नमो नमो निम्मल दंसणस्स

पंचम गणधरश्री सुधर्मास्वामिने नमः ॥

४१/१ ओघनिर्युक्तिः (मूलसूत्रं)

सटीकं

मूल निर्युक्तिः + भाष्यं + द्रोणाचार्य विरचिता वृत्तिः

नमो अरिहंताणं, नमो सिद्धाणं, नमो आयरियाणं, नमो उवज्झायाणं, नमो लोए सव्वसाहूणं, एसो पंच नमुक्कारो, सव्वपावप्पणासणो, मंगलाणं च सव्वेसिं, पढमं हवइ मंगलं ॥

अर्हद्भ्यश्चरित्रभुवनगजपूजितेभ्यः, सिद्धेभ्यः सितघनकर्मबन्धनेभ्यः।
आचार्यश्रुतधरसर्वसंयतेभ्यः, सिद्धयर्थी सततमहं नमस्करोमि ॥

वृ. प्रक्रान्तोऽयमावश्यकानुयोगः, तत्र च सामायिकाध्ययनमनुवर्तते, तस्य च चत्वार्यनुयोगद्वाराणि भवन्ति महापुरुषैरेव, तद्यथा-उपक्रमः निक्षेपः अनुगमः नय इति, एतेषां चाध्ययनादौ उपन्यासे इत्थं च क्रमोपन्यासे प्रयोजनमभिहितम्, तत्रोपक्रमनिक्षेपावुक्तौ, अधुनाऽनुगमावसरः, स च द्विधा-निर्युक्त्यनुगमः सूत्रानुगमश्च, तत्र निर्युक्त्यनुगमस्त्रेधानिक्षेपोपोद्घातसूत्रस्पर्शनिर्युक्त्यनुगमभेदात्, तत्र निक्षेपनिर्युक्त्यनुगमोऽनुगतो वक्ष्यमाणश्च, उपोद्घातनिर्युक्त्यनुगमस्त्वाभ्यां द्वाभ्यां द्वारगाथाभ्यामनुगन्तव्यः-"उद्देसे निद्देसे य" इत्यादि। अस्य च द्वारगाथाद्वयस्य समुदायार्थोऽभिहितः, अधुनाऽवय-वार्थोऽनुवर्तते, तत्रापि कालद्वारावयवार्थः, तत्प्रतिपादनार्थं चेदं प्रतिद्वारगाथासूत्रमुपन्यस्तम्-"दव्वे अद्ध अहाउय · उवक्कम' इत्यादि, अस्यापि समुदायार्थो व्याख्यातः, साम्प्रतमवयवार्थः, तत्राप्युपक्रमकालाभिधानार्थमिदं गाथासूत्रमाह-

मू. (१) दुविहोवक्कमकालो सामायारी अहाउयं चेव।
सामायारी तिविहा ओहे दसहा पयविभागे ॥ [प्र. १]

मू. (२) नवमयपच्चक्खाणाभिहाण पुव्वस्स तइय वत्थुओ
वीसइम पाहुडाओ तओ इहानीणिया जइया ॥ [प्र. २]

मू. (३) सोउ उवक्कमकालो, तयत्थ निव्विग्घ सिक्खणात्थं च।
आइय कथं चिय, एणं मंगलमारंभये तं च ॥ [प्र. ३]

वृ. तत्रोपक्रम इतिकः शब्दार्थः ?, उपक्रमणं उपशब्दः सामीप्ये 'क्रमु पादविक्षेपे' उपेति सामीप्येनक्रमणं उपक्रमः-दूरस्थस्यसमीपापादनमित्यर्थः, तत्रोपक्रमो द्विधा-सामाचार्युपक्रमकालः यथायुष्कोपक्रमकालश्च, तत्रसामाचार्युक्रमकालस्त्रिविधः-ओघसामाचार्युपक्रमकालः दशधासामाचार्युपक्रमकालः पदविभागसामाचार्युपक्रमकालश्च, तत्रौघसामाचारी-ओघनिर्युक्तिः, दशधासामाचारी 'इच्छामिच्छे' त्यादि, पदविभागसामाचारी कल्पव्यवहारः। तत्रौघसामाचारीपदविभागसमाचारीं च नवमपूर्वान्तर्वर्त्तियत तृतीयं सामाचारीवस्त्वस्तितत्रापि विंशतितमात्प्राभृतात् साध्वनुग्रहार्थं भद्रबाहुस्वामिनानिर्यूढा, दशधासामाचारी पुनरुत्तराध्ययनेभ्यो निर्यूढा 'इच्छामिच्छे' त्यादिका, तत्रेतदुपक्रमणं-विंशतिवर्षपर्यायस्य दृष्टिवादो दीयते

नारतः, इयं तु प्रथमदिवस एव दीयते, प्रभूत-दिवसलभ्या सती स्वल्पदिवसलभ्या कृतेत्यर्थः, एवं पदविभागसामाचारी दशधासामाचार्यपीति। तत्रौघसामाचारी तावदभिधीयते, अस्याश्च महार्थत्वात् कथञ्चिच्छास्त्रान्तरत्वाच्चादावेवाचार्यो मङ्गलार्थं संबन्धादित्रयप्रतिपादनार्थं च गाथाद्वयमाह-

मू. (४) अरहंते वंदित्ता चउदसपुव्वी तहेव दसपुव्वी।
एक्कारसंगसुत्तत्थधारए सव्वसाहू य॥

मू. (५) ओहेन उ निज्जुत्तिं वुच्छं चरणकरणानुओगाओ।
अप्पक्खरं महत्थं अनुग्गहत्थं सुविहियाणं॥

वृ. अत्राह-किमर्थं शास्त्रारम्भे मङ्गलं क्रियते? इति, उच्यते, विघ्नविनायकोपशमनार्थं, तथा चोक्तम्-"श्रेयांसि बहुविघ्नानि, भवन्ति" इत्यादि, श्रेयोभूता चेयमतो मङ्गलं कर्तव्यं, तच्च नामादि-भेदेन चतुर्धा, तत्र नामस्थापनेसुज्ञाने, द्रव्यमङ्गलं दध्यादि, तच्चानैकान्तिकमनात्यन्तिकं च, भाव-मङ्गलमर्हदादिनमस्कारः, तच्चैकान्तिकमात्यन्तिकं च। तदनेन संबन्धेनायातस्यास्य व्याख्या क्रियते-सा च लक्षणान्विता नालक्षणेति, लक्षणं च संहितादि, "संहिता च पदं चैव" इत्यादि, तत्रास्खलितपदोच्चारणं संहिता, सा चेयम्-'अरहंते वंदिता' इत्यादिका। अधुना पदानि प्रतन्यन्ते-अर्हतो वन्दित्वा चतुर्दशपूर्विणः तथैव दशपूर्विणः। एकादशाङ्गसूत्रार्थधारकान् सर्वसाधूंश्च। एतावन्ति पदान्याद्यगाथासूत्रे, द्वितीयगाथासूत्रपदान्युच्यन्ते-ओघेन तु निर्युक्तिं वक्ष्ये चरणकरणानुयोगात् अल्पाक्षरां महार्थाम् अनुग्रहार्थं सुविहितानाम्, एतावन्ति पदानि। अधुनापदार्थः-'अरहंते' इत्यादि, अशोकाद्यष्टमहाप्रातिहार्यादिरूपां पूजामर्हन्तीत्यर्हन्तः तान् अर्हतः, 'वंदित्ता' इति 'वदि अभिवादनस्तुत्योः' स्तुत्वेत्यर्थः, समानकर्तृकयोः पूर्वकाले क्त्वाप्रत्ययो भवतीति वन्दित्वा, किम्?-'ओघनिर्युक्तिं वक्ष्ये' इति द्वितीयगाथाक्रियया सह योगः, किमर्हत एव वन्दित्वा?, नेत्याह-'चतुर्दशपूर्विणश्च' चतुर्दश पूर्वाणि विद्यन्ते येषां ते चतुर्दशपूर्विणस्तांश्च, वन्दित्वेति सर्वत्र क्रिया मीलनीया, किंतानेव?, नेत्याह-'तथैव दशपूर्विणश्च' 'तथे'ति आगमोक्तेन प्रकारेणैवेति क्रमनियमप्रतिपादनार्थः अनेनैव क्रमेण दशपूर्विण इति, दश पूर्वाणि विद्यन्ते येषां ते दशपूर्विणः, न केवलं तानेव, 'एकादशाङ्गसूत्रार्थ-धारकान्' एकादश च तान्यङ्गानि च एकादशाङ्गानि एकादशाङ्गानां सूत्रार्थौ एकादशाङ्गसूत्रार्थौ तौ धारयन्ति ये तान् एकादशाङ्गसूत्रार्थधारकान्। 'सर्वसाधूंच' इति सर्वे साधयन्तीति सर्वसाधवः अथवा सर्वे च ते साधवश्च सर्वसाधवः तान् सर्वसाधूंश्च वन्दित्वा, चशब्दः समुच्चये, अथवाऽनुक्त समुच्चये, यच्च समुच्चितं तत्प्रतिपादयिष्यामः। पदविग्रहस्तु यानि समासभाञ्जि पदानि तेषां प्रतिपादितः।

अधुना चालनाया अवसरः सा प्रतिपाद्यते, एवं व्याख्याते सत्याह परः-सर्वमेवेदं गाथासूत्रं न घटते, कथम्?, इह 'ओघनिर्युक्तिं वक्ष्ये' इतिप्रतिज्ञा, सा च प्रथममेव नमस्कारसूत्रेनमस्कारेण दिता, यदुत नमस्कारोऽपि संक्षेपेणैवाभिधातव्यः, न चासौ संक्षेपेण प्रतिपादितः, अपि त्वर्हन्नमस्कार एव केवलः संक्षेपनमस्कारो भवति, स एव कर्तव्यो, न चतुर्दशपूर्वधरादिनमस्कारः, अथ क्रियते, एवं तर्हि एकैकस्या व्यक्तेर्नमस्कारः कर्तव्यः, किं दशपूर्व्यादिनमस्कारेणेति, चतुर्दशपूर्विनमस्कारेणैव शेषाणां नमस्कारो भविष्यतीति, अथ भेदेन क्रियते एवं तर्हि त्रयोदशपूर्वधरादीनामेकैकपूर्वहान्या तावत्कर्तव्यो यावत्पूर्वकदेशधराणामिति, अत्रोच्यते, यदित्थं ओघः क्रियते तदविज्ञायैवपरमार्थं, कथम्?, यदुक्तं तावत संक्षेपग्रन्थोऽयं तदत्र नमस्कारोऽपि संक्षेपेण कर्तव्य इति, अत्रतावत्प्रतिविधीयते-येनैव संक्षेपग्रन्थोऽयं तेनैव लक्षणेनेत्थं नमस्कारः कृतः, तथाहि-सामान्येनार्हतां नमस्कारोऽभिहितः न विशेषेण एकैकस्य तीर्थकरस्य, तथा भगवतामुपकारित्वान्नमस्कारः क्रियते, येऽप्यमी

चतुर्दशपूर्वधरास्तेऽप्युपकारका एव, कथमिति चेत्, अर्थद्वारेण तीर्थकरा उपकारकाः, सूत्रतस्तु चतुर्दशपूर्वधरा गणधराः, यत उक्तम्-"अत्थं भासइ अरहा सुत्तं गंथंति गणहरा निउणा।" इत्यादि, अत उपकारकास्त इति, अथवा द्विधोपकारः-व्यवहितोऽव्यवहितश्च, तत्राभगवन्तोऽर्हन्तोऽव्यवहितोपकारकत्वेन व्यवस्थिताः, चतुर्दशपूर्वधरास्त्वयस्यानन्तरोपकारकत्वेन, अतश्चतुर्दशपूर्वधरनमस्कारः कृतः, सर्वाश्चतुर्दशपूर्वधरव्यक्तय आगृहीता अनेननमस्कारेणेति, यच्चोक्तम्-चतुर्दशपूर्विनमस्कारेणैव शेषाणां दशपूर्व्यादीनां नमस्कारो भविष्यति किं दशपूर्व्यादिनमस्कारेणेति ?. अथ भेदेन क्रियते एवं तर्हि त्रयोदशपूर्वधरादीनामेकैकपूर्वहान्या तावत्कर्तव्यो यावत्पूर्वैकदेशधराणामिति, एतदप्यसाधु, कथम् ?, यतो दशपूर्वधरा अपि शासनस्योपकारका उपाङ्गादीनां संग्रहण्युपबृंहनेन हेतुना, अथवाऽस्याभवसर्पिण्यां चतुर्दशपूर्व्यनन्तरं दशपूर्वधरा एव संजाताना त्रयोदशपूर्वधरा द्वादशपूर्वधरा एकादशपूर्वधरा वा इत्यस्यार्थस्य प्रतिपादनार्थं चतुर्दशपूर्वधरानन्तरं दशपूर्विनमस्कारोऽभिहितः, अथवाऽन्यत्प्रयोजनम्-अर्थतस्तीर्थकरप्रणीतं सूत्रतो गणधरोपनिबद्धं चतुर्दशपूर्वधरोपनिबद्धं दशपूर्वधरोपनिबद्धं प्रत्येकबुद्धोपनिबद्धं च प्रमाणभूतं सूत्रं भवतीत्यस्य प्रतिपादनार्थं दशपूर्विनमस्कारः कृतः, तथा चोक्तम्-"अर्हत्प्रोक्तं गणधरदृब्धं प्रत्येकबुद्धदृब्धं च। स्थाविरग्रथितं च तथा प्रमाणभूतं त्रिधा सूत्रम्॥" इति,

अथवाऽन्यत्प्रयोजनम्-चतुर्दशपूर्विणो दशपूर्विणश्च नियमेनैव सम्यग्दृष्टय इतिप्रदर्शनार्थं तन्नमस्कारः. अथवा यदुक्तं 'त्रयोदशपूर्वधरादीनामेकैकहान्या तावन्नमस्कारो वाच्यो यावदेकदेशपूर्वधराणा'मिति, सैव हानिरित्थमुक्ता। यदुत प्रभूतहान्या हानिर्वाच्या, सा च व्यन्तरे प्रतिपादिता भवति, अतः पूर्वत्रतमुल्लङ्घ्य दशपूर्विणां ग्रहणम्, एवं नवादिष्वपि योज्यम्, एवं व्याख्याते सत्याह परः-गुणाधिकस्य वन्दनं कर्तव्यं, न त्वथमस्य, यत उक्तम्-"गुणाहिए वंदनयं" भद्रबाहुस्वामिनश्चतुर्दशपूर्वधरत्वात् दशपूर्वधरादीनां च न्यूनत्वात्तत्किं तेषां नमस्कारमसौ करोति ? इति, अत्रोच्यते, गुणाधिकाएवते, अव्यवच्छित्तिगुणाधिक्यात्, अतो न दोष इति।

एवं व्याख्याते सत्याह परः-एकादशाङ्गसूत्रार्थधारकाणां किमर्थं क्रियते ? इति, उच्यते, इह चरणकरणात्मिका ओघनिर्युक्तिः, एकादशाङ्गसूत्रार्थधारिणश्च चरणकरणवन्त एव, एकादशानामङ्गानां चरणकरणानुयोगत्वात्, उपयोगित्वेनांशेन तेषां नमस्कार इति। साधूनां किमर्थमिति चेत्, ते तु चरणकरणनिष्पादकाः. तदर्थं चायं सर्व एव प्रयास इति। अथवाऽन्यथा व्याख्यायते इदं गाथासूत्रम्-अनेन गाथासूत्रेण पञ्चनमस्कारः प्रतिपाद्यते, न च पञ्चनमस्कारात्लघुतरोऽन्योऽस्ति नमस्कार इत्यतो भद्रबाहुस्वामिनाऽयमेव कृत इति, कथम् ?, 'अरहंते वंदित्ता' इत्यनेनार्हन्नमस्कारः, 'चउदसपुव्वी तहेव दसपुव्वी एक्कारसंगसुत्तत्थधारए' इत्यनेनाचार्योपाध्यायनमस्कारः, यतः सूत्रप्रदा उपाध्याया अर्थप्रदा आचार्या इति। एवं व्याख्याते सत्याह-एवं तर्हि 'अर्थसूत्रधारकान्' इत्येव वक्तव्यम्, आचार्योपाध्यायपदयोरेवंक्रमेण व्यवस्थितत्वात्, तत्कथमेतत् ? इति, अत्रोच्यते, नावश्यमा-चार्योपाध्यायैर्भवितव्यम्, अपि तु क्वचिदसावेव सूत्रं शिष्येभ्यः प्रयच्छत्यसावेव चार्थमतः 'सूत्रार्थ-धारकान्' इत्येवमुपन्यस्तम। 'सर्वसाधूंश्च' इत्यनेन तु साधुनमस्कारः प्रतिपादितः। सर्वशब्दः प्रत्येकमभिसंबध्यते, ततोऽयमर्थो भवति-सर्वानर्हतः, एवं चतुर्दशपूर्वधरादीनामपि मीलनीयं, चशब्दात्सिद्धनमस्कारः। एवं व्याख्याते सत्याह-किमर्थं सिद्धनमस्कारः पश्चादभिधीयते ?, अपित्वर्हन्नमस्कारानन्तरं वाच्य इति. अत्रोच्यते, यानि ह्यर्हदादीनिपदानि तेषां सर्वेषामेव सिद्धाः फलभूताः. अतः फलप्रतिपादनार्थं पश्चादुपन्यास इति, अथवाऽर्हन्नमस्कारेणैव सिद्धनमस्कारोऽ-

प्यभिहितः, कारणे कार्योपचारमङ्गीकृत्य, सिद्धत्वस्य कारणभूतत्वादर्हतामित्यतः प्रसङ्गेनेति॥

अधुना कृतमङ्गलः सन् संबन्धाभिधेयप्रयोजनत्रयप्रदर्शनार्थं द्वितीयं गाथासूत्रमाह-'ओहेण उ' इति, ओघः संक्षेपः समासः सामान्यमित्येकोऽर्थः, तेन ओघेन निर्युक्तिः वक्ष्ये इति योगः, तदनेन गाथाखण्डकेन संबन्धः प्रतिपादितः क्रियाऽनन्तर्यलक्षणः, तथा च व्याससक्रियायाः समासक्रिया अनन्तरभूता वर्तते, अतः क्रियाऽनन्तर्यलक्षणः संबन्धः, एवं कार्यकारणलक्षणोऽपि द्रष्टव्यः-कार्यम्-ओघनिर्युक्त्यर्थपरिज्ञानमनुष्ठानं च कारणं तु वचनरूपापन्ना ओघनिर्युक्तिरेव, एवं च साध्यसाधनादयोऽपि द्रष्टव्या इति। तुशब्दो विशेषणे, किं विशिनष्टि ?-ओघेन वक्ष्ये, तुशब्दात्किञ्चिद्विशिष्टतरतोऽपि, "छप्पुरिमं" इत्या निर्युक्तिः वक्ष्य इति-निः-आधिक्ये योजनं युक्तिः, सूत्रार्थयोर्योगो नित्यव्यवस्थित एवास्ते वाच्यवाचकतयेत्यर्थः, अधिका योजना निर्युक्तिरुच्यते, नियता निश्चिता वा योजनेति, ततश्च निर्युक्ति युक्तिरित्येवं वक्तव्यं एकस्य युक्तिशब्दस्य लोपं कृत्वा एवमुपन्यासः, यथाऽष्टमुखी कन्येति। 'वोच्छं' इति वक्ष्ये' अभिधास्य इति यदुक्तं भवति, कुतो वक्ष्ये ? इत्यत आह-

'चरणकरणानुयोगात्' चर्यते इति चरणं-वक्ष्यमाणलक्षणं व्रतादिकलापजातं, करणं-पिण्डविशुद्ध्यादि, चरणं च करणं च चरणकरणे तयोरनुयोगश्चरणकरणानुयोगः, अनुयोजनमनुयोगः अनुकूलो वा योगोऽनुयोगः, अथवाऽनु-सूत्रं महान्-अर्थः ततो महतोऽर्थस्यानुना सूत्रेण योगोऽनुयोगः, तस्माच्चरणकरणानुयोगात् निर्युक्तिं वक्ष्ये, चरणकरणात्मिकामेवेति गम्यते, यथा मृदो घटं करोति मृदात्मकमेव, तद्वदत्रापीति। अथवा चरणं च तत्करणं च २ तस्यानुयोगस्तस्माच्चरणकरणानुयोगात् निर्युक्तिं वक्ष्य इति, तदनेनाभिधेयमुक्तं, चरणकरणनिर्युक्ति रभिधेयेति। किंस्वरूपां निर्युक्तिं वक्ष्ये ? इत्यत आह-'अल्पाक्षरां' अल्पान्यक्षराणि यस्यां साऽल्पाक्षरा तामल्पाक्षराम्, अथवा क्रियाविशेषणमेतत्, कथं वक्ष्ये ? इत्यत आह-'अल्पाक्षरं' स्तोकाक्षरं वक्ष्ये, नप्रभूताक्षरमित्यर्थः। किमल्पाक्षरमेव ?, नेत्याह-'महत्थं' महार्थं वक्ष्ये, अथवा महानर्थो यस्याः सा महार्था तां महार्थां वक्ष्ये, तदनेनाभिधेयविशेषणं प्रतिपादितं भवति। 'अल्पाक्षरां महार्थां' इत्यनेन चतुर्भङ्गिकाप्रतिपादिता भवति, एकमल्पाक्षरं प्रभूतार्थं भवति १, तथा अन्यत्प्रभूताक्षरमल्पार्थं २, तथा प्रभूताक्षरं प्रभूतार्थं ३, अल्पाक्षरमल्पार्थं ४ चेति। किंनिमित्तं वक्ष्ये ? इत्यत आह-'अनुग्रहार्थं' अनुग्रह-उपकारोऽभिधीयते, अर्थशब्दः प्रयोजनवचनः, तत उपकारप्रयोजनं वक्ष्ये, तदनेन प्रयोजनं प्रतिपादितं द्रष्टव्यम।

केषां वक्ष्ये ? इत्यत आह-'सुविहितानां' शोभनं विहितम-अनुष्ठानं येषामिति ते सुविहिताः-साधवस्तेषां सुविहितानामनुग्रहार्थमोघनिर्युक्तिं वक्ष्य इति योगः। तदनेन गाथासूत्रेण परोपन्यस्ता हेतवो निराकृता भवन्ति। के च हेतवः ?, निःसंबन्धत्वादय इति। यश्चायं क्त्वाप्रत्यय उपन्यस्तस्तेन नित्यानित्यैकान्तवादयोरसारता प्रतिपादिता भव कथम् ?-न नित्यवादे क्त्वाप्रत्ययो युज्यते न वाऽनित्यवादे, किं तु नित्यानित्यवाद एवायं घटत इति, नित्यवादे तावन्न घटते, एकं कृत्वा ह्यपरकरणं क्रमः, क्त्वाप्रत्ययश्च विशिष्टपूर्वार्थोऽभिधीयते, 'समानकर्तृकयोः पूर्वकाले क्त्वे' ति वचनात, नित्यवादे चाप्रच्युतानुत्पन्नस्थिरैकस्वभावं वस्तु, तच्च किं तावत् पूर्वस्वभावत्यागेन द्वितीयां क्रियां करोति आहोस्वित्पूर्वस्वभावात्यागेनेति वाच्यम् ?, यदि पूर्वस्वभावत्यागेन ततोऽनित्यत्वप्रसङ्गः, अतादवस्थ्यमनित्यतां ब्रूमः, अथ पूर्वस्वभावात्यागेन, एवं तर्हि न कदाचिदपि तेन द्वितीया क्रिया कर्तव्येति, एवं प्रतिपादितेऽनित्यतावादाह-अत एवास्माकं दर्शने क्त्वाप्रत्ययो घटत इति, एतदप्यचारु, यस्य क्षणिकं वस्तु तस्य कथं क्त्वाप्रत्ययो युज्यते ?, उत्पत्त्यनन्तरं ध्वंसात्, कथमेक एव कर्ता क्रियाद्वयं करोति ?, येन हि प्राक्तनी क्रिया निष्पादिता

सोऽन्य एव, योऽपि चोत्तरां क्रियां करोति सोऽपिचान्य एव, तत् एकान्तानित्यवादेऽपि न घटते क्त्वाप्रत्यय इति॥ अयं तावत्समुदायार्थः, अधुना भाष्यकृदेकैकमवयवं व्याख्यानयति-तत्र 'तत्त्वभेदपर्यायैर्व्याख्ये'ति पर्यायतां व्याख्यां कुर्वन्निदं गाथासूत्रमाह-

मू. (६) ओहे पिंड समासे संखेवे चेव होंति एगट्ठा।
निज्जुत्तंति य अत्था जं बद्धा तेन निज्जुत्ती॥ [भा. १]

वृ. ओघः पिण्डो भवतीति योगः, पिण्डनं पिण्डः, संघातरूप इत्यर्थः, 'समासे' इति समसनं समासः, 'असु क्षेपणे' सम्-एकीभावेनासनं क्षेपणमित्यर्थः, तथा च समासेन सर्व एव विशेषा गृह्यन्ते, ओघः समासो भवतीति योगः, एवं भवतीति क्रिया सर्वत्र मीलनीया। 'संखेवे' इति संक्षेपणं संक्षेपः सम्-एकीभावेन प्रेरणमित्यर्थः, चशब्द उक्तसमुच्चये, कादाचदनुक्तसमुच्चये, एवंशब्दः प्रकारवाचकः, एवमेतेषामपि पिण्डादीनां ये पर्यायास्तेऽपि मीलनीया इति। निर्युक्तिपदव्याख्यानार्थमाह-'निज्जुत्तंति य' इत्यादि, निः-आधिक्ये योजनं युक्तिः, आधिक्येन युक्ता निर्युक्ताः अर्थान्ता इत्यर्थाः गम्यन्त इत्यर्थः, ततो निर्युक्ता इति चाऽर्था यद् यस्माद्बद्धास्तेन निर्युक्तिरभिधीयते। अथवाऽन्यथा-निश्चयेन युक्ता निर्युक्तिरिति चार्थाः यद्बद्धास्तेन निर्युक्तिरभिधीयते, इत्ययं गाथार्थः। एकार्थिकप्रतिपादनेन चैकान्तभेदाभेदवादौ व्युदस्येते, नैकान्तभेदपक्षे एकार्थिकानि युज्यन्ते, कथम?, यस्य ह्येकान्तेनैव सर्वे भावाः सर्वथा भिन्ना वर्तन्ते तस्य हि यथा घटशब्दात्पटशब्दो भिन्नः एवं कुटशब्दोऽपि भिन्न एव तत्कथं घटशब्दस्य-कुटशब्द एकार्थिको युज्यते?, एकार्थिकत्वं हि कथञ्चिद्भेदे भवतीति, एवमेकान्ताभेदवादिनोऽपि न युज्यन्ते एकार्थिकानि, कथम्?, यस्य ह्यभेदेन सर्वे भावा व्यवस्थितास्तस्य यथा घटशब्दस्य घटशब्दोऽभिन्न एकार्थिको न भवति एवं कुटादयोऽपि न युज्यन्ते अभिन्नत्वात्, इत्यलं चसूर्येति॥ अधुना चरणपदव्याख्यानार्थमिदं गाथासूत्रमाह-

मू. (७) वय समणधम्म संजम वेयावच्चं च बंभगुत्तीओ।
नाणाइतियं तव कोहनिग्गहाई चरणमेयं [भा. २]

वृ. भवतीति क्रियाऽनुवर्तते, व्रतादि चरणं भवतीति योगः, व्रतानि-प्राणातिपातादिनिवृत्तिरूपाणि 'समणधम्म'त्ति श्रमणाः-साधवो धारयन्तीति धर्मः श्रमणानां धर्मः-क्षान्त्यादिकश्चरणं भवतीति सर्वत्र मीलनीयम्। 'संजमे'ति सम-एकीभावेन यमः संयमः, उपरम इत्यर्थः, स च प्रेक्षोत्प्रेक्षादिरूपः सप्तदशप्रकारः 'वेयावच्च' इति व्यावृताभावो वैयावृत्यं, आचार्यादिभेदादशप्रकारं, चशब्दः समु-च्चये, किंसमुच्चिनोति?, विनयश्च 'बंभगुत्तीओ'त्ति ब्रह्म इति-ब्रह्मचर्यं तस्य गुप्तयो ब्रह्मचर्यगुप्तयस्ताः, चर्यशब्दलोपादेवमुपन्यासः कृतः, ताश्चैताः वसत्यादिका नव ब्रह्मचर्यगुप्तयः, 'नाणाइतियं'ति ज्ञायतेऽनेनेति ज्ञानम्-आभिनिबोधिकादि तदादिर्यस्य ज्ञानादित्रयस्य तत् ज्ञानादि, आदिशब्दात् सम्यग्दर्शनचारित्रपरिग्रहः, ज्ञानादि च तत्त्रिकं च ज्ञानादित्रिकम्, 'तव' इति तापयन्तीति तपो-द्वादशप्रकारमनशनादि 'कोहनिग्गहाइ' इति 'कुध कोपे' क्रोधनं क्रोधः, निग्रहणं निग्रहः, क्रोधस्य निग्रहः क्रोधनिग्रहः स आदिर्यस्य मानादिनिग्रहकदम्बकस्य तत्क्रोधनिग्रहादि, चरणमेतत्। एवं व्याख्याते सत्याह परः-ननु व्रतान्तर्गतत्वाद् गुप्तयो न पृथक् कर्तव्याः, अथ पारिकरभूताश्चतुर्थव्रतस्य ब्रह्मचर्यगुप्तयोऽभिधीयन्ते, एवं तर्ह्येकैकस्य व्रतस्य पारिकरभूता भावनाः अपि वाच्याः, न च ज्ञानादित्रयस्य ग्रहणं कर्तव्यं, अपितु ज्ञानसम्यग्दर्शनयोरेवोपन्यासः कर्तव्य इति, चारित्रव्रतग्रहणेनैव ग्रहणात्, तथा श्रमणधर्मग्रहणेन संयमग्रहणं तपोग्रहणं चातिरिच्यते, संयमतपसी वोद्धृत्य श्रमणधर्मस्योपन्यासः कर्तव्यः, तथा तपोग्रहणे च सति वैयावृत्यस्योपन्यासो वृथा, चशब्दसमुच्चितस्य च

विनयस्य, वैयावृत्त्यविनययोस्तपोऽन्तर्गतत्वात्, तथा क्षान्त्यादिधर्मग्रहणे च सति क्रोधादि-निग्रहग्रहणमनर्थकं, तदियं सर्ववगाथा प्रलूनविशीर्णोजत तत्कथमेतत्? इति, अत्रोच्यते. अविज्ञायैव परमार्थमेवं चोद्यं, यदुक्तं -व्रतग्रहणे ब्रह्मगुप्तिज्ञानादित्रयोपन्यासोनकर्तव्यःतत्रावत्परिहियते-यदेतद्व्रतचारित्रंसएकांशोवर्तते चारित्रस्य, सामायिकादि च चारित्रं चतुर्विधमगृहीतमास्ते तदग्रहणार्थं ज्ञानादित्रयमुपन्यस्तं, व्रतग्रहणे ब्रह्मचर्यगुप्तयो यदभिधीयन्ते तद्ब्रह्मचर्यस्य निरपवादत्वं दर्शयति, तथा चोक्तम्- नवि किंचिति पडिसिद्धं णाणुन्नायं च जिणवरिंदेहिं। मुत्तुं मेहुणभावं न विना तं रागदोसेहिं॥"

अथवा पूर्वपश्चिमतीर्थयोर्भेदेनैतत् महाव्रतं भवति, अस्यार्थस्य प्रतिपादनार्थं भेदेनोपन्यासः कृत इति. यच्चोक्तं-श्रमणधर्मग्रहणे संयमतपसोर्न ग्रहणं कर्तव्यम्, श्रमणधर्मग्रहणेनैव गृहीतत्वात्तयोः, तदप्यसाधु. संयमतपसोः प्रधानमोक्षाङ्गत्वात्, कथं प्रधानत्वम्? इति चेत् अपूर्वकर्माश्रवसंवरहेतुः संयमो वर्तते, पूर्वगृहीतकर्मक्षयहेतुश्चतपः, ततःप्रधानत्वमनयोः, अतोगृहीतयोरप्यनयोर्भेदेनोपन्यासः कृतः, दृष्टश्चायंन्यायो यथा-ब्राह्मणा आयाता वशिष्ठोऽप्यायातः. अत्र हि ब्राह्मणग्रहणेन वशिष्ठस्यापि ग्रहणं कृतमेव, तथाऽपि प्राधान्यात्तस्य भेदेनोपन्यासः क्रियत इति, तथा यच्चोक्तं-तपोग्रहणे वैयावृत्त्यविनययोर्न ग्रहणं कर्तव्यं, तदप्यचारु, वैयावृत्त्यविनययोर्यथास्वपरोपकारकत्वात्प्राधान्येनवमनशनादीनांतपोभेदानामिति, यच्चोक्तं-श्रमणधर्मग्रहणे क्रोधादिनिग्रहस्यनोपन्यासःकर्तव्यः, तदप्यचारु, इहाष्टविधःक्रोधः-उदयगत उदीरणावलिकागतश्च, तत्रोदयगतनिग्रहः क्रोधनिग्रहः, एवं मानादिष्वपि वाच्यं, यस्तु उदीरणावलिका-प्राप्तस्तस्योदय एव नकर्तव्यःक्षान्त्यादिभिर्हेतुभिरिति, अथवा त्रिविधंवस्तु-ग्राह्यंहेयमुपेक्षणीयं च, तत्रक्षान्त्यादयोग्राह्याः, क्रोधादयोहेयाः, अतोनिगृहीतव्यास्यइत्येवमर्थमित्थमुपन्यस्ताइतिस्यात्साधुसर्वमवदातंगाथासूत्रमिति।

अधुना करणावयवप्रतिपादनार्थमिदं गाथासूत्रमाह-

मू. (८) पिंडविसोही समिई भावण पडिमा य इंदियनिरोहो।
पडिलेहणगुत्तीओ अभिग्गहाचेव करणं तु॥ [भा. ८]

वृ. अस्या व्याख्या-'पिंड'त्ति पिण्डनं पिण्डस्तस्य विविधम-अनेकैः प्रकारैः शुद्धिः आधाकमादिपरिहारप्रकारैःपिण्डविशुद्धिः, साकिम्?, करणंभवतीतियोगः, 'समिति'त्तिसम्यगितिः-सम्यग्गमनं प्राणातिपातवर्जनेनेत्यर्थः, जातावेकवचनं, ताश्चेर्यासमित्यादयः समितयः, 'भावन'त्ति भाव्यन्त इतिभावनाः-अनित्यत्वादिकाः 'पडिम'त्ति प्रतिमाः-अभिग्रहप्रकारामासाद्या द्वादश भिक्षुप्रतिमाः, चशब्दादष्म-द्वादशश्च प्रतिमा गृह्यन्ते, 'इंदियनिरोहो'त्तिइन्द्रियाणि-स्पर्शनादीनितेषांनिरोधः, आत्मीयेष्टानि-ष्टविषयरागद्वेषाभाव इत्यर्थः, 'पडिलेहण'इतिप्रतिलेखनंप्रतिलेखना 'लिख्ल अक्षरविन्यासे' अस्यप्रतिपूर्वस्यल्युडन्तस्यानादेशे टापि च विहिते प्रतिलेखनेति भवति. एतदुक्तं भवति-अक्षरानुसारेण प्रतिनिसीक्षणमनुष्ठानं च यत्सा प्रतिलेखना, सा च चोलपट्टा-देरुपकरणस्येति 'गुत्तीओ'त्ति गोपनानि गुप्तयो-मनोवाक्कायरूपास्तिस्रः 'अभिग्गह'त्ति अभिग्रहा द्रव्यादिभिरनेकप्रकाराः- चशब्दो वस्त्रत्याजदग्रमुच्चयार्थः, एवकारः क्रमप्रतिपादनार्थः, 'करणं तु'त्ति क्रियत इति करणं, मोक्षार्थिभिः साधुभिर्निष्पाद्यत इत्यर्थः, तुशब्दो विशेषणे. मूलगुणस्यद्भावे करणत्वमस्य, नान्यथेति। आह-ननु समितिग्रहणेनैव पिण्डविशुद्धेर्गृहीतत्वान्न पिण्डविशुद्धिग्रहणं कर्तव्यं, यत एषणासमितौ सर्वैषणा गृहीता. पिण्डविशुद्धिरप्येषणैव. तत्किं भेदेनोपान्यासः? इति. अत्रोच्यते. पिण्डव्यतिरेकेणाप्येषणा विद्यते वस्त्रादिरूपा तस्या ग्रहणं भविष्यति. तत्र पिण्डविशुद्धेस्तु भेदेनोपन्यासः करणं ग्रहणं कर्तव्यं नाकरणं इत्यस्यार्थस्य प्रतिपादनार्थः, अथवाऽऽहारमन्तरेण न शक्यते

पिण्डविशुद्ध्यादि करणं सर्वमेव कर्तुमनो भेदनोपन्यास इति। अत्राह- चरणकरणयोः कः प्रतिविशेषः ? इति. अत्रोच्यते, नित्यानुष्ठानं चरणं, यत्तु प्रयोजन आपन्ने क्रियते तत्करणमिति. तथा च व्रतादि सर्वकालमेव चर्यते न पुनर्व्रतशून्यः कश्चित्काल इति. पिण्डविशुद्ध्यादि तु प्रयोजने आपन्ने क्रियत इति। एवं व्याख्याते सत्याह परः-"आहेन उ निज्जुत्तिं वुच्छं चरणकरणानुओगस्स" इत्येवं वक्तव्यं. तत्किमर्थं षष्ठ्यलोपलक्षणं कृत्वा पञ्चम्यभिधीयते. इत्यस्यार्थस्य प्रतिपादनार्थमिदं गाथासूत्रमाह-

मू. (९) चोदगवयणं छट्ठी संबंधे किंम न भवइ विभत्ती ?।
तो पंचमी उ भणिया, किमत्थि अन्नेऽवि अनुओगा॥ [भा. ४]

वृ.. व्याख्या- 'चोदग' त्ति चोदकवचनं, किंभूतम ?, तदाह- षष्ठी संबन्धे किमिति न भवति विभक्तिः ?. संबन्धन संबन्धस्तस्मिन संबन्धे षष्ठी किमिति न भवति ?. एतदुक्तं भवति- चरणकरणा- नुयोगसंबन्धिनी- मोघनिर्युक्तिं वक्ष्य इति वाच्यं. तदलक्षणं कृत्वा पञ्चम्युच्यते तत्र प्रयोजनं वाच्यं. अथ न किञ्चित्प्रयोजनं ततः पञ्चमी भणिता किं केन कारणेन ?. निष्प्रयोजनेत्यर्थः. एवं चोदिते सत्याहाचार्यः- अन्यत्र प्रयोजनं षष्ठ्यलक्षणं कृत्वा यत पञ्चम्युपन्यस्ता. किम ? इत्यत आह- 'अत्थि अन्नेऽवि अनुओगा'स्ति- विद्यन्ते अन्येऽप्यनुयोगाः. अस्यार्थस्य प्रतिपादनार्थमेवमुपन्यासः कृत इति। पुनरप्याह- यद्यन्येऽप्यनुयोगाः सन्ति पञ्चम्याः किमायातम ? इति. अत्रोच्यते, अस्माचार्यस्येयं शैली- यदुभयत्र क्वचित्तत्र षष्ठ्याः सप्तम्या वा निर्देशं करोति, तथा च- "आवस्सगस्स दसकालियस्स तह उत्तरज्झमायारे इत्येवमादि

अत्र तु शैलीं त्यक्त्वा पञ्चम्या निर्देशं कुर्वन्नाचार्य एतत् ज्ञापयति- सन्त्यन्येऽप्यनुयोगा इति, तदाह चरणकरणानुयोगादन्ये नान्यानुयोगेभ्य इति। तत्र षष्ठी त्रिविधा दृष्टा भेदषष्ठी अभेदषष्ठी च, तत्र भेदषष्ठी यथा- देवदत्तस्य गृहम, अभेदषष्ठी यथा- तैलस्य धारा शिलापुत्रकस्य शरीरकमिति, तद्यदि षष्ठ्या उपन्यासः क्रियते ततो न ज्ञायते- किं चरणकरणानुयोगस्य भिन्नामोघनिर्युक्तिं वक्ष्ये यथा देवदत्तस्य गृहमिति, अथाहोश्चिदभिन्नां वक्ष्ये यथा तैलस्य धारेति, तस्य सम्मोहस्य निवृत्त्यर्थं पञ्चम्या उपन्यासः कृत इति। एवं व्याख्याते सत्यपरस्त्वाह- अस्तीत्येकवचनमनुयोगा बहवश्च तत्कथं बहुत्वं प्रतिपादयति ?, उच्यते, अस्तीति तिङन्तप्रतिरूपकमव्ययम्, अव्ययं च-

सदृशं त्रिषु लिङ्गेषु, सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु, यन्न व्येति तदव्ययम॥

ततोबहुत्वंप्रतिपादयत्येवत्यदोषः। अथवाव्यवहितःसंबन्धोऽस्तिशब्दस्य, कथम ?, इदं चात्र-कवचनम- षष्ठी संबन्धे किमिति न भवति विभक्तिः ?, आचार्य आह- अस्ति षष्ठी विभक्तिः, पुनरप्याह- यद्यस्ति ततः पञ्चमी भणिता किम ?, आचार्य आह- अन्येऽप्यनुयोगाश्चान्यतः, अतः षष्ठी विद्यमानाऽपि नोक्तेति. भावना पूर्ववत। अन्येऽप्यनुयोगाः सन्तीत्युक्तं. न च ज्ञायन्ते कियन्तोऽपि ते ? इत्यतः प्रतिपादयन्नाह-

मू. (१०) चत्तारि उ अनुओगा चरणे धम्मगणियानुओगे य।
दवियनुओगे य तहा अहक्कमं ते महिड्ढीया॥ [भा. ५]

वृ. चत्वार इति संख्यावचनः शब्दः अनुक्रमा अनुरूपा वा योगा अनुयोगाः, तुशब्दश्चैवकारार्थः. चत्वार एव. अन्ये तु तुशब्दं विशेषणार्थं व्याख्यानयन्ति. किं विशेषयन्तीति- चत्वारोऽनुयोगाः. तुशब्दाद्धि च- पृथक्त्वापृथक्त्वभेदात. कथं चत्वारोऽनुयोगाः ? इत्याह- 'चरणे धम्म- गणियानुओगे य' चर्यते इति चरणं, तद्विषयोऽनुयोगश्चरणानुयोगस्तस्मिन चरणानुयोगे. अत्र चोत्तर- पदलोपाद्विद्यमुपन्यासः, अन्यथा

चरणकरणानुयोग इत्येवंवक्तव्यं, स चैकादशाङ्गरूपः, 'धम्मे' इति धार्यतीति धर्मः, दुर्गतौ पतन्तं सत्त्वमिति, तस्मिन धर्मे-धर्मविषये द्वितीयोऽनुयोगो भवति, स चोत्तराध्ययनप्रकीर्णकरूपः, 'गणियानुओगे य' इति गणितं तस्यानुयोगो गणितानुयोगः तस्मिन गणितानुयोगे-गणितानुयोगविषये तृतीयो भवति, स चसूर्य-प्रज्ञप्त्यादिरूपः, चशब्दः प्रत्येकं मनुयोगपदसमुच्चायकः, 'दविय नुओगे' त्ति द्रवतीति द्रव्यं तस्यानुयोगो द्रव्यानुयोगः-सदसत्प-र्यालोचनाख्यः, स च दृष्टिवादः, चशब्दात्तनार्षः सम्मत्यादिरूपश्च, तथेति क्रमप्रतिपादकः, आगमोक्तेन प्रकारेण 'यथाक्रमं' यथापरिपाट्येति, चरणकरणानुयोगाद्या 'महर्द्धिकाः' प्रधाना इति यदुक्तं भवति। एवं व्याख्याते सत्याह परः-'चरणे धम्मगणियानुओगे य दवियनुओगे य' त्ति यद्येतेषां भेदेनोपन्यासः क्रियते तत्किमर्थं चत्वारः? इत्युच्यते, विशिष्टपदोपन्यासादेवायमर्थोऽवगम्यत इति, तथा चरणपदं भिन्नया विभक्त्या किमर्थमुपन्यास्तं?, धर्मगणितानुयोगौ तु एकयैव विभक्त्या, पुनर्द्रव्यानुयोगो भिन्नया विभक्त्येति, तथाऽनुयोगशब्दश्चैकत्रोपन्यस्तव्यः, किमर्थं द्रव्यानुयोग इति भेदेनोपन्यस्त इति?, अत्रोच्यते, यत्तावदुक्तं-चतुर्ग्रहणं न कर्तव्यं, विशिष्टपदोपन्यासात, तदसत, यतो न विशिष्ट-स्यैकस्यावगमो भवति विशिष्टपदोपन्यासेऽपि, कुतः?, चरणधर्मगणितद्रव्यपदानि सन्ति, अन्यान्यपि सन्तीति संशयोमा भूत्कस्यचिदित्यतश्चतुर्ग्रहणं क्रियत इति, तथा यच्चोक्तं-भिन्नया विभक्त्या चरणपदं केन कारणेनोपन्यस्तम्?, तत्रैतत्प्रयोजनं, चरण-करणानुयोग एवात्राधिकृतः, प्राधान्यख्यापनार्थं भिन्नया विभक्त्या उपन्यास इति, तथा धर्मगणितानुयोगौ एकविभक्त्योपन्यस्तौ, अत्र तु क्रमेऽप्रधानावेताविति, तथा द्रव्यानुयोगं भिन्न-विभक्त्युपन्यासे प्रयोजनं, अयं हि एकैकानुयोगे मीलनीयः, न पुनर्लौकिकशास्त्रवद्युक्तिभिर्न विचारणीय इति, तथाऽनुयोगशब्दद्वयो-पन्यासे प्रयोजनमुच्यते-यत्रयाणां पदानामन्तेऽनुयोगपदमुपन्यस्तं तदपृथक्त्वानुयोगप्रतिपादनार्थं, यच्च द्रव्यानुयोग इति तत्पृथक्त्वानुयोगप्रतिपादनार्थमिति। एवं व्याख्याते सत्याह परः-इह गाथासूत्रपर्यन्त इदमुक्तः-'यथाक्रमं ते महर्द्धिका' इति, एवं तर्हि चरणकरणानुयोगस्य लघुत्वं, तत्किमर्थं तस्य निर्युक्तिः क्रियते?, अपि तु द्रव्यानुयोगस्य युज्यते कर्तुं, सर्वेषामेव प्रधानत्वात्, एवं चोदकेनाक्षेपे कृते सत्युच्यते -

मू. (११) संविसयबलवत्तं पुन जुज्जइ तह्विअ महिड्ढिअं चरणं।
चारित्तरक्खणट्ठा जेणिअरे तिन्नि अणुओगा॥ [भा. ६]

वृ. स्वश्चासौ विषयश्च स्वविषयस्तस्मिन स्वविषये बलवत्त्वं पुनर्युज्यते-घटते, एतदुक्तं भवति-आत्मीयात्मीयविषये सर्व एव बलवन्तो वर्तन्त इति, एवं व्याख्याते सत्यपरस्त्वाह-यद्येवं सर्वेषामेव निर्युक्ति-करणं प्राप्तं, आत्मीयात्मीयविषये सर्वेषामेव बलवत्त्वात्, तथाऽपि चरणकरणानुयोगस्यैव न कर्तव्येति, एवं चोदकेनाशङ्किते सत्याह गुरुः-'तह्विअ महिड्ढिअं चरणं' 'तथापि' एवमपि स्वविषय-बलवत्त्वेऽपि सति महर्द्धिकं चरणमेव, शेषानुयोगानां चरणकरणानुयोगार्थमेवोपादानात, पूर्वोत्पन्न-संरक्षणार्थमपूर्वप्रतिपत्त्यर्थं च शेषानुयोगा अस्यैव वृत्तिभूताः, यथा हि कर्पूरवनखण्डरक्षार्थं वृत्तिरुपादीयते, तत्र हि कर्पूरवनखण्डं प्रधानं नपुनर्वृत्तिः, एवमत्रापि चारित्ररक्षणार्थं शेषानुयोगा-मुपन्यासात, तथा चाह-'चारित्तरक्खणट्ठा जेणियरे तिन्नि अणुओगा' चर्यारिक्तीकरणाच्चारित्रं तस्य रक्षणं तदर्थं चारित्ररक्षणार्थं येन कारणेन 'इतरे' इति धर्मानुयोगादयस्त्रयोऽनुयोगा इति। एवं व्याख्याते सत्याह-कथं चारित्ररक्षणमिति चेत्तदाह-

मू. (१२) चरणपडिवत्तिहेउं धम्मकहा कालदिक्खमाईआ।
दविए दंसणसुद्धी दंसणसुद्धस्स चरणं तु॥ [भा. ७]

वृ. चर्यत इति चरणं-व्रतादितस्य प्रतिपत्तिश्चरणप्रतिपत्तिः चरणप्रतिपत्तेर्हेतुः कारणं निमित्तमिति पर्यायाः,

किम् ? तदाह-'धर्मकथा' दुर्गतौ प्रपतन्तं सत्त्वसङ्घातं धारयतीति धर्मस्तस्य कथा-कथनं धर्मकथा चरणप्रतिपत्तेर्हेतुर्धर्मकथा, तथाहि-आक्षेपण्यादिधर्मकथाऽऽक्षिप्ताः सन्तो भव्यप्राणिनश्चारित्रमवाप्नुवन्ति. 'कालन्वियखमाईय'त्ति कलनं कालः कलासमूहो वा कालस्तस्मिन् काले दीक्षा-दयः-दीक्षणं दीक्षा-प्रव्रज्या-प्रदानम् आदिशब्दादुपस्थापनादिपरिग्रहः, तथा च शोभनतिथि-नक्षत्रमुहूर्तयोगादौ प्रव्रज्याप्रदानं कर्तव्यम्, अतः कालानुयोगोऽप्यस्यैव परिकरभूत इति. 'दंसणि' त्ति द्रव्यानुयोगे किं भवति ? इत्यत आह-'दंसणसुद्धि' दर्शनं-सम्यग्दर्शनमभिधीयते तस्य शुद्धिः-निर्मलता दर्शनशुद्धिः, एतदुक्तं भवति द्रव्यानुयोगगतिर्दर्शनशुद्धि-भवति, युक्तिभिर्यस्माऽवस्थितार्थ-परिच्छेदात्, तदत्र चरणमपि युक्त्यनुगतमेव ग्रहीतव्यं, न पुनरागमादेव केवलादिति। आह-दर्शनशुद्ध्यैवकिम्?, तदाह-'दंसणसुद्धस्स' दर्शनं शुद्धं यस्यासौ दर्शनशुद्धस्तस्य 'चरणं' चारित्रं भवतीत्यर्थः, तुशब्दो विशेषणे, चारित्रशुद्धस्यैव दर्शनमिति॥ अथवाप्रकारान्तरेण चरणकरणानुयोगस्यैव प्राधान्यं प्रतिपाद्यते आनिभृतस्यार्पणेति, तच्च दृष्टान्तबलेनाचलं भवति नान्यथेत्यतो दृष्टान्तद्वारेणाह-

मू. (१३) जह रत्ना विगप्पसु वयरं कणगं अ रययं लोहं अ।
चत्तारि आगरा खलु चउण्ह पुत्ताण ते दिन्ना॥ [भा. ८]

वृ 'यथे'त्युदाहरणोपन्यासे राज्ञो 'विषयेषु' जनपदेषु 'वज्रं' इति वज्राकरो भवति, वज्राणि-रत्नानि तेषामाकरः-स्थानिर्वज्राकरः। 'चिन्ता लोहागरिए' त्ति इत्यतः सिंहावलोकितन्यायेनाकरग्रहणं संबध्यते, एतेन कारणेन 'होति उ' त्ति इत्यस्माद्भवति क्रिया सर्वत्र मीलनीयेति। 'कनकं' सुवर्णं तस्याकरो भवति द्वितीयः, 'रजतं' रूप्यंतद्विषयस्तृतीय आकरो भवति, चशब्दः समुच्चये, अनेकभेदभिन्नं रूप्याकरं समुच्चिनोति, 'लोहं य'त्ति लोहमजस्तस्मिन लोहे-लोहाविषयश्चतुर्थ आकरो भवति, चशब्दो मृदुकठिनमध्यलोहभेदसमुच्चायकः, 'चत्वारः' इति सङ्ख्याः, आक्रियन्त एतेष्वित्याकराः, तथा च मर्यादयाऽभिविधिना वा क्रियन्ते वज्रादीनि नेष्विति, खलुशब्दो विशेषणे, किं विशिनष्टि ?-सन्निधयाः सहस्थादयश्चते पुत्रेभ्यो दत्ताः, चतुर्णां 'पुत्राणां' सुतानां 'त' इत्याकरा 'दत्ताः' विभक्ता इत्यर्थः॥ अधुना प्रदानोत्तरकालं यत्तेषां संजातं तदुच्यते-

मू. (१४) चिंता लोहागरिए पडिसेहं सो उ कुणइ लोहस्स।
वयगाईहि अ गहणं करिंति लोहस्स तिन्नियरे॥ [भा. ९]

वृ. लोहाकरोऽस्यास्तीति लोहाकरिकस्तस्मिन लोहाकरिके चिन्ता भवति, राज्ञा परिभूतोऽहं येन ममाप्रधान आकरो दत्तः, एवं चिन्तायां सत्यां सुबुद्धयभिधानेनमन्त्रिणाऽभिहितः-देव! माचिन्तां कृथः, भवदीय एव प्रधान आकरो, न शेषा आकरा इति, कुत एतदवसीयते ?, यदि भवत्संबन्धी लोहाकरो भवति तदानीं शेषाकरप्रवृत्तिः, इतरथा लोहोपकरणाभावान्न प्रवृत्तिरिति. ततोऽनिर्वाहं कार्यमनुकतिचिद्दिनानि यावदुपक्षयं प्रतिपद्यते लोहोपकरणजातं, ततः सुमहार्घमपि ते लोहं ग्रहीष्यन्तीत्यत आह-'पडिसेहं' इत्यादि, प्रतिषेधो-वारणा ते प्रतिषेधं करोत्यसौ लोहं प्रतीतमेव तस्य लोहस्य, तुशब्दो विशेषणे, न केवलमनिर्वाहं करोत्यपूर्वोत्पादनिरोधं च, ततश्चैवं कृते शेषाकरेषूपस्कराः क्षयं प्रतिपन्नाः, ततस्ते वज्रादिभिर्ग्रहणं कुर्वन्ति इतरे वज्राकरिकादयः, चशब्दान्न केवलं वज्रादिभिर्हस्त्यादिभिश्च, अत्र कथानकं स्पष्टत्वान्न लिखितम्, अयं दृष्टान्तः, साम्प्रतं दार्ष्टान्तिकयोजना क्रियते-यथाऽसौ लोहाकर आधारभूतः शेषाकरणां, तत्प्रवृत्तौ शेषाणामपि प्रवृत्तेः, एवमत्रापि चरणकरणानुयोगे सति शेषानुयोगसद्भावः, तथाहि-चरणे व्यवस्थितः शेषानुयोगग्रहणे समर्थो भवति, नान्यथेति॥ अस्यार्थस्य प्रतिपादनार्थं गाथासूत्रमाह-

मू. (१५) एवं चरणंमि ठिओ करेइ गहणं विहाड इयरेसिं।

एएण कारणेणं हवइ उ चरणं महड्ढीअं ॥ [भा. १०]

वृ. 'एव'मित्युपनयग्रन्थः 'चरणंमि'त्ति चर्यत इति चरणं तस्मिन् व्यवस्थितः करोति विधिना ग्रहणमितरेषाम्, इतरेषामिति द्रव्यानुयोगादीनां, तदनेन कारणेन भवति चरणं महर्द्धिकम् तुशब्दादन्येषां च गुणानां समर्थो भवतीति ॥ अधुना 'अल्पाक्षरं महार्थ'मिति यदुक्तं तद्व्याख्यानायाह-

मू. (१६) अप्पक्खरं महत्थं १ महक्खरऽप्पत्थ २ दोसुऽवि महत्थं ३ ।
दोसुऽवि अप्पं च ४ तहा भणिअं सत्थं चउविगप्पं ॥ [भा. ११]

वृ. अत्र चतुर्भङ्गिका-अल्पान्यक्षराणि यस्मिन् तदल्पाक्षरं, स्तोकाक्षरमित्यर्थः, 'महत्थं' इति महानर्थो यस्मिन्महार्थंप्रभूतार्थमित्यर्थः, तत्रैकं शास्त्रमल्पाक्षरं भवति महार्थं च प्रथमो भङ्गः १, अथान्यत्किंभूतं भवति?-'महक्खरमप्पत्थं, महाक्षरं, प्रभूताक्षरमिति हृदयं, अल्पार्थं, स्वल्पार्थमिति हृदयं, द्वितीयो भङ्गः २, तथाऽन्यत किंभूतं भवति ?-'दोसुऽवि महत्थं' द्वयोरपीति अक्षरार्थयोः, श्रुतत्वा-दक्षरार्थोभयं परिगृह्यते, एतदुक्तं भवति-प्रभूताक्षरं प्रभूतार्थं च तृतीयो भङ्गः ३, तथाऽन्यत् किंभूतं भवति ? इत्याह-'दोसुवि अप्पं च तहा' द्वयोरप्यल्पमक्षरार्थयोः, एतदुक्तं भवति-अल्पाक्षरं अल्पार्थं चेति ४। 'तथे'ति तेनागमोक्तप्रकारेण 'भणितं' उक्तं शास्त्रं 'चतुर्विकल्पं' चतुर्विधमित्यर्थः ॥ अधुना चतुर्णामपि दृष्टान्तानामुदाहरणतश्चिरार्थमिदं गाथासूत्रमाह

मू. (१७) सामायारी ओहे नायज्झयणा य दिट्ठिवाओ य ।
लोइअकप्पासाई अणुक्कमा कारगा चउरो ॥ [भा. १२]

वृ. ओघसामाचारी प्रथमभङ्गकेउदाहरणं भवति, पूर्वापरनिपातादेवमुपन्यासः कृतः १, ज्ञाता-ध्ययनानि षष्ठाङ्गे प्रथमश्रुतस्कन्धे तेषु कथानकान्युच्यन्ते ततः प्रभूताक्षरत्वमल्पार्थत्वं चेति द्वितीयभङ्गके ज्ञाताध्ययनान्युदाहरणं, चशब्दादन्यच्च यदस्यां कोटौ व्यवस्थितं २, दृष्टिवादश्च तृतीयभङ्गक उदाहरणं, यतोऽसौ प्रभूताक्षरःप्रभूतार्थश्च, चशब्दात्तदेकदेशोऽपि ३, चतुर्थभङ्गोदाहरणप्रतिपादनार्थमाह-'लोइयकप्पासादी' इति लौकिकं चतुर्थभङ्गेउदाहरणं, किंभूतम्? -कप्पासादि, आदि-शब्दाच्छिवचन्द्रादिग्रहः, 'अनुक्कम'त्ति अनुक्रमाविति अनुक्रमेणैव-परिपाट्या, तृतीयार्थे पञ्चमी, 'कारकाणि' कुर्वन्तीति कारकाणि-उदाहरणान्युच्यन्ते, चत्वारीति यथासंख्येनेवेति। 'अनुग्रहार्थं सुविहितानाम्' इति यदुक्तं तद्व्याख्यानायो-दाहरणगाथा-

मू. (१८) बालाईणनुकंपा संखडिकरणंमि होअगारीणं ।
ओमे य बीयभत्तं रन्ना दिन्नं जनवयस्स ॥ [भा. १३]

वृ. 'एव'मित्युपन्यासाद्यथेति गम्यते, ततोऽयमर्थोभवति-यथाह्यगारिणामनुकम्पा भवति बालादीनामुपरि संखडिकरणे, एवं स्थविरःसाधूनामनुकम्पार्थमुपदिष्टोघनिर्युक्तिरिति संबन्धः। अधुनाऽक्षरगमनिकाबालाः शिशवोऽभिधीयन्ते, ते आदिर्येषाम्, आदिशब्दात्कर्मकरादिपरिग्रहः, तेषां बालादीनामुपर्यनुकम्पा दयेत्यर्थः, 'संखडिकरणे' संस्कृत्यन्ते प्राणिनो यस्यां सा संखडिः, अनेकसत्त्वव्यापत्तिहेतुरित्यर्थः, कृतिः करणं संखड्याः करणं संखडिकरणं तस्मिन संखडिकरणे यथाऽनुकम्पा भवति, केषाम्? इत्याह-'अगारिणां' अगारं विद्यते येषां तेऽगारिणस्तेषामगारिणां, तथाहि-यदभोजने प्रहरत्रयादेशे भवति तस्मिन् यदि बालादीनां प्रथमालिकां न दीयते ततोऽ-तिबुभुक्षाक्रान्तानां केषाञ्चिन्मूर्च्छागमनं भवति केचित्पुनः कर्मादिकर्तुं न शक्नुवन्ति ततोऽनुकम्पार्थं प्रथमालिकाद्यर्थं गृहपतिःप्रयच्छति, अस्यैव दर्शनार्थं दृष्टान्तान्तरमाह-'ओम' इत्यादि, अवमं-दुर्भिक्षं तस्मिन्नवमे बीजानि-शाल्यादीनि भक्तम्-अन्नं बीजानि च भक्तं च बीजभक्तमेकवद्भावः 'राज्ञा' नरपतिना दत्तं, कस्य ? तदाह-जनपदस्य ॥

कस्यचिद्राज्ञो विषये दुर्भिक्षं प्रभूतवार्षिकं संजातं, ततस्तेन दुर्भिक्षेण सर्वमेव धान्यं क्षयं नीतं, लोकश्च विषन्नः, तस्मिन्नवसरे राज्ञा चिन्तितम् सर्वमेव राज्यं मम जनपदायत्तं, यदि जनपदो भवति ततः कोष्ठागारादीनां प्रभवः, जनपदाभावे तु सर्वाभावः, ततस्तत्संरक्षणार्थं बीजनिमित्तं भक्तनिमित्तं च कोष्ठागारादिधान्यं ददामीति, एवमनुचिन्त्य दापितं तस्य जनपदस्य, लोकश्च स्वस्थः संजातः, पुनर्द्विगुणं त्रिगुणं च प्रेषितं राज्ञ इति॥ अयं दृष्टान्तः, अधुना दार्ष्टान्तिकप्रतिपादनार्थमाह-

मू. (१९) एवं थेरेहिं इमा अपावमाणाण पयविभागं तु।
साहूणनुकंपट्ठा उवइट्ठा ओहनिज्जुत्ती॥ [भा. १४]

वृ. 'एव'मित्युपनयगन्थः, यथा गृहपतिना बालादीनामनुकम्पार्थं भक्तं दत्तं, राज्ञा च बीजभक्तमनुग्रहार्थमेव दत्तं, एवं स्थविरैरोघनिर्युक्तिः साधूनामनुग्रहार्थं निर्यूढेति, स्थविराः-भद्रबाहुस्वामिनस्तैः, 'आत्मनि गुरुषु च बहुवचन'मिति बहुवचनेन निर्देशः कृतः, 'इमा' इति इयं वक्ष्यमाणलक्षणा प्रतिलेखनादिरूपा। किमर्थं निर्यूढा ?, तदाह-'अपावमाणाणं' इत्यादि, 'अप्राप्नुवतां' अनासादयतां, किमप्राप्नुवतामित्याह-'पदविभागं' वर्तमानकालापेक्षया कल्परूपं, चिरन्तनकालापेक्षया तु दृष्टिवादव्यवस्थितपदविभागसामाचारीमित्यर्थः। तुशब्दादृशधासामाचारीं चाप्राप्नुवतां, केषामनुकम्पार्थं निर्यूढा ?, तदाह-'साधूनां' ज्ञानादिरूपाभिः पौरुषेयीभिर्मोक्षं साधयन्तीति साधवस्तेषां साधूनां, किम् ?-'अनुकम्पार्थं' अनुकम्पा कृपा दया इत्येकोऽर्थः तया अर्थः-प्रयोजनं, 'उपदिष्टा' कथिता 'ओघनिर्युक्तिः' सामान्यार्थप्रतिपादिकेत्यर्थः॥ आह-अथ केयमोघनिर्युक्तिः या स्थविरैः प्रतिपादिता ?, तत्प्रतिपादनायाह-

मू. (२०) पडिलेहणं१ च पिंडं२ उवहिपमाणं३ अनाययनवज्जं४।
पडिसेवणं५ मालोअं६ जह य विसोही७ सुविहियाणं॥

वृ. एवं संबन्धे कृते सत्याह परः ननु पूर्वमभिहितम्, अर्हतो वन्दित्वौघनिर्युक्तिं वक्ष्ये, तत्किमर्थं वन्दनादिक्रियामकृत्वैवौघनिर्युक्तिं प्रतिपादयति इति, अत्रोच्यते, अविज्ञायैव परमार्थं भवतेतच्चोच्यते, इह हि वन्दनादिक्रिया प्रतिपादितैवासाधारणनामोद्घट्टनादेव, तथाहि-अशोकाद्यष्टमहाप्रातिहार्यादिरूपां पूजामर्हन्तीत्यर्हन्तः, तदनेनैव स्तवोऽभिहितः, एवं चतुर्दशपूर्वधरादिष्वपि योजनीयं, अलं प्रसङ्गेन, प्रकृतं प्रस्तुमः-'पडिलेहणं' इति, 'लिख अक्षरविन्यासे' प्रतिलेखनं प्रतिलेखना तां वक्ष्याम इति, एतदुक्तं भवति-आगमानुस्मारेण या निरूपणा क्षेत्रादेः सा प्रतिलेखनेति। चशब्दात्प्रतिलेखकं प्रतिलेखनीयं च वक्ष्ये। अथवाऽनेकाकारां प्रतिलेखनां च वक्ष्ये, उपाधिभेदात्। 'पिंड'मिति पिण्डनं पिण्डः-ग्रहान-रूपस्तं पिण्डं, वक्ष्य इति प्रत्येकं मीलनीयं, भिक्षाशोधिमित्यर्थः। 'उपधिप्रमाणं' इति उपदधातीत्युपधिः, उप-सामीप्येन संयमं धारयति पोषयति चेत्यर्थः, स च पात्रादिरूपस्तस्य प्रमाणं, तच्च गणनाप्रमाणं प्रमाणप्रमाणं च। 'अनाययनवर्ज्यं' इति नायतनमनायतनं तद्वर्ज्यं-त्याज्यमित्येनच्च वक्ष्ये, अथवाऽनायतनवर्ज्यमायतनं, तदायतनं वक्ष्ये, तच्चानायतनं स्त्रीपशुषण्डकसंसक्तं यद्यतति, तद्विपरीतमायतनं-'पडिसेवणं' इति प्रतीपा सेवना प्रतिसेवना, एतदुक्तं भवति-संयमानुष्ठा-नात्प्रतीपमसंयमानुष्ठानं तदासेवना ताम्। 'आलोयण' इति आलोचनमालोचना अपराधमर्यादया लोचनं-दर्शनमाचार्यादेरालोचनेत्यभिधीयते, किमालोचनामेव ?, नेत्याह-'जह य' इत्यादि, 'यथा' येन प्रकारेण 'विशोधिः' विशेषेण शोधिर्विशोधिः, एतदुक्तं भवति-शिष्येणालोचितेऽपराधे सति तद्योग्यं यत्प्रायश्चित्तप्रदानं सा विशोधिरभिधीयते, तां विशोधिं। केषां संबन्धिनीं विशोधिं ?, तदाह-'सुविहितानां' शोभनं विहितम्-अनुष्ठानं येषां ते सुविहितास्तेषां संबन्धिनीं यथा

विशोधिस्तथा वक्ष्ये, चशब्दः समुच्चये, किं समुच्चिनोति ?-कारणप्रतिसेवनं अकारणप्रतिसेवनं च यथा शोधिस्तथा वक्ष्य इति। अत्राह-अथैषां द्वाराणामित्थं क्रमोपन्यासे किं प्रयोजनमिति, अत्रोच्यते, यत्प्रतिलेखनाद्वारस्य पूर्वमुपन्यासः कृतस्तत्रेतत्प्रयोजनं-सर्वत्र क्रियाप्रतिलेखनापूर्विका कर्तव्येत्यस्यार्थस्य प्रतिपादनार्थं पूर्वं प्रतिलेखनाद्वारमुपन्यस्तं, प्रतिलेखनोपकरणं च गृह्यमाणं भवति अतः पिण्डस्योपन्यासः, अशेषदोषविशुद्धः पिण्डो ग्राह्य इति, तदनन्तरमुपधिद्वारस्योपन्यासः क्रियते, किमर्थमिति चेत्, स हि पिण्डो न पात्रबन्धादिकमन्तरेण गृहीतुं शक्यते अत उपधिप्रमाणं तदनन्तरमभिधीयते, स च गृहीतः पिण्ड उपधिश्च नवसतिमन्तरेणोपभोक्तुं शक्यते, अतः 'अनायतनवर्ज्यं' इत्यस्य द्वारस्योपन्यासः क्रियते, प्रतिलेखनां कुर्वतः पिण्डग्रहणमुपधिप्रमाणं अनायतनवर्जनं चेच्छतः कदाचित्कश्चित्कश्चिदतिचारो भवतीत्यतोऽतिचारद्वारं क्रियते, स चातिचारोऽवश्यमालोचनीयो भावशुद्ध्यर्थमतः आलोचनाद्वारमभिधीयते, आलोचनोत्तरकालं प्रायश्चित्तं तद्योग्यं यतो दीयतेऽतो विशुद्धिद्वारस्योपन्यासः क्रियत इत्यलमतिविस्तरेण॥

अधुनैकैकं द्वारं व्याचष्टे, तत्र पर्यायतः प्रतिलेखनाद्वारव्याख्यानायाह-

मू. (२१) आभोगमग्गण गवेसणा य ईहा अपोह पडिलेहा।
पेक्खणनिरिक्खणावि अ आलोयपलोयणगट्ठा॥

वृ. आभोगनमाभोगः, 'भुज पालनाभ्यवहारयोः' मर्यादयाऽभिविधिना वा भोगनं-पालनमाभोगः प्रतिलेखना भवति, मार्गणं मार्गणा 'मृग अन्वेषणे' अशेषसत्त्वापीडया यदन्वेषणं सा मार्गणेत्युच्यते, गवेषणं गवेषणा 'गवेष मार्गणे' अशेषदोषरहितवस्तुमार्गणं गवेषणेत्युच्यते, ईहनमीहा 'ईह चेष्टायां' शुद्धवस्त्वन्वेषण-रूपा चेष्टेहेत्युच्यते, सा च प्रतिलेखना भवति, अपोहनमपोहः अपोहः-पृथग्भाव उच्यते, तथा चक्षुषा निरूप्य यदि तत्र सत्त्वसम्भवो भवति ततः उद्धारं करोति सत्त्वानां अन्यालाभे सति, स चापोहः प्रतिलेखना भवति, प्रतिलेखनं प्रतिलेखना, प्रतिप्रत्यागमानुसारेण निरूपणमित्यर्थः, सा च प्रतिलेखना। प्रेक्षणं प्रेक्षणा, प्रकर्षेणेक्षणं दर्शनं प्रेक्षणेत्युच्यते, सा च प्रतिलेखना। निरीक्षणं निरीक्षणा, निः-आधिक्ये 'ईक्ष दर्शने' अधिकं दर्शनं निरीक्षणेत्युच्यते, अपिशब्दादन्योपसर्गयोगे चैकार्थिकसंभवो यथा-उपेक्षणेति, चशब्दादाभोगादीनां च शब्दानां ये पर्यायशब्दास्तेऽपि प्रतिलेख-नाद्वारस्य पर्यायशब्दाः। आलोकनमालोकः, मर्यादयाऽभिविधिना वा लोकनमित्यर्थः। प्रलोकनं प्रलोकना, प्रकर्षेणालोकनमित्यर्थः। 'एगट्ठा' इति एकार्थिकान्यमूनि अनन्तरोद्दिष्टानि भवन्ति। पुंल्लिङ्गता च प्राकृतलक्षणवशादवगन्तव्या, यथा-जसो तवो सल्लो, नपुंसकलिङ्गा अपि शब्दाः पुंल्लिङ्गाः प्रयुज्यन्ते एवमत्रापीति व्याख्याते सत्याह परः प्रतिलेखनं नपुंसकं, अत्र तु कानिचित्रपुंसकानि कानिचित्स्त्रीलिङ्गानि कानिचित्पुंल्लिङ्गानि, तत्र नपुंसकस्य नपुंसकान्येव वाच्यानि तत्कथमिति, अत्रोच्यते, एकैतावत्प्राकृतशैलीमङ्गीकृत्य नपुंसकस्यापि स्त्रीलिङ्गपुंल्लिङ्गैः पर्यायाभिधानमदुष्टं, तथाऽन्यत्प्रयोजनं, संस्कृतेऽप्येकस्यैव शब्दस्य त्रयमपि भवति, यथा तटस्तटी तटमिति, तदत्र भिन्नलिङ्गाः शब्दाः केन कारणेन पर्यायशब्दा न भवन्तीति॥ आह-प्रतिलेखनाग्रहणेन किं सर्वं केवलं गृह्यते ? किमन्यदपि ?, अन्यदपि किं तत् ?, 'पडिलेहओ य' इत्यादि, अथवा का पुनरत्र प्ररूपणा ? इति तदर्थं ब्रवीति-

मू. (२२) पडिलेहओ य पडिलेहणा च पडिलेहियव्वयं चेव।
कुंभाइसु जह तियं पस्वणा, एवमिहयंपि॥

वृ. प्रतिलिखतीति प्रतिलेखकः-प्रवचनानुसारेण स्थानादिनिरीक्षकः साधुरित्यर्थः, चशब्दः सकारणादि-स्वगतभेदानां समुच्चायकः, प्रतिलेखनं प्रतिलेखना "दुविहा खलु पडिलेहा" इत्यादिना ग्रन्थेन वक्ष्यमाण-

लक्षणा, चशब्दोभेदसूचकः, प्रतिलेख्यत इतिप्रतिलेखितव्यं "ठाणेउपकरणे" इत्यादिना वक्ष्यमाणं, चशब्दः पूर्ववत्, एवकारोऽवधारणे, नातस्त्रिकादतिरिक्तं मस्ति। आह-कथं पुनः प्रतिलेखकप्रतिलेखितव्ययोरनुक्तयोर्ग्रहणमिति ?, दण्डमध्यग्रहणन्यायात्, अथवा ग्रन्थेनैवोच्यते-'कुंभादीसु' कुम्भो-घटः, आदिशब्दात्कुटपटशकटग्रहः 'यथा' येन प्रकारेण 'त्रिकं' त्रितयं, त्रीणीत्यर्थः, प्ररूपणानि प्ररूपणाः 'एवं'ति तथानेनप्रकारेण, 'इहं'ति प्रतिलेखनायां, अपिशब्दः साधर्म्यदृष्टान्तप्रतिपादनार्थः, यथाकर्तां कुलालः करणं मृत्पिण्डदण्डादि कार्यं कृतः, परस्परापेक्षतया नैकमेकेनापि विनेति, तथा प्रतिलेखना क्रिया, सा च कर्तारं प्रतिलेखकमपेक्षते, प्रतिलेखितव्याभावे चोभयोरभावस्तस्मात्त्रीण्येतानि-प्रतिलेखकः प्रतिलेखना प्रतिलेखितव्यं चेति॥ इहच 'यथोद्देशं निर्देश' इतिन्यायमङ्गीकृत्यप्रतिलेखकआदौ कर्तृत्वात्प्रधानश्चेत्यतस्तद्द्वारव्याख्यानार्थमाह-पडिलेहगगाहा

मू. (२३) एगो व अनेगो वा, दुविहा पडिलेहगा समासेणं।
तेदुविहा नायव्वा, निक्कारणिआ य कारणिआ॥

वृ. सुगमा, नवरं 'निक्कारणिआ य' इति चशब्दाद्गच्छेस्थितेनविशेषणे चात्र द्रष्टव्ये॥ सकारणाकारणनिर्णयार्थमाह-

मू. (२४) असिवाई कारणिआ निक्कारणिआ य चक्कथूभाई।
तत्थेगं कारणिअं वोच्छं ठप्पा उ इतरिये॥

वृ. सुगमा, नवरं-'तत्थेगं' इति 'तत्र' तेष्वेकानेकसकारणगच्छन्तिष्ठन्प्रतिलेखकेषु य एकः सकारणो गच्छन् तं वक्ष्ये। तावत्तिष्ठन्तु त्रयः-सकारणानेकनिष्कारणैकानेकभेदाः, तुशब्दात्स्थान-स्थितश्च, 'इतरे' अन्य इत्यर्थः॥ कियन्ति पुनस्तान्यशिवादीनि ? येष्वसावेकाकी भवतीत्याह-

मू. (२५) असिवे ओमोयरिए रायभए खुहिअ उत्तमट्ठे अ।
फिडिअगिलाणाइसणे देवया चेव आयरिए॥

वृ. नशिवमशिवं-देवतादिजनितोज्वरादिपद्रवः, अवमौदरिकं-दुर्भिक्षं, राज्ञोभयं राजभयं, क्षुभितक्षोभः, संत्रास इत्यर्थः, उत्तमार्थः-अनशनं 'फिडिन' इति भ्रष्टो मार्गात् 'ग्लानो' मन्दः, अतिशयः-अतिशययुक्तः, देवताधार्यो प्रतीतो, अथ तावदक्षरार्थः। भावार्थस्य भाष्यकार एकैकं द्वारमङ्गीकृत्य प्रतिपादकः। 'यथोद्देशं निर्देश' इतिन्यायाद्यद्द्वारमाश्रित्ययो विधिरसावभिधीयते-इहाशिवमेका-कित्वस्यहेतुत्वेवर्तते, तस्मात्तथा कर्तव्यं यथा तन्न भवत्येव॥ केन पुनः प्रकारेण तन्न भवतीति चेत्स उच्यते-

मू. (२६) संवच्छरचारमणे होहा असिवंति ते (तइ) तओ निंति।
सुत्तत्थं कुव्वंता अइसयमाईहिं नाऊणं॥ [भा. १५]

वृ. संवत्सरचारणा द्वादशके, दश च द्वौ च द्वादश, तेन भविष्यत्यशिवमिति ज्ञात्वा 'त' इति। (तइत्ति) तदेव 'तत' इतिसस्मात्क्षेत्रात् 'निंति' निर्गच्छन्ति, सूत्रपौरुषीमर्थपौरुषीं च 'कुर्वन्तः' निष्पादयन्तोऽन्यदेशमभविष्यदशिवं विश्रब्धास्तं संक्रमन्ति। कथं पुनर्ज्ञायते ?- अतिशय आदिर्येषां तेऽतिशयादयो ज्ञानहेतवस्तैः॥ अतिशयादि प्रतिपादयन्नाह-

मू. (२७) अइसेस देवया वा निमित्तगहणं सयं व सीसो वा।
परिहाणि जाव पत्तं निग्गमणं गिलाणपडिबंधो॥ [भा. १६]

वृ. अतिशयः-अवध्यादिरस्तदभावे क्षपकादिगुणाकृष्टा देवता कथयति, अहवा आयरिएणं सुत्तत्थेसु

णिम्माणेण सयमेव निमित्तं धेत्तव्वं, अहवा सीसो गहणधारणासंपन्नो निज्जिकारी जो सो गेण्हाविज्जइ, जया जायरिओ वुड्ढो भवइ तया अविगारिस्स सीसस्स देइ, जाहे सो न होज्जा ताहे अन्नो कोइ पुच्छिज्जइ, ताहे बारसहिं निग्गंतव्वं. अह बारसहिं न नायं ताहे एक्कारसहिं जाव जाहे एक्केणवि ण नायं होज्जा ताहिं छहिं मासेहिं तुरंतेहिं निग्गच्छंतु, अहवा चेव सव्वं अतिरित्तं जायं ताहे निग्गच्छंतु। अक्षरव्याख्या-अतिशयनमतिशयः-प्रत्यक्षं ज्ञानमवधिमनः पर्यायकेवलाख्यं, तेन ज्ञात्वा, देवता वा कथयति. भविष्यत्यशिवमिति, निमित्तम्-अनागतार्थपरिज्ञानहेतुर्ग्रन्थस्तस्य ग्रहणं स्वयमेव कृत्वा आचार्यः शिष्यो वा योग्यो ग्राह्यते निमित्तं. 'परिहाणिजाव पत्तं'ति द्वादशकेन यदा नज्ञातं तदा एकादशकेनेत्येवंकहान्या परिहानिरिति, यावत्प्राप्तमिति तावत्स्थिताः कथञ्चिद्यावत्प्राप्तम्-आगतमशिवं. तत्र किमिति ?, निर्गमन निर्गमः कार्यः सर्वैरिति। कथं तर्ह्य शिवमाश्रित्यैकाकित्वमिति चेदाह-'गिहाणपडिबंधो' ग्लानो-मन्दस्तस्यैवाशिवकारिण्या देवतया कृतः पूर्वभूतो वा, तेन प्रतिबन्धः-न निर्गमः सर्वेषां ॥ तस्याश्चाशिवकारिण्याः स्वरूपप्रतिपादनायाह-

मू. (२८) संजयगिहित्तदुभय भद्दिआ य तह तदु भयस्सवि अ पंता।
चउवज्जणवीसु उवस्सए य निपरंपराभत्तं ॥ [भा. १७]

मू. (२९) असिवे सवसं वत्थं नोहं लोणं च तह य विगईओ।
एयाइं वज्जिज्जा चउवज्जणयंति जं भणिअं ॥ [भा. १८]

वृ. संयताः-साधवस्तेषां भद्रिका न गृहिणामिति प्रथमो भङ्गः, गृहिणां भद्रिका न संयतानामिति द्वितीयः, तथोभयभद्रिकेति तृतीयः, उभयप्रान्तेति चतुर्थः। सापुन चउप्पयारा संजयभद्दिगा गिहत्थपंता १ गिहत्थभद्दिगा संजयपंता२ उभयपंता ३ उभयभद्दिआ ४। कहं पुण संजयभद्दिगा होज्जा ?, गिहत्थे उद्दवेइ, संजए भणति-निरुवसग्गा अच्छह, ताहेवि गंतव्वं, कोहा जाणति पमत्ता पहोएज्जा वा गेण्हेज्जा वा, गिहिभद्दिगा संजयपंता संजए चेव पढमं गेण्हंति जहा एते महातवस्सी एते चेव पढमं पल्लेयव्व, एतेसु निज्जिएसु अवसेसा निज्जिआ चेव भवंति, एत्थं जा होउ सा होउ निग्गंतव्वं, जाहे न निग्गया केणइ वाघाएण, को वाघाओ ?, पुव्वं गिलाणो वा होज्जा, ताए वा उद्दाइआए कोइ संजओ गहितो होज्जा, पंथा वा न वहंति, ताहे तत्थ जयणाए अच्छियव्वं, का जयणा ?, इमानि चत्तारि परिहरिअव्वाणि-विगइं दव्वविहावि लोणं लोहं च सवसं वत्थं च, जाणि अकुलाणि असिवेण गहिआणि तेसु आहारईणि न गेण्हंति, जाहे सव्वाणिवि गहियाणि होज्जा ताहे दिट्ठं दिट्ठीए न पाडिंति, ओमन्थिआ गेण्हंति. दिट्ठीउ संकमउ ॥ 'चउवज्जणं'ति चतुर्णां वर्जना-परिहारश्चतुर्वर्जना विकृत्यादीनां, चतुर्षु वा वर्जना क्षेत्रस्य-संयतभद्रिका गृहिप्रान्ता इत्यादिषु भङ्गकेषु, 'वीसु उवस्सए य'त्ति ग्लानविधिः, विध्वग्-भेदेनोपाश्रयः-आश्रयः कर्तव्य इत्यर्थः। जो संजतो असिवेण गहिओ होज्जा, तस्स दूरट्ठियस्स भत्तं निपरंपरेण दिज्जइ। 'निपरंपराभत्तं'ति, त्रयाणां परम्परा। निपरम्परा, भक्तं-आहारः, तद् एको गृह्णाति द्वितीयश्चानयति तृतीयोऽवशया ददातीत्यर्थः। अवधूतम-अवज्ञातं, जहा अवधूता नासंति ॥

ग्लानोद्वर्तनादिविधिप्रदर्शनायाह-

मू. (३०) उव्वत्तणनिल्लेवण बीहेते अनभिओगऽभीरू य।
अगहिअकूलेसु भत्तं गहिए दिट्ठिं परिहरिज्जा ॥ [भा. १९]

वृ. उद्वर्तनं-ऊर्ध्वं वर्तनं यदसावुद्वर्त्यते, निर्लेपनं यदसौ निर्लेपः क्रियते, उपलक्षणं चैतत्, तस्य समकाशे न स्थातव्यं दिवारात्रौ वा। अथ कीदृशेन साधुना कर्तव्यमित्याह-'बीहेते अनभिओग'त्ति बिभ्यत्यनभियोगः, बिभ्यतीति भयं गच्छति. भीरावित्यर्थः, नाभियोगोऽनभियोगः, यो भीरुः स तत्र न नियोक्तव्यः। कस्तर्हि

करोति ?, आह- 'अभारव्य' अभारस्थ न भारुरभीरुः, स तत्र स्वयं करोति नियुज्यते वा, चणशब्दो वस्त्रान्तरितविप्रयत्नप्रदर्शनार्थः, अगृहीतेषु कुलेषु अशिवेनेह भक्तं ग्राह्यं, तदभावे दृष्टि- दृष्टिगपातपरिहारः। आह- चतुर्वर्जनित्युक्तं तत्र भङ्गका अपि गृह्यन्त इति। जोऽवि तं उव्वत्तेइ वा परियत्तेइ वा सो हत्थस्स अंतरे वत्थं दाऊण ताहे उव्वत्तेति वा परियत्तेइ वा। उव्वत्तेऊण हत्थं मट्टिआए धोवइ, जो य बीहिज्जा सो तत्थायरिएण न भणियव्वो जहा अज्जो तुमं वसाहिति। जो धम्मसद्धिओ साहू सो अप्पणा चेव भणइ- अहं वसामि। प्रतिबन्धस्थाने गति कर्तव्यान्तरप्रदर्शनायाह-

मू. (३१) पुव्वाभिग्गहवुड्ढी विवेग संभोइएसु निक्खिवणं।
तेऽविअ पडिबंधठिआ इयरेसु वता सगारदुगं॥ [भा. २०]

वृ. पूर्वमिति- शिवकालेयाऽभिग्रहाः- तपःप्रभृतयस्तेषां वृद्धिः कार्या, चतुर्थाभिग्राहःषष्ठंकरोति, मृते तस्मिन् को विधिरित्याह- 'विवेग' विवेचनं विवेकः, 'विचिर पृथग्भावे' परित्याग इतियावत्, कस्यासाविति- तदुपकरणस्य, अमृते तस्मिन् गमनावसरे च प्राप्ते किं कर्तव्यमित्याह- 'संभोइएसु निक्खिवणं' अशेष- समानसामाचारिकेषु विमुच्य गम्यते, ते तत्राशिवे कथं स्थिता इत्याह- 'तेऽवि अ पडिबंधठिआ' न तेषां गमनावसरः कृतस्थित्यनिबन्धात्, तदभावे किं कर्तव्यमित्याह 'इतरेसु'त्ति असम्भोगिकेष्वित्यर्थः, तदभावे देवकुलिकेषु, अनिच्छत्सु बलात्कारेण, तदभावे कृत इत्याह- 'सगारदुअं' स्वकं अगारस्थं वसति इति सागारः गृहस्थ इत्यर्थः, तयोर्द्वयं, तावेव स्थाप्यावित्यर्थः। कौ पुनस्स्थाविति ?- व्रत्यव्रतौ वा सम्यग्दृष्टी, तदभावे शय्यातरः, यथाभद्रकमिथ्यादृष्टिः॥ सो य गिलाणो यदि अत्थि अन्नो वसहीं तहिं ठविज्जइ, असइए अ ताए चेव वसहीए एगपासे चिलिमिली किज्जइ, बारं दुहा किज्जइ, जेण गिलाणो निक्खमति वा पविसति वा तेन अन्ने साहुणो ननिग्गच्छंति, पडिआरगवज्जं, ताव य तहिं अच्छंति जाव सत्थो न लब्भइ ताव जोगवुड्ढिं करेंति, जो नमोक्कारं करिंतओ सो पोरिसिं करेति, एवं वड्ढंति, जइ पउणो सो साहू जो गहिओ ताहे वच्चंति, अह कालं करेइ ताहे जं तस्स उवगरणं तं सव्वं छड्डिज्जइ, ते छड्डित्ता ताहे वच्चंति, अह सो न चेव मुक्को ताहे अन्नेसिं संभोइआणं सकज्जपडिबंधट्ठिआणं मूले निक्खिप्पइ, जाहे संभोइआ न होज्जा ताहे अन्नसंभोइयाणं, जाहे तेऽविन होज्जा ताहे पासत्थोसन्नकुसीलाईणं, तेसिं बलावि ओवडिज्जइ, तेसिं देवकुलाणि भुज्जंति, सारूविअसिन्हपुत्ताणं, तेसिं असति सावगाणं उवणिक्खिप्पति, पच्छा संजायरेसु आहाभद्दगेसु वा एवं ठविज्जइ, ताहे वच्चंति॥

यदि पुनर्गो म्रियमान आक्रोशति ततः किं कर्तव्यमित्याह -

मू. (३२) कूयंते अब्भन्थण समत्थभिक्खुस्स निच्छ तद्दिवसं।
जइ विंदघाइभेओ निद्दुक्खो जाव लाउवमा॥ [भा. २१]

वृ. 'कूज अव्यक्ते शब्दे' कूजयति- अव्यक्तशब्दं कुर्वाणे किं कार्यमित्याह- 'अब्भन्थण समत्थभिक्खुस्स' समर्थः- शक्तोऽभ्यर्थयति, त्वंनिष्ठ्यावद्यंनिर्गच्छामइति, निर्गतपूर्वक्तव्यम- इच्छतु भवान् अहमपि गच्छामि, यदीच्छति क्षिप्रं निर्गमः। अथासौ धर्मनिरपेक्षतया नेच्छति ततः किमित्याह- 'अनिच्छ तद्दिवसं' अनिच्छति तस्मिंस्तस्य साधोर्गमनं तद्दिवसं स्थित्वा छिद्रं लब्ध्वा नेष्टव्यं; तत्र किं संहतैर्गन्तव्य- माहोस्विदन्यथेत्याह- जइ विंदघाइभेओ निद्दुक्खो जाव' यद्यसौ वृन्द- घातिनी ततो छिद्रा भेदः, तथाऽपि न निष्पतति त्रिधा, त्रयस्त्रयो द्वौ द्वौ एककोऽप्यावत्तथा न घातयति। कः पुनरत्र दृष्टान्त इत्याह- 'जहा अलाउवमा' अलातम- उल्मुकमुपमानं- दृष्टान्तस्तेनोपमा, यथा हि तानि संहतानि ज्वलन्ति नान्यथा, एवं तेऽपि संहता हन्यन्ते नान्यथेति, तदर्थभेदः, एवमशिवादिकारकी भवति। यदिसो कूवति ताहे एक्को भन्नति- जो (जइ) समत्थो

तुमंवाहं छिदं नाऊणविहिअदिवसंएज्जासि, तस्स पुनमज्जायाए विसज्जेयव्वा, मा ममकज्जे मरंतु, जाहे साऽवि मिलिओ ताहे सव्वे एगतो वअंति, जाहे तेसिं एगतो वअंताणं कोऽवि विद्धाओ हुज्जा, एस विद्धाई, जत्थ बहुगा तत्थ पडति, दिट्ठेतो कट्ठसंघाओ पलित्तो, सा दड्ढा कओ पच्छा एक्कक्के दारुगं न जलति, एवं तऽवि जड गहिआ ताहे दड्ढा कज्जंति, एवं तिहा, जाव तिन्नितिन्नि जना, एगो पडिरूपयवालो संघाडओ हिंडइ, अहतहवि न मुयति ताहे दो दो होंति, अह दोवि जणा न मुयंड ताहे एगागी भवंति, तेसिं उवगरणं न उवहम्मति, एवं ता एकल्लओ दिट्ठो असिवेण॥ केन पुनरुपायेनैकत्वविशेषणजुष्टा नष्टाः सन्त एकत्र प्रदेशे संक्षिप्यन्ते ? इत्याह -

मू. (३३) संगारो रायनिए आलोयणपुव्वपत्तपच्छा वा।
सोममुहिकालमुहच्छऽणतरे एक्क दो विसए॥ [भा. २२]

वृ. संगारः-संकेत पृथग्भावकाले कर्त्तव्यः, यथाऽमुकप्रदेशे सर्वैः संहन्तव्यमित्युपायः, तं च प्रदेशं प्राप्तानां को विधिरित्याह- 'राइनिए आलोयणपुव्वपत्तपच्छा वा' रत्नाधिकस्य-गीतार्थस्य पूर्वप्राप्तस्य पश्चात्प्राप्तस्य वाऽऽलोचना देया, तदभावे तथाऽपि गीतार्थस्य दातव्या, किंयत्पुनः क्षेत्रमनिष्क्रमणीयमित्याह- 'सोममुहा' इत्यादि, अशिवकारिण्या विशेषणानि, सोम्यं मुखं यस्याः सा तथा, कथमुपद्रवकारिण्याः सौम्यमुखत्वम् ?, अनन्तरविधयं प्रत्युपद्रवाकरणात्, कृष्णमुखी द्वितीयेऽपि न मुञ्चति, रक्ताक्षी तृतीयेऽपि न मुञ्चति, यथासङ्ख्यमनन्तरमेव स्थाप्यते सौम्यमुख्याम्, 'एक' इति एकमन्तरे कृत्वा तृतीये स्थाप्यते कृष्णमुख्यां, 'दो' इति द्वावन्तरे कृत्वा चतुर्थे स्थाप्यते रक्ताक्ष्यां, तेसिं संगारे दिन्नेल्लतो भवति, यथा अमुगत्थ मेलाइयव्वं, जाहे मिलाणो भवति ताहे तत्थ जो राइनिओ पुव्वपत्तो वा पच्छापत्तो वा तस्स आलोयणा दायव्वा, अह गीयत्थो ओमो ताहे तस्स आलोइज्जइ, सा पुन तिविहा, उद्दाइआ-सोममुही कालमुही रत्तच्छी य, जा सा सोममुही तीसेएक्कं विसयं गम्मइ, कालमुहीए एगो विसओ अंतरिज्जइ, रत्तच्छीए दोविगएअंतरेऊण चउत्थे विसए ठाति। असिवे त्ति दारं समत्तं॥ अशिवेन यथैकाकी भवति तथा व्याख्यातं, साम्प्रतं "ओमोयरिए" इति यदुक्तं तदव्याख्यानायाह -

मू. (३४/१) एमेव उ ओमम्मि भेओ उ अलंभि गीणिदिट्ठंतो।

वृ. एवमेव'ति अनेनैव प्रकारेणावमद्वारमपि व्याख्येयं, यथाऽशिवद्वारं व्याख्यातं, यो विधिर-शिवद्वारे सोऽत्रापीत्यर्थः, तुशब्दो बहुसादृश्यप्रतिपादनार्थः, अवमं-दुर्भिक्षे, अपिशब्दः सादृश्यसंभावने, तदुच्यते- "संवच्छरबारसएण होहिति ओमंतिते तओ निंति" इत्यादि, भेदनं-भेदः-एकैकता, तुशब्दएवकारार्थः, कस्मिन पुनरसौ भवतीत्याह- अलाभे भवति, अप्राप्तावाहारस्येत्यर्थः, यदेको लभते तदद्वावपि, द्वौ वा दृष्ट्वा न विभिञ्जतीति, एकैक एव लभते इत्यवमोदरे काकिता। अत्र दृष्टान्तमाह- 'गीणिदिट्ठंतो' गोदृष्टान्तः, यथा संहतानां गवां स्वल्पे तृणोदके न तृप्तिः, पृथग्भूतानां स्यात्, तथेहापीति॥ ओमोयरियाएवि एसेव कमो, बारसहिं संवच्छरेहिं आरद्धं जोहपारं न पावंति ताहे गणभेदं करेइ, नाणत्तं-गिलाणो न तहा परिहरिज्जइ। एत्थ गीणिदिट्ठंतो कायव्वो, अल्पे गोब्राह्मणे नन्दति, एवं ओमेणवि एगागिओ दिट्ठो॥ साम्प्रतं राजभयद्वारप्रतिपादनायाह -

मू. (३४/२) रायभयं च चउत्था चरिमदुगे होइ गणभेओ॥ [भा. २३]

वृ. राज्ञोभयं राजभयं, चशब्दएवमेवेत्यस्यानुकर्षणार्थः "संवच्छर बारस" इत्यादि, कियन्तः पुनरस्य भेदा इत्याहचतुर्था, सङ्ख्यायाः प्रकारवचने धा, चतुष्प्रकारमित्यर्थः, के पुनरमी इति ?, मात्स्वरिष्ठा अनन्तरमेवोच्यन्ते, किंचतुर्ष्वपि भेदेषु ?, नेत्याह- 'चरिमदुए' इत्यादि, 'चरिमे' पश्चिमे द्वये 'भवति' जायते 'गणभेदः' गच्छपृथग्भावः, एकैकइत्यर्थः। 'रायदुट्ठमवि तहेव बारसमंवच्छरेहिं होहिंति'। भेदचतुष्टयस्वरूपदर्शनायाह-

मू. (३५) निव्विसउत्ति य पढमो बिइओ मा देह भत्तपाणं तु।
तइओ उवगरणहरो जीवचरित्तस्स वा भेओ॥ [भा. २४]

वृ. सुगमा. नवरं-'जीय'त्ति जीवितभेदकारी चतुर्थो भेदश्चारित्रभेदकारी वा चतुर्थो राजा. उपकरणहारिजीवितचारित्रहारिणोर्गणभेदः कार्य इति। 'तं चउव्विहं निव्विसओत्ति य पढमो मा देह भत्तपानं तु। तइओ उवगरणहरो जीवचरित्तस्स वा भेओ'॥ आह-कथं पुनः साधूनां त्यक्तापराधानां राजभयं भवति?. 'यस्य हस्तौ च पादौ च. जिह्वाग्रं च सुयन्त्रितम। इन्द्रियाणि च गुप्तानि. तस्य राजा करोति किम्?॥' सत्यमेतत्. किं तर्हि?-

मू. (३६) अहिमर अनिट्ठवरिसणवुग्गाहणया तहा अनायारे।
अवहरणदिक्खणाए आणालोए व कुप्पिज्जा॥ [भा. २५]

मू. (३७/१) अंतउरण्णवेसो वायनिमित्तं च सो पउस्सेज्जा।

वृ. 'अभिमराः' अभिमृत्यमाकार्यं मारयन्ति म्रियन्ते वेत्यभिमराः. कृतश्चित्कोपाद्राजकुलं प्रविश्यापरं व्यापादयन्तीति, साधूनां किमायातमिति चेत्. उच्यते. अन्यथा प्रवेशमलभमानः कश्चित्साधुवेषेण प्रविश्य तत्कृतं. ततश्च निर्विवेकित्वात्स राजा साधुभ्यः कुप्येत्. कुप्येदिति चेत्-क्रियापदं प्रतिपदं योजनीयं. अभव्यत्वात्, अनिष्टान्-अप्रशस्तान् मन्यमानो दर्शनं नेच्छति, ग्रन्थ-नादौ च दृष्ट्वा इति कुप्येत। 'व्युद्ग्राहणता' विशब्दः कुत्सायामुत्-प्राबल्येन केनचित्प्रत्यनीकेन व्युद्ग्रा-हितः, यथैते तवानिष्टं ध्यायन्तीतिकुप्येत्। लोकंप्रत्यनाचारेसमुद्देशादीन्दृष्ट्वाकुप्येत्, अपहरणंकृत्वातत्प्रतिबद्धोदीक्षितइति-कुप्यत्, आज्ञालोपेवाकाचिदाज्ञालोपिता-नकृतातनश्चकुप्येत्?, अन्तःपुरेप्रवेशंकृत्याकेनचिल्लिङ्गधारिणाविकर्म कृतं ततः प्रद्वेषं यायात्, वादिना वा केनचिद्विभक्षुणा परिभूत इति, ततो निमित्तात् स इतिराजा प्रदुष्येद्वा। द्वारम्। तं पुन रायदुट्ठं कहं होज्जा?. केनतिलिंगग्रहणमंतेउरमवरुद्धं होज्जा। अहवा जहा वा वादिना वादे "तस्स पंडियमाणस्स बुद्धिल्लस्स दुरप्पणो। भुट्ठं पाएण अक्कम्म वाई वाउरिवागओ॥" एवं राय दुट्ठं भविज्जा, निव्विसए भत्तपानपडिसेहे उवगरणहरे अ एत्थ गच्छेण चेव वच्चंति, जत्थ जीवचरित्तभेओ तत्थ एगाणिओ होज्जा। क्षुभितद्वारं व्याचिख्यासुराह-

मू. (३७/२) खुभिए मालुज्जेनी पलायणं जो जओ तुरिओ॥ [भा. २६]

वृ. क्षोभे एकाकी भवति. क्षोभः-आकस्मिकः संत्रासः. तद 'मालुज्जेणि'त्ति माला अरहट्टस्य पतिता. उज्जयनी नगरी. उज्जयिन्यां बहुशो मालवा आगत्यागत्य मानुषादीन हरन्ति. अन्यदा तत्र कूपेऽरघट्टमाला पतिता, तत्र केनचिदुक्तं-माला पतिता, अन्येन सहसा प्रतिपन्नं मालवाः पतिताः. ततः संक्षोभः, तत्र किं भवति?, आह-'पलायणं जो जओ तुरियं' 'पलायनं' नाशनं यः कश्चिद्यत्र व्यवस्थितस्तच्छ्रुतवान स तत एव नष्ट इति। 'मालुज्जेनि'त्ति दृष्टान्तसूचकं वचनम। खुभिए वा एगागी होज्जा, जहा उज्जेनीए अरहट्टमाला पडिआ. लोगो सव्वो पलाओ मालवा पडियत्ति, एरिसे खुभिए एगागी होज्जा, जो जओ सो तओ नासति।

अधुना यदुक्तं राजभयद्वारे. 'वायनिमित्तं च सो पउस्सेज्ज'त्ति तद्व्याचिख्यासुराह-

मू. (३८) तस्स पंडियमानस्स, बुद्धिल्लस्स दुरप्पणो।
भुट्ठं पाएण अक्कम्म, वाई वाउरिवागओ॥ [भा. २७]

वृ. आह चोदकः-शोभनं स्थानं तद व्याख्यायाः. ननु क्षुभितद्वारेणान्तरितत्वान्कोऽयं प्रकारः? इति. अत्रोच्यते. निर्युक्तिग्रन्थवशाद्दोषः। यतोऽत्रैकगाथया "अंतउरे" इत्यादिकया राजभयक्षुभितद्वारे उक्ते

ननस्तत्रानवयवत्वादिहैव युक्ता व्याख्या. 'तस्से'ति 'तस्य' राज्ञो भयहेतोः, कथंभूतस्य? -'पण्डितमानिनः' पण्डितमन्यस्य पण्डितमात्मानं मन्यते सएवमन्यो, ज्ञानलवदुर्विदग्धत्वात्. बुद्धिर्लाताति बुद्धिलो बुद्धिलस्य 'दृशात्मनः' मिथ्यादृष्टित्वादभद्रत्वाच्छासनप्रत्यनीकत्वात्स तथा तस्य, किमित्याह- 'मूर्द्धानं' उत्तमाङ्गं पादेनाक्रम्य 'वादी' वादलब्धिसंपन्नः साधुर्वाग्यरिवागतः- अभीष्टं स्थानं प्राप्त इत्यक्षरार्थः. समुदायार्थस्तु- स राजा पण्डितमन्यतया दर्शनं निन्दति, तद्वादी वा कश्चित्, तत्र च साधुवादी, तेन सभां प्रविश्य न्यायेन पराजितः, तथाऽपि न साधुकारं ददाति प्रभुत्वात्तथाऽपि निन्दति. पुनश्चासौ साधुवादी विद्यादिबलेन सभामध्ये तस्य शिरसि पादं कृत्वाऽदर्शनीभूतः, ततश्चासौ परं परिभवं मन्यमानः प्रकर्षेण द्वेषं यायात्, इति श्लोकार्थः॥ उत्तमार्थद्वारप्रतिपादनायाह-

मू. (३९) निज्जवगस्स सगासं अमई एगाणिओ व गच्छिज्जा।
सुत्तत्थपुच्छगो वा गच्छे अहवाऽवि पडिअरिउं॥ [भा. २८]

वृ. निर्यापयति- आराधयतिनिर्यामकः- आराधकस्तस्य 'सकाशं' मूलम अमतिः- द्वितीयाभावे एकाकित्वमपि कालं कर्तुकामो गच्छेत्, सूत्रार्थपृच्छको वा गच्छेत्। उत्तमार्थस्थितस्यैकाकित्वमपि मा भूदव्यवच्छेदः 'अहवावि पडिअरिउं' अथवाऽपि 'प्रतिचरितुं' प्रतिचरणाकरणार्थम्, 'उत्तमट्ठं वा' सो साहू उत्तमट्ठं पडिवज्जिउकामो, आयरियसगासे य नत्थि निज्जमओ, ताहे अन्नत्थ वच्चज्जा, तो ससंघाडओ वच्चउ. असति ताहे एगो एगाणिओ वच्चेज्जा, अहवा उत्तिमट्ठपडिवन्नओ साहू सुओ, तस्स सुत्तत्थतदुभयाणि अपुव्वाणि, इमस्स अ संकिआणि. अन्नस्स य नत्थि, ताहे तत्थ पडिपुच्छ- णनिमित्तं वच्चेज्जा। अथवा उत्तिमट्ठपडिअरणहिं- गम्मति॥ फिडिअद्वारं व्याचिख्यासुराह-

मू. (४०/१) फिडिओ व परिरएणं मंदगई वावि जाव न मिलेज्जा।

वृ. 'फिडिए' त्ति एते पंथेण वच्चंति, तत्थ कोइ पंथाओ उत्तिण्णो, अन्नेण वच्चेज्जा, अहवा थेरो, तस्स य अंतरा गुट्ठाडोंगरा वा, जे समत्था ते उज्जुएण वच्चंति, जो असमत्थो सो परिरएणं- भमाडेण वच्चइ, ततो जाव ताणं न मिलइ ताव एगागी होज्जा। इदानीं गाथार्थः- 'फिडितः' प्रभ्रष्टः, गच्छतामेव सर्वेषां पथिद्वयप्रदर्शना- न्तरंजातमोहोऽन्येनैव पथाप्रयातस्ततएकाकीभवति। 'परिरएणंवा' परिरयो- गिर्यादिःपरिहरणंतेन वाएकाकी कश्चिदसहिष्णुर्मन्दगतिर्वा कश्चित्साधुः यावन्न मिलति तावदेकाकी भवति।

उक्तं फिडितद्वारम्. इदानीं ग्लानद्वारमुच्यते-

मू. (४०/२) सोऊणं व गिलाणं ओसहकज्जे असई एगो॥ [भा. २९]

वृ. गिलाणनिमित्तेन एगागी हुज्जा. तस्स ओसहं वा आनियव्वं। असइ संघाडयस्स ताहे एगागी वच्चिज्जा. अहवा गिलाणो सुओ ताहे सव्वेहिं गंतव्वं। अहप्पणो आयरिआ थेरा ताहे तेसिं पासे अच्छियव्वं. ताहे संघाडयस्स असइ एगागी वच्चिज्जा। इदानीमक्षरगमनिका- श्रुत्वाऽन्यत्र ग्लानं सङ्घाटकाभावे एकाकी व्रजति, यदिवा स्वगच्छ एव ग्लानः कश्चित्, तदर्थमौषधादीनामानयनार्थं व्रजत्येकाकी द्वितीयाभावे सति॥

उक्तं ग्लानद्वारम्, इदानीमनिशयद्वारम-

मू. (४१/१) अइसेसिओव सेहं असई एगाणिओ पठावेज्जा।

वृ. कोइ अतिसयसंपन्नो सो जाणइ, जहा एयस्स सेहस्स सयंतिज्जगा आगया, ताहे सो भणति- एस सेहो अबलेहो, जइ न अबलेहो ताहे एसन कंरेति पव्वज्जं, ततो सो असइ संघाडयस्स एगाणिओवि पट्ठविज्जइ। इदानीमक्षरार्थः- अतिशयीवा कश्चिदभिनवप्रव्रजितं द्वितीयमन्यंवाऽविलमपि प्रवर्तयेत्। उक्तमनिशयिद्वारम्.

इदानीं देवताद्वारम्-

मू. (४१/२) देवय कलिंगरुवणा पारणए खीरकुहिरं च ॥ [भा. ३०]

वृ. इह कलिंगेसु जनवएसु कंचनपुरं नगरं, तत्थायरिआ बहुस्सुआ पहाणागमा बहुसिस्ससपरिवारा, ते अन्नया सिस्साण सत्तत्थे दाऊण सन्नाभूमिं वच्चंति, तस्स य गच्छंतस्स पंथे महति महालतो रुक्खो, तस्स हेट्ठा देवया महिलारूवं विउव्वित्ता कलुणकलुणाइं रोवति, सा तेण दिट्ठा, एवं बितिअदिवसंवि, तओ आयरियस्स संका जाया-अहो ? कीस इमा एवं रोवइ ? त्ति, ताहे ओव्वत्तिऊण पुच्छिआ किं पुन धम्ममीले-स्यसि ?, सा भणइ-भगवं ! किं मम धेवं रोडयव्वं ?, आयरिओ भणइ-किं कहं वा, सा भणइ-अहमेयस्स कंचनपुरस्स देवया, एयं च अइरा सव्वं महाजनप्पवाहेण पलावि-ज्जिहिति तेन रुआमि त्ति, एते य साहुणो एत्थ सज्झायंति, ते अ अन्नत्थ गमिस्संतित्ति अओ रुआमि, आयरिएण भणिअ-कहं पुन एयं जाणिज्जइ ?, सा भणति जओ तुज्झं खमओ पारणए दुद्धं लभिस्सइ, तं च सुहिरं भविस्सइत्ति, जइ एवं होज्जा तो पत्तिएज्जाह, तं च घेत्तूण सव्वसाहूणं पाएसु थेवं थेवं देज्जाह, जत्थ देसे तं सहावं जाहिति तत्थेण जनप्पवाहो पभवेस्सइत्ति मुणिज्जह त्ति, ततो एवंते आयरिएण पडिवन्नं, ताहे बितिअदिवसे तहेव तत्थ तहा संजायं, ततो आयरिएहिं सव्वेसिं मत्तए पत्तेअं पत्तेअं तं दिन्नं तओ जहाभत्तीए पलायंति, जत्थ तं पंडुरं जायं तत्थ मिलिआ। एवं एगागी होज्जा ॥

उक्तं देवता द्वारम्. अथाचार्यद्वारमाह -

मू. (४२) चरिमाए संदिट्ठो ओगाहेऊण मत्तए गंठी।
इहरा कयउस्सग्गो परिच्छ आमंतिआ सगणं ॥ [भा. ३१]

वृ. चरमा-चतुर्थपौरुषी तस्यां 'संदिष्टः' उक्तः यदुत-त्वयाऽमुकत्र गन्तव्यं, स चाभिग्रहिकः साधुः, ततश्चासावेवमाचार्येणोक्तः किं करोति-सकलमुपकरणं पत्रकपडलादि वोढा हयति, मात्रकं चनेन गच्छता ग्राह्यं, अतस्तस्मिन् ग्रन्थिं ददाति, मा भूद्भयः, प्रत्युपेक्षणेयं स्यात्, एवमसावाभिग्रहिकः संयन्त्र्य तिष्ठतीति। 'इहर' त्ति आभिग्रहिकाभावे विकालवेलायां गमनप्रयोजनमापतितं ततः 'कृतोत्सर्गः' कृतावश्यकः किं करोतीत्याह-परीक्षार्थमिति-पश्यामः कोऽत्र महचनानन्तरं प्रवर्तते को वा न प्रवर्तते इति स्वगणमामन्त्रयति, ते च प्रतिक्रमणानन्तरं तत्रैवान्तर्मुहूर्तमात्रकालमासते, कदाचित्- चार्याः खल्वपूर्वो चारीं प्ररूपयेयुः अपूर्वं चार्थपदं, तत्रस्थांश्च नानामन्त्रयन्त्यसौ-भो भिक्षवः ! अमुकं मे गमनकार्यमुपस्थितं, तत्र-

मू. (४३) गच्छेज्ज को न सव्वेऽवऽनुग्गहो कारणाणि दीविंता।
अमुओ एत्थ समत्थो अनुग्गहो उभयकिडकम्मं ॥

वृ. कतमः साधुस्तत्र च गमनक्षमः ?, तत्राचार्यवाक्यश्रवणानन्तरं सर्वेऽपि साधव एवं ब्रुवन्ति-अहं गच्छाम्यहं गच्छामीत्यनुग्रहोऽयमस्माकं तत्राचार्यो वैयावृत्यकरयोगवाहिदुर्बलादीनि कारणानि 'दीपयित्वा' स्वयं प्रदर्श्यैतद् भणति-अमु-कोऽत्र कार्ये 'समर्थः क्षमः, ततश्च योऽसावाचार्येणोक्तः अयं क्षम इति स भणति-अनुग्रहो मेऽयं, ततः को विधिः ?, ततः स जिगमिषुः साधुराचार्यस्य चैत्यसाधुवन्दनां करोति, यदि पर्यायेण लघुस्ततः शेषाणामपि चैत्यसाधूनां वन्दनां करोति, अथवाऽसौ गन्ता सघुरत्नाधिकस्ततस्ते साधवस्तस्य चैत्यसाधुवन्दनां विदधति, एतदुभयकृतिकर्म-वन्दनं। ततः स गन्ता साधुः किं करोति जिगमिषुः सन् ?-

मू. (४४) पोरिसिकरणं अहवावि अकरणं दोच्चऽपुच्छणे होया।
सगणं सुदग्ग साहू संती अंतो बहि अन्नभावेणं ॥

वृ. यद्यसौ सूर्योद्गमेवास्यतिततः प्राभातिकां सूत्रपौरुषीं करोति, अथवा रात्रिशेषयास्यतिप्रयोजनवशात्

ततः गृह्णपार्श्वामवृत्त्वेव स्वपिति, एतत्पार्श्वावरणमकरणं चेति। पुनरपि च तेन गच्छताऽऽचार्यः प्रच्छनीयः प्रत्यूषसि-सामान्यमहमिति, अथ न पृच्छत्यतः 'दोच्चऽपुच्छणे दोस' त्ति द्वितीयवारामपृच्छति दोषाः- वक्ष्यमाणाः, के च ते ? इत्याह-'मरण' गाहद्धं, स्मरणमाचार्यस्यैव संजातं, एवंविधमन्यथा व्यवस्थितं कार्यमन्यथाकथंचित्संदिष्टं, 'सुय' त्ति श्रुतमाचार्यैर्यथातं तत्राचार्यान विद्यन्तेयन्निमित्तं चासौप्रेष्यते, तद्वा कार्यं तत्र नास्ति, 'साहु' त्ति अथवा विकाले साधुः कश्चित्तस्मात्स्थानादागतस्तेन कथितं यथा स आचार्यस्तत्र नास्तीति, 'सन्नि' त्ति अथवासन्नी-श्रावकआयातस्तेनाख्यातं, 'अंतो' त्ति अभ्यन्तरतः, कस्य ? ,प्रतिश्रयस्य, केनचिदुल्लपितं, यथा-अस्माकमप्येवंविधाः साधव आसन, ते च ततो गता मृता वा, 'बहि' त्ति बाह्यतः प्रतिश्रयस्य श्रुतमन्यस्मै कथ्यमानं केनचित 'अन्नभावेण' त्ति योऽसौ गन्ता सोऽन्यभावः उल्लिष्कमितुकामः, एतच्चाचार्यायतत्सङ्घाटकेनाख्यातं, ततश्चासौ म्रियतेकेनचिदव्याजेन॥ यदिपुनरसौ गन्तानप्रबोधयायात्ततः-

मू. (४५) बोहण अप्पडिबुद्धे गुरुवंदण घट्टणा अघडिबुद्धे।
निच्चलणिसन्नडाई दट्ठे चिट्ठे चले पुच्छे॥

वृ. अचेतयति सति तस्मिन गन्तरि बोधनं गीतार्थः करोति॥ ततः साधुरुत्थायाचार्यान्भ्यासमेति, गत्वा च यद्याचार्यो विबुद्धस्ततोऽसौ गुरवे वन्दनं करोति. अथाद्यापिस्वपिति ततः संघट्टना चाचार्यपादयोः शिरसा घट्टना-चलनं क्रियते. अथासौ प्रतिबुद्ध एव किन्तु निश्चलो निषन्नः-उपविष्टो ध्यायतीति, ततस्तमेवंभूतं निश्चलंनिषन्नध्यायिनंदृष्ट्वा किंकर्त्तव्यमित्याह- 'चिट्ठे' स्थातव्यं, तेनगुरुध्यानव्याघातेनमहाहानिसंभवात, 'चले पुच्छे'त्ति अथ छलोऽसौ ततः प्रष्टव्यः-भगवन् ! स एषोऽहं गच्छामीति। ततश्चासावाचार्येण संदिष्टः- इदमेवं त्वया कर्त्तव्यमिति व्रजति, स चेदेनं गन्तुं प्रवृत्तं इत्येतदाह-

मू. (४६) अप्पाहि अणुन्नाओ स महाओ नाइ जा पहायंति।
उवओगं आसन्न आमंते करेइ गामस्स सो उभए॥

वृ. संदिष्टः प्राग पश्चादनुज्ञातो वेति ततो गच्छति, कथम् ?-ससहायः, कियन्तं कालं यावत्ससहायो व्रजति ?- 'यावत्प्रभात'-जातसूर्योदय इत्यर्थः, ससहायश्च प्रभातं यावद्भजति श्वापदादिभयात, एवमसौ साधुव्रजन ग्रामस्यासन्नं प्राप्तः सन् किं करोतीत्याह-उपयोगं करोति. किंविषयम ?-उभयविषयं. मूत्रपुरीष-परित्याग इत्यर्थः, कस्मादेवं चेत् ग्रामसन्निधान एव स्थण्डिलसद्भावाद् गवादिसंस्थानात॥

अथ रात्रौ गच्छतः कश्चिदपायः संभाव्येत ततः प्रभातं यावत्स्थातव्यं, तथा चाह-

मू. (४७) हिमतेनसावयभया दारा पिहिया पहे अयाणंतो।
अच्छइ जाव पभायं वासियभत्तं न से दप्पा॥

वृ. हिमं-शीतं स्तेनाः-चोराः श्वापदानि-सिंहादीनि, एतद्भयात्प्रभातं यावदास्ते, यदि पुरस्य द्वाराणि पिहितानि ग्रामस्य फलहके पथानं वाऽजानंस्तिष्ठति यावत्प्रभातमिति। एवं च प्रभातं यावत्स्थिते गन्तरि 'वासिकभक्तं' दोषान्न 'से' तस्य 'दप्पा' गीतार्थां आनयन्ति। अथ केभ्यस्तदानीयते ?-

मू. (४८) ठवणकुल संखडीए अणहिंडंते सिनेह पयवज्जे।
भत्तट्ठिअस्स गमनं अपरिणए गाउयं वहइ॥

वृ. स्थापनाकुलेभ्यः तथा 'संखडीए' त्ति सामयिकी भाषा भोजनप्रकरणार्थे तस्य वा, के पुनस्त-दानयन्त्यत आह-'अनहिंडंते' यभिक्षानपर्यटितवन्तः, कस्मात्पुनस्तेभक्तमानयन्ति ?, उच्यते तेषामहिण्ड-कानांगृहस्थागौरवेणप्रयच्छन्ति, कीदृशंपुनस्तेभक्तं मानयतीयम ?- 'सिनेहपयवज्जे'तिस्नेहन-घृतादिना

पश्यया-क्षीणि (वर्जितं) भक्तं गृह्णन्ति, नैतत्साध्वाचारसमञ्जसत्वात्, नष्टपरिता-पहेतुत्वात्, महद्भयभैवकत्वात् कालिकविरोधित्वाच्च, कालिकप्रायपायित्वाच्च संयतानां, किं पुनस्ते गृह्णन्ति ?-दधिसक्तुकादि, तदर्थं मुक्त्वा व्रजति, तथा चाह-'भत्तट्ठि अस्स गमनं' भक्तं यतस्ततो गमनं भवति, अथ न तस्य भक्तं परिणतिर्जातित्यतोऽपरिणते भक्ते सति गव्यूतिमात्रं यावन्मार्गं वहति। क्रोशद्वयं गव्यूतिः॥

इदानीं तस्य गच्छतो विधिरुच्यते-

मू. (४९) अत्थंडिलसंकमणं चलवक्किखत्तनुवउत्तमागमिए।
पप्पिक्खेसु उ भयणा इयरेण विलंबणा लोगं॥

वृ. स्थण्डिलादस्थण्डिलं च संक्रामता साधुना पादौ रजोहरणेन प्रमार्जनीयाविति विधिः, मा भूत सचित्तपृथिव्या अचित्तपृथिव्या व्यापत्तिः, स्यात्तथा च पादयोरसौ रजोहरणेन प्रमार्जनं करोति, अथ कश्चित्सागारिकः पथिव्रजनश्रान्तो भवतिव्याक्षिप्तोऽनुपयुक्तश्चेति, तत्र चलो-गन्तृपथिप्रवृत्तः, व्या-क्षिप्तो-हस्तकृत्तिशवृक्षच्छेदादिव्यग्रः, अनुपयुक्तः-साधुंप्रत्यदत्तावधानः, यदैवंविधः सागारिको भवतितदा रजोहरणेन प्रमृज्य पादौ याति। 'पप्पिक्खेसु उ' इति विसदृशाः पक्षाः प्रतिपक्षाः, अमुहशा इत्यर्थः, तेषुप्रतिपक्षेषु 'भजना' विकल्पना कर्त्तव्या, एतदुक्तं भवति-केषुचित्प्रतिपक्षेषु प्रमार्जनं क्रियते केषुचित्तु नैव, तुशब्दो विशेषणार्थः, किं विशेषयति ?, प्रतिपक्षेष्वेव समुदायरूपेषु भजना कर्त्तव्या, न त्वेककास्मिन् भङ्ग इति, यदा तु सागारिकः स्थिरोऽव्याक्षिप्त उपयुक्त श्च साधुं प्रति भवति तदा 'इतरेण' इति इतरशब्देन रजोहरणनिषद्योच्यते तया पादौ प्रमार्ष्टि, न रजोहरणेन, 'विलंबण' त्ति तां च निषद्यां हस्तेन विलम्बमानां नयति, न तच्छरीरसंस्पर्शनं करोति, कियतीं भुवं यावदित्याह-'आलोयण' त्ति आलोकनमालोको यावत्तद्दृष्टिप्रसर इत्यर्थः, अथवा 'इतरेण' इति केनचिदोपग्रहिकेन कार्पासिकेन औणिकेन वा चीवरेण, शेषं प्राग्वत्, पश्चात्तं गोपयति। अथवा 'इतरेण विलंबणालोयं' इति प्राकृतावेदंकारिको विधिरुक्तः, यदा तु इतरेण-इतरशब्देनसार्थोगृह्यते, तेनेतरेण-सार्थेन सहप्रव्रजता स्थाण्डिल्याच्चास्थाण्डिल्यं संक्रामता किंकर्त्तव्यं सार्थपुरतः ? इत्याह-'विलम्बनं' इति विलम्बना कार्या, मन्दगतिना सता स्थण्डिलस्थेन तावत्प्रतिपालनीयं, कियन्तं कालं प्रतिपालनीयं ? यावदालोकनं-दर्शनं तस्य सार्थस्य, अदर्शनीभूते तु प्रभाटान्तरिते सार्थे पादयोः प्रमार्जनं कृत्वा व्रजनीत्यर्थं विधिः। उक्तो गाथाऽक्षरार्थः, इदानीमष्टभङ्गिका प्रख्प्यते, सा चेयम्-चलोवक्किखत्तो अनुवउत्तोय सागारिओ, एत्थ पमज्जणं, तस्यानुपयुक्तत्वादप्रमार्जनेऽप्यामाचारीप्रसङ्गात् १, चलव-क्किखत्त उवउत्त एत्थ नत्थि पमज्जणं सागारियत्तणओ २, च० अव० अनु० एत्थवि पमज्जणं ३, चल० अव० उव० एत्थवि णत्थि पमज्जणं ४, अच० व० अणु० एत्थ पमज्जणं ५, अच० भ० उ० नत्थि पमज्जणं ६, अच० अव० अनु० अत्थि पमज्जणं ७, अच० अव० उ० एत्थ नत्थि पमज्जणं ८। तत्थ पढमभंग नियमेन पमज्जणा, सेसेसु भयणा॥ एतदुक्तं भवति-केषुचित्प्रमार्जनं केषु-चित्प्रमार्जना, स इदानीं साधुर्मार्गमजानानः पृच्छति, तत्र को विधिरित्याह-

मू. (५०) पुच्छाए तिन्नि तिआ छक्कं पढमं जयणा तिपंचविहा।
आउम्मिविहतिविहा तिविहा सेसेसु काएसु॥

वृ. पृच्छायां सत्यां 'तन्नि तिय' नि त्रयस्त्रिका भवन्ति, तत्र पुरुषः स्त्री नपुंसकं च, तत्रैतेषा-मेककस्त्रिप्रकारः-आत्मन्तरूपो वृद्धश्चेति, एवमेते त्रयस्त्रिकाः, संपत्यर्थः, तथा तेनैव साधुना गच्छता 'छक्कं पढमजयणा' इतिषट्कं पृथिव्यादिलक्षणं यतना कर्त्तव्या, तत्र 'पढमजयणा तिपंचविह' त्ति प्रथमो यः पृथ्वीकायः तस्य यतना त्रिपंचविधा, तत्र त्रिविधा सचित्तस्य अचित्तस्य मिश्रस्य च पंचविधा पृथिवीकाययतना

कृष्णनीलरक्तपीतशुक्लरूपेति, अथवा त्रिपञ्चविधेति-त्रयः पञ्चकाः पञ्चकदशप्रकारेत्यर्थः, तथाहि-सच्चित्तः पृथिवीकायः शुक्लादिः पञ्चधा, एवमचित्तो मिश्रश्च, तथाऽप्काये 'दुविहा (जहाजयणा) तिविहा य' तत्र द्विधा अन्तरिक्षाप्कायतना भौमाप्कायतना च, त्रिविधा तु सच्चित्ता-प्कायतना, अच्चित्ता० मिश्रा० त्रिविधा तु शेषेषु कायेषु-तेजोवायुवनस्पतित्रसाख्येषु यतना, कथं ?, सच्चित्तादि, महाद्वारगाथायाः समुदायार्थः। अथावयवार्थं पुनस्तदेवाह-

मू. (५१) पुरिसो इत्थिनपुंसग एक्केक्को थेर मज्झिमो तरुणो।
साहम्मि अन्नधम्मिअगिहत्थदुगअप्पणो तइओ॥

वृ. यदुक्तं अनन्तरगाथायां 'पुच्छाए' त्ति पृच्छायां त्रितयं संभवति, तद्या पुरुषः स्त्री नपुंसकं चेति, यदुक्तं त्रयश्चिका: तदर्थमाह-एक्कक: स्थविरो मध्यमस्तरुण इत्ययं नवभेदः। स चैकैको नव-विधोऽपि कदाचित्साधर्मिकः स्यात्कदाचिन्नवविधोऽप्यन्यधार्मिकः स्यादित्याह-समाने धर्मे वर्त्तत इति साधर्मिकः-श्रावकः श्राविका नपुंसकं श्रावकं च, अन्यधार्मिको मिथ्यादृष्टिः। कियन्तः पुनस्तेन गच्छता पन्थानं पृष्टव्याः इत्यत आह-'गिहत्थदुग' त्ति, साधर्मिकगृहस्थद्वयं पृच्छनीयं, अन्य-धार्मिक-गृहस्थद्वयं वा। 'अप्पणा तिउ' त्ति आत्मना तृतीयो युक्त्याऽन्वेषणं विदधाति, एष तावत्सामा-न्योप-न्यासः, अथ प्रथमं यः प्रष्टव्यः स उच्यते-तत्र यदि साधर्मिकद्वयमस्ति ततस्तदेवोत्सर्गेण पृच्छ्यते, तस्य प्रत्ययिकत्वात्, अथ नास्ति ततः-

मू. (५२) साहम्मिअपुरिसाभाइ मज्झिमपुरिसं अनुव्वजिअ पुच्छे।
सेसेसु होंति दोसा सविसेसा संजईवग्गे॥

वृ. साधर्मिकपुरुषद्वयाभावेऽन्यधार्मिकमध्यमपुरुषद्वयं पृच्छनीयं, कथम् ?-'अनुव्रजिअ' अनुज्ञां कृत्वा धर्मलाभपुरस्सरं, ततः प्रियपूर्वकं पृच्छति, अन्यधार्मिकमध्यमग्रहणं त्विह साधर्मिकविपक्षत्वादवसीयत एव, 'सेसेसु' त्ति अन्यधार्मिकमध्यमपुरुषद्वयव्यतिरिक्तेषु अष्टसु भेदेषु दोषा भवन्ति पृच्छतस्तत एव दोषाः सविशेषाः-समधिकाः संयतीवर्गे-संयतीवर्ग-विषये पृच्छतः सतः। के च ते दोषा इत्याह-

मू. (५३) थेरो पहं न याणइ बालो पंथंचे न याणई वावि।
पंडित्थिमज्झसंका इयरे न याणंति संका य॥

वृ. स्थविरः-वृद्धः समागं न जानाति, भ्रष्टस्मृतित्वात्, बालस्तु प्रपञ्चयति केलीकिलत्वात् नवा जानाति, अल्पत्वात्, बालस्त्वत्र अष्टवर्षादारभ्य यावत्पञ्चविंशतिकः इति, असावपि बाल इव बालः, अपरिणतत्वेन रागान्धत्वात्, मध्यमवयः षण्डकमध्यवयःस्त्रीपृच्छायां शङ्कोपजायते नूनमस्य नाभ्यां कश्चिदर्थोऽस्ति, 'इयरे न याणंति' इतरशब्देन स्थविरनपुंसकं बालनपुंसकं स्थविरस्त्री बाला स्त्री वाऽभिगृह्यते, एते मार्गानभिज्ञाः शङ्का च स्यात्, क्व तर्हि व्यवस्थितेन पृच्छनीयमित्याह-

मू. (५४) पासट्ठिओ य पुच्छेज्ज वंदमाणं अवंदमाणं वा।
अनुव्वइऊण व पुच्छे तुण्हिक्कं मा य पुच्छिज्जा॥

वृ. 'पार्श्वस्थितः' समीपे व्यवस्थितः पृच्छेत्, किंविशिष्टं पृच्छेत् ?-वन्दनं कुर्वाणमकुर्वाणं वा, अथवा समीपमतिक्रम्य यात्येव ततः 'अनुव्रजनं' कृत्वा कतिचित्पदानि गत्वा प्रष्टव्यः, अथवा पृच्छ्यमानोऽपि न किञ्चिदपि तूष्णीं व्रजति, ततो नैव पृच्छनीय इति॥

मू. (५५) पंथब्भासे य ठिओ गोवाई मा य दूरि पुच्छिज्जा।
संकाईया दोसा विराधना होइ दुविहा उ॥

वृ. तथा पन्थाभ्यासे-समीपे स्थितः कश्चिद्गोपालादिः, आदिशब्दात्कर्षकपरिग्रहः. स च पृच्छनीयः, मा च दूरे व्यवस्थितं गोपालादि पृच्छेत्. शंकादिदोषसद्भावात्. नूनमस्य द्रविणमस्ति बलीवर्दादि (कंवा) शृङ्गिणं करोतीत्यंवमादयः। दूरे च गच्छतो द्विविधा विराधना-आत्मसंयमविषया, आद्या कण्टकादिभिरितराऽनाक्रान्तपृथिव्याद्याक्रमणेन॥ यदा तु पुनरन्यधार्मिको मध्यमवयाः पुरुषो नास्ति यः पन्थानं पृच्छ्यते तदा का प्रष्टव्य इत्याह-

मू. (५६) अगडं मज्झिम थेरा दढरूवइं भद्दओ य जो तरुणा।
एमेव इत्थिवग्गे नपुंसवग्गे य संजोगा॥

वृ. अगडमिति मध्यमपुरुषे स्थविरः पन्थानं पृच्छनीयः किंविशिष्टः ?-दृढस्मृतिः, अथ स्थविरो न भवति ततस्तरुणः प्रष्टव्यः, कीदृशः ?-यः स्वभावेनैव भद्रकः। स्त्रीवर्गेऽप्येवमेव पृच्छा कर्तव्या. एतदुक्तं भवति प्रथमं मध्यमवयाः स्त्रीमार्गः प्रष्टव्या तदभावे स्थविरा दृढस्मृतिः, अथ स्थविरा न भवन्ति ततस्तरुणी प्रष्टव्या, तदभावे भद्रिका तरुणी, एवं मध्यमवयो नपुंसकं, तस्याभावे स्थविरनपुंसकं दृढ-स्मृति, तदभावे बालनपुंसकं भद्रकम। आह च-'नपुंसकवर्गे च संयोगाः' नपुंसकवर्गे-नपुंसकसमुदाये एवमेव संयोगा ज्ञातव्याः। यथेतेऽनन्तरमुक्ताः न केवलमेतावन्त एव संयोगाः किन्त्वन्येऽपि बहवः सन्ति. आह च-

मू. (५७) एत्थ पुन सजोगा होंति अणेगा विहाणसंगुणिआ।
पुरिसित्थिनपुंसेसुं मज्झिमतरुथेरतरुणेसुं॥

वृ. अत्र पुनः-पृच्छाप्रक्रमे संयोगा भवन्त्यनेके, कथं ?-'विहाणसंगुणिय'त्ति विधानेन-भेदप्रकारेण संगुणिताः, चारणिकया अनेकशो भिन्ना इत्यर्थः. क्व च ते भवन्ति ?-'पुरिसित्थिनपुंसेसुं' पुरुषस्त्रीनपुंसकेषु, किंविशिष्टेषु ?-मध्यमस्थविरतरुणभेदभिन्नेषु, उक्तो गाथाऽक्षरार्थः। इदानीं भङ्गकाः प्रदर्श्यन्ते, तत्थ साहम्मिअचारणिआए तावं-दो मज्झिमवया साहम्मिअपरिग्गा पुच्छेज्ज एस एक्को उ १, तदभावे दो थेरे साहम्मिए चेव पुच्छिज्जा २, तदभावे दो तरुणे साहम्मिए चेव एस तइओत्ति ३। तदभावे दो साहम्मिणीओ मज्झिमिअमहिलातो ४, तासं दो थेरीओ साहम्मिणीओ चेव पंचमो एसो ५, तासं साहम्मिणीओ च्चिअ दो तरुणीओ छट्ठो सो ६, तदभावे दो साहम्मिआ उ मज्झिमनपुंसया पुच्छे ७, तासं दो साहम्मिअथेरणपुंसाओ अट्ठमओ ८. दो साहम्मिअतरुणे नपुंसया चेव ते उ पुच्छेज्जा ९, अहवा मज्झिमपुरिसो थेरो उ दुचेव साहम्मी १०, मज्झिमपुरिसो साहम्मिओ तरुणसाहम्मिओ उ पुच्छिज्जउ ११, मज्झिमपुरिसो साहम्मिओ मज्झिममहिला साहम्मिआ १२, मज्झिमपुरिसो साहम्मिओ थेरी य साहम्मिणी १३, मज्झिमपुरिसो साहम्मिओ तरुणी य साहम्मिणी १४, मज्झिमपुरिसो साहम्मिओ मज्झिमसाहम्मिअनपुंसो अ १५, मज्झिमपुरिसो साहम्मिओ थेरसाहम्मिअनपुंसो अ १६, मज्झिमपुरिसो साहम्मिओ तरुणनपुंसयसाहम्मिओ य १७, अहवा थेरपुरिसो साहम्मिओ तरुणसाहम्मिओ अ १८, थेरपुरिससाहम्मिओ मज्झिममहिला साहम्मिणी १९, थेरपुरिसो साहम्मिओ थेरी साहम्मिणी अ २०, थेरपुरिसो साहम्मिओ तरुणी साहम्मिणी य २१, थेरपुरिसो साहम्मिओ मज्झिमनपुंसओ साहम्मिओ य २२, थेरपुरिसो साहम्मिओ थेरनपुंसो साहम्मिओ अ २३, थेरपुरिसो साहम्मिओ तरुणनपुंसओ य २४ तरुणपुरिसो साहम्मिओ मज्झिममहिला साहम्मिणी अ २५, तरुणपुरिसो साहम्मिओ थेरसाहम्मिणी अ २६, तरुणपुरिसो साहम्मिओ तरुणी साहम्मिणी अ २७, तरुणपुरिसो साहम्मिओ मज्झिमनपुंसयसाहम्मिओ अ २८, तरुणपुरिसो साहम्मिओ थेरनपुंसयसाहम्मिओ अ २९, तरुणपुरिससाहम्मिओ तरुणनपुंसयसाहम्मिओ अ ३०, मज्झिममहिला साहम्मिणी थेरीसाहम्मिणी

अ ३१. मज्झिममहिला साहम्मिणी अ तरुणीसाहम्मिणी अ ३०. मज्झिममहिला साहम्मिणी मज्झिमनपुंसयसाहम्मिओ अ ३३. मज्झिममहिला साहम्मिणी थेरनपुंसओ साहम्मिओ उ ३४. मज्झिममहिला साहम्मिणी तरुणनपुंसयसाहम्मिओ अ ३५. थेरी साहम्मिणी तरुणी थेर साहम्मिणी ३६, थेरी साहम्मिणी नपुंसयसाहम्मिओ अ ३७, थेरी साहम्मिणी मज्झिमनपुंसयसाहम्मिओ उ ३८. थेरी साहम्मिणी तरुणनपुंसय साहम्मिओ उ ३९. तरुणिसाहम्मिणी मज्झिमनपुंसयसाहम्मिओ ४०. तरुणी साहम्मिणी थेरनपुंसयसाहम्मिओ उ ४१. तरुणी साहम्मिणी तरुणनपुंसयसाहम्मिओ य ४२ तरुणी साहम्मिणी मज्झिमो नपुंसयसाहम्मिओ अ ४३, थेरनपुंसय साहम्मिओ तरुणनपुंसय साहम्मिओ अ ४४, एते नव साहम्मिअचारणिआए लद्धा॥

इदानीं अन्नधम्मचारणिआए एवं सिज्जइ-अन्नधम्मिआ दो मज्झिमपुरिसा पुच्छिज्जंति एसक्को १. अन्नधम्मिआ दो थेरपुरिसा २. अन्नधम्मिआ दो तरुणपुरिसा ३. अन्नधम्मिआउ दो मज्झिममहिला ४. अन्नधम्मिआ थेराउ दो ५. अन्नधम्मिअ तरुणी दो ६, अन्नधम्मिअ मज्झिमनपुंसया दो ७. अन्नधम्मिअ थेरनपुंसया दो ८. अन्नधम्मिअतरुणनपुंसया दो९. अन्नधम्मिअमज्झिमपुरिसो अन्नधम्मिअथेरपुरिसाय १०. अन्नधम्मियमज्झिमपुरिसो अन्नधम्मिअतरुणपुरिसो य ११. अन्नधम्मिअमज्झिमपुरिसो अ अन्नधम्मिअमज्झिममहिला अ १२. अन्नधम्मिअमज्झिमपुरिसो अ अन्नधम्मिअथेरी य १३. अन्नधम्मिअमज्झिमपुरिसो अन्नधम्मिअतरुणी अ १४. अन्नधम्मिअमज्झिमपुरिसो अन्नधम्मिअमाज्झिमनपुंसओ अ १५, अन्नधम्मिअमज्झिमपुरिसो अन्नधम्मिअथेरनपुंसगो य १६, अन्नधम्मिअमज्झिमपुरिसो अन्नधम्मिअतरुणनपुंसगो अ १७, अन्नधम्मिअथेरपुरिसो अन्नधम्मिअतरुणपुरिसो अ १८, अन्नधम्मिअथेरपुरिसो अन्नधम्मिअमज्झिममहिला य १९. अन्नधम्मिअथेरपुरिसो अन्नधम्मिअथेरी अ २०, अन्नधम्मिअथेरपुरिसो अन्नधम्मिअतरुणी अ २१. अन्नधम्मिअथेरपुरिसो अन्नधम्मिअमज्झिमनपुंसओ अ २२. अन्नधम्मिअथेरपुरिसो अन्नधम्मियथेरनपुंसगो य २३, अन्नधम्मिअथेरपुरिसो अन्नधम्मिअतरुणनपुंसगो य २४, अन्नधम्मिअतरुणपुरिसो अन्नधम्मिअमज्झिममहिला य २५, अन्नधम्मिअतरुणपुरिसो अन्नधम्मिअथेरी य २६. अन्नधम्मिअतरुणपुरिसो अन्नधम्मिअतरुणी अ २७. अन्नधम्मिअतरुणपुरिसो अन्नधम्मिअमज्झिमनपुंसगो अ २८, अन्नधम्मिअतरुणपुरिसो अन्नधम्मिअथेरनपुंसगो अ २९. अन्नधम्मियतरुणपुरिसो अन्नधम्मिअतरुणनपुंसगो अ ३०. अन्नधम्मिअमज्झिममहिला अन्नधम्मिअथेरी अ ३१. अन्नधम्मिअमज्झिममहिला अन्नधम्मिअतरुणी अ ३२, अन्नधम्मिअमज्झिममहिला मज्झिमनपुंसगो अ ३३. अन्नधम्मिअमज्झिममहिला अन्नधम्मिअथेरनपुंसगो य ३४, अन्नधम्मिअमज्झिममहिला अन्नधम्मितरुणनपुंसगो अ ३५. अन्नधम्मिअथेरी अन्नधम्मिअतरुणी य ३६. अन्नधम्मिअथेरी अन्नधम्मिअथेरनपुंसगो य ३७, अन्नधम्मिअथेरी अन्नधम्मिअमज्झिमनपुंसगो य ३८. अन्नधम्मियथेरी अन्नधम्मियतरुणनपुंसगो अ ३९. अन्नधम्मिअतरुणी अन्नधम्मियमज्झिमनपुंसगो अ ४०, अन्नधम्मिअतरुणी अन्नधम्मिअथेरनपुंसगो अ ४१. अन्नधम्मिअतरुणी अन्नधम्मिअतरुणनपुंसगो य ४२ अन्नधम्मिअतरुणी अन्नधम्मिअमज्झिमनपुंसगो अ ४३. अन्नधम्मिअमज्झिमनपुंसओ अन्नधम्मिअथेरनपुंसगो अ ४४ अन्नधम्मिअमज्झिमनपुंसगो अन्नधम्मिअतरुणनपुंसओ अ ४५. अन्नधम्मिअथेरनपुंसओ अन्नधम्मिअतरुणनपुंसगो अ ४६.

एते अन्नधम्मिअचारणियाए लद्धा। ते सव्वे य नऊडे।

इदानिं साहम्मिअ अन्नधम्मिअ उभयचारणिआ किज्जइ-साहम्मिअभज्झिमपुरिसो अन्नधम्मियमज्झिमपुरिसो य पुच्छिज्जइ १. साहम्मिअमज्झिमपुरिसो अन्नधम्मियथेरपुरिसो य २. साहम्मिअमज्झिमपुरिसो अन्नधम्मिअतरुणो अ ३. साहम्मिअमज्झिमपुरिसो अन्नधम्मिअ मज्झिममहिला अ ४. साहम्मिअमज्झिमपुरिसो अन्नधम्मिअथेरी अ ५. साहम्मिअमज्झिमपुरिसो अन्नधम्मिअतरुणी अ ६. साहम्मिअमज्झिमपुरिसो अन्नधम्मिअमज्झिमनपुंसगो य ७. साहम्मिअमज्झिमपुरिसो अन्नधम्मिअथेरनपुंसगो अ ८. साहम्मिअमज्झिमपुरिसो अन्नधम्मिअतरुणनपुंसगो य ९, एते नव साहम्मियमज्झिमपुरिसममुंचमाणेहिं लब्धा ॥ साहम्मिअथेरपुरिसो अन्नधम्मिअमज्झिमपुरिसो अ १. साहम्मिअथेरपुरिसो अन्नधम्मिअथेरपुरिसो चेव २, साहम्मिअथेरपुरिसो अन्नधम्मिअतरुणो अ ३. साहम्मिअथेरपुरिसो अन्नधम्मिअमज्झिममहिला अ ४. साहम्मिअथेरपुरिसो अन्नधम्मिअमहिलथेरी अ ५. साहम्मिअथेरपुरिसो अन्नधम्मिअतरुणी अ ६. साहम्मिअथेरपुरिसो अन्नधम्मिअमज्झिमनपुंगगो अ ७. साहम्मिअथेरपुरिसो अन्नधम्मियनपुंसगथेरो अ ८. साहम्मिअथेरपुरिसो अन्नधम्मिअतरुणनपुंसगो अ ९. एते नव साहम्मिअथेरपुरिसममुंचमाणेहिं लब्धा ॥ साहम्मिअतरुणपुरिसो अन्नधम्मिअमज्झिमपुरिसो य १, साहम्मिअतरुणपुरिसो अन्नधम्मियथेरपुरिसो अ २. साहम्मियतरुणपुरिसो अन्नधम्मिअतरुणपुरिसो अ ३. साहम्मियतरुणपुरिसो अन्नधम्मिअमज्झिममहिला अ ४. साहम्मिअतरुणपुरिसो अन्नधम्मिअथेरमहिला य ५. साहम्मिअतरुणपुरिसो अन्नधम्मियतरुणी अ ६. साहम्मियतरुणपुरिसो अन्नधम्मिअमज्झिमनपुंसगो अ ७. साहम्मिअतरुणपुरिसो अन्नधम्मिअतरुणनपुंसगो अ ८. साहम्मिअतरुणपुरिसो अन्नधम्मिअथेरनपुंसगो अ ९. एतेवि नव साहम्मिअतरुणममुंचमाणेहिं लब्धा।

साहम्मियमज्झिममहिला। अन्नधम्मिअमज्झिमपुरिसो अ १, साहम्मिअमज्झिममहिला अन्नधम्मिअथेरपुरिसो अ २. साहम्मियमज्झिममहिला अन्नधम्मिअतरुणपुरिसो अ ३. साहम्मिअमज्झिममहिला अन्नधम्मिअमज्झिममहिला अ ४. साहम्मिअमज्झिममहिला अन्नधम्मिअथेरमहिला अ ५. साहम्मिअमज्झिममहिला अन्नधम्मिअतरुणमहिला अ ६, साहम्मिअमज्झिममहिला अन्नधम्मिअमज्झिमनपुंसगो अ ७, साहम्मिअमज्झिममहिला अन्नधम्मिअथेरनपुंगगो अ ८, साहम्मिअमज्झिममहिला अन्नधम्मिअतरुणनपुंसगो अ ९, एते नव साहम्मिअमज्झिममहिलाए लब्धा ॥ साहम्मिआ थेरी अन्नधम्मिअमज्झिमपुरिसो अ १. साहम्मिअथेरी अन्नधम्मिअथेरपुरिसो अ २. साहम्मिअथेरी अन्नधम्मिअतरुणपुरिसो य ३. साहम्मियथेरी अन्नधम्मिअमज्झिममहिला अ ४. साहम्मिअथेरी अन्नधम्मिअथेरी अ ५, साहम्मिअथेरी अन्नधम्मिअतरुणी अ ६. साहम्मिअथेरी अन्नधम्मिअमज्झिमनपुंसगो अ ७, साहम्मियथेरी अन्नधम्मिअथेरनपुंसगो अ ८. साहम्मिअथेरी अन्नधम्मिअतरुणनपुंसगो अ ९, एते साहम्मियथेरीए अमुंचमाणीए लब्धा ॥ साहम्मिअतरुणी अन्नधम्मिअमज्झिमपुरिसो य १, साहम्मिअतरुणी अन्नधम्मिअथेरपुरिसो अ २. साहम्मिअतरुणी अन्नधम्मियतरुणपुरिसो य ३, साहम्मियतरुणी अन्नधम्मिअमज्झिममहिला य ४. साहम्मिअतरुणी अन्नधम्मिअथेरी य ५ साहम्मिअतरुणी अन्नधम्मिअतरुणी अ ६ साहम्मिअतरुणी अन्नधम्मिअमज्झिमनपुंगगो अ७. साहम्मिअतरुणी अन्नधम्मिअथेरनपुंसगो अ ८ साहम्मिअतरुणी अन्नधम्मिअतरुणनपुंसगो अ ९, एते नव साहम्मिअतरुणीए अमुंचमाणीए लब्धा ॥

साहम्मिअमज्झिमनपुंसगो अन्नधम्मिअमज्झिमपुरिसो अ १. साहम्मिअमज्झिमनपुंसगो अन्नधम्मिअथेरपुरिसो अ २, साहम्मिअमज्झिमनपुंसगो अन्नधम्मिअतरुणपुरिसो अ ३. साहम्मि-

अमज्झिमनपुंसओ अन्नधम्मिथमज्झिममहिला य ४, साहम्मिअमज्झिमनपुंसओ अन्नधम्मिअथेरी अ ५, साहम्मिअमज्झिमनपुंसओ अन्नधम्मियतरुणी अ ६, साहम्मियमज्झमनपुंसओ, अन्नधम्मियमज्झिमनपुंसओ अ ७, साहम्मिअमाज्झिमनपुंसओ अन्नधम्मियथेरनपुंसओ अ ८, साहम्मिअमज्झिमनपुंसओ अन्नधम्मिअतरुणनपुंसओ अ ९, एते नव साहम्मिअमज्झिमनपुंसगेण अमुंचमाणेण लद्धा ॥ साहम्मिअथेरनपुंसओ अन्नधम्मिअमज्झिमपुरिसो अ १, साहम्मिअथेरनपुंसगो अन्नधम्मिअथेरपुरिसो अ २, साहम्मिअथेरनपुंसगो अन्नधम्मिअतरुणपुरिसो अ ३, साहम्मिअथेरनपुंसगो अन्नधम्मिअमाज्झिममहिला अ ४, साहम्मिअथेरनपुंसगो अन्नधम्मिअथेरी अ ५, साहम्मिअथेरनपुंसओ अन्नधम्मि अतरुणी अ ६, साहम्मिअथेरनपुंसगो अन्नधम्मिअमज्झिमनपुंसगो अ ७, साहम्मिअथेरनपुंसगो अन्नधम्मिअथेरनपुंसगो अ ८, साहम्मिअथेरनपुंसगो अन्नधम्मिअतरुणनपुंसगो अ ९, एते नव साहम्मियथेरनपुंसगेण अमुंचमाणेण लद्धा ॥ साहम्मिअतरुणनपुंसगो अन्नधम्मिअमज्झिमपुरिसो अ १, साहम्मिअतरुणनपुंसगो अ २, साहम्मिअतरुणनपुंसगो अन्नधम्मिअतरुणपुरिसो अ ३, साहम्मिअतरुणनपुंसगो अन्नधम्मिअमज्झिममहिला अ ४, साहम्मिअतरुणनपुंसगो अन्नधम्मिअथेरी अ ५, साहम्मिअतरुणनपुंसगो अन्नधम्मिअतरुणी अ ६, साहम्मिअतरुणनपुंसगो अन्नधम्मिअमज्झिमनपुंसगो अ ७, साहम्मिअतरुणनपुंसगो अन्नधम्मिअथेरनपुंसगो अ ८, साहम्मिअतरुणनपुंसगो अन्नधम्मिअतरुणपुंसगो अ ९, एते नव साहम्मिअतरुणनपुंसगेण अमुंचमाणेण लद्धा ॥ एते नव नवगा साहम्मिअअन्नधम्मिअचारणिआए होंति। एगत्थ मिलिआ एक्कासीति॥ उक्तं पृच्छाद्वारम्। (अथ) "छक्के पन्नरसगणा" (यदुक्तं)तां विवृण्वन्नाह-

मू. (५८) तिविहो पुढविक्काओ सच्चित्तो मीसओ स अच्चित्तो।
एक्केक्को पंचविहो अच्चित्तेणं तु गंतव्वं ॥

वृ. त्रिविधःपृथिवीकायः-सच्चित्तोमिश्रोऽचित्तश्चेति, इदानींसत्रिविधोऽप्येकैकःपञ्चप्रकारः, तत्रयोऽसौ सचित्तः स कृष्णनीलरक्तपीतशुक्लभेदेन पञ्चधा, एवं मिश्राचित्तावपि, तत्र कतरेण गन्तव्यमित्याह-'अच्चित्तेणं तु गंतव्वं'ति, तत्र योऽसावचेतनस्तेन गन्तव्यमित्युत्सर्गविधिः, तत्र स एव पृथिवीकायः शुष्क आर्द्रश्च स्यात्, आह च-

मू. (५९) सुक्कोल्ल उल्लगमणे विराधना दुविह सिग्गरवुप्पंते।
सक्कोवि अ धूलीए ते दोसा भद्दिए गमनं ॥

वृ. शुष्कः-चिक्खल्ल आर्द्रश्चेति, तत्र द्वयोः शुष्काऽऽर्द्रयोः शुष्केन गन्तव्यं, किंकारणं?, यत आर्द्रगमने विराधना द्विधा भवति आत्मसंयमयोः, तत्रात्मनो विराधना कण्टकादिवेधात्, इतरा तु त्रसादिपीडनात्। इदानीं विराधनाऽधिकदोषप्रदर्शनायाह-'सिग्गरवुप्पंते' 'सिग्गर'त्ति श्रमो भवति. 'वुप्पंते'त्ति कर्दम एव निमज्जति, सति तत्र शुष्केनपथा गमनमप्यनुज्ञातमार्गात्, तेनापि न गन्तव्यं यद्यसौ धूलीबहुलो भवति मार्गः, किंकारणं?, यतो धूलीबहुलेनापि पथा गच्छतस्तएव दोषाः, के चते?, संयमविराधना आत्मविराधना च, तत्रात्मविराधना अक्ष्णोर्धूलिः प्रविशति, निमज्जन श्रान्तश्च भवति. उपकरणं मलिनीभवति, तत्र यद्युपकरणक्षालनं करोत्यसमाचारी. अथ न क्षालयति प्रवचन-हीलना स्यात्, अत उच्यते 'भद्दिए गमणं'ति, भाष्टया गन्तव्यं-योगरहितया तु गन्तव्यमिति। इदानीं भाष्यकार आर्द्रस्य पृथिवीकायस्य भेदान दर्शयन्नाह-

मू. (६०) तिविहो उ होइ उल्लो महुसित्थो पिंडओ य चिक्खल्लो।
लत्तपदोलित उदओ वुप्पिज्जड जत्थ चिक्खिल्लो ॥ [भा. ३३]

वृ. यस्तावदार्द्रः स त्रिविधः-'मधुसित्थो पिंडओ य चिक्खल्लो' एतेषां यथासङ्ख्येन स्वरूपमाह-'लत्तपहलित्तउंदग खुप्पिज्जति जत्थ चिक्खल्लो' 'लत्त' त्ति अलक्तोऽलक्तकः पथः येन प्रदेशेनालक्तकः कामिन्याः पात्यंतस्तावन्मात्रंयोलिम्पतिकर्दमः समधुसित्थकोऽभिधीयते. उंडकाः-पिण्डकास्तद्रूपा यो भवति, पादयोर्यः पिण्डरूपतया लगति स पिण्डक इत्यर्थः, यत्र तु निमज्जनं स्यात्स चिक्खल्ल इति। शुष्कमार्गश्च भाष्यकृता नव्याख्यातः, प्रसिद्धत्वादभेदरहितत्वाच्चेति। अथ सः मार्गः शुष्कचिक्खल्लरूपोऽपि सप्रत्यपायो निष्प्रत्यपायश्चेति, ते चामी प्रत्यपायाः-

मू. (६१) पच्चवाया बालाइभावया तेनकंटगा मेच्छा।
अक्कंतमनक्कंत सपच्चवाएयरे चेव॥

वृ. इह हि प्रत्यपाया नाम दोषा, के ते ?, व्यालादिश्वापदास्तेनाः कण्टका म्लेच्छा इति। तत्र पढमं सक्कंणं भट्टाए गम्मइ, सो दुविहो-अक्कंतो अनक्कंतो, अक्कंतेण गम्मइ, जोऽवि अक्कंतो सोविदुविहो-सपच्चवाओ निपच्चवाओ य. पच्चवाया य तेनादओ भणिआ, निप्पच्चवाएणं गम्मइ। अहवा अनक्कंता भट्टा सपच्चवाया य होज्जा ताहे धूलीपंथेणं अक्कंतेन गम्मइ. अहव न होज्जा धूलीपंथा सपच्चवाओ य होज्जा ताहे उल्लेणं गम्मइ, सो अ तिविहो-मधुसित्थो पिंडओ चिक्खल्लो य. तत्थक्कंतो दुहा-अक्कंतो अनक्कंतो य. अक्कंतेणं गम्मइ, प्रासुकत्वात्, सो दुविहो सपच्चवाओ अपच्चवाओ य. निपच्चवाएणं गम्मइ. तस्स असइ अनक्कंतेणं आत्मादिरक्षाहेतुत्वात्। एवं सर्वत्र निष्प्रत्यपायेन गन्तव्यम्। 'अक्कंतो अपच्चवाओ' 'अक्कंतमनक्कंतो सपच्चवाएतरं चेव' त्ति कहियं॥ अत्र भाष्टयाः स्वल्वभावे धूलीपथेन यायात्, आह च-

मू. (६२) तस्सासइ धूलीए अक्कंत निपच्चएण गंतव्वं।
मीसगसच्चित्तसुऽवि एस गमो सुक्कउल्लाइं॥

वृ. 'तस्याः' भाष्टयाः 'असति' अभावे सति धूलीपथेन गन्तव्यं, कीदृशेन ?-आक्रान्तेन निष्प्रत्यपायेन चेति। एव तावदचित्तपृथिवीकायमार्गगमने विधिरुक्तः, तदभावे मिश्रेण पृथिवीकायेन गन्तव्यं, तत्राप्येष एवाधस्तात्योविधिर्दृश्यः, तदभावे सचित्तेन गन्तव्यं, तथा चाह-'मीसगसच्चित्तसुविएस गमो' मिश्रसचेतनेष्वपि पृथिवीकायेषु एष गमः शुष्काद्रादिः, एतदुक्तं भवति-प्रथमं मिश्रशुष्केन गम्यते, तदभावे मिश्रार्द्रेण, तदभावे सचित्तशुष्केन, तदभावे सचित्तार्द्रेण। अथवा 'हस्स गमो त्ति' 'अक्कंतानक्कंतसपच्चवायभेयभिन्नो जोएयव्वो सव्वत्थ सपच्चवाओ परिहरणीओ त्ति' एष विधिः। स इदानीं साधुः स्थण्डिलादस्थण्डिलं संक्रामन कस्मिन कस्मिन् काले केन प्रमार्जनं करोतीत्यत आह-

मू. (६३) उब्भबद्धे रयहरणं वासावासासु पायलेहणिआ।
वडउंबर पिलंखू तस्स अलंभंमि चिंचिणिआ॥

वृ. 'उब्भबद्धे' शीतोष्णकाले 'रयहरणं' ति रजोहरणेन प्रमार्जनं कृत्वा प्रयति। तथा 'वासावासासु पायलेहणिआ' वर्षासुयावद्वर्षा वर्षाकालेवर्षतिसतिपादलेखनिकया प्रमार्जनंकर्त्तव्यं, सा च किमर्थी भवत्यत उच्यते-'वडे' त्यादि, वटमयी उदुम्बरमयी प्लक्षमयी, 'तस्यालाभे' प्लक्षस्याप्राप्तौ पिञ्चणिकामयी अम्बिलिकामयीति। सा च कियत्प्रमाणा भवतीत्याह-

मू. (६४) बारसअंगुलदीहा अंगुत्तमंगं तु होइ विच्छिन्ना।
घनमसिणनिव्वणावि अ पुरिसे य पनेअ॥

वृ. द्वादशाङ्गुलानि दीर्घा भवति, येन मध्ये हस्तग्राहो भवति, विस्तारस्त्वेकमङ्गुलं स्यात्। सा च 'घना'

निबिडा कार्या, मसृणा निर्व्रणा च भवति। सा च किमेकैव भवति? नेत्याह-पुरुषे च प्रत्येकम्-एकैकस्य पृथगसौ भवति।

मू. (६५/१) उभओ नहसंठाणा सचित्ताचित्तकारणा मसिणा।

वृ. 'उभयोः' पार्श्वयोः 'नखसंस्थाना' नखवर्त्तीक्ष्णा, किमर्थमसौ उभयपार्श्वयोस्तीक्ष्णा क्रियते?, सचित्ताचित्तकारणात्, तस्याएकेनपार्श्वेन सचित्तपृथिवीकायः सँल्लिख्यते, अन्येनपार्श्वेना-चित्तपृथिवीकाय इति। किंविशिष्टा सा? 'मसिण'त्ति, मसृणा क्रियते, नातितीक्ष्णा, यतो लिखत आत्मविराधना न भवति। पृथिवीकायद्वारं गतम्। अप्कायद्वारमाह-

मू. (६५/२) आउक्काओ दुविहो भोमो तह अंतलिक्खो य॥

वृ. अप्कायो द्विविधः-भौमोऽन्तरिक्षश्च। इदानीं प्रत्यासत्तिन्यायादन्तरिक्षस्तावदुच्यते-

मू. (६६) महिआदायं तह अंतरिक्खिअं दट्ठुं न निग्गच्छे।
आसन्नाओ नियत्तइ दूरगओ वरं च रुक्खं वा॥

वृ. सोऽन्तरिक्षजो द्विविधः, महिका-धूमिकारूपोऽप्कायः, 'वास'मिति वर्षारूपश्चाप्कायः, तमेवंप्रकार-मुभयमपि दृष्ट्वाऽन्तरिक्षजं न निर्गच्छेत्, अथ कथञ्चिन्निर्गतस्य सतो जातं महिकावर्षं ततः आसन्नादि-भूभागं निवर्त्तते, अथ दूरमध्वानं गतः ततः किं करोति?-'गृहं' शून्यं गृहं वृक्षं वा बहलमाश्रित्य तिष्ठति।

अथ सभयप्रदेशे गतस्ततः किं कर्त्तव्यमित्याह-

मू. (६७) सभए वासत्ताणं अइदए सुक्खरुक्खचडणं वा।
नइकोप्परतरणेणं भोमे पडिपुच्छिआगमनं॥

वृ. 'सभये' गृहादौ स्तेनकादिभयोपेते 'वर्षात्राणं' वर्षाकल्पं प्रावृत्य व्रजति, अथ 'अत्युदके' उदकान् वर्षः ततः किं करोति?-शुष्कवृक्षारोपणं कर्त्तव्यम्। अथार्यो सापायो नास्ति ततस्तरण्डं गृहीत्वा तरितुं जलं व्रजति इत्युक्तमन्तरिक्षजः, इतरमाह-'नदी'त्यादि, यदा तुतस्य साधोर्गच्छतोऽपान्तराले नदी स्याद्बहुरूपा ततस्तस्या नद्याः कूर्परेण व्रजति, नदीं परिहृत्येत्यर्थः। अथवा 'वरणेन' सेतुबन्धेन व्रजति। एवं भीमे प्रतिपृच्छ्य पूर्वमेव कञ्चित्पुरुषं गमनं कर्त्तव्यम्। इदानीं यदुक्तं 'वरणेनगन्तव्य'मिति, तत्संक्रमोनिरूप्यते, किंविशिष्टेन तेन गन्तव्यं? कीदृशेन वा (न) गन्तव्यमित्यत आह-

मू. (६८) नेगंगिपरंपरपारिसाडिसालंबवज्जिए सभए।
पडिवक्खेण उ गमनं तज्जाइयरे व संडवा॥

वृ. 'नेगंगिपरंपरपारिसाडिसालंबवज्जिए सभए पडिवक्खेण उ गमनं'ति न एकाङ्गी-अनेकाङ्गी-अनेकैष्टकादिनिर्मितः संक्रमः, 'परंपर' इति परम्परप्रतिष्ठः-न निर्व्यवधानप्रतिष्ठः, 'परिसाडी'ति गच्छतो-यत्र धूल्यादि निषतति, 'सालंबवज्जिए'त्ति सालम्बवर्जितः-सावष्टम्भत्वरहित इत्यर्थः, सभयो यत्र-व्यालादयः शृषिरेषु सन्ति, यद्यभिगुणैर्युक्तः संक्रमो भवति तदा न यातव्यं, कथं तर्हि यातव्यं?-'प्रतिपक्षेण' उक्तस्य विपर्ययेण। तत्रानेकाङ्गिनः प्रतिपक्ष एकाङ्गी, परम्परस्यापरम्परकः, परिशाटिनोऽपरिशाटी, सालम्बवर्जितस्य सालम्बः, अभयस्य निर्भयः प्रतिपक्षः, एतेषु प्रतिपक्षेषु गमनं। भङ्गकाश्चात्र षट्पञ्चक-निष्पन्नत्वाद्द्वात्रिंशत्, तद्यथा-"अनेगंगिओ परंपरो परिसाडी सालंबवज्जितो सभउत्तिपढमो" एवं स्ववुद्ध्या रचनीयम।

पाठान्तरं वा 'नेगंगिचलथिर'त्ति, शेषं प्राग्वत्, तत्रानेकाङ्गी पूर्ववत्, 'चलथिर'त्ति एतत्पदद्वयं, तथाहि-

एकश्चलः संक्रमो भवति, अपरस्त्वस्थिरः तत्रारूढे गन्तरि भवति वेशवधः अन्दोलने स चलः, अस्थिरस्तुभूमावप्रतिष्ठितः, शेषं प्राग्वत, प्रतिपक्षा अपि प्राग्वदेव. केवलं चलस्याचलः प्रतिपक्षः, अनन्दोलनशीलत्वात्, अस्थिरस्य तु स्थिरः, भुवि प्रतिष्ठितत्वात्. एतेषुगमनं. एतानि च षट्पदानि, तद्यथा-''एगंगि चलो अथिरे पारिसाडि सालंबवज्जिए सभए'' एष प्रथमः, एवं चतुस्सङ्घो भंगो कायव्वो। अन्ये त्वेवं पठन्ति-''एगंगिचलथिरपारिसाडिसालंबवज्जिए सभए'' एकाङ्गेन निर्वृत्त एकाङ्गी. चलः-पद्मनर्शालः. अस्थिरः-अधरत्वादप्रतिष्ठितः. परिशाटी सालम्बवर्जितः सभयः. एभिः षड्भिः षंढश्चतुःषष्टिभङ्गाः. अस्यां या मध्ये द्वात्रिंशत्तमो भङ्गः स एव परिगृह्यते, तद्ग्रहणाच्च तुल्यमध्यग्रहणाद्द्वयोरन्तर्वर्तिनः संगृहीताः. 'षडिपक्खेण' गमनं'ति. अस्य मध्यमस्य भङ्गस्यापन्यन्तस्य यः प्रतिपक्ष एकान्तेन शुद्धश्चतुःषष्टितमस्तेन गन्तव्यं. अयमुत्सर्गविधिः. एतदभावे ये निर्भयाः संकीर्णभङ्गास्तेनापि गन्तव्यमेवेत्यपवादः। अथ संक्रमो नास्ति ततः को विधिः?, अत आह-'तज्जाइयरं व संडेय'त्ति. षण्ढवक्रः-पाषाणादि यो ऽन्यस्मिन पाषाणादौ पादनिक्षेपः स संढेवकः. स च द्विविधः-तज्जातः इतरश्च. तत्र तज्जातः-तस्यामेव भुवि यो जातः. इतरस्त्वन्यत आनीय तत्र निहितः. स एकैकश्त्रिविधः। तदेव त्रिविध्यं दर्शयन्नाह-

मू. (६९) चलमाणमनक्कंते सभए परिहरिअ गच्छ इयरेणं।
दगसंघट्टणलेवोपमज्ज पाए अदूरंमि॥

वृ. तत्र योऽगीतज्ञातः स त्रिविधः-चलमानः अनाक्रान्तः सभयश्च, योऽप्यसावतज्ज्ञातः असौ-प्येवमेव त्रिविधः। ततश्चैवंविधेऽपण्ढेवके किंकर्तव्यमित्याह-'गच्छ' व्रज 'इतरेण'तियोऽचलः आक्रान्तः असभयश्चेति, अनेनपदत्रयेणाष्टौ भङ्गाः सूचिताः, तेषां चैषाचलः-अनाक्रान्तः। अथ संक्रमो नास्ति ततउदकमध्येनैव गन्तव्यं. तत्रको विधिरित्याह-'दग'इत्यादि, 'दग-संघट्टण'मिति. उदके जङ्घार्द्धप्रमाणं, 'लेव'ति उदकमेव नाभिप्रमाणं. तत्र कथमवतरणीयमित्याह-'पमज्ज पाए अदूरंमि' पादौ प्रमृज्य, पादौ प्रमृज्य, कियति भूमिभागे व्यवस्थित उदकस्येत्यत आह, अदूरे-आसन्ने तीर इत्यर्थः। ततश्च तूर्णं जलम-

मू. (७०) पाहाणे महुसित्थे वालुअ तह कद्दमे य संजोगा।
अक्कंतमनक्कंते सपच्चवायंतरं चेव॥

वृ. पाषाणजलंमधुसित्थजलं वालुका-जलंकर्दमजलं चेति, तत्र पाषाणजलं-यत्पाषाणानामुपरि वहति. मधुसित्थजलं यद आलक्तक कमार्गावगाहिकर्दमस्योपरि वहति. वालुकाजलं तु यद्वालुकाया अपरि वहति. कर्दमजलं तु यद घनकर्दमस्योपरि वहति, अत्र च पाषाणजलादेरक्रान्तानाक्रान्त-सप्रत्यपायनिष्प्रत्यपायैः सह संयोगा भवन्ति-भङ्गका इत्यर्थः। तत्थ पाहाणजलं अक्कंतं अनक्कंतं च. जं तत्थ अक्कंतं तेन गम्मति, जं न अक्कंतं सपच्चवायं अपच्चवायं च. अपच्चवाएणं गम्मति. सपच्चावायं पाहाण जलंहोज्जा ताहे मधुसित्थजलेण गम्मइ, तत्थ ऽवि एस्स भेदो. तस्साभावे वालुआजलेण गम्मइ, तस्सवि एए चेव भेआ. कद्दमजलेऽवि एवमेव अक्कंतमनक्कंतसपच्चवायेयरा, सव्वत्थ निप्प-च्चवाएण गम्मइ। तथाहि-एककस्मिंश्चतुर्विधे जले चतुर्भङ्गी. साचेयम्-तत्थ तावपाहाणजलं अक्कंतं अपच्चवायं पढमो भंगो, एवमादि ४. एवं महुसित्थेपि ४ वालुयाजलेपि ४ कद्दमजलेपि ४। अथ सङ्घट्टादिलक्षणप्रतिपत्तिसंग्रहया भाष्यकृदाह-

मू. (७१) जंघद्धा संघट्टो नाभी लेवो परेण लेवुवरिं।
एगो जले थलेगो निप्पगले तीरमुस्सग्गो॥ [भा. ३४]

वृ. जङ्घार्द्धमात्रप्रमाणं जलं संघट्ट उच्यते, नाभिप्रमाणं जलं लेप उच्यते. परेण नाभेर्जलं यत्तल्लेपोपरि

उच्यते, इदानीं जङ्घार्द्धप्रमाणं जलमुत्तरतो यो विधिस्य उच्यते - एकः पादो जले कर्त्तव्योऽन्यःस्थले - आकाशे, अथ तीरप्राप्तस्य विधिमाह - 'निप्पगलं' ति एकः पादो जले द्वितीयश्च आकाशे निष्प्रगलत्वात्ततः आश्यानः स्थले क्रियते पुनर्द्वितीयमपि पादं निष्प्रगलं कृत्वा ततस्तीरे कायोत्सर्गं करोति ॥

अथतज्जलं नाभिप्रमाणादि भवति निर्भयं च ततः का सामाचारीत्याह -

मू. (७२) निभएऽगारित्थीणं तु भग्गओ चोलपट्टमुस्सारे।
सभए उत्तरंते वा उत्तिन्नेसु घनं पट्टं ॥

वृ. निर्भये जले सत्यहरणशीलत्वात् ध्यानादिरहितत्वाच्च अगाराणां स्त्रीणां च मार्गतः - पृष्ठतो गच्छति, गच्छता च किं कर्त्तव्यं ?, चोलपट्टक उपर्यूत्सारणीयः । सभये तु तस्मिन् अत्यग्घे वा 'उत्तिन्नेसु' अवतीर्णेषु कियत्स्वपि गृहिषु मध्येस्थितः प्रयाणि 'घनं पट्ट' न्ति चोलपट्टकं च 'घनं' निबिडं करोति यथा तोयेन नापद्यिवत इति ।

मू. (७३) दगतीरं ता चिट्ठे निप्पगलो जाव चोलपट्टो उ।
सभए पलंबमाणं गच्छइ काएण अफुसंतो ॥

वृ. उत्तीर्णश्चोदकतीरे तावत्तिष्ठति यावन्निष्प्रगलो जातश्चोलपट्टकः, अथाग्रे प्रदेशः सभयस्ततः सभये प्रलम्बमानं चोलपट्टकं गृहीत्वा व्रजति । कथम् ? - 'कायेन' शरीरेणास्पृशन्, शरीरकृताप्कायविराधनाभयात्, यदा तु नद्यामवतरतो गृही सहायो नास्ति ततः किं कर्त्तव्यमित्याह -

मू. (७४) असइ गिहि नालियाए आनक्खेउं पुणोऽवि पडियरणं।
एगाभोग पडिग्गह केई सव्वाणि न य पुरओ ॥

वृ. गृहस्थाभावे नालिकया तन्नदीजलं 'आणक्खेउं' परीक्ष्य गन्तव्यं, नालिका चात्मप्रमाणा चतुरङ्गुलाधिकयष्टिका तया परीक्ष्य 'पुणोऽवि पडियरणं' ति पुनः प्रतिनिवृत्त्य प्रतिचरणा - आगमनं करोति, आगत्य च 'एगाभोग' त्ति एकत्राभोगः, आभोगः - उपकरणं 'एक' त्ति एकत्र करोति, एकत्र बन्धातीत्यर्थः, 'पडिग्गह' त्ति पतद्ग्रहं च पृथगधोमुखं घनपात्रकबन्धेन बध्नाति, तं च हस्तेन गृह्णाति तरणार्थम् । कश्चित्त्वेवमाह - पतद्ग्रह उपलक्षणं पात्रकाणां, ततश्च सर्वाण्येव पात्रकाणि अधोमुखानि घनेन चीरेण बध्यन्ते तरणार्थमिति । एस ताव सामन्नेन नदीए अत्थग्घाए गच्छंतस्स विही भणिओ, यदुत - 'एगाभोगपडिग्गह केई सव्वाणि' त्ति, नावाएवि आरूहंतस्स एसेव विही, किंतु नावाए चडंतो 'न य पुरउ' त्ति नावाए पढमं नारुहइ - अग्गिमो न चडइ, प्रवर्त्तनाधिकरणदोषात्, भद्दगपंतदोसाओ य, जइ भद्दओ तओ सउणंति मन्नमाणो आरुहइ, अह पंतो तओ अवसउणंति मन्नमानो कोवं गेण्हति । तथा चरमहओ मग्गओवि नारोहइ - निप्पच्छिमो नारुहइ, मा सा अक्कारूहंतस्सेव वच्चिहिति नावा, अतो थेवेसु आरूढेसु गिहिसु आरुहइ ॥

मू. (७५) सागारं संवरणं ठाणतिअं परिहरित्तु अनाबाहं।
ठाइ नमोक्कारपरो तीरे जयणा इमा होइ ॥

वृ. आरुहन्तो अ सो साहू सागारं संवरणं - पच्चक्खाणं करेति, आरूढो य संतो ठाणतिअं परिहरिउं अनाबाहं ठाइ, तत्थ पुरओ न ठाइयव्वं, तत्थ किल नावादेवयाहिवासो, न य मग्गओ, अवल्लगवाहणभयओ, न मज्झओ, मा नावाओ उदकं उल्लिंचाविज्जिहिन्ति । कत्थ पुण ठाइयव्वं ?, पासे, तत्थ य उवउत्तो चिट्ठइ नमोक्कारपरो । एवं कुशलेन तीरपत्तस्स को विही ?, भन्नइ - 'तीरे जयणा इमा होति' वक्खमाणा -

मू. (७६) नवि पुरओ नवि मग्गओ मज्झे उस्सग्ग पत्तवीसाउ।

दड्ढउदयं तुंबेसु अ एस विही होइ संतरणे ॥

वृ. इदानिं तीरपत्ताए नावाए उत्तरंतो न लो अअग्गिमो उत्तरति. पवत्तणाधिकरणादेव. नावि मग्गओ लोयस्स उत्तरति. झडत्ति पडिओ गच्छेज्जंति.(चल)स्वभावत्वात. अहवा सो पच्छा एक्को उत्तरंतो कयाइ धरेज्जा नावि(ण)तरपणट्ठा, तम्हा थोवेसु उत्तिन्नेसु गिहिसु उत्तरति। तीरत्थेण किंकायव्वंति? भन्नइ- 'उस्सग्गो' कायोत्सर्गः कर्त्तव्यः, तत्र च किमनन्त उच्छ्वासाः इत्यत आह- पन्नवे सोऽ सि पञ्चविंशतेरुच्छ्वासैरन्तर्नीयाः। 'दड्ढउदंति दतिउ चक्खल्लाउड्ढओ जेन नरिज्जइ 'तुंबे' अलाउअं. एएहिं नावाए अभावे संतरिज्जइ, जंडिलरणजोग्गं पाणियंति। 'एस विही'त्ति दृतिका-दिभिस्तीर्णस्य एष एव विधिः 'संतरणे' प्लवने. यदुक्तं - 'तीरप्राप्तेनोत्सर्गः कार्य' इति. अत्र चाप्कायेमिश्राचित्तयतनानासाक्षादुक्ता। छद्मस्थेन तयोस्तत्त्वतोज्ञातुमशक्यत्वात. यश्चज्ञास्यतिसकरिष्य-त्येवेति. सच्चित्तस्य तृणं वा उक्तं अप्कायद्वारम. अथ तेजस्कायस्तत्राह।

मू. (७७) वोत्तीणे अनुलोमे पडिलोमउदंसु ठाइ तणरहिए।
अग्गइ व गंतिनंतगउल्लण तलिगाइ डेवणया ॥

वृ. यदा हि तस्य साधोर्गच्छतो वनदवोऽनुकूलो भवति, यदभिमुखं साधुर्व्रजति तदभिमुख-मग्निरभ्येतीत्यर्थः, ततस्तस्मिन् वनदवे व्यतिक्रान्ते सति गन्तव्यं, यदा तु प्रतिलोभः-अभिमुखमायाति ततः 'अदंसु'त्ति आर्द्रेषु प्रदेशेषु तिष्ठति येनासौ नाभिभवति, तृणरहिते वा. 'अगति' अभावे तस्य 'कत्तणिंतगउल्लण-'त्ति. कृत्तिः-चर्म तेनात्मानमावृत्य तिष्ठति, तदभावे 'नंतगउल्लणं' अनंतकंकम्बलादिवस्त्रं तदार्द्रीकृत्य पानकेन तेनात्मानमावृणोति, ततस्तिष्ठति. अथ गच्छतो बहुगुणं ततः 'तलिगाविडेवणया'त्ति उपानहौ परिधाय डेवनं-लङ्घनमग्नेः कृत्वा व्रजति। तत्र यदा विध्यातं तेजस्काये याति तदाऽचित्ततेजस्कायतना. यदा तूपानहौ परिधाय व्रजति तदा सचित्तो मिश्रो वा तेजस्कायः, एषा त्रि-प्रकारा यतना। उक्तं तेजस्कायद्वारम. अथ वायुद्वारं-

मू. (७८) जह अंतरिक्खमुदए नवरि निअंतं अ वणनिगुंजे य।
ठाणं सभए पाउण घनकप्पमलंबमाणं तु ॥

वृ. यथा अन्तरिक्षोदके यतनोक्ता। 'आसन्ना नियत्तंति 'इत्यादिलक्षणा सेवेहापि दृश्या. 'नवर'न्ति केवलमयं विशेषः, 'नितम्बे' पर्वतकटके वननिकुञ्जे वा स्थातव्यम्, यद्यसौ प्रदेशः सभयस्ततः 'पाउण घणकप्पं' घनं-निश्छिद्रकल्पं-कम्बलादिरूपंपावृत्यगच्छति 'अलम्बमाणंतु'त्तियथा कोणानप्रलम्बते, प्रलम्बमानेवा-युविराधनात। तत्र महावातो गच्छतः कल्पप्रावृतशरीरस्य सचित्तयतना भवति, अप्रलम्बं कल्पं कुर्वतः अचेतनयतना। मिश्रयतना कल्पप्रावृतस्यैव भवति, यतः किंचि ठक्किअं किंचिच्च न, इयं त्रिविधा यतना॥

उक्तं वायुद्वारम. अथ वनस्पतिद्वारमुच्यते-

मू. (७९) तिविहो वणस्सई खलु परित्तऽनंता थिरथिरक्कडो।
संजोगा जह हेट्ठा अक्कंताई तहेव इहं ॥

वृ. त्रिविधो वनस्पतिः-अचित्तो मिश्रः सचित्तश्च, योऽप्यावचित्तः स परित्तो अनंतोय. परित्तो थिरो अथिरो अ, अनंतोवि थिरो अथिरो अ, इदानिं मीसो सो दुविहो-परित्तो अनंतो अ, परित्तो दुहा-थिरो अथिरो अ. अनंतोऽवि दुविहोथिरो अथिरो अ. इदानिं सचित्तो, सो दुहा-परित्तो अणंतो अ. परित्तो दुहा-थिरो अथिरो अ. अनंतो दुहा-थिरो अथिरो अ. एक्केक्को अ भेओ चउहा-अक्कंतो निपच्चवाओ अ १, अक्कंतो सपच्चवाओ अ २, अनक्कंतो अपच्चवाओ य ३, अनक्कंतो सपच्चवाओ अ ४। तत्थ का जयणा? अचित्तेणं गम्मइ, तत्थवि परित्तेण, तेनवि थिरेण, तत्थवि अक्कंत-निपच्चवाएणं, तदभावे अनक्कंतेणं निपच्चवाएणं, तदभावे अचित्तपरित्तेणं अथिरेण।

गम्मइ, सोऽवि यदि अक्कंतो निपच्चवाओ अ तदभावे अनक्कंतेण निपच्चवाएण य, तदभावे अचित्तानंतेण थिरेण गम्मति, तत्थवि तेन अक्कंतेण निपच्चवाएण य, तदभावे अनक्कंतनिप्पच्चवाएणं तदभावे अचित्ताणंतेणं अथिरेण सो अ अक्कंतनिपच्चवाओ य यदि होति, तदभावे अणक्कंतनिप्पच्चवाएणं, तदभावे मीसेणं, एवमेव भंगा जाणियव्वा जहा अचित्ते, तदभावे सचित्तेणं गम्मइ, तत्थवि एसेव गम्मइ। अथ गाथाऽक्षरघटना-त्रिविधो वनस्पतिः-सचित्तः अचित्तः मिश्रश्चेति, तत्रैकैको द्विधा-परीतोऽनन्तश्च, तत्र परीतः पृथक्-शरीराणामेकद्वित्रिअसङ्ख्येयानां जीवानामाश्रयः, अनन्तस्तु अनन्तानामेकैकं शरीरं, स एकैकः स्थिरोऽस्थिरश्च, स्थिरो दृढसंहननः, इतरस्त्वस्थिरः। अत्र चसंयोगाः कर्त्तव्याः, ते चाधस्ताद्-वक्ष्यास्तथैव दृश्याः, ते चाक्रान्तनिष्प्रत्यपायआक्रान्तसप्रत्यपायअनाक्रान्तनिष्प्रत्यपायअनाक्रान्तस-प्रत्यपायरूपाः। ननु चकस्मादचित्तवनस्पतियतनोच्यते ?, तथाहि-सचेतनविषया यतनेति न्यायः, उच्यते, तत्राप्यस्ति कारणं, यद्यपि अचित्तस्तथाऽपिकदाचित्केषाञ्चिद्वनस्पतीनामविनष्टा योनिःस्याद्गुडूच्यामृद्भादीनां, तथाहि-गुडूच्या शुष्काऽपि सती जलसंकान्तादात्म्यं भजन्ती दृश्यते, एवं कङ्कुदक-मृद्भादिरपि, अतो योनिरक्षणार्थमचेतनयतनाऽपि न्यायवत्येवेति। अथवाऽचित्तवनस्पतियतनया दयालुतामाह, अचेतनस्यैते भेदा न भवन्ति, किन्तु सचित्तमिश्रयोरेव योजनीयाः। उक्तं वनस्पति-द्वारम्, अधुना त्रसद्वारमाह-

मू. (८०) तिविहा बेइंदिया खलु थिरसंघयणेयरा पुणो दुविहा।
अक्कंताई य गमो जाव उ पंचिंदिआ नेआ॥

वृ. 'त्रिविधाः' त्रिप्रकारा द्वीन्द्रियाः-सचित्तादिभेदात्, सचित्ताः सकलजीवप्रदेशवन्तः, अचित्तास्तु विपर्ययात्, मिश्रास्त्वेतदेवकरम्बीभूताः, पुनरेकैको द्विविधः, तथाहि-सचित्तो थिरसंघयणो अथिर-संघयणो अ, एवं अचित्तो मिश्रोऽपि, जो सो स्थिरसंघयणो तत्थ चउभंगो-अक्कंतोऽनक्कंतो सपच्चवाओ इयरो य, एवं अन्नेऽपि 'अक्कंतादीय'त्ति आक्रान्तादिगमको-भङ्ग इति, अनेन चतुर्भङ्गिका सूचि-ता। एवमयं क्रमस्त्रीन्द्रियचतुरिन्द्रियपञ्चेन्द्रियाणां सचित्ताचित्तमिश्रादियोजनीय इति॥ एवं तावत्सजातीययतनोक्ता, इदानीं विजातीयेन सहाह-

मू. (८१) पुढविदएय पुढविए उदए पुढवितस बालकंटा य।
पुढविवणस्सइकाए ते चेव उ पुढविए कमणं॥

मू. (८२) पुढवितसे तसरहिए निरंतरतसेसु पुढविए चेव।
आउवणस्सइकाए वनेन नियमा वनं उदए॥

मू. (८३) तेऊवाउविहूणा एवं ससावि सव्वसंजोगा।
नच्चा विराधनदुगं वज्जंतो जयसु उवउत्तो॥

वृ. पृथिव्युदकयोः युगपदभ्रमननया प्राप्तयोः सतोः कतरेण यातव्यमित्याह-पृथिव्या, उदके त्रसादि-सद्भावात्, चशब्दाद्वनस्पतिश्च, पृथिवीं त्यक्त्वेव। अथ पृथिवीवनस्पतिकाययोः सतोः किं कर्त्तव्यमित्याह-पृथिव्यैव गन्तव्यं, वनस्पतौ तद्दोषसंभवात्। पृथिवीत्रसयोः केन गन्तव्यं ?-त्रसरहित-मार्गेण, एतदुक्तं भवति-विरलत्रसेषु तन्मध्येन, निरन्तरेषु तु पृथिव्या, अप्कायवनस्पतिकाययोः सतोः केन यातव्यमित्याह-वनेन वनस्पतिकायेन, उदकेनियमाद्वनस्पतिसद्भावात्॥ तेजस्कायवायुकायाभ्यां रहिता एवं शेषा अपि सर्वसंयोगाः अन्येऽपि ये नोक्तास्तेऽनुगन्तव्याः भङ्गकाः, सर्वथा विराधनाद्वयं ज्ञात्वा-आत्मविराधना संयमविराधना च, एतद्वयमपि यजनेन उपयुक्तः-यतस्व-यतनां कुर्विति। इदानीं यदुक्तं-'एवं ससावि सव्वसंजोगा' इति

ते भङ्गका दर्श्यन्ते, ते चामी-तत्थ पुढविकाओ आऊकाओ वणस्सइकाओ तसकाओ चेति चत्वारि पदानि काउं ततो दुगचारणियाए तिगचारणियाए चउक्कचारणियाए चारयव्वा, सा य इमा चारणिआ-पुढविक्काओ आऊ य पढमो १, पुढवी वणस्सतीबीओ य २, पुढवी तसा य तइओ य ३, एवं पुढवीए तिन्नि लद्धा, आऊ दो लहइ, वणस्सई एक्कंति ६, पुढवी आऊ वणस्सई १, पुढवी आऊ तसा २, पुढवी वणस्सइ तसा ३, आऊवणस्सइतसा ४, एए तिगचारणियाए लद्धा, चउक्कचारणियाए उ एक्को चेव, सव्वेवि एक्कारस अचित्तेहिं पएहिं लद्धा, एवं मीसेसुवि ११ सचित्तेसुवि ११, सव्वेऽवि तेतीसं ३३। उक्ता षट्कायतना। आह-यदा पुनर्व्याघ्रदुस्तटीन्यायेनान्यतरविराधनामन्तरेण प्रवृत्तिरेव न घटां प्राञ्चति तदा किं कर्त्तव्यमित्याह-

मू. (८४) सव्वत्थ संजमं संजमाउ अप्पाणमेव रक्खिज्जा।
मुच्चइ अइवायाओ पुणो विसोही न याविरई॥

वृ. 'सर्वत्र' सर्वेषु कल्पादिषु, किम्? -संयमम्, कार्यं तत्साधनं वा, अनेनैतदर्थमिदमुक्तं भवति, किमेष न्यायः?, नेत्याह-संयमादप्यात्मानमेव रक्षन्, आत्माभावे तत्प्रवृत्त्यसिद्धेः, आत्मानमेव रक्षन्, जीव-द्वित्यर्थः, 'मुच्यते' भ्रश्यते तस्मादतिपातात्-हिंसादि-दोषात्, किंकारणम्?, उच्यते, अतिपाततो यतः पुनर्विशुद्धिस्तपआदिना भविष्यति, अथ मन्यसे-पृथिव्याद्यतिपातोत्तरकालं विशुद्धिर्भवति नाम, किन्तु हिंसायां वर्त्तमानः सः अविरतो लभ्यत इति 'एकव्रतभङ्गे सर्वव्रतभङ्ग' इति वचनात्, नैवं-नास्ति, यत आह-'न याविरई', किं कारणं?-तस्याशयशुद्धतया, विशुद्धपरिणामस्य चमोक्ष-हेतुत्वात्। यद्वा सर्वत्र संयमं रक्षन्नतिपातान्मुच्यते-अतिपातो न भवति, किमयमेव न्यायः?, नेत्याह-संयमादात्मानमेव रक्षन्, येन पुनरपि विशुद्धिर्भवति, न चातिपातेऽप्यविरतिरिति पूर्ववत्। किं कारणं संयमादप्यात्मा रक्षितव्यः?, उच्यते, यतः-

मू. (८५) संजमहेउं देहो धारिज्जइ सो कओ उ तदभावे?।
संजमफाडनिमित्तं देहपरिपालणा इट्ठा॥

वृ. इह हि 'संयमहेतुः' संयमनिमित्तं देहो धार्यते, स च-संयमः कुतः 'तदभावे' देहाभावे?। यस्मादेतदेवं तस्मात् 'संयमस्फातिनिमित्तं' संयमवृद्ध्यर्थं देहपरिपालनमिष्टं-धर्मकायसंरक्षणमभ्युपगम्यते। आह-लोकेनाविशिष्टमेतत्, यथाहि-

मू. (८६) चिक्खल्लवालसावयसरेणुकंटयतणे बहुजलंमि अ।
लोगोऽवि नेच्छइ पहे को नु विसेसो भयंतस्स?॥

वृ. चिक्खल्लव्यालस्वापदसरेणुकण्टकतृणानां बहुजलानां चौरसोपद्रवानां मार्गाणां-पथः लोकोऽपि नेच्छत्येव, अतः को नु विशेषो? लोकात्तस्काशाद्भदन्तस्य येनैवमुच्यत इति?, उच्यते-

मू. (८७) जयणमजयणं च गिही सचित्तमीसे परित्तऽनंते अ।
नवि जाणंति न यासिं अवहपडिन्ना अह विसेसो॥

वृ. यतनामयतनां च गृहिणो न जानन्ति, क्व?-सचित्तादौ, न च 'एतेषां' गृहिणां 'अवधप्रतिज्ञा' वधनिवृत्तिः, अत एव विशेषः।

मू. (८८) अविअ जणो मरणभया परिरक्खमभाव ते विवज्जेइ।
ते पुन दयापरिणया मोक्खत्थमिमी परिहरंति॥

वृ. कण्ठ्या॥ "अपि च" इति अनेनाभ्युच्चयमाह, नवरं 'ते'त्ति साधवो यतनया पथः। इतश्च साधोः प्राणातिपातापत्तावपि गृहिणा सह वैधर्म्यमित्याह-

मू. (८९) अविसिट्ठंमिवि जोगंमि बाहिरं होइ विहुरया इहरा।
सुद्धस्स उ संपत्ती अफला जं देसिआ समए॥

वृ. इह 'अविशिष्टेऽपि' तुल्येऽपि 'योगे' प्राणातिपातादिव्यापारे 'बाह्य' बहिर्वर्त्तिनि भवति 'विधुरता' वैधर्म्यं विसदृशता, इत्थं चैतदभ्युपगन्तव्यम्, इतरथा शुद्धस्य-साधोः संप्राप्तिः' प्राणातिपातापत्तिः 'अफला' निष्फलायतःप्रदर्शिता 'समये' सिद्धान्ततद्विरुध्यते, तस्मादेतदेवमवाभ्युपगन्तव्यं, बाह्यप्राणातिपातव्यापारः शुद्धस्य साधोर्न बन्धाय भवतीति॥

मू. (९०) एक्कंमिवि पाणिवहंमि देसिअं समयहदंतरं समए।
एमेव निज्जरफला परिणामवसा बहुविहाओ॥

वृ. 'एकस्मिन्नपि' तुल्येऽपिप्राणिवधे 'दर्शितं' प्रतिपादितं समयहदन्तरं, क्व?-'समये' सिद्धान्ते, तथाहि-यथा ह्यो पुरुषौ प्राणिवधप्रवृत्तौ, तयोश्च न तुल्यो बन्धो, यस्तत्रातीवसंक्लिष्टपरिणामः स सप्तस्वां पृथिव्यामुत्पद्यते, अपरस्तु नातिसंक्लिष्टपरिणामः स द्वितीयनरकादाविति। इयं तावद्वि-सदृशता बन्धमङ्गीकृत्य, इदानीं निर्जरामङ्गीकृत्य विसदृशतां दर्शयन्नाहएवमेव 'निर्जरा' फलविशेषा अपि परिणामवशाद् 'बहुविधा' बहुप्रकारा विशिष्टविशिष्टनरविशिष्टतमाः। एकां प्राणिजातिमङ्गीकृत्यान्तरमुक्तम्,

अधुना सकलव्यक्त्याश्रयमन्तरं प्रतिपिपादयिषुराह-

मू. (९१) जे जत्तिआ अ हेऊ भवस्स ते चेव तत्तिआ मुक्खे।
गणणाईया लोगा दोण्हवि पुन्ना भवे तुल्ला॥

वृ. ये हेतवो यावन्तो-यावन्मात्रा 'भवस्य' संसारस्य निमित्तं। त एव नान्ये तावन्मात्रा एव मो-क्षस्य हेतवो-निमित्तानि। कियन्मात्रास्ते अत आह-गणनाया अतीताः-सङ्ख्याया अतिक्रान्ताः, के?, लोकाः 'द्वयोरपि' भवमोक्षयोः संबन्धिनां हेतूनामसङ्ख्येया लोकाः 'पूर्णाः' भृताः, ते तु पूर्णा एकहेतून्यूना अपि भवन्त्यत आह-तुल्याः, कथंभूताः?-क्रियाविशेषणं 'तुल्याः' सदृशा इत्यर्थः। ननु तुल्यग्रहणमेव कस्मात्केवलं न कृतं? येन पुनः पूर्णग्रहणं क्रियते, भन्नतिपडिवयणं-तुल्लग्गहणेण संवलिआणं संसारमोक्खहेऊणं लोका तुल्लत्ति करिस्सति बुद्धी होज्जा तेन पुन्नग्गहणंपि कीरइ, दोण्हवि पुन्नत्ति जया जया भण्णिहिति नेयव्वा, इयमत्र भावना-सर्व एव ये त्रैलोक्योदरविवरवर्त्तिनो भावा रागद्वेषमोहात्मनां पुंसां संसारहेतवो भवन्ति त एव रागादिरहितानां शुद्धागमतामज्ञानपरिहारेण मोक्षहेतवो भवन्तीति एवंतावत्प्रमाणमिदमुक्तम्, इदानीं येषामर्थो त्रैलोक्यव्यापन्नाः पदार्था बन्धहेतवो भवन्ति न भवन्ति च येषां तदाह-

मू. (९२) हरिआवहमाईआ जे चेव हवंति कम्मबंधाय।
अजयाणं ते चेव उ जयाण निव्वाणगमणाय॥

वृ. 'इर् गतिप्रेरणयोः' इरणमीर्या पथि डर्या ईर्यापथं-गमनागमनमित्यर्थः, ईर्यापथमादौ येषां ते ईर्यापथाद्याः, आदिशब्दाद्दृष्टिव्यागादिव्यापारा गृह्यन्ते, ईर्यापथाद्या व्यापारा य एव भवन्ति 'कर्म-बंधाय' कर्मबन्धनिमित्तं-कर्मबन्धहेतवः, कथम्?-'अयतानाम्' अयत्नपराणां पुरुषाणां, त एव ईर्यापथाद्याव्यापारा 'यतानां' यत्नवतां 'निर्वाणगमनाय' मोक्षगमनाय भवन्ति॥ एवं तावत्साधोर्गृहस्थेन सह तुल्येऽपि व्यापारे विसदृशतोक्ता, इदानीं सजातीयमेव साधुमाश्रित्य विसदृशतामादर्शयन्नाह-

मू. (९३) एगंतेन निरोहो जोगेसु न देसिओ विहीवावि।
दव्वित्ते पप्प निरोहो होज्ज विहीवा जहा रोगे॥

वृ. एकान्तेन निषेधः 'योगेषु' गमनादिव्यापारेषु 'न दर्शितः' नोपलिप्तः 'विधिर्वा' अनुज्ञा वा क्वचित्-स्वाध्यायादौ न दर्शिता, किन्तु 'वलिअं' द्रव्यं वस्तु वा 'प्राप्य' विज्ञाय निषेधो भवेत्, तस्यैव वा विधि-र्भवेत् अनुज्ञानं भवेदिति। अयमत्र भावः-कस्यचित् [illegible] गमनः-मनुज्ञायते, कारणिकत्वात्, नाकारणिकस्य, दृष्टान्तमाह-'जहा रोगे' त्तियथा 'रोगे' ज्वरादौ परिपाचनभोजनादेः प्रतिषेधः क्रियते, जीर्णज्वरे तु तस्यैव विधिरित्यतः साधूच्यतेवस्त्वन्तरमाश्रित्य विधिः प्रतिषेधो वा विधीयते। अथवाऽन्यथा व्याख्यायते-इहोक्तं -'अखिलाः पदार्था आत्मनः संसार-हेतवो मोक्षहेतवश्च' ततश्च न केवलं तपोवयान्यपि सम्यग्दर्शन-ज्ञानचारित्राणि तान्यपि संसारमोक्षयोः कारणानीति, तथा चाह-'एगंतेन निसेहो०' एकान्तेन निषेधः सम्यग्दर्शनादिव्यतिषेषु तत्प्रख्यापक-शास्त्रोपदेशेषु न दर्शितो विधिर्वा न दर्शित इति संटङ्कः, किन्तु 'वत्तिकं प्राप्य' पात्रविशेषं प्राप्य कदा चिद्दीयते कदाचिन्न, एतदुक्तं भवति-प्रशमादिगुणान्वितायं दीयमानानि मोक्षाय, विपर्यये भवाय, तदाशातनात्, यथा ज्वरादौ तस्मिन् सत्यपथ्यं पथ्यात् पथ्यमपि तदेव॥

अथैकमेव वस्त्वासेव्यमानं बन्धाय मोक्षाय च कथं भवति ?, तदाह-

मू. (९४) जंमि निसेविज्जंते अइआरो होज्ज कस्सइ कयाइ।
तेनेव य तस्स पुनो कयाइ सोही हवेज्जाहि॥

वृ. 'यस्मिन्' वस्तुनिक्रोधादौ निषेव्यमाणे 'अतिचारः' स्खलना भवति 'कस्यचित्' साधोः 'कदाचित्' कस्याश्चिदवस्थायां 'तेनैव' क्रोधादिना तस्यैव पुनः कदाचिच्छुद्धिरपि भवेत्, चण्डरुद्रस्याधोरिव, तेन हि रुषा स्वशिष्यो दण्डकेन ताडितः, तं च रुधिरार्द्रं दृष्ट्वा पश्चात्तापवान् संवृत्तः चिन्तयति च-धिग्मां यस्यैवंविधः क्रोधः इति विशुद्धपरिणामस्यापूर्वं करणं क्षपकश्रेणिः केवलोदयः संवृत्त इति। बाह्यं व्यापारमङ्गीकृत्य विसदृशमेवेदं, अथ बाह्योऽपि व्यापारो यथा बन्धहेतुर्न स्यात्तथाऽऽह-

मू. (९५) अनुमित्तोऽवि न कस्सइ बंधो परवत्थुपच्चओ भणिओ।
तहवि अ जयंति जइणो परिणामविसोहिमिच्छंता॥

वृ. 'अणुमात्रोऽपि' स्वल्पोऽपि बन्धो न कस्यचित् 'परवस्तुप्रत्ययाद्' बाह्यवस्तुनिमित्तात्मकाशाद् 'भणितः' उक्तः, किन्त्वात्मपरिणामादेवेत्यभिप्रायः। आह-यद्येवं न तर्हि पृथिव्यादियतना कार्या, उच्यते, यद्यपि बाह्यवस्तुनिमित्तो बन्धो न भवति तथाऽपि यतनां विदधति पृथिव्यादौ मुनयः परिणामविशुद्धिं 'इच्छन्तः' अभिलषन्तः, एतदुक्तं भवति-यदि पृथिव्यादिकायायतना न विधीयते ततो नैवेयं स्यात्, यस्तु हिंसायां वर्त्तते तस्य परिणाम एव न शुद्धः, इत्याह-

मू. (९६) जो पुन हिंसायतणेसु वट्टइ तस्स ननु परिणामो।
दुट्ठो न य तं लिंगं होइ विसुद्धस्स जोगस्स॥

वृ. यस्तु पुनः 'हिंसायतनेषु' व्यापत्तिस्थानेषु वर्त्तते तस्य ननु परिणामो दुष्ट एव भवति न च तल्लिङ्गस्थानवर्त्तित्वं 'लिङ्गं' चिह्नं भवति 'विशुद्धयोगस्य' मनोवाक्कायव्यापारस्य॥

मू. (९७) तम्हा सया विसुद्धं परिणामं इच्छया सुविहिएणं।
हिंसायतणा सव्वे परिहरियव्वा पयत्तेणं॥

वृ. तस्मात् 'सदा' अनवरतं विशुद्धं परिणाममिच्छता सुविहितेन किं कर्तव्यं ?-हिंसायतनानि सर्वाणि वर्जनीयानि प्रयत्नतः॥ तथा च-

मू. (९८) वज्जेमिति परिणओ संपत्तीए विमुच्चई वेरा।

अविहिंसाऽवि न मुच्चइ किलिट्ठभावोत्ति वा तस्स ॥

वृ. वर्जयाम्यहं प्राणिवधादीन्येवंपरिणतः सन संप्राप्तावपि, कस्य ?-अतिपातस्य-प्राणिप्राणविनाशस्येत्युपरिष्टात्संबन्धः, तथाऽपि विमुच्यते 'वैरात' कर्मसंबन्धात । यस्तु पुनः क्लिष्टपरिणामः सोऽन्यापादयन्नपि नमुच्यते वैरात ॥ तदेवं गच्छतस्तस्य षट्कायतनानिको विधिरुक्तः, सइदानीं गच्छन ग्रामादौ प्रविशति, तत्र का सामाचारी ?, तद्दर्शनार्थमुपक्रमते-

मू. (९९) पढमबिइया गिलाणे नइए सन्नी चउत्थ साहम्मी ।
पंचमियंमि अ वसही छट्ठे ठाणट्ठिआ होइ ॥

वृ. प्रथमद्वारे द्वितीयद्वारे च 'गिलाणे'त्ति ग्लानविषया यतना वक्तव्या, तृतीये द्वारे संज्ञी-श्रावको वक्तव्यः, चतुर्थे द्वारे साधर्मिकः-साधुर्वक्तव्यः, पञ्चमे द्वारे वसतिर्वक्तव्या, षष्ठे द्वारे वर्षाकालप्रतिघातात्स्थानस्थिता भवति । आह-तृतीयद्वारे षडर्थाधिकारा भविष्यन्ति, तद्यथा-"वडअग्गामे संखडि सन्नी दाणं अ भद्दे अ"त्ति, ततश्च किमिति संज्ञिन एव कदलस्य ग्रहणमकारि ?, उच्यते, संज्ञिनोऽनिरिक्तं विधिवक्ष्यमाणं भविष्यति अस्यार्थस्य ज्ञापनार्थं संज्ञिग्रहणमेवाकारि, अथवा तुलादण्ड-मध्यग्रहणन्यायेन मध्यग्रहणे शेषाण्यपि गृहीतान्येव द्रष्टव्यानि, आह-मध्यमेवतत्र भवति, यतः षडमूनि द्वाराणि, उच्यन्ते, नैतदेवं, यतः सामर्थं चशब्दाक्षिप्तं महानिनादेतिद्वारं भविष्यति, संज्ञि-ग्रहणेन मध्यमेव गृहीतमित्तीयं द्वारगाथा । नन्वस्यातित्वरिताचार्यकार्यप्रसृतत्वात्कोऽवसरो ग्रामादि-प्रवेशनेन ?, उच्यते, तत्प्रवेशेऽधिकतरगुण-दर्शनात, तथा चाह-

मू. (१००) एहिअपारत्तगुणा दुन्नि य पुच्छा दुवे य साहम्मी ।
तत्थेक्केक्का दुविहा चउहा जयणा दुहेक्केक्का ॥

वृ. तस्य तत्र ग्रामे प्रविशत 'ऐहिकाः' इहलोकगुणा भक्त पानादयो भवन्ति, परत्रगुणाश्च ग्लानादिप्रतिजागरणादिकाः, प्रविशतश्चतस्यद्विधापृच्छा भवति, सा चविध्यविधिलक्षणा वक्ष्यमाणा । साधर्मिकाश्च द्विधा-साम्भोगिका अन्यसाम्भोगिकाश्च, तत्रैकैको द्विविधः, योऽसौ साम्भोगिकः सचद्विविधः-कदाचिदेकः कदाचिदनेकः, एवमन्यसांभोगिकेऽपि वाच्यं, 'चउहा जयण'त्ति चतुर्विधा यतना, साम्भोगिकसंयतयतना साम्भोगिकसंयतीयतना च, अन्यसंभोइयसंजय-जयणा अन्यसंभोइयसंयतीजयणा चेति । 'तत्थेक्केक्का दुविहा'त्ति तत्रैकैको भेदो द्विविधः-साम्भोगिक-संयतः-कारणिका निष्कारणिकाश्च, नवरं संभोइयसंजइओवि। एवं असंभोइअसंजयावि संजइओवि । अथवाऽन्यथा-'दुवे य साहम्मि'त्ति संभोइआ असंभोइआ चेति । 'तत्थेक्केक्का दुविहा'त्ति जे ते संभोइआ ते संजया संजयइओ अ, एवमसंभोइयावि, 'चउहा जयण'त्ति चउव्विहा जयणा कायव्वा दव्वादि ४, 'दुहेक्केक्क'त्ति सा एकैका द्रव्यादियतना द्विधा-तत्थ दव्वओ पढमं फासुएण कीरइ, तदभावे अफासुएणवि, खेत्ततो अकयाकारिआमंकप्पिए गिहे ठाइयव्वं, तदभावे उद्घाटनं गृहस्यकपाटादेरपि क्रियते कालतः प्रथमपौरुष्यां प्रासुकं दीयते, अथ तस्यां न लभ्यते ततः कृत्वाऽपि दीयते । भावतः प्रासुकद्रव्यं शरीरस्य समाधानमार्धायते, तदभावे त्वप्रासुकेऽपि ।

इयं द्वारगाथा महती, तत्रैहिकगुणद्वारप्रतिपादनायाह-पडिद्वारगाहा-

मू. (१०१) इहलोइआ पवित्ती पासणया नेगि संखडी सड्ढो ।
परलोइआ गिलाणे चउय वाई य पडिणीए ॥

वृ. 'इहलोइअ'त्तिद्वारपरामर्शः, प्रविष्टस्यतस्यायंगुणा भवति-यानभिमन्यायप्रवृत्तस्तदीयां कदाचित्तत्र

वानां लभनेयथा ततो निर्गत्यतेऽधुनाऽमुकत्र तिष्ठन्तीति, एतदुक्तं भवति-मासकल्पपरिश्रमार्ता ते कदाचित्तत्रवायाताः स्युः, ततश्चैतेषां साधूनां पश्यत्ता-संदर्शनं भवतीति तत्रैव कार्यपरिश्रमार्तिः स्यात्, तथा कदाचित्तत्र संखडी भवति, ततश्च भक्तं गृहीत्वा व्रजतः कालक्षेपो (न) भवति, शीघ्रं चा-भीष्टंग्रामंप्राप्नोति, तत्रवा प्रविष्टस्य श्रान्तः-श्रावकः कश्चिद्भवति, तदगृहात्पर्युषितभक्तमादायव्रजति। एतेप्रविष्टस्यैहिकागुणाः, अथेतरे 'परलोइआ' इति द्वारपरामर्शः, 'गिहाण' त्ति कदाचित्तत्र प्रविष्ट इदं शृणुयात तदुत्तत्र ग्लान आस्ते, ततश्च पथ्यपालनं कार्यं, पथ्यपालने च कथं न पारलौकिका गुणा इति, 'जो गिलाणं पडियरइ से मं पडिअरति, जो मंपडिअरइसो गिलाणं पडियरति' त्तिवचनप्रामाण्यात्, कदाचिद्धानत्र चैत्यायतनंभवेत्तद्वन्दनपुण्यावाप्तिः स्यात्, वादी वा तत्पराजयश्च, प्रत्यनीको वा साध्वादेस्तत्र स्यात् तददर्शनाच्चात्मावुपशमं यायात्, एवंलब्धिसंपन्नत्वात्। उक्तमैहिकपारलौकिकगुणद्वारम्, अथ पृच्छाद्वारं, तत्र विधिपृच्छा अविधिपृच्छा च, अविधिपृच्छाद्वारमाह-

मू. (१०२) अविहीपुच्छा अत्थित्थ संजयानत्थि तत्थ समणीओ।
समणीसु अ ना नत्थी संका य किसोरवडवाए॥

वृ. अविधिपृच्छेयं, यदुतान्यत्रसंयताः? ततोऽसौपृच्छ्यएतांविशेषविषयां पृच्छांश्रुत्वाऽऽह्नानास्त्यत्र संयताः, तत्र च श्रमण्यो विद्यन्ते तेन च ता न कथिताः, विशेषप्रश्नाकरणात्, 'समणीसु य'त्ति अथ श्रमणीः पृच्छति ततोऽसावाह-न सन्त्यत्र ताः, तत्र च श्रमणाः सन्तीति प्राग्वत्। शङ्का च श्रमणीपृच्छायां स्यात्, 'किशोरवडवान्यायात्'॥

मू. (१०३) सड्ढेसु चरिअकामो संका चारी य होइ सड्ढीसु।
चेइयघरं व नत्थिह तम्हा उ विहीइ पुच्छेज्जा॥

वृ. अथ श्रावकान् पृच्छति ततः परेण विकल्पयति-चरितुकामोऽयं-भक्षयितुकामः, अथ 'सड्ढीसु'त्ति श्राविकाविषयायां पृच्छायां शङ्का स्यात्, नूनमयं तदर्थी चरितुकामश्च। अथ चैत्यगृहमेव केवलं पृच्छति, ततस्तदभावे वर्गचतुष्टयाभावे च तत्प्रभवगुणहानिः स्यात्, तस्माद्विधिना पृच्छेत्। तत्प्रतिपादनायाह-

मू. (१०४) गामदुवारब्भासे अगडस्समीवे महाणमज्झे वा।
पुच्छेज्ज सयं पक्खा विआलणे तस्स परिकहणा॥

वृ. ग्रामद्वारे-ग्रामस्य निष्क्रामप्रवेशे स्थित्वा पृच्छेत्, अथवा 'अब्भासे'त्ति ग्रामाभ्यर्णे कूपसमीपे वा महाजनस्यसमुदाये वा, के?-स्वकेपक्षे, किमत्राप्यन्यपक्षोऽस्तिनेति? यदि परोऽजानन पृच्छति-को भवतां स्वपक्षः? इत्येवंविचारणे ततस्तस्याग्रे साधोः परिकथना स्यात्, पञ्चविधोऽस्यत्पक्षः-चैत्यगृहादि।

उक्तं पृच्छाद्वारम्। ततः पृच्छासमनन्तरं यदि चैत्यगृहमस्ति ततस्तस्मिन्नेव गन्तव्यं, तत्र च कथं गन्तव्यम्?, उच्यते-

मू. (१०५) निस्सकिअ सुभाइसुं काउं गच्छेज्ज चेइअघरं तु।
पच्छा साहुसमीवं तउवि अ संभोइया तस्स॥

वृ. पूर्वार्द्धं कण्ठं। अथ साहम्मिअद्वारमाह-'पच्छा साहुसमीवं'ति चैत्यगृहान्निर्गत्य पश्चात्साधुसमीपं यांति, 'तउवि' साधवःसाम्भोगिकाः 'तस्य' साधोः, चशब्दादन्यसाम्भोगिकावा। तत्रयदिसाम्भोगिकास्ततः का सामाचारी?, इत्याह-

मू. (१०६) निक्किच्चविउं किडकम्मं दीवणऽनाबाह पुच्छणं महाओ।

गेलन्न विसज्जणया अविसज्जुवएस दायणया ॥

वृ. 'निक्षिप्य' विमृज्य साधूनहम्, किम ?, उपकरणं-पात्रकादि, ततः 'कृतिकर्म' वन्दनं करोति, ततश्च 'दावणं'ति आगमनकार्यविभावनं करोति 'अनाबाधं'ति, अनाबाधा वयम ?, एवंपृष्टसतिनऽप्याहुः-अनाबाधा वयमिति। 'पुच्छण'त्ति ततः साधुरेवमाह-भवद्दर्शनार्थमहं प्रविष्टो ग्राममिदानीं व्रजामीत्येवंपृच्छति, ततस्तेऽपि साधवो यद्यस्ति सहायस्तं दत्त्वा प्रेषयन्ति, अथ तत्र कश्चिद् ग्लानस्तत एवं ब्रवीति-अहमेनं ग्लानं परिचरामीति, ततस्तेऽप्याहुः-विद्यन्त एव परिचारकाः, एवमभिधाय 'विसज्जण'न्ति तं साधुं 'विसर्जयन्ति' प्रेषयन्ति प्रेषयन्ति वयमेवंभूतान्याम इति। अथ न विसर्जयन्ति, एतच्च ब्रुवतेसर्वमत्र ग्लानप्रायोग्यमौषधादि लभ्यते, किन्तु तत्संयोजनां न जानीमः, ततः स उपदेशं ददाति-इदमौषधमनेन संयोज्य देयमिति, अथ त एवं ब्रुवते-औषधान्येवात्र वयं न जानीमोऽहं ततः स्वसाधुदर्शयत्योषधानि, याचयति वापाठान्तरं, एवमसावौषधानि दापयित्वा व्रजति, अथतएवमाहुः-औषधसंयोजनां न जानीमो न चैतेषामहं, ततएषसाधुरौषधानि याचित्वा संयोज्य ग्लानाय दत्त्वा मनाक् प्रशान्ते व्याधौ सति व्रजति। अथ न एवमाहुर्गच्छन्तं साधुम-

मू. (१०७) पुनरवि अत्थं खुभिज्जा अयाणगा मो स वा भणिज्ज संचिक्खे।
उभओऽवि अयाणंता वेज्जं पुच्छंति जयणाए ॥

वृ. पुनरप्यर्थं व्याधिः क्षोभयायात-प्रकुप्येत, वयं चन जानीम उपशमयितुं, स चग्लानएवं ब्रूयात-त्वया निष्ठुता अहमचिरात्प्रगुणीभवामि, ततः 'संचिक्खे'त्ति संतिष्ठति। अथोभावपि तावागन्तुकव्याधिस्तव्यौ न जानीतः क्रियां कर्तुं, तत उभावपि अजानन्तौ वैद्यं पृच्छतः, कथं ?-'यतनया' अनन्तरगाथावक्ष्यमाणयेति। सा चैवम्-

मू. (१०८) गमने पमाण उवगरण सउण वावार ठाण उवएसो।
आनन गंधुदगाडं उड्डमणुट्ठे अ जे दोसा ॥

वृ. यदि ग्लानो गन्तुं पारयति तत उत्सर्गेण स एव नीयते, अथ न पारयति ततोऽन्ये साधवो वैद्यस्यकार्ये गमनं कुर्वन्ति, 'पमाणं'त्ति कियत्प्रमाणैर्गन्तव्यं ?, तत्रैकेन न गन्तव्यं यमदण्डपरिकल्पनात्, न द्वौ यमपुरुषपरिकल्पनात्, न चत्वारो वाहीकपरिकल्पनात्, अतस्त्रिपञ्चसप्तभिर्गन्तव्यं, उक्तं प्रमाणं, 'उवगरणं'ति शुक्लवासोभिर्यातव्यं, न कृष्णमलिनादिभिर्यातव्यं, उक्त मुपकरणं, 'सउण'त्ति शकुनेषु सत्सु गन्तव्यं, ते चामी 'नन्दीतूर'मित्यादयः, अपशकुनेषु न गन्तव्यं, ये चैतेमडतक चेलादयः, उक्तं शकुनद्वारं, 'वावार'त्ति यद्यसौ वैद्यो भुङ्क्ते एकाल्लशाटको वाछिन्दन किञ्चिदास्ते भिन्दन्वा ततो न प्रष्टव्यः, अथ ग्लानस्यापि छेत्तव्यं ततोऽस्मिन्नेव प्रष्टव्यः, उक्तो व्यापारः, 'ठाण'त्ति यद्युत्कुरुटिकादौ तृणशय्यादौ स्थितस्तत्तो न प्रष्टव्यः, किं तर्हि ?, शुचिप्रदेशे स्थित इति, उक्तं स्थानं, 'उवएस'त्ति एवमसौ यतनया पृष्टो यमुपदेशं ददाति-द्रव्यतः क्षेत्रतः कालतो भावतश्च सोऽवधार्णीयः, तत्र द्रव्यतः शाल्योदनं घृतोपेतं च खादेः क्षेत्रतो निर्वाता वसतिः कालतः पौरुष्यादेर्यो भावस्तस्य नाम्यप्रतिकूलव्यवहारिभिर्भाव्यं, उक्त उपदेशः, अथसवैद्यएवं ब्रूयात-पश्यामि तावन्तमिति, ततः सवैद्यस्तत्समीपमानीयते, न च ग्लानस्तत्र नेयः, किं कारणं ?, वैद्यसमीपं नीयमाने दृष्ट्वेति लोकः कदाचिदेवं ब्रूयात-यथा नूनमयं मृत इत्यपशकुनः, मूर्च्छा वा भवेद्गृहपतिर्वा वैद्यगृहं स्यादिति, आगच्छति चवैद्येकिंकर्तव्यं ?, गन्धोदकादिभिर्गन्धवासाः सन्निहिताः क्रियन्ते, तद्गन्धार्थमृदकमृत्तिकयाविलेपनादि क्रियते। वैद्ये चागच्छति सूरिणा किं कर्तव्यमित्याह-'उड्डमणुट्ठे अ जे दोस'त्ति यद्यसावाचार्यो वैद्यस्यागच्छन्नभ्युत्तिष्ठति ततो लाघवदोषः, अथ नाभ्युत्तिष्ठति ततः स्तब्ध इति-कृत्वा कोपं गृहीत्वा प्रतिकूलः स्यात,

नस्याऽऽलेतद्दोषपरिजिहीर्षयाऽनागतमेवोत्थायप्राङ्गणेपरिष्वष्क-कमाणस्तिष्ठतीति। उक्तनमुत्थितानुत्थितद्वारं. कियन्तं पुनः कालं तेन साधुना तस्य ग्लानस्य परिचरणं कर्त्तव्यमित्याह-

मू. (१०९) पढमावियारजोग्गं नाउं गच्छेज्ज बिइज्जए दिन्ने।
एमेव अन्नसंभोइयाण अन्नाइ वसहीए॥

वृ. 'पढम' त्ति यावत प्रथमालिकां करोति तां चात्मनः स्वयंभवानयितुं समर्थः संवृत्तः, 'वियार-जोग्ग' त्ति बहिर्भूमिगमनयोग्यो जात इति, एवं ज्ञात्वा गच्छेत्, कथं ? द्वितीये सहाये दत्ते सति, अथ नास्ति सहायस्तेन एक एव व्रजति। एष तावत्सांभोगिकान प्राप्य विधिरुक्तः, इदानीमसांभोगिकविधिमनिर्दिशन्नाह-एवमेवान्यसांभोगिकग्लानस्य विधिः, किन्तु 'अन्नाइ वसहीए' त्ति अन्यस्यां वसतौ व्यवस्थितेन ग्लानपरिचरणाविधिः कार्यः, अयमपरो विशेषः-असांभोगिकस्योपाश्रयं प्रविशता तदनाक्रान्ते भूप्रदेशे निक्षिप्योपकरणं ततः कृतिकर्मादि सांभोगिकेष्विव सर्वं कर्त्तव्यमिति, तदाक्रान्तभूभागे चोपकरणं स्थापयति, मा मृच्छिक्षकाणां तन्मामाचारीदर्शनेऽन्यथाभावः स्यादिति। एवं तावत्सांभोगिकबहुमध्यगतस्य ग्लानस्य विधिः, अन्यसांभोगिकबहुमध्यगतस्याप्येष एव विधिर्दृश्यः। इदानीमेकैकस्य सांभोगिकस्येतरस्य च विधिमाह-

मू. (११०) एगागि गिलाणंमि उ सिट्ठे किं कीरइ ? न कीरइ वावि।
छगमुत्तकहणपानगधुवणत्थर तस्स नियगं वा॥

वृ. एवमसौ गच्छन् ग्रामाभ्याशे कस्मादपि पुरुषादिदं शृणुयात-किं भवता ग्लानप्रतिजागरणं क्रियते उत न ?, ततश्चैवमेकाकिनि ग्लाने 'शिष्टे' कथिते सति क्रियते न क्रियते ? इत्युक्ते परेण सति साधुरप्याह-सुष्ठु क्रियते, पर आह-यद्येवं 'छगमुत्तकहण' त्ति छग-पुरीषं मूत्रं-प्रतीतं, ताभ्यांविलिप्त आस्ते, एवं कथिते सति स साधुर्बहिर्भूमेरेव 'पानग' त्ति पानकं गृहीत्वा प्रविशति, प्रविष्टश्च 'धुवण' त्ति 'तस्य' ग्लानस्य धावनं करोति-प्रक्षालनं विदधाति, उपधिञ्च 'अत्थरण' त्ति आस्तरणं करोति 'तस्स' त्ति तदीयेरेव चीवरैः, अथ तस्यान्यानि न सन्ति ततः 'नियगं व' त्ति निजैरेव चीवरैरास्तरणं करोतीति। तथा चाह-

मू. (१११) सारवणं साहल्लत्थ पाणडधुवणे सुई समायारा।
अइबिंभले समाही सहस्स आसासपडिअरणं॥

वृ. सारवणं-निष्क्रियं तस्मिन निष्क्रिये ग्लाने कृते सति, अथवा 'सारवणे' त्ति संमार्जिते प्रतिश्रये ग्लानसंबन्धिनि सति परः पृच्छति-तवायं केन संबन्धेन संबद्धः इति, साधुराह,-कल्पडकहिंचिज्जाता, एवमादि, ततः पर आह-'साहल्लत्थ' त्ति, सफलता धर्मस्य, यदेतेऽपि परमबन्धावित्थं क्रिया क्रियते, 'पाणडधुवणे' त्ति प्रकटग्लानस्योपधेर्वा क्षालनं कर्त्तव्यं, प्रकटक्षालने चालोकएवमाह, शुचिसमाचारा एते श्रमणा इति, अथासौ ग्लानोऽतिविह्वलः स्याद्-अतीव दुःखेन करणितः स्यात्ततः 'समाहि' त्ति यथा प्रार्थितं भोजनादि दातव्यं येन स्वस्थचित्तो भवति, स्वस्थीभूतश्चाभिधीयते-यथाकालं कुरुष्वेति। अथासौ सहः-समर्थस्ततश्चाश्वास्यते-न भेतव्यं अहं त्वां प्रतिजागरमीति। ततश्च-

मू. (११२) सयमेव दिट्ठपाढो वेज्जं पुच्छउ अयाणओ वेज्जं।
दीवन दव्वाडेमि अ उवएसो जाव लंभो त्ति॥

वृ. यद्यसौ साधुः 'दृष्टपाठो' दृष्टः-उपलब्धश्चरकसुश्रुतादियेनसदृष्टपाठो, अथवा 'दिट्ठ' तिदैवेव-दृष्टक्रियः क्रियाकुशलः, पाठीति सकलं बाहडादि पठति स एवंविधः स्वयमेव क्रियां करोति। अथासौ दृष्टपाठो न भवति ततः पृच्छति अजः सन वैद्यं, 'दीवन' त्ति वैद्यशालां गतः प्रकाशयति, यदुताहं कारणेनैककः संजातः, अतो

निमित्तेन ग्राह्यं, 'दव्वादिभिय'त्ति द्रव्यादिचतुष्टयोपदेशो यति तत्र द्रव्यतः प्रासुकमप्रासुकं वा क्रीतकडा अक्रीतकडा वा वस्ती, कालतः प्रथमपौरुष्यामुपदिष्टं तस्यां च यदा प्रासुकेन लभ्यते तदाऽप्रासुकमपि क्रियते, भावतः समाधिः कर्तव्या प्रासुकाप्रासुकैरिति ॥

मू. (११३) कारणिअ इट्ठपेसे गमननुलोमेण तेण सह गच्छे।
निक्कारणिअ खरंटण बिइज्ज संघाडए गमनं ॥

वृ. एवमसौ ग्लानो यदि कारणिको भवति, ततः 'इट्ठ'त्ति दृष्टाभूतः 'पेसे'त्ति प्रेषणीयः, अथ ग्लानस्याप्यनुकूलमेव गन्तव्यं भवति ततः 'गमननुलोमेण' हेतुना तेन ग्लानेन सहगच्छेत उक्तं : साम्भोगिकः ग्लान एकः कारणिकः, असाम्भोगिकः ग्लानः कारणिक एकोऽप्येवमेव द्रष्टव्य इति। अथ निष्कारणिक एको ग्लान इतितनः 'निक्कारणिअ खरंटण'त्ति निष्कारणिकस्य ग्लानस्य खरण्टया-प्रवचनोपदेशपूर्वकपरुषभणनमिति, खरण्टितश्च छिन्नाय आत्मनः क्रियत इति। ततश्चैव सङ्घाटके सति 'गमण'त्ति गमनं कर्तव्यमिति। साम्भोगिकासाम्भोगिकसंयतानामेकानेककारणिकानिष्कारणिकानेककथनेनोक्तं। इदानीं साम्भोगिकासाम्भोगिकसंयतानामेकानेककारणिकानिष्कारणिकोयादीनां यतना प्रतिपाद्यते-

अथ विधिपृच्छया पृष्ट सति तत्र संयत्यः स्युः, ततः को विधिः ? इत्याह-

मू. (११४) समणपवेसि निसीहिअ दुवारवज्जण अदिट्ठपरिकहणं।
थेरीतरुणिविभासा निमंतऽणाबाहपुच्छा य ॥

वृ. श्रमणीप्रतिश्रयप्रवेशे सति बहिःस्थितेनैव निषेधिकी कर्तव्या वारत्रयं-द्वारे मध्ये प्रवेशे च, प्रविष्टश्च तथा 'दुवारवज्जण'त्ति द्वारं प्रतिहत्य एकस्मिन् प्रदेशे तिष्ठति, अथ निषीधिकायां कृतायामपि स्वाध्यायव्याघृताभिनं दृष्टस्ततः परिकथनं कर्तव्यं-साधुरागत इति, ततः परिकथिते सति साध्वीभिर्निर्गन्तव्यं, तत्र को विधिः ?, 'थेरीतरुणिविभास'त्ति याऽसौ प्रवर्तिनी सा कदाचित्स्थविरा भवति कदाचिच्च तरुणी, ततो 'विभाषा' विकल्पना, तत्र यदि स्थविरी निर्गच्छति तत आत्मच्छिन्नायाऽऽत्मतुल्यायां वा, अथ तरुणी ततः स्थविरीभिस्तिसृभिश्चतसृभिश्च निर्गच्छति, ततस्तारतमासनेन निमन्त्रयन्ति, उपवेशयति, सोऽप्युपविश्य पृच्छति-न काचिद्भवतीनामाबाधेति ॥

मू. (११५) सिट्ठसि सहू पडिनीयनिग्गहं अहव अन्नहिं पेसे।
उवएसो दावणया गेलन्ने वेज्जपुच्छा अ ॥

वृ. ततस्ता: कथयन्ति अस्त्याबाधाइति, एवं 'सिट्ठे' कथितेसतियद्यसौ 'सहू' समर्थस्ततः प्रत्यनीकनिग्रहं करोति, अथ निग्रहसमर्थो न भवति ततोऽन्यत्र प्रेषयति, अथ तत्र काचिद् ग्लाना तत्र उपदेशं ददाति, एवमेतन्नोपधादि दातव्यमन्यस्याः। अथ तास्तत्र लभन्ते ततः 'दावण'त्ति अमावेव दापयति, ग्लानत्वे सत्ययं विधिः। अथासौ स्वयं न जानाति औषधादि दातुं ततो वैद्यं पृच्छति ॥

मू. (११६) तह चेव दावण चउक्कएण अन्नत्थवसहि जा पढमा।
तह चेवेगाणीए आगाढे चिलिमिली नवरं ॥

वृ. कथं वैद्यं पृच्छति ? 'तथैव' प्राग्वत् 'दावणं'त्ति प्रकाशनं कारणिकोऽहमकारणिको नापशकुन-बुद्धया ग्राह्यः, 'चउक्कएण'त्ति वैद्येन द्रव्यादिचतुष्के कथिते सति यतना पूर्ववत्कर्तव्या, 'अन्नत्थ-वसहि'त्ति अन्यवसतिव्यवस्थितेनप्रतिजागरणं कर्तव्यं, कियन्तं कालं यावदत आह-'जा पढमा' यावत्प्रथमामिलानयनक्षमा संवृत्तेति ततो गच्छन्ति। एवं भावद्वयानां मध्ये एकस्या ग्लानविधिरुक्तः, इदानीमेकाकिन्या ग्लानविधिमति-

दिशन्नाह-'तह चेव गाणीए' 'तथैव'प्राग्वदेकाकिन्या ग्लानायाः प्रतिचरणविधिः, एतावांस्तु विशेषः-यदुतागाढे-अतीवापदुतायामेकस्मिन्नाश्रये 'चिलमिलि'त्ति यवनिकाव्यवधानं कृत्वा नवरमेकत्वं प्रतिचरणमसौ करोति॥

मू. (११७) निक्कारणिअं चमढण कारणिअं नेइ अहव अप्पाहे।
गमनित्थि मीससंबंधिवज्जए असइ एगागी॥

वृ. यदि निष्कारणिकाऽसौ भवति ततः 'चमढण'त्ति प्रवचनोक्तेन वंचनेन खिंसनं करोति, अथासौ कारणिका ततस्तां स्वयमेव नयति. 'अहव अप्पाहे'त्ति अथवा तदभ्यासस्तत्प्रवर्त्तिन्या वा एवं संदिशति-यथैतात्मसमकक्षीं कुरुत, स्वयं च नयतः को विधिरत आह-'गमनित्थिमीससंबंधिवज्जए असइ एगागी' गमनं कार्यत्वं इत्थीहिं सह, वाशब्दोऽपि जइ संबंधिनीओ ह्यंति, तदभावे मीसेहिं-इत्थीपुरिसेहिं संबंधीहिं सह गन्तव्वं, तदभावे असंबंधिणीहिं इत्थीहिं, तदभावे पुरिसित्थिमीसेणं (अ)संबंधेण, तदभावे संबं-धिपुरिसेहिं, तदभावे असंबंधिपुरिसेहिं, तदभावे-असंबंधे वर्जिते-असति अन्यस्य उपायस्य एगागिनं नेति॥

इदानीं चतुर्थीमप्युक्तं यतनामुपन्यस्यन्नाहोर्घुराह-

मू. (११८) एगबहुसमणुन्नाण वसहीए जो अ एगअमणुन्नो।
अमणुन्न संजईण य अन्नहि पुच्छे चिलिमिलीए॥

वृ. एतदुक्तं भवति-एगो समणुन्नो जे अ बहू समणुन्ना जो अ एगो असमणुन्नो एयाणं एगाए चेव वसहीए पडिअरणं कायव्वं, 'अमणुन्न'त्ति जे अ बहू अमणुन्ना संजया तेसिं न एकाए वसहीए ठिएहिं पडियरणं कायव्वं 'संजईण य'त्ति संजईण य संभोइयाणं अन्नसंभोइयाण य बहूणं अन्नाए वसहीए ठिओ पडियरइ। 'एक्के'त्ति एको पुनर्ग्लानामाश्रित्य 'चिलिमिलीए' यवनिकाव्यवधानं कृत्वा एकस्यामेव वसतौ प्रतिजागरणं करोति। द्रव्यादियतना च सर्वत्रानुगता द्रष्टव्या। "एहिअपारत्तगुणा दोन्नि अपुच्छा दुवे असाहम्मी" त्यादिप्रतिद्वारगाथा व्याख्याता, तद्व्याख्यानाच्च व्याख्यातं षष्ठमग्लानाणं द्वारं। अथ द्वितीयग्लानप्रतिपादनायाह-

मू. (११९) विहिपुच्छाए पवेसो सन्निकुले चेइ पुच्छसाहम्मी।
अन्नत्थ अत्थि इह ते गिलाणकज्जे अहिवडंति॥

वृ. एवं तस्य व्रजतः पूर्ववद्विधिपृच्छायां सत्यां परेणाख्यातं, यदुतास्ति श्रावकस्तत्रः 'पवेसो'त्ति प्रवेशं करोति, क्व?-सन्निकुले 'चेइय'त्ति यदि तस्मिन सन्निकुले चैत्यानि ततस्तद्वन्दनां करोति। ततः 'पुच्छ'त्ति पृच्छति-किमिह साधर्मिकाः सन्ति उत न?, तत्राह श्रावकः-'अन्नत्थ अत्थि' अन्यत्र-आसन्नग्रामे विद्यन्ते, ते चेह 'ग्लानकार्ये' ग्लाननिमित्तं 'अहिवडंति' आगच्छन्ति प्रायोग्यभक्तादिग्रहणा-र्थमिति। ततश्च स साधुस्तस्मादभजति, व्रजन्तं वा साधुं भोजनादिना'ऽमन्त्रयति श्रावकः-भगवन्! पथमालिकामादाय व्रज॥

एवं चाभिहितः स किं करोतीत्याह-

मू. (१२०) सव्वेवि न घेत्तव्वं निमंतणं जं तहिं गिलाणस्स।
कारणि तस्स य तुज्झ य विउलं दव्वं तु पाउग्गं॥

वृ. 'सव्वं' अशेषं प्रायोग्यमप्रायोग्यं वा न ग्राह्यं श्रावकनिमन्त्रणं सति, 'जं तहिं गिलाणस्से'ति यस्मात्तत्र ग्लानस्य गृह्यते अतो न ग्राह्यम्, ततः श्रावकः पुनरप्याह-'कारणि तस्स य तुज्झ य विउलं दव्वं तु पाउग्गं'ति, 'तस्य' ग्लानस्य 'कारणे' ग्लाननिमित्तं तव च कारणे तव निमित्तं 'विपुलं' प्रभूतं द्रव्यं शाल्योदनादि प्रायोग्यमस्त्यतो गृह्यतामिति। ततश्चासौ श्रावकस्यापरोधेन गृहीत्वा व्रजति।

मू. (१२१) जाए दिसाए गिलाणो ताए दिसाए उ होइ पडिअरणा।
पुव्वभणिअं गिलाणो पंचण्हवि होइ जयणाए॥

वृ. यया दिशा ग्लानस्तिष्ठति तया दिशा 'पडिअरण'त्ति प्रतिपालनां करोति साधुनां, अथवा 'पडिअरण'त्ति निरूपणं-आलोचनं तस्य श्रावकदानस्य करोति, तच्च परीक्षणं ग्लानप्रतिचारकसाधुदर्शनमिति भवति अत उक्तं-यया दिशा ग्लानस्तया दिशा 'पडिअरणं'ति पुव्वभणिअं 'गिलाणो'त्ति पूर्वभणितो ग्लानविषयो विधिद्रष्टव्यः साम्भोगिकस्याम्भोगिकस्य ग्लानस्य, किमर्थमेव प्रतिचरणं कर्तव्यं ?, नित्याह-'पंचण्हवि होइ जयणाए' पञ्चानामपि-पासत्थोसन्नकुशीलसंसक्तणितिआनयतनया-प्रासुकान्नपानेनकर्तव्यं प्रतिजागरणमिति. अपिशब्दाद्विस्मृतका देवकुलपतिपालकाश्च गृह्यन्ते।

इयं निर्युक्ति गाथा. एता च भाष्यकृद्व्याख्यानयन्नाह-

मू. (१२२) तेसिं पडिच्छण सड्ढकयं अत्थि नत्थि वा लंभो।
खग्गूड विलओलणदानमनिच्छे नहिं नयनं॥ [भा. ३५]

वृ. 'तेसिं पडिच्छण'त्ति 'तेषां' ग्लानप्रतिजागरकसाधूनां प्रतिपालनां करोति, यया दिशा ते साधव आगच्छन्ति, 'पुच्छण'त्ति ततस्तान साधून दृष्ट्वा पृच्छति-एतन्ममामुकेन श्रावकेण दत्तं यदि ग्लान-प्रायोग्यं ननु गृह्यतामिति, एवमुक्ते तेऽप्याहुः 'सड्ढकयं अत्थि'त्ति सुष्ठुकृतं श्रावकेण अस्ति ग्लानप्रायोग्यं तत्रान्यदपि त्वमेवेदं गृहाण, 'नत्थि व'त्ति अथवा एवं भणन्ति-नास्ति तत्रेदं द्रव्यं किन्त्वन्यत्र लाभो भविष्यति, त्वमेव गृहाणेदम। अथैते 'खग्गूडि'त्तिनिर्धर्मप्रायास्तत एवमाहुः 'विड-ओलण'त्ति थाडिरेव निपतिता ततस्तद्द्रव्यं साधुः सकलंददाति-समर्पयति, तेऽपि चरुषानेच्छन्तिगृहीतुं, ततश्चासौ 'नयनं'तिग्लानसमीपे तस्य द्रव्यस्य नयनं करोति॥ इदानीं यद्यसौ समर्थस्ततश्च गच्छत्येव, अथासमर्थस्ततः-

मू. (१२३) पंते अम्हे करित्ता निवेदनं गहण अहव समणुन्ना।
खग्गूड देहि तं चिअ कमढग तस्सप्पणो पाए॥ [भा. ३६]

वृ. 'प्रान्ते' नीरसप्रायं 'अस्मद्' असमर्थः-क्षुत्पीडितः 'करित्ता' अभ्यवहृत्य व्रजति। ततश्च तत्र प्राप्तः सन् निवेदनंकरोत्याचार्याय, सोऽप्याचार्योग्लानार्थं 'गहण'त्ति ग्रहणंकरोति, कस्य? द्रव्यस्य, अथवा 'समणुन्न'त्ति तस्यैवसाधोरनुज्ञांकरोति, यदुत-भक्षयेदं, ग्लानस्यान्यदपिभविष्यति। अथा-सावाचार्यः 'खग्गूडो' शठप्रायो भवेत्तत इदं वक्ति-'देहि तं चिअ' त्वमेव ग्लानाय प्रयच्छ, किं ममानेन ? एवं चोक्त ग्लेनाचार्येण गत्वा ग्लानसमीपं 'कमढग तस्स'त्ति तदीयकं कमढकं ददाति, अथ तस्य तत्रास्ति, ततः 'अप्पणो पाए' आत्मीये पात्र एव ददाति, ततश्च पुनरप्याचार्यसमीपं व्रजति. गत्वा इदं ब्रवीति-

मू. (१२४) किं कीरउ ? जं जाणसि अतरंति संढेत्ति वच्च तं भंत!।
निल्लज्जा न करेंती करणमनालोडयसहाओ॥ [भा. ३७]

वृ. हे आचार्य! ग्लानस्य किमन्यत्क्रियते ?, आचार्योऽप्याह-'जं जाणसि'त्ति यज्जानासि तदेव कुरु, पुनश्चासौ ग्लानसमीपं गच्छति, 'अतरंतो'त्ति ग्लानोऽपि वक्ति-भगवन्! शठास्ते य एवं त्वां ग्लानीकुर्वन्ति. व्रज भदन्त। अस्मिन मे परिचारकाः. एवं चोक्ते व्रजति। 'निल्लज्जा न करेंती' अथासौ ग्लान एवमाह-यदुतैते निर्लज्जा मम न परिचेष्टां कुर्वन्ति, ततश्चासौ साधुः 'करणं'ति वैयावृत्त्यं करोति. पुनश्चासौ साधुस्तं ग्लानसमीपमेवं ब्रवीति-'अनालोडय'त्ति अमीषां निर्लज्जानांमध्येऽनालोचिता-प्रतिक्रान्तं कथञ्चिदेवत्वं नष्ट इति. अत एवमभिधाय तमात्मसहायं कृत्वा प्रयाति॥ यदा तु पुनः-

मू. (१२५) उभओ निल्लम्मेसुं फासुपडोआर इयरपडिसेहो।
परिमिअदान विसज्जण सच्छंदोल्लंघणागमनं॥ [भा. ३८]

वृ. 'उभओ निल्लम्मेसु' इति यदा ग्लानः शेषसाधवश्च निर्द्धर्म्मास्तदा कथं परिचरणां करोति-त्याह-'फासुपडोआर' प्रासुकेनान्नपानेनपरिपालनं करोति 'इतर' इति अप्रासुकंतस्यनिषेधः, तेन न क्रियां करोती-त्यर्थः। 'परिमिअदान' त्ति परिमितं-स्वल्पं ददाति येनासौ निर्विन्नः प्रेषयति, ततः 'विसज्जण' त्ति निर्विन्नः सन विसर्जयति, गच्छश्च स साधुः 'सच्छंदोल्लंघण' त्ति सच्छन्दस्त्वमित्येवं 'उल्लं-घनो' उल्लुंघनाम-आक्रोशं करोति, ततो 'गमनं' ति गच्छति। परिचरणा अवस्थीपोक्षा, 'पुव्वभणिओ विधाणो' त्ति एतदपि व्याख्यानम्। अथ 'पंचण्हवि होंति जयणाए' त्ति, एतत्पदं व्याचिख्यासुराह-

मू. (१२६) एस गमो पंचण्हवि होइ नियाइण गिलाणपडियरणे।
फासुअकरणनिकायण कहण पडिक्कामणागमनं॥ [भा. ३९]

वृ. 'एस गमः' एष परिचरणविधिः 'पंचण्हवि' पञ्चानामपि, केषामत आह-'नियाइणं' आदिशब्दात पार्श्वस्थोसन्नकुशीलसंसक्तानां, 'गिलाणपडिअरणे' त्ति ग्लानप्रतिचरणे एष विधिः-'फासुअकरण' त्ति यदुत प्रासुकेन भक्त पानादिना प्रतिचरणं कार्य, 'निकायण' त्ति निकाचनं करोति, यदुत दृढीभूतेन त्वया यदहं ब्रवीमि तत्कर्त्तव्यम्, 'कहण' त्ति धर्मकथाया, यद्वा 'कहण' त्तिलोकस्यकथयति-किमस्यप्रव्रजि-तस्य शक्यतेऽशुद्धेन कर्त्तुम्?। 'पडिक्कामण' त्ति यद्यसौ ग्लानः प्रतिक्रामतितस्मात्स्थानान्निवर्त्तत इतियावत् ततःस्थानात् 'गमन' त्ति तं ग्लानं गृहीत्वा गमनं करोति॥ अथ यदुक्तं 'पंचण्हवि होंति जयणाए' त्ति अत्रापिशब्द आस्ते तदर्थमाह-र्शयन्नाह-

मू. (१२७) संभावनेऽविसद्दो देवकुलिअखरंटयजयण उवएसो।
अविसेस निण्हगाणवि न एस अम्हं तओ गमनं॥ [भा. ४०]

वृ. संभावनेऽपिशब्दः, किंसंभावयति?-'देवकुलिअ' त्ति देवकुलपरिपालकावेषमात्रधारिणस्तेऽपिग्लानाः सन्तः परिचरणीयाः, 'खरंटण' त्ति तेषां देवकुलिकानां खिंसनां करोति, यदुत धर्मे उद्यमं कुरुत, 'जयण' त्ति यतनया कर्त्तव्यं यथा संयमलाञ्छना न स्यात्। 'उवएसो' त्ति उपदेशं च क्रियाविषयं ददाति। 'अविसेस' त्ति, न यस्मिन् विषये साधुनिह्नावकविशेषो ज्ञायते तस्मिन 'निण्हगाणंपि' निण्हा-वकानामपि यतनया परिचरणं करोति। अथ निह्नवकग्लान एवं ब्रूयात 'न एस अम्हं' ति योऽयं प्रा-घूर्णक आयातो नैषोऽस्मज्ज्ञातीय इति ततो गमनं करोति स साधुरिति। अथासौ निण्हावका-दिरेवमभिदध्यात-

मू. (१२८) तारेहि जयणकरणं अमुगं आनेहऽकप्प जनपुरओ।
नवि एस्सया समणा जयणाएँ तओ अवक्कमणं॥ [भा. ४१]

वृ. भगवंस्तारय मामस्मान्मान्द्यात ततः 'जयणकरणं' ति यतनया प्रतिचरणं करोति। अथासौ निण्हवकग्लान एवं ब्रूयात-'अमुकं आनेहि' त्ति 'अमुकं' बीजपूरादि आनय, तत एवं वक्तव्यं-'अकप्प जनपुरओ' त्ति अकल्पनीयमेतदित्येवं जनपुरतःप्रत्याख्यापयति, एतच्च स साधुर्वक्ति -नवि एस्सया समणा. एवं जनेन-लोकेन तयोर्भेदे ज्ञाते सति ततोऽसावपक्रामतिगच्छति तस्मात्स्थानात।

एवं प्रतिपादिते विधौ चोदक आह-

मू. (१२९) चोअगवयणं आणा आयरिआणं तु फेडिआ तेनं।
साहम्मिअकज्जबहुत्तया य सुचिरेणवि न गच्छे॥ [भा. ४२]

वृ. चोदकस्य वचनं चोदकवचनं, किं तदित्याह- आज्ञा आचार्याणां संबन्धिनी अपनीता- विनाशिता ततो यतः साधर्मिककार्यप्रभृतितया सुचिरेणापि न गच्छेत- न यायाद्विवक्षितं स्थानमिति। अत आचार्य आह-

मू. (१३०) तित्थगराणा चोयग! दिट्ठेतो भोइणा नरवइणा।
जत्तुग्गय भोइअदंडिए अ घरदार पुव्वकए॥ [भा. ४३]

वृ. तीर्थंकराणामियमाज्ञाहे चोदक!- यदुतग्लानप्रतिजागरणंकर्त्तव्यं, "जोगिलाण" मित्यादि-वचनात्, अत्रदृष्टान्तोग्रामभोगिकनरपतिसंबन्धी। जहा कोइ राया जत्ताए उज्जओ, तेनय आनत्तं, अमुकगामे पयाणयं देसामित्ति तत्थावासे करेहित्ति, ताहे गतो गोट्ठो, जस्सवि भोइअस्स सो गामो तेनवि कहिअं, ममवि करेह घरंति, ताहे गामेल्लयया चिंतेतिण्ण एस दिवसं ठाहिति, तं किंत्तो सविसेसं उवलद्धसुन्दरकुडेणा?, एवं तेहिं रन्ना कायमाणं कयं, भोइअस्स उ रम्मं चाउस्सालं निम्मविअं। राया आग-तो पेच्छति कयवंदणमालातोरणाभिरामं भोइयगिहं चाउस्सालं, ततोहिंतो पहाविओ, ततो तेहिं भणिअं-भगवं! एस तुम्हमावासो, इमो नज्जंति, वा कम्म एसो?, भोइयस्स, ततो रन्ना रुट्ठेण भोइयस्स गामो हडो गामोवि दंडिओ। एत्थवि जहा भोइओ तहा आयरिओ, जहा नरवई तहा तित्थयरो, जहा कुडुंबी तहा साहू। अमुमेवार्थमाह-दृष्टान्तो ग्राम्भोगिकनरपतिनायात्रोद्यतभद्रदारुणा (त्रोद्यतेभाजिकेदण्डिकेचतृणेनदारुणा च) पूर्वकृतेन-पूर्वचिन्तितेन यत्कृतं गृहमिति।

मू. (१३१) रन्ना तणघरकरणं सचित्तकम्मं तु गामसामिस्स।
दोण्हंपि दंडकरणं विवरीयऽन्नेनुवणओ उ॥ [भा. ४४]

वृ. राज्ञस्तृणगृहं कृतं सचित्रकर्म च ग्रामस्वामिनः, 'द्वयोरपि' ग्रामेयग्रामस्वामिनोर्दण्डकरणं-दण्डः कृतः। एवं तीर्थकराज्ञातिक्रमे द्वयोरप्याचार्यसाध्वोः संसारदण्डइति। 'विवरीयऽन्नेणुवणओ' त्ति उक्ताद्योऽन्यः सविपरीतेनान्येनाख्यानकेनोपनयः कर्त्तव्यः। अत्रेहिंगामेल्लएहिंचिंतिअं-एअं भोइयस्स सुंदरतरं कयल्लयं घरं, एयं चेव नरवइस्स होइ, गए नरवइंमि भोइयस्स चेव होहित्ति, भोइयस्सवि तणकुडी कया, राया पत्तो दिट्ठं भणति-कहं भो एरिसेणं भवणं कयं?, ते भणंति-अम्हेहिं एयं कयं, एयं दलियं भोइयस्स आनीयं, तेन तुज्झ घरं कयं, भोइयस्सवि तणकुडी कया, ताहे रन्ना तुट्ठेण सो गामो अकरदाओ कओ, भोइओऽवि संपूइओ, अन्नो अ से गामो दिन्नो। एवं तित्थयराणमाणं करेंतेण कया चेव आयरिआणं। अथ प्रथमोपनयोपदर्शनायाह-

मू. (१३२) जह नरवइणो आणं अइक्कमंता पमायदोसेणं।
पावंति बंधवहरोहछिन्नमरणावसाणाइं॥ [भा. ४५]

मू. (१३३) तह जिनवराण आणं अइक्कमंता पमायदोसेणं।
पावंति दुग्गइपहे विनिवायसहस्सकोडीओ॥ [भा. ४६]

वृ. यथा नरपतेराज्ञामतिक्रामन्तः प्रमादद्वेषेण- अज्ञानदोषेण प्राप्नुवन्ति बन्धो निगडादिभिः वधः- कशादिताडनं रोधागमनस्य व्याघातः छेदो हस्तादेः मरणावसानानि दुःखानि प्राप्नुवन्ति यथा- तथा जिनवराणामाज्ञामतिक्रामन्तः प्रमादः- अज्ञानं स एव दोषस्तेन प्राप्नुवन्ति विनिपातानां-दुःखानां सहस्र-कोटीः। इदानीं द्वितीयोपनयोपदर्शनायाह-

मू. (१३४) तित्थगरवयणकरणे आयरिआणं कयं पए होइ।
कुज्जा गिलाणगस्स उ पढमालिअ जाव बहिगमनं॥ [भा. ४७]

वृ. तीर्थकरसंबन्धिवचनकरणे-वचनानुष्ठाने आचार्याणां 'कृतं पए' त्ति 'प्रागेव' पूर्वमेव कृतं भवति।

यस्मादेतदेवं तस्मात्कुर्यात् ग्लानस्य प्रतिजागरणं साधुः, क्रियन्तं कालमत आह-'पढमालियं जाव बहिगमनं'ति यावत्प्रथमालिकामानेतुं समर्थो जातः यावच्च बहिर्गमनक्षमो जात इति॥ तथा-

मू. (१३५) जइ ता पासत्थोसन्नकुसीलत्तं निण्हवगाणंपि देंगिच्छं करणं।
चरणकरणाल्लमाणं सब्भावपरूहाणं च॥ [भा. ४८]

वृ. यदि तावत्पार्श्वस्थावसन्नकुशीलत्वास्तेषां, तथा सद्भावः-तत्त्वं सम्यग्दर्शनं ततः पराङ्मुखाः, के ते? निह्नवकास्तेषाम्, अथवा 'चरणकरणाल्लमाणं' अत एव सद्भावपराङ्मुखानां, केषां?-सर्वेषामेव पार्श्वस्थावसन्नकुसीलनिह्नवकानां यदि तावत्कर्त्तव्यं प्रतिपादितं तत इतरेषां नितरामेव। एतदेवाह-

मू. (१३६) किं पुन जयणाकरणुज्जयाण दंतिंदियाण गुत्ताण?।
संविग्गविहारीणं सव्वपयत्तेण कायव्वं॥ [भा. ४९]

वृ. किं पुनः-किमुत यतनाकरणे उद्यताः-उद्यक्तास्तेषां दान्तेन्द्रियाणां गुप्तानां मनोवाक्कायगुप्तिभिः संविग्नविहारिणः-उद्यतविहारिणां भोक्षाभिलाषिणामित्यर्थः, तेषांसर्वप्रयत्नेनकार्यम्?। किंपुनःकारणमनावन्ति विशेषणानि क्रियन्ते? एकस्यैव युज्यमानत्वात्तत्र, तथाहि-यतनावदुच्यते-यतना-करणोद्यतानामिति, ततः कदाचिन्निह्नवका अपि यतनाकरणोद्यताःस्युः? अत आह-दान्तेन्द्रियाणां गुप्तानां चेति, तेऽपिचदान्तेन्द्रिया गुप्ताः कदाचिल्लाभादिनिमित्तं भवेयुरत उक्तं-संविग्नविहारिणां ये, तेषामवश्यं कर्त्तव्यमिति।

उक्तं ग्लानद्वारम्, अथ सञ्ज्ञिद्वारं संबन्धयन्नाह-

मू. (१३७) एवं गेलन्नट्ठा वाघाओ अह इनानि भिक्खट्ठा।
वड्डयग्गामे संखडि सन्नी दाने अ भद्दे अ॥

वृ. एवंग्लानार्थं 'व्याघातो' गमनप्रतिबन्धस्तस्यस्यात्, 'अथेत्यानन्तर्ये, इदानीं भिक्षार्थंगमन-विघातो न कार्य इत्यध्याहारः, अथवाऽन्यथा-एवं तावद् ग्लानार्थं गमनव्याघात उक्तः, इदानीं भिक्षार्थं यथाऽसौ स्यात्तथोपदर्श्यते-'वड्डयग्गामे संखडिसन्नी दाने य भद्दे'त्ति, व्रज इति-गोकुलं तस्मिन्प्रविष्टस्यगमनविघातः स्यात्, ग्रामः-प्रसिद्धः संखडीप्रकरणं सञ्ज्ञी-श्रावकः 'दान'त्ति दान-श्राद्धकः 'भद्दे अ'त्ति भद्रकः साधूनां, चशब्दान्माधुनिनादकुलानि। एतेषु प्रतिबध्यमानस्य यथा गमनविघातस्तथाऽऽह-

मू. (१३८) उव्वत्तणमप्पत्तं च पडिच्छे खीरगहण पहगमने।
वोसिरणे छक्काया धरणे मरणं दवविरोहो॥

वृ. सङ्घिअनुकूलंपन्थानमुत्सृज्य उद्वर्त्तते-यतोव्रजस्ततोयाति, व्रजे चप्राप्तः सन अप्राप्तांवेलां 'प्रतीक्षते' प्रतिपालयति, ततश्च 'खीरगहण'त्ति तत्र क्षीरग्रहणं करोति, क्षीरमध्यवहारमित्यर्थः, 'पहगमन'त्ति पीते क्षीरे पथि गमनं करोति। पुनश्च तेनान्य भद्रः कृतः, ततश्च 'वोसिरणं'ति मुहुर्मुहुः पुरीषोत्सर्गं विदधाति, तत्र च षट्कायविराधना, तद्गर्भधरणे च मरणं, 'दवविरोहो'त्ति द्रवेण-काञ्जिकेन सह विरोधो भवति, साधोः प्रायस्तत्संव्यवहारात्, यद्वा 'दवविरोहो'त्ति द्रवम्उदके तेन निर्लेपनं करोति सागारिकपुरतः, अथ न करोत्युड्डाहः-प्रवचनहीलना भवति, अथवा द्रवविरोधो विनाशो, यतस्तृषितः सन्तंदेव पिबति। एवं व्रजे गच्छतः आत्मविराधना प्रवचनोपघातश्च स्यात्, गमनविघातश्च नितरां स्यात्। उक्तं व्रजद्वारम्, अथ ग्रामद्वारम्-

मू. (१३९) खद्धादानिअगामे संखडि आउन्न खद्ध गेलन्ने।
सन्नी दाने भद्दे अप्पत्तमहानिनादेसु॥

वृ. स्वद्धादानिकग्रामः-समृद्धग्रामस्तस्मिन्प्रवर्त्तते करोति, अप्राप्तां वेलां च प्रतिपालयति, क्षीर-ग्रहणं

करोति, तत्र चत एव दोषाः "वोसिरणे छक्कायाधरणे मरणं दव्वविगेहो"। उक्तं ग्रामद्वारम्, अथ संखडिद्वारं, तत्राह-'संखडिआइन्नगेलन्ने'त्ति संखडीप्रकरणंतदर्थंमुद्यतेन, अप्राप्तां चवेलांप्रतिपालयति, तत्र च 'आइन्न'त्ति आकीर्णं-संबाधनं स्त्रीस्पर्शादिदोषाः, तथा 'खद्धरगेलण'त्ति खद्धं-प्रभूतमुच्यते, ततश्च भूरिभक्षणे मान्द्यं स्यात्, तएवच दोषाः "वोसिरणे छक्कायाधरणे मरणं दव-विगेहो"। उक्तं संखडिद्वारम्, अथ सञ्ज्ञिद्वारम्-'सन्नि'त्ति सञ्ज्ञिनं श्रुत्वा उद्वर्तनं करोति, अप्राप्तां च वेलां प्रतिपालयति, तत्र न त एव दोषा वोसिरणादयः। उक्तं सञ्ज्ञिद्वारम्, इदानीं दानश्राद्धकद्वारं, तत्रापि 'उव्वत्तणमप्पत्तं च पडिच्छे'त्ति पूर्ववत्, ततश्चासौ दानश्राद्धकःप्रभूतं घृतब्वादि, तत्रापितएवदोषा वोसिरणादयः। उक्तं दानद्वारम्, अथ भद्रकद्वारं-'भद्दग'त्ति कश्चिन्स्वभावत एव साधुभद्रकः स्यात् तत्समीपगमनार्थमुद्वर्तनं करोति, अप्राप्तां च वेलां प्रतिपालयति, ततश्चासौ लड्डुकादिप्रदानं करोति, त एव दोषाः। अथ महानिनादद्वारमाह-'अप्पत्तमहानिनाएसु'त्ति महानिनादेषु-शब्दितेषुकुलेषु-प्रख्यातेषुकुलेषु उद्वर्तनंकृत्वा 'अप्पत्त'त्ति अप्राप्तां वेलां प्रतिपालयति, तेषु च स्निग्धमन्नं लभ्यते, एवं च तत्रापि त एव दोषाः "वोसिरणे छक्कायाः" इत्यादयः। उक्तं चशब्दाक्षिप्तं महानिनादकुलद्वारं, तथाऽनुकूलान्त्वमार्गाद(न)नुकूलेषु व्यवस्थितेषु व्रजादिषु अप्राप्तां वेलां भक्तार्थं प्रतिपालयतो गमनविघातदोष उक्तः, इदानीमनुकूलमार्गव्यवस्थितेषु व्रजादिषु भक्तार्थं प्रविष्टस्य यथा गमनविघातो भवति तथा प्रतिपादयन्नाह-

मू. (१४०) पहुच्छिरवीर सतरं घयाइ तक्कस्स गिण्हणे दीहं।
गेहि विगिंचणिअभया निसट्ठ सुयणे स परिहानी॥

वृ. पहुच्छिरक्षीरं-पारिहिट्ठिरक्षीरं नदन्विषन शेषक्षीरं चागृण्हन् दीर्घां भिक्षाचर्यां करोति, तथा 'सतरं'ति सतरं दधिअन्वेदीर्घां तां करोति, तक्रस्य वा ग्रहणे दीर्घां तां करोति। इदानीं तत्क्षीरादिप्रचुरंलब्धंसत 'गेहि'त्ति गृह्णः सन् प्रचुरं भक्षयति, यद्वा 'विगिंचणिअभया निसट्ठं'ति विगिञ्चनं-परित्यागस्तद्भयान्निसृष्टं-प्रचुरं भक्षयति, ततश्च प्रचुरभक्षणे 'सुयणे अपरिहाणी' प्रदोषएवस्वाध्यायमकृत्वैवस्वपिति, सुप्तस्य च 'परिहाणी' सूत्रार्थविस्मरणमित्यर्थः, चशब्दात् 'अह जग्गति गेलन्ने" इत्येतद्वक्ष्यति नृनोयगाथायाम्। एवं तावदनुकूलमार्गव्यवस्थितेव्रजे भक्तार्थं प्रविशतो गमनप्रतिघात उक्तः, इदानीमनुकूलमार्गव्यवस्थितेग्रामे भक्तार्थं प्रविष्टस्य यथा गमनविघातो भवति तथाह-

मू. (१४१) गामे परितलिअगमाडमग्गणे संखडी छणे विरुवा।
सन्नी दाने भद्दे जेमणविगडंगहण दीहं॥

वृ. 'गामे' इति द्वारपरामर्शः, ग्रामेप्रविष्टःसन परितलितादिमार्गणं करोति, परितलितं-सुकुमालिकादि उच्यते, तदन्विषन दीर्घां भिक्षाचर्यां करोति। उक्तं मनुकूलग्रामद्वारम्, इदानीमनुकूलसंखडीद्वारमुच्यते-'संखडी छण विरुव'त्ति संखडीप्रकरणं, सा च 'क्षणे' उत्सवे विविधरूपा भवति, एतदुक्तं भवति-गृहे गृहे घृतपूरादि लभ्यते, तदर्थं च दीर्घां भिक्षाचर्यां करोति। उक्तं मनुकूलसंखडीद्वारं, इदानीमनुकूलव्यवस्थित-सञ्ज्ञिद्वारमुच्यते-'सन्नि'त्ति सञ्ज्ञिनः-श्रावका उच्यन्ते, तेषु मृष्टान्नार्थी दीर्घां भिक्षाचर्यां करोति। उक्तं मनुकूलसञ्ज्ञिद्वारम्, इदानीमनुकूलदानश्राद्धकद्वारमुच्यते-'दाने'त्ति दानश्राद्धका उच्यन्ते, तेष्व-नुकूलपथव्यवस्थितेषु प्रविष्टो मृष्टभोजनार्थी दीर्घां भिक्षाचर्यां करोति। उक्तं दानश्राद्धकद्वारम्, इदानीं भद्रकद्वारमुच्यते-"भद्दे'त्ति अनुकूलपथव्यवस्थितेषु भद्रकेषु 'जेमण-विगडंगहण दीह'त्ति मृष्टभोजन-विकृतिग्रहणार्थं, दीर्घां भिक्षाचर्यां करोतीति सर्वत्र योज्यमिति। तत्र प्रागिदमुक्तं -प्रचुरभक्षणात्स्वपनः

सूत्रार्थपरिहानिर्भवति, अथ न स्वपिति ततः को दोष ? इत्यत आह-

मू. (१४२) अह जग्गइ गेलन्नं अस्संजयकरणजीववाघाओ।
इच्छमनिच्छे मरणं गुरुआणा छड्डणे काया॥

वृ. अथ स्निग्धे आहारे भक्षिते जागरणं करोति, सूत्रार्थपौरुषीं करोतीत्यर्थः, ततश्च को दोष ? इत्यत आह-'गेलन्नं' ग्लानत्वं भवति, ग्लानत्वे सति तस्य साधोर्यद्यसंयतः प्रतिजागरणं करोति इच्छति च ततः को दोषस्तदेत्यत आह-असंयतकरणे जीवव्यापातो भवति इच्छतः, अथ नेच्छति असंयतेन क्रियां क्रियमाणां ततः 'अनिच्छे मरणं' अनिच्छतो मरणं भवति, न केवलमयमेव दोषः, 'गुरुआणाछड्डणे काया' गुरोराज्ञालोपः कृतो भवति, मृतस्य च छड्डणे-परित्यागे गृहस्थाः षट्काय-व्यापादनं कुर्वन्ति। यदा तु पुनस्तेषु व्रजादिषु तक्रौदनादिग्रहणं करोति तदा पूर्वोक्ता दोषाः परिहृता भवन्ति। एतदेव प्रतिपादयन्नाह-

मू. (१४३) तक्कोयणाण गहणे गिलाण आणाइया जढा होंति।
अप्पत्तं च पडिच्छे सोच्चा अहवा सयं नाउं॥

वृ. तक्रौदनानां ग्रहणे सति ग्लानत्वदोष आज्ञाभङ्गदोषश्च, आदिशब्दात्पथि पतिमन्थदोषश्च, एते जढा इति-त्यक्ता भवन्ति। इदानीं प्रतिषिद्धस्यापि कारणान्तरेणानुज्ञां दर्शयन्नाह-'अप्पत्तं' च पडिच्छे' अप्राप्तामपि वेलां प्रतिपालयति, किमर्थं ?, -वक्ष्यमाणान् दोषान् श्रुत्वा पथिकादेः सकाशात्, 'अहवा सयं नाउं' स्वयमेव ज्ञात्वा, कान् ?-दूरव्यवस्थितग्रामादिदोषान्, अप्राप्तामपि वेलां प्रतीक्षत इति।

इदानीं तानेव दोषान् प्रतिपादयन्नाह-

मू. (१४४) दूरुट्ठिअ खुड्डुलए लव भड अगनी अ पंत पडिनीए।
अप्पत्तपडिच्छण पुच्छ बाहिं अंतो पविसिअव्वं॥

वृ. कदाचिदसौ ग्रामो दूरे भवति ततोऽप्राप्तामपि वेलां प्रतिपालयति, 'उट्ठिउ'त्ति कदाचिदसौ ग्राम उत्थितः-उद्वसितो भवति, कदाचिच्च 'खुड्डुलय'त्ति स्वल्पकुटीरकः, कदाचित् 'नव' इति अभिनववासितो भवति, तत्र पृथिवीकायः सचित्तो भवति, कदाचिच्च भटाक्रान्तोऽसौ भवति, कदाचित् 'अगनीय'त्ति अग्निना दग्धो भवति, कदाचिच्च प्रान्तः-दरिद्रप्रायो भवति, कदाचिच्च प्रत्यनीकाक्रान्तो भवति, अत एभिः कारणैः 'अप्पत्तपडिच्छण'त्ति अप्राप्तामपि वेलां प्रतिपालयति, तेन च साधुना सञ्ज्ञिकुलं प्रविशता विधिपृच्छा पूर्ववत्कर्त्तव्या, एतदेवाह-'पुच्छ'त्ति, विधिपृच्छा पूर्ववत्। 'बाहिं'ति चोदकएवमाह-बहिरेवास्तु साधुस्तिष्ठति यावत्सञ्ज्ञिकुले वेला भवतीति, आचार्यस्त्वाह-'अंतो पवि-सियव्वं' इमं च गाथाऽवयवं भाष्यकारो व्याख्यानयिष्यतीति। इदानीं तत्र सञ्ज्ञिकुलेषु प्रविष्टः साधुः कारणमाश्रित्य दीर्घामपि भिक्षाचर्यां यथा करोति तथा प्रतिपादयन्नाह-

मू. (१४५) कक्खडखेत्तचुओ वा दुब्बल उद्धाण पविसमाणो वा।
खीराइगहण दीहं बहुं च उवमा अयकडिल्ले॥

वृ. 'कक्खडं' रूक्षादिगुणसमन्वितं यत्क्षेत्रं तस्माच्च्युतः-आयातः सन्, तथा दुर्बलो यदि भवति-वाध्यादिरोगाक्रान्तः, तथा परस्ताद्दीर्घमध्वानं प्रवेक्ष्यति यदि, तत एभिः कारणैः क्षीरादिग्रहणनिमित्तं दीर्घां भिक्षाचर्यां करोति, बहु च क्षीरादि गृह्णाति येनास्य कार्यस्य समर्थो भवति। आह-बहुभक्षणात्कथं विसूचिकादिदोषो न भवति ? उच्यते, 'उवमा अयकडिल्ले' उपमा-उपमानं अयो-लोहं तन्मयं तत्कडिल्लं तेन उपमा, एतदुक्तं भवति-यथा तप्तलोहकडिल्ले तोयादिक्षयमुपयाति एवमस्मिन् साधौ रूक्षस्वभावे बह्वपि

घृतादिक्षयं यातीति। इदानीयं एव प्राग्व्यावर्णिता दोषास्तानेव कारणान्तरमुद्दिश्य गुणवत्तया स्थापयन्नाह-

मू. (१४६) जे चेव पडिच्छणदीहसद्धसुवणेसु वन्निआ दोसा।
ते चेव सपडिवक्खा होंति इहं कारणज्जाए॥

वृ. यएवदोषा 'पडिच्छणे'तिप्रतिपालने 'दीहे'तिदीर्घायांभिक्षाचर्यायां 'सद्ध'त्तिप्रचुरभक्षणे 'सुवण'त्ति स्वापे, एतेषु स्थानान्तरेषु 'वर्णिताः' कथिता ये दोषास्त एव सप्रतिपक्षाः-सविपर्ययाः गुणा इत्यर्थः, भवन्ति, 'इह' अस्मिन् 'कारणजाते कारणमाश्रित्य। इदानींयदुक्तं निर्युक्तिकृता-''पुच्छबाहिंअंतोपविसिअव्वं''ति, एतद्व्याख्यानयन्भाष्यकार आह-

मू. (१४७) विहिपुच्छाए सन्नी सोउं पविसे न बाहि संचिक्खे।
उग्गमदोसभएणं चोयगवयणं बहिं ठाउ॥ [भा. ५०]

वृ. 'विधिपृच्छया' पूर्वाभिहितया 'सञ्ज्ञिनं' श्रावकं श्रुत्वा ततः प्रविशेत्, क्व ?-श्रावकगृहे, न च बहिः संतिष्ठेत्, किंकारणम् ?-उद्गमदोषभयात्, मा भूत्तं साधुमुद्दिश्य कश्चिदाहारं कुर्याद असौ सञ्ज्ञी। एवमुक्ते सत्याह चोदकः, किं तद् ?, इत्याह-'बहिं ठाउ' बहिरेवासौ साधुर्भिक्षावेलां प्रतिपालयतु, मा भूत् प्राघूर्णक इतिकृत्वा श्रावक आहारपाकं करिष्यतीति। एवमुक्ते सत्याचार्य आह-

मू. (१४८) सोच्चा वट्टणं वा बाहिठिअं अग्गमेगयर कुज्जा।
अप्पत्तपविट्ठो पुण चोयग! दट्ठुं निवारेज्जा॥ [भा. ५१]

वृ. श्रुत्वा तं साधुं बहिर्वर्त्तिनमन्यस्मात्पुरुषादेः स्वयं वा दृष्ट्वा उद्गमादीनां दोषाणामेकतरं-अन्यतमं कुर्यात्। 'अप्पत्त'-त्ति अथवासाधौ वेलायामतिक्रान्तायां श्रावकः कुर्यात्, एष बहिस्तिष्ठतो दोषः, 'पविट्ठो पुन चोयग! दट्ठुं निवारेज्जा' प्रविष्टः पुनरसौ साधुः सञ्ज्ञिकुलं हे चोयग! 'दट्ठुं'ति दृष्ट्वा उद्गमादिदोषं निवारयेत। किञ्च-

मू. (१४९) उग्गमदोसाईणं कहणा उप्पायणेसणाणं च।
तत्थ उ नत्थी सुन्ने बाहिं सागार कालदुवे॥

वृ. उद्गमदोषादीनां कथनं करोति उत्पादनादोषाणां एषणादोषाणां च कथनं करोति, ततश्च यदि शुद्धं भक्तं ततस्तत्रैव सञ्ज्ञिगृहे भोक्तव्यम्, अथतत्रनास्तिततोऽन्यत्रगन्तव्यम्। एतदेवाह-'तत्थउ'त्ति तत्रैव-श्रावकगृहेभुञ्जते, 'नत्थि'त्तिअथतत्रनास्तिभोजनस्थानंततः 'सुन्न'त्ति शून्यगृहे शून्यगृहे याति, 'बाहिं'ति अथ शून्यगृहे सागारिकैर्भोक्तुं न शक्यते ततो बाह्यतो व्रजति, अथ तत्रापि 'सागार'त्ति सागारिकाः ततः 'कालदुवे'त्ति कालक्षितयं ज्ञातव्यं, किं ?, स्वल्पो दिवस आस्ते आहो-स्वित् महान् ?, यदि महांस्ततो दूरमपि स्थण्डिले गत्वा समुद्दिशति, अथ स्वल्पो दिवसस्ततोऽस्थण्डिल एव यतनया समुद्दिशतीति। इयं तावन्निर्युक्तिगाथा, एतामेव भाष्यकारः प्रतिपदं व्याख्यानयति, तत्र चोदकाक्षेपपरिहारद्वारेण प्रवेशविधिरुक्तः, इदानीं बहिस्तिष्ठतोऽधिकतरदोषप्रतिपादनायाह-

मू. (१५०) फेडेज्ज व सइ कालं संखडि घेत्तूण वा पए गच्छे।
सुन्नघराइपलोअण चेइअ आलोयणाऽबाहे॥ [भा. ५२]

वृ. स हि तत्र बहिर्व्यवस्थितः किं कुर्यादित आह-'फेडेज्ज व सइ कालं' अपनयेत् 'सति'त्ति विद्य-मानं भिक्षाकालम्, एतदुक्तं भवति-ग्रामे प्रहरमात्र एव भिक्षावेला भवति, तत्र च व्यवस्थितः साधुस्तां भिक्षावेलामपनयति, 'संखडि'त्ति कदाचित्तत्रान्यस्मिन दिवसे सङ्खडिरासीत्, तदुद्धरितं च पर्युषितभक्तं प्रत्यूषस्येव भक्षितं गृहस्थैरतोऽसौ साधुर्बहिर्व्यवस्थितस्तस्य भ्रष्ट इति, 'घेत्तूण वा पए गच्छे'त्ति गृही-त्वा

वायत्तत्वराद्धं पव्वं वा नत्यागंव श्रावकोगृहीत्वाग्रामान्तरंगतः, ततश्चागौ साधुरन्तरस्यभ्रष्टइति, अतएतद्दोष-भयात्प्रवेष्टव्यम्। प्रविशतश्च को विधिरित्यत आह-'सुन्नघरादिपलोयण' प्रविशंश्चासौ साधुः शून्य-गृहादिप्रलोकनं करोति, कदाचित्तत्र भुंजिक्रियां करोति, प्रविष्टश्च श्रावकगृहं 'चेइय'त्ति चैत्यवन्दनं करोति 'आलोयण'त्ति आलोचनां पृच्छति। तत्र च प्रविष्टो भिक्षादोषान् कथयन्नाह-

मू. (१५१) उग्गम एसणकहणं न किंचि करणिज्ज अम्ह विहिवाणं।
कम्मट्ठा आरंभो तुज्झेसो ? पाहुणा डिंभा॥ [भा. ५३]

वृ. उद्गमदोषाणाम्-आधाकर्मादिदोषाणां कथनं एषणादोषाणां च कथनं, ततश्च आरम्भं दृष्ट्वा एतच्च ब्रवीति-नास्मदर्थे किञ्चित्कर्त्तव्य आहारविधिः, किन्त्वस्माकं विधिदानं क्रियते, तथा चोक्तं-"विहिगहिअं विहिदिन्नं दोण्हंपि बहुप्फलं जहा होति"। अथ कदाचिच्छ्रावको न कथयति तदा डिम्भरूपाणि पृच्छति, तानि ह्यजत्वाद्यथाव्यवस्थितं कथयन्ति। किं पृच्छति ?, 'कम्मट्ठा आरंभो' कस्य निमित्तमयमारम्भः ?, इत्येवं साधुना पृष्टे सति डिम्भरूपाण्यपि कथयन्ति-'तुज्झेसो'त्ति त्वदर्थ-मयमारम्भः, यतः 'पाहुण'त्ति प्राघूर्णका यूयमिति, अथवा 'पाहुण'त्ति प्राघूर्णकानामर्थेऽयमारम्भो न तव, एवं 'डिंभ'त्ति अर्भकरूपाणि कथयन्ति। अथ तत्रार्मकरूपाणि न सन्ति यानि पृच्छ्यन्ते ततः स्वयमेव केनचिद्व्याजेन रसवती यतो याति, एतदेवाह-

मू. (१५२) रसवइपविसण पासण मिअममिअमूवक्खडे तहा गहणं।
पज्जत्ते तत्थेव उ उभएगयरे य ओयविए॥ [भा. ५४]

वृ. रसवती-सूपकारशाला तस्यां प्रवेशनं करोति, प्रविष्टश्च पश्यत्ता-दर्शनं करोति, तत्र च 'मित-ममितं उवक्खडे'त्ति कदाचिन्मितमुपस्क्रियते स्वल्पं, कदाचिदमितं उपस्क्रियते बहु, 'तहा गहणं'ति तत्र यदि मितं राद्धं ततः स्वल्प गृह्णाति, अथ प्रचुरं राद्धं ततस्तदनुरूपमेव गृह्णाति। तत्र नियुक्ति कारगाथायां संबन्धि पूर्वार्द्धं व्याख्यातं, कतमत् ? "उग्गमदोसाईणं कहणं उप्पायणेसणाणं च" इति, इदानीं मूलनियुक्ति कारगाथायां तस्यामेव यदुपन्यस्तं 'तत्थ उ'त्ति तद्व्याख्यानयन्नाह, 'पज्जत्ते तत्थेव उ' यदि पर्याप्तं भक्तं लब्धंततस्तस्मिन्नेवगृहेभुङ्क्त इति। 'उभएगयरेचओय-विए'त्ति उभयं श्रावकः श्राविका च 'ओयविअं'खेदज्ञं उभयं यदि भवति 'एगतरं च ओयविअं' अल्प-सागारिकः-श्रावक इत्यर्थः, श्राविका वा ओयविआअल्प-सागारिकेत्यर्थः, ततो भुङ्क्त इति।

'तत्थ उ'त्ति अयमवयवो व्याख्यातः, इदानीं 'नत्थि'त्ति अवयवो व्याख्यायते-

मू. (१५३) असइ अपज्जत्ते वा सुनघराईण बाहि संसद्दे।
तद्दाइ दारघट्टण पविसण उस्सग्ग आसत्थे॥ [भा. ५५]

वृ. असति तस्मिन्नुभये यदा श्रावकोऽल्पसागारिको नास्ति, नापि श्राविकाऽल्पसागारिका, श्रावक-श्राविकयोरन्यतरो वा यदाऽल्पसागारिको नास्ति तदा अभावे अति 'अपज्जत्ते व'त्ति यदा पर्याप्तं तस्मिन् श्रावकगृहेभक्तं नभवति लब्धं तदाऽन्यत्रापि भिक्षाटनं कृत्वा 'सुन्नघराई'नि शून्यगृहादिषुगम्यते भोजनार्थम्, आदिशब्दाद्देवकुलादिषु वा, तेषां च शून्यगृहादीनां बहिरेव व्यवस्थितः संज्ञाशब्दं-काशितादिरूपं करोति, कदाचित्तत्र कश्चित्सागारिको दृश्यारित्रीभवेत्स च तेन शब्देन निर्गच्छति, अथैवमपि शब्दे कृते न निर्गच्छति ततो यष्ट्या द्वारे घट्टनं-आहननं क्रियते, ततः प्रविशति, प्रविष्टश्च यदि कञ्चित्न पश्यति ततः 'उस्सग्ग'ति ईर्यापथनिमित्तं पञ्चविंशत्युच्छ्वासप्रमाणं कायोत्सर्गं करोति, तथा च 'आसत्थे'त्ति मनागाश्वासितः सन्।

ततश्च-

मू. (१५४) आलोअणमालोवो अदिट्ठमिवि तहेव आलावो।
किं उल्लावं न देसी ? अदिट्ठ निस्संकिअं भुंजे॥ [भा. ५६]

वृ. 'आलोकने' निरूपणं तत् करोति, अथ निरूपितं (कश्चिद्दृष्टः) 'आलावो'त्ति, यदि कश्चिद्दृष्टस्तत आलपनं करोति, किमिह भवानागतः? इति। 'अदिट्ठमिवि तहेव आलावो'त्ति अदृष्टऽपि सागारिके तथैवालपनं करोति, किमिह भवानायातः इति। अथैवमप्युक्तो न कश्चित्तत्रोत्तरं ददाति तत इदमुच्यते- 'किमुल्लावं न देसीति ?,' तस्मादुल्लापं प्रतिवचनं प्रयच्छेति। अथैवमपि न कश्चित्त्रोपलब्धस्ततः 'अदिट्ठे'त्ति सर्वथा सागारिकेऽनुपलब्धेसतिनिःशङ्कितं भुङ्क्त इति। अथएभिरप्यु-पायैर्नप्रकटीभूतः सागारिकः पश्चात्तुप्रकटीभूतो भुञ्जतः सतस्ततः,

मू. (१५५) दिट्ठ असंभम पिंडो तुज्झवि य इमोत्ति साह वेउव्वी।
सोवि अगारो दोच्चा नीइ पिसाउत्ति काऊणं॥ [भा. ५७]

वृ. दृष्टे सागारिके सति 'असंभम'त्ति असम्भ्रमो-न भयं कर्त्तव्यम्, असम्भ्रान्तेन च तेन साधुना 'पिण्डो तुज्झवि अ इमो'त्ति स्वाहा' भिक्षापिण्डं गृहीत्वा एवं करोति-अयं यमाय पिण्डः, अयं वरुणाय पिण्डः, अयं धनदाय पिण्डः, अयमिन्द्राय पिण्डः, तुज्झवि अ इमोत्ति स्वाहा-तवाप्ययं पिण्डः स्वाहा 'वेउव्वि'त्ति विकृतं शरीरं करोति पिशाचगृहीत इव, एवंविधं साधुं दृष्ट्वा सोऽप्यगारी 'दोच्चा' इति भयेन 'नीति' निर्गच्छति, 'मुनि (पिसा) ऊ त्ति कारुणं' पिशाचोऽयमितिकृत्वा। एवं तावदभ्यन्तर-स्थसागारिकदर्शने भुञ्जानस्य विधिरुक्तः, यदा तु पुनर्बहिर्व्यवस्थित एव एभिः स्थानान्तरं पश्यति तदा को विधिः ? इत्यत आह-

मू. (१५६) तिव्वेण व मालेन व वाउपवेसेण असव सढयाए।
गमनं च कहण आगम दूरब्भासे विही इणमो॥ [भा. ५८]

वृ. यदा तु सागारिको बहिर्व्यवस्थित एव साधुं तीव्रेण-छिद्रेण कुटिकापवङ्केन कटकेन पश्यति, 'मालेण व'त्ति माले-उपरितलव्यवस्थितो यदा कदाचिच्छठतया पश्यति, 'वाउपवेसण'त्ति, अथवा 'वायुप्रवेशेन' गवाक्षेण शठतया पश्यति, अथवेति विकल्पार्थः, एतेनान्येन वा प्रदेशेन 'शठतया' धूर्त्ततया पश्यति, दृष्ट्वा च गमनं च करोति स सागारिकः, 'कहणं'- ति गत्वा चान्येभ्यः कथयति-यदुतागच्छत पश्यत पत्रके भुञ्जानः साधुर्दृष्ट इति, तत्र 'आगम'त्ति तेऽप्यागच्छन्ति, पश्यामः किमेतत्सत्यं न वेति, 'दूरब्भासे विही इणमो' दूरादागच्छतां अभ्यासाद्वाऽऽगच्छतां 'विही इणमो' विधिः 'अयं' वक्ष्यमाणलक्षणो भवति।

कथासौ विधिरित्यत आह-

मू. (१५७) थोवं भुंजइ बहुअं विगिंचइ पउमपत्तपरिगुणणं।
पत्तेसु कहिं भिक्खं दिट्ठमदिट्ठे विभासा उ॥ [भा. ५९]

वृ. यदितावद्दूरेसागारिकास्ततःससाधुः 'थोवं भुंजति' स्तोकं भुङ्क्ते, बहुभक्तं 'विगिंचति'त्यजति गर्त्तादौ-अल्पसागारिकं करोति धूलिना वा आच्छादयति, अथाभ्यास एव सागारिकास्ततः 'थोवं भुंज'त्यन्यथा व्याख्यायते-स्तोकं भुङ्क्ते यावन्मात्रं मुखस्यान्तस्तिष्ठति तावन्मात्रमेव भुङ्क्ते, शेषं परित्यजतीतिप्राग्वत्, 'पउमपत्त'त्ति पद्मपत्रसदृशं निर्लेपनं पात्रं करोति 'परिगुणण'त्ति स्वाध्यायं कुर्वन्तिष्ठतीति। एवं च व्यवस्थितस्य साधोस्ते सागारिकाः प्राप्ताः, ते च प्राप्ताः सन्त इदं पृच्छन्ति-'कहिं भिक्खं'ति कुत्वया भिक्षा कृतेति। तत्र 'दिट्ठमदिट्ठे विभासा उ' दृष्टेऽदृष्टे च 'विभाषा' विक-ल्पना कार्या, यदि दृष्टो भिक्षामटन् तत इदं वक्ति -तत्रैव श्रावकादिगृहे भक्षयित्वा इहागत इति। अथ न दृष्टो भिक्षामटंस्ततः-

मू. (१५८) अदिट्ठे किं वेला तेसि निबंधमि दायणे खिंसा।
ओहामिओ उ बडुओ वन्नो अ पहाविओ तहिअं॥ [भा. ६०]

वृ. अदृष्टे सतीदं वक्तव्यं- किं वेला वर्त्तते भिक्षाटनस्य ?, अथैवमप्युक्तानां पत्रकदर्शने निर्बन्धः ततो 'दान'त्ति दर्शयति पत्रकं, दृष्टे च पत्रके सति 'खिंसंति' ते सागारिकास्तं बटुकं जुगुप्सन्ते- धिक् त्वामसमीक्षितभाषिणमिति। ततः किं जातम् ?- 'ओहामिओ उ बडुओ' अपध्राजितो बटुकस्तिरस्कृत इत्यर्थो वर्णश्च- यशः प्रख्यापितं तत्रेति- तस्मिन् भोजनविधौ। 'सुत्त' इत्ययमवयवो व्याख्यातः,

इदानीं 'बहिं गमण'मित्यमुष्यावयवस्यावसरप्राप्तस्याह,

(मू. १५९) सुन्नघरासइ बाहिं देवकुलाईसु होइ जयणा उ।
तेगिच्छिधाउखोभो मरणं अनुकंपपडिअरणं॥ [भा. ६१]

वृ. शून्यगृहस्यासति- अभावे 'बाहिं देवकुलाईसु होति जयणा उ' ततो बहिर्देवकुलादौ व्रजति, तत्रापि देवकुलादौ वनगह्वरादौ इयमेव यतना कर्त्तव्या 'बाहिं संगह लहुए दारदारघट्टण' इत्येवमादि सर्वं कर्त्तव्यम्। अथ कथं बहिः सागारिकसम्भवः ?, अत आह, 'तेगिच्छि'त्ति 'चिकित्सकः' वैद्यः स कदाचित्तस्यं साधोर्भिक्षामटतः 'धातुखोभे'त्ति धातुक्षोभ्यं दृष्ट्वा इदं चिन्तयति- यद्यस्यामवस्थायामयं साधुर्भक्षणं करोति ततः 'मरणं'ति अवश्यमेव म्रियते, स वैद्यः 'अनुकंप'त्ति अनुकम्पया 'पडियरणं'ति साधोरनुमार्गेण गत्वा निरूपणं करोति, यद्ययमिदानीमेव भक्षयिष्यति ततो निवारयिष्यामि वैद्यक- शास्त्रपरीक्षणं वा कृतं भवति, एवमसौ वैद्यस्तस्य साधोरनुमार्गेण गत्वा लीनस्तिष्ठति साधुरपि,-

मू. (१६०) इरियाइ पडिक्कंतो परिगुणणं संधिआ भि का गुणिआ ?।
अम्हं एसुवएसो धम्मकहा दुविहपडिवत्ती॥ [भा. ६२]

वृ. ईर्यापथिकाप्रतिक्रान्तः सन् 'परिगुणण'त्ति कियन्मात्रकमपि स्वाध्यायं करोति, अस्मिंश्च प्रस्तावे साधुः समधातुरेव संजातः, ततश्च वैद्योऽपि तं साधुं समधातुं दृष्ट्वा इदं वक्ति - 'संहिता भे का गुणिया' संहिता- चरकसुश्रुतरूपा का गुणिता ?- अधीता, तेनभवताऽऽगमनमात्रेणैवनभुङ्क्ते। साधुराह- 'अम्हं एसुवएसो' अस्माकमयं सर्वज्ञोपदेशः, यदुत- स्वाध्यायं कृत्वा भुज्यत इति। 'धम्मकहा दुविहपडिवत्ती' ततश्चासौ साधुर्धर्मकथां करोति, पश्चात्तस्य वैद्यस्य 'दुविहपडिवत्ति'त्ति कदाचित्संयतो भवेत् कदाचिच्छ्रावक इति। इदानीं बहिर्देवकुलादौ भुञ्जानस्य विधिरुक्तः, यदा तु पुनर्देवकुलाद्यपि सागारिकैर्व्याप्तं भवति तदाऽनुकूलमार्गव्यवस्थितं स्थण्डिलं प्रति प्रयाति-

मू. (१६१) थंडिल्लासइ चीरं निवायसंरक्खणाइ पंचेव।
सेसं जा थंडिल्लं असईए अन्नगामंमि॥ [भा. ६३]

वृ. 'थंडिल्ल'त्ति स्थण्डिलं गत्वा भुङ्क्ते, 'असति'त्ति अथ स्थण्डिलं नास्ति क्षुधा च पीड्यते ततोऽस्थण्डिलस्थ एव 'चीर'न्ति चीरमारनीयं पादयोरधस्ततश्च भुङ्क्ते, किमर्थं पुनस्तच्चीरमारभ्यते ? अत आह- 'निपातसंरक्षणाय' परिशाटिनिपातसंरक्षणार्थं, तया हि परिशाट्या निपतन्त्या पृथिवीकायादि विध्वंस्यते इति। 'पंचेव'त्ति तत्र चीरोपरि अस्थण्डिलस्थः कियदभक्षयति ?, त्रीन् पञ्च वा कवलान्। 'सेसं जा थंडिल्लं' शेषं- अपरं भक्तं तावत्तयति यावत्स्थण्डिलं प्राप्तम्। 'असईए'त्ति अपान्तराले स्थण्डिलस्यासति 'अन्नगामंमि'त्ति अन्यद्ग्रामं प्रयाति, तत्र च स्थण्डिले भुङ्क्त इति।

इदानीं यदुक्तं 'कालदुवे'त्ति निर्युक्तिकृता तद्भाष्यकृद् व्याख्यानयन्नाह-

मू. (१६२) अपहुप्पंते काले तं चेव दुगाउयं नइक्कमे।
गोमुत्तिअदङ्घाइसु भुंजइ अहवा पएसेसु॥ [भा. ६४]

वृ. अथ तस्य भिक्षोर्गच्छतो योऽसावभिप्रेतो ग्रामः स क्रोशत्रये संजातः, तत्र च यदि कालः पर्याप्यते ततस्तद्भक्तं पूर्वगृहीतं परित्यज्यान्यद्भङ्क्ते, अथास्तमयकाल आसन्नस्ततः 'तं चेव'त्ति तदेव पूर्वगृहीतं भक्तं क्षेत्रातिक्रान्तमपि भुङ्क्ते, 'दुगाउअं नइक्कमे'त्ति यदा तु कालः पर्याप्यते तदा तत्पूर्वगृहीतं भक्तं द्विगव्यूतात्परतो नातिक्रामयति-न नयति, गव्यूतद्वय एव तत्परित्यज्य याति, तत्र च गतः काले पर्याप्यमाणेऽन्यद् ग्रहीष्यतीति, यदा पुनस्तस्य साधोर्दंजतः क्रोशद्वयव्यवस्थितग्रामस्यारत आदित्योऽस्तमुपयाति न चान्तराले स्थण्डिलमस्ति तदा 'गोमुत्तिगदङ्घादिसुभुंजे' गोमूत्रदग्धभूदेशेषुभुञ्जीत, आदिशब्दात्मक्रोत्कीर्णभूपदेशादौ भुङ्क्त इति, 'अहवा पएसेसु'त्ति यदि गोमूत्रदग्धादिस्थानं न भवति ततो धर्माधर्माकाशास्तिकायकल्पनां तस्मिन स्थाने कृत्वा भुङ्क्ते, एतदुक्तं भवतिधर्माधर्माकाशास्ति-कायैरस्तिरोहितायां भुवि ऊर्ध्वव्यवस्थितः, ततश्चानया यतनया सशङ्कता दर्शिता भवति।

उक्तं सञ्ज्ञिद्वारम्, इदानीं साधर्मिकद्वारप्रतिपादनायाह-

मू. (१६३) दिट्ठमदिट्ठा दुविहा नायगुणा चेव हुंति अन्नाया।
अदिट्ठावि अ दुविहा सुअमसुअ पसत्थमपसत्था॥

वृ. साधर्मिका द्विविधाः-दृष्टाअदृष्टाश्च, 'नायगुणा तहय चेव अन्नाया' येते दृष्टाः साध-र्मिकास्ते द्विविधाः-कदाचिज्ज्ञातगुणा भवन्ति कदाचिदज्ञातगुणाः, 'अदिट्ठावि अदुविहा' येऽप्यदृष्टाः साधर्मिकास्तेऽपि द्विविधाः-'सुय असुय'त्ति श्रुतगुणा अश्रुतगुणाश्च। 'पसत्थापसत्थ'त्ति ये ते ज्ञात-गुणास्ते द्विविधाः-प्रशस्तज्ञातगुणा अप्रशस्तज्ञातगुणाश्च, येऽपितेऽज्ञातगुणास्तेऽपिद्विविधाः-प्रशस्ताज्ञातगुणा अप्रशस्ताज्ञातगुणाश्चेति, येऽपि ते श्रुतगुणास्तेऽपि द्विविधाः-प्रशस्तश्रुतगुणा अप्रशस्तश्रुतगुणाश्च, येऽपि तेऽश्रुतगुणास्तेऽपि द्विविधाः-प्रशस्ताश्रुतगुणा अप्रशस्ताश्रुतगुणाश्च। आह-ये दृष्टास्ते कथमज्ञातगुणा भवन्तीत्यत आह-

मू. (१६४) दिट्ठा व समोसरणे न य नायगुणा हवेज्ज ते समणा।
सुअगुण पसत्थ इयरे समणुन्निअरे य सव्वेवि॥

वृ. 'दृष्टाः' उपलब्धाः सामान्यतो झटितिवा?-'समवसरणे' सूत्रादौ, न च ज्ञातगुणास्ते भवेयुः श्रमणाः, 'सुयगुणपसत्थ इयरे'त्ति इतरे इति अदृष्टानां परामर्शः, ते अदृष्टाः सुयगुणेति-श्रुतगुणा अपि सन्तः पसत्थेत्ति-प्रशस्तश्रुतगुणा गृह्यन्ते, तदनेन सुयगुन पसत्थेत्ति भावितं, इयरेत्ति-इतरे इत्यदृष्टानां परामर्शः ते अदृष्टाः श्रुतगुणा इत्ययमनन्तरगाथोपन्यस्तभङ्गकः एकः सूचित इति 'समणुन्नियरेयसव्वेऽवि' सर्वेऽपि चैते श्रुतादि-गुणभेदभिन्नाः साधवः समनोज्ञाः इयरे च-असमनोज्ञा इति च, सांभो-गिका असांभोगिकाश्चेत्यर्थः। इदानीमेषां श्रमणानां सर्वेषां मध्ये ये शुद्धास्तेष्वेव संवसनं करोति नेतरेष्विति, अमुमेवार्थं प्रतिपादयन्नाह-

मू. (१६५) जइ सुद्धा संवासो होइ असुद्धाण दुविह पडिलेहा।
अब्भिंतरबाहिरिआ दुविहा दव्वे अ भावे अ॥

वृ. यदिशुद्धाः-संवासशुद्धाः, केअभिधीयन्ते?, प्रशस्तश्रुतगुणास्तथाप्रशस्तज्ञातगुणाश्च, ते-श्वेवविधेषु संवासं-संवसनं करोति। 'होइ असुद्धाण दुविह पडिलेहा' भवत्यशुद्धानां द्विविधा प्रत्य-वेक्षणा, तत्राशुद्धा अप्रशस्तश्रुतगुणास्तथाऽप्रशस्तज्ञातगुणा अशुद्धा अभिधीयन्ते, तद्विषयं द्विविधं प्रत्युपेक्षणं भवति, कथम्?-'अब्भिंतरबाहिरिआ' एका अभ्यन्तरप्रत्युपेक्षणाऽभ्यन्तरेत्यर्थः, अपरा बाह्यप्रत्युपेक्षणा, 'दुविहा दव्वे य भावे

य' केका च प्रत्युपेक्षणा द्विविधा, 'दव्वे य भावे य' द्रव्यतो भावतश्च प्रत्युपेक्षणा द्विप्रकारा भवति, याऽपि बाह्या प्रत्युपेक्षणा साऽपि द्रव्यतो भाव-तश्चेति द्विविधैव। इदानीं बाह्यां प्रत्युपेक्षणां द्रव्यतः प्रतिपादयन्नाह-

मू. (१६६) धट्ठाइतलिअदंडग पाउय संलग्गिरी अनुवओगो।
दिसि पवणगामसूरिज वितहं उच्छोलणा दव्वे ॥

वृ. 'धट्ठादि' त्ति धृष्टाजङ्घासृदत्तफेनका, आदिशब्दात्तुमट्ठा तुप्पोट्ठादयो गृह्यन्ते, 'तलिंग' त्ति सोपानत्काः-उपानद्दृढपादाः 'दंडग' त्ति चित्रलताद्यण्डकगृहीताः 'पाउय' मिति प्रावृत्ता यथा संयत्यः प्रावृण्वन्ति कल्पं तथा तैः प्रावृतं 'संलग्गिरि' त्ति परस्परं हस्तावलगिकया व्रजन्ति, अथवा संलग्गिरीति युगलिता व्रजन्ति, 'अनुवओगो' त्ति अनुपयुक्ता व्रजन्ति, 'ईर्यायामनुपयुक्ताः, एवं बहिर्भुवं गच्छन्तः प्रत्युपेक्षिताः, इदानीं स्वज्ञाभूमीप्राप्तान् संयतान् प्रत्युपेक्षते-'दिसि' त्ति आगमोक्त दिग्विपर्यासेनोपविशन्ति, 'पवण' त्ति पवनस्य प्रतिकूलमुपवेष्टव्यं ते तु आनुकूल्येन पवनस्योपवि-शन्ति, 'गाम' त्ति ग्रामस्याभिमुखेनोपवेष्टव्यं, ते तु पृष्ठं दत्त्वोपविशन्ति, 'सूरिय' त्ति सूर्यस्याभिमुखेनोप-वेष्टव्यं, ते तु पृष्ठं दत्त्वोपविशन्ति। एवमुक्ते न प्रकारेण वितथं कुर्वन्ति, 'उच्छोलण' त्ति पुरीषमुत्सृज्य प्रभूतेन पयसा क्षालनं कुर्वन्ति, 'दव्वे' त्ति द्वारपरामर्शः, इयं तावदबाह्या द्रव्यतः प्रत्युपेक्षणा। आह-अनन्तरगाथायां अभ्यन्तरायाः प्रत्युपेक्षणायाः प्रथममुपन्यासः कृतः, ततस्तामेव व्याख्यातुं युक्तं न बाह्यामिति, उच्यते, प्रथमं तादबाह्येव प्रत्युपेक्षणा भवति पश्चादाभ्यन्तरा, अतो बाह्येव व्याख्यायते, आह-किमितीत्थमेव नोपन्यासः कृतः ? उच्यते, अभ्यन्तरप्रत्युपेक्षणायाः प्राधान्यख्यापनार्थमादावु-पन्यासः कृतः। एवं तावद्बाह्या प्रत्युपेक्षणा द्रव्यतोऽभिहिता, इदानीं बाह्यां प्रत्युपेक्षणां भावतः प्रतिपादयन्नाह-

मू. (१६७) विकहा हरिउग्गाइय भित्तकहा चक्कवालछलिअकहा।
मानुसतिरिआवाए दायणआयरणया भावे ॥

वृ. विकथा' विरूपा कथा-अथवा 'विकथा' स्त्रीभक्त चौरजनपदकथा तां कुर्वन्तो व्रजन्ति, तथा हसन्त उद्गायन्तश्च व्रजन्ति, 'भित्तकह' त्ति मैथुनसंबद्धा रागमिश्रिका कथा तां कुर्वन्तो व्रजन्ति, 'चक्कवाल' त्ति मण्डलबन्धनस्थिता व्रजन्ति, 'छलिअकह' त्ति षट्पञ्चाशत्कगाथाः पठन्तो गच्छन्ति, तथा 'मानुसतिरिआवाए' त्ति मानुषापाते तिर्यगापाते संज्ञां व्युत्सृजन्ति, 'दायण' त्ति (दर्शनता) परस्परस्याङ्गुल्या किमपि दर्शयन्ति इयमेव आचरणता दर्शनतानऽऽचरणता, 'भावे' त्ति द्वारपरामर्शः, इयं बाह्यभावमङ्गीकृत्य प्रत्युपेक्षणा, एवं बाह्यप्रत्युपेक्षणाऽशुद्धानपि साधून् दृष्ट्वा प्रविशति, कदाचित्ते गुरोरनादेशेनैव वं कुर्वन्ति।

एतदेव प्रतिपादयन्नाह-

मू. (१६८) बाहिं जइवि असुद्धा तहावि गंतूण गुरुपरिक्खा उ।
अहव विसुद्धातहावे उ भंतोदुविहा उ पडिलेहा ॥

वृ. बाह्यप्रत्युपेक्षणामाङ्गीकृत्य यद्यप्यशुद्धास्तथाऽपि प्रविश्य गुरोः परीक्षा कर्तव्या, अथवा बाह्य-प्रत्युपेक्षणा विशुद्धा एव भवन्ति तथाऽपि त्वन्तः- अभ्यन्तरतः अभ्यन्तरां प्रत्युपेक्षणामाश्रित्य द्विविधैव प्रत्युपेक्षणा भवति कर्तव्या-द्रव्यतो भावतश्च। इदानीमसौ अभ्यन्तरप्रत्युपेक्षणामङ्गीकृत्य द्रव्यतः परीक्षां कारयति साधर्मिकान्तरेण कुतोऽपि भिक्षाचर्यायां प्रविष्टः सन्-

मू. (१६९) पविसंतिनिमित्तमनेरणं व साहइ न एरिसा समणा।
अम्हंपि ते कहंता कुक्कुरियाइट्ठाणं च ॥

वृ. प्रविशन्भिक्षार्थंनिमित्तंपृच्छ्यतेगृहस्थैस्ततश्चनकथयति, 'अनेसणं'तेअनेषणांगृहस्थेनक्रियमाणां निवारयति. 'नएरिसासमणा' नास्मदीयाएवंविधाः श्रमणाः, अस्माकंहितंनिमित्तंकथयन्ति अनेषणीयमपि गृह्णन्तिएवमभिधीयतेगृहस्थेन, 'कुक्कुड'त्तिकुक्कुडप्रायोऽयमिति। एवंतावद्भिक्षामटताप्रत्युपेक्षणाकृता, इदानीं दूरस्थ एवोपाश्रयप्रत्युपेक्षणां करोति-'खरिआदिट्ठाणं'ति खरिया-द्व्यक्षरिका तत्समीपे स्थानं-उपाश्रयः आदिशब्दाच्चरिकादिसमीपे वा। इयं तावद्बहुसंदिग्धा प्रत्युपेक्षणा कृता, इदानीमुपाश्रयाभ्यन्तरं द्रव्यप्रत्युपेक्षणां कुर्वन्नाह-

मू. (१७०) दव्वमि ठाणफलए सेज्जासंथारकायउच्चारे।
कंदप्पगीयविकहा वुग्गहिकिड्डा य भावंमि॥

वृ. द्रव्यमित्ति द्वारपरामर्शः, 'ठाणफए'त्ति स्थानं-अवस्थितिः, फलकानामवस्थितिं पश्यति, तानि हि वर्षाकाल एव गृह्यन्ते न शेषकाले, स तु प्रविष्टः शेषकालेऽपि फलकानि गृहीतानि पश्यति, 'सेज्जत्ति शेरतेऽस्यामिति शय्या-आस्तरणं तदास्तृतमेवास्ते, संस्तारकाः-तृणमयाः, प्रकीर्यन्तेऽधस्तृणानि स्वपद्भिस्तं संस्तारकं पश्यति, 'काय'त्ति कायिकाभूमिं गृहस्थसंबद्धां पश्यति, 'उच्चार'त्ति गृहस्थैः सह पुरीषव्युत्सर्गं कुर्वन्ति, अथवा 'उच्चारं'त्ति श्लेष्मणः परिष्ठापनमङ्गणे कुर्वन्ति, एवं स साधुः प्रविशति। इयमभ्यन्तरा। द्रव्यप्रत्युपेक्षणा, इदानीमभ्यन्तरां भावप्रत्युपेक्षणां प्रतिपादयन्नाह-कन्दर्पगीत-विकथाः कुर्वन्ति, तथा 'वुग्गह'त्ति विग्रहःकलहस्तंकुर्वन्ति, 'किड्ड'त्तिपाशककपर्दकैःक्रीडन्ति, 'भावंमि' 'भावविषया प्रत्युपेक्षणा। उक्ता अभ्यन्तरा भावप्रत्युपेक्षणा, इदानीमेतद्दोषवर्जितेषु संयतेषु प्रविशति, एतदेवाह-

मू. (१७१) संविग्गेसु पवेसो संविग्गऽमणुन्न बाहि किइकम्मं।
ठवणफुलापुच्छणया एत्तोच्चिअ गच्छ गविसणया।

वृ. संविग्नाः-मोक्षमिलाषिणस्तेषु प्रवेशः कर्त्तव्यः समनोज्ञेषु। अथ समनोज्ञा न सन्ति ततः 'संविग्गऽमुणुन्न'त्ति संविज्ञेषु अमनोज्ञेषु प्रवेशः, तत्र च 'बाहि'त्ति बहिरेव प्रविशन्नुपकरणमेकस्मिन्-प्रदेशेमुञ्चति, ततः 'किइकम्मं'ति तदुत्तरकालं वंदनं करोति, ततः 'ठवणकुलापुच्छणया' स्थापनाकुलानि पृच्छति भिक्षार्थं, ततस्ते कथयन्ति-अमुकत्रामुकानि। 'एत्तोच्चिअगच्छ'त्ति अस्या एव भिक्षाटनभूमेर्गमिष्यामि, इत्येवं ब्रवीति। 'गवेसणय'त्ति तं तस्माद्भामादेर्निर्गतं न निर्गतमिति वा वं गवेषणं कुर्वन्ति।

उक्तं साधर्मिकद्वारम्, इदानीं वसतिद्वारमभिधीयते, स च साधुर्गच्छन अन्तमनसमये वसतिं निरूपयति, सा च एषु स्थानेषु निरूपणीया-

मू. (१७२) संविग्गसंनिभद्दग सुन्ने निइयाह मोत्तुऽहाच्छंदे।
वच्चंतरुक्खमूले वसहीए मग्गणा होइ॥

वृ. 'संविग्गेसु वसतिमग्गमा होइ' संविग्नेषु वसतिमार्गणा कर्त्तव्या, सञ्ज्ञी-श्राद्धः भद्रकः-संविग्नभावितस्तस्मिन्वा वसतिमार्गणाकर्त्तव्या, तदभावे शून्यगृहादौ वसतिमार्गणाकर्त्तव्या, 'निनियादि'त्ति नित्यवासादिषु, आदिशब्दात्पार्श्वस्थादयस्त्रयोगृह्यन्ते, तेषुवसतिमार्गणंकर्त्तव्यं. ''मोत्तुऽहाच्छंदे'त्तिमुक्त्वा यथाच्छन्दानस्वच्छन्दानित्यर्थः, तत्रवसतिर्नमृग्यते, व्रजतःसाधोर्-तेष्वनन्तरगेदिनेषुवसतिमार्गणा-अन्वेषणं कर्त्तव्यम्। इयं द्वारगाथा वर्त्तते। इदानीमेतामेव गाथां प्रतिपदं व्याख्यानयन्नाह-

मू. (१७३) वसही समणुन्नेसुं निइयादमणुन्न निवए।
संनिगिहि इत्थिरहिए सहिए वीसुं थरकुडीए॥

वृ. वसतिरन्वेषणीया, क्व ?, अत आह- 'समणुन्नेसु' संविग्नसमनोज्ञेषु आदौ वसन्तिरन्वेषणीया. 'नितियादणुन्न अन्नाहि निवेए' अथ तु तत्र नित्यवास्यादयः अमनोज्ञा अन्यसामाचारीप्रतिविद्धा वा भवन्ति. आदिशब्दात्पार्श्वस्थादयो गृह्यन्ते, ततश्चैतेषु विद्यमानेषु नैतेषां मध्ये निवसितव्यं, किन्तु, 'अन्नहि' अन्यत्र वसतिं कृत्वा 'निवेदे' निवेदयित्वाएषामेव -यथाऽमुष्मिन अहंवसिष्यामिप्रतिजागरणीयो भवद्भिरिति, क्वासौ निवसति ? किंविशिष्टेवा गृहे निवसति ? -सड्ढो- श्रावकः, स च यदि महिलया रहितस्ततस्तद्गृहेवसति. अथासौ नास्ति ततः 'गिहि' त्ति गृही भद्रकोऽत्र सूचितः, स च स्त्रिया रहितस्तत्सममपि वसति. अथ भद्रकोऽपि स्त्रीरहितो नास्ति किन्तु सहितः स्त्रिया, ततः सहिते -स्त्रीयुक्ते सति 'वीसुं' निपृथग् निवसति. क्व ? -'घरकुडीए' तस्यैव गृहस्थस्य बहिरवस्थितं धनकादि, अथवा तत्फलहिकान्तर्गतुकुड्यां वा निवसति। अथ भद्रकादिगृहं नास्ति ततः शून्यगृहे निवसति। किंविशिष्टे ?, अत आह-

मू. (१७४) अहुनुव्वासिअ सगवाड निव्विले निच्चले वसइ सुन्ना।
अनिवेइएयरेसिं गलत्ते न एस अम्हंति ॥

वृ. 'अहुनुव्वासिय' त्ति अधुना यदुद्वसितं तदपि सकपाटं यदि भवति तदपि निर्बिलं भवति निर्बिलमपि यदि निश्चलं भवति न पतनमयं यत्र वसितव्यं चैते गाथोपन्यस्तानां चतुर्णां पदानां षोडश भङ्गका निष्पद्यन्ते, स चैवंविधं गृहे वसतिं कथयित्वा नित्यवास्यादीनां यथाऽहमत्रोषितो भवद्भिर्भलनीयो, यदा पुनः 'अनिवेदितेतरेसि' तियदा तुनित्यवास्यादीनामनिवेद्यवसति, तत्रचोषितः सन्दैवयोगाद्ग्लानः संजातस्ततो ग्लानत्वे सति नित्यवास्यादीनां स गृहस्थ आगत्य कथयति -यदुत प्रव्रजितोऽद्दुः संजातः, ते नित्यवास्यादयोऽस्माकं न कथितमितिकृत्वा एवं ब्रुवते- 'न एस अम्हं' ति न एषोऽस्माकं-नायमस्मद्गोचरे यदा, तु पुनः पूर्वोक्तानां सर्वेषामेवाभावः संजातः, किन्तु तस्मिन् क्षेत्रे नित्यवास्यादयः सन्ति ततस्तेष्वेव वसितव्यम्, एतदेवाह-

मू. (१७५) नीयाइअपरिभुत्ते सहिएयर पक्खिएण व गज्झाए।
कालो संजमकालो वासो पुन कालचारीसु ॥

वृ. नित्यवास्यादौ वसति, आदिशब्दात्मनोज्ञेषु वसति. कथमित्याह- 'अपरिभुत्ते' त्ति नैर्नित्यवास्यादिभिर्यःप्रदेशस्तस्यावग्रहेनैवपरिभुक्तः -अनाक्रान्तस्तस्मिन्प्रदेशेऽपरिभुक्ते चसतिंवसति, 'सहिएतरत्ति' ते च नित्यवास्यादयः सहितेतरे संहिताः- संयतीभिर्युक्ताः केचन नित्यावास्यादयो भवन्ति. इतरे इत्यपरे संयतीरहिता भवन्तिः ते, च नित्यवसति। ये ते संयतीभिर्युक्तास्तेद्विविधाः -एके कालचारिणीभिः संयतीभिर्युक्ताः, तत्रनित्यवसत्येव, परेऽकालचारिणीभिःसंयतीभिर्युक्ताः, कथंकालः ? 'पक्खिएण वसज्झाए' त्ति साः संयत्यः पाक्षिकक्षामणार्थमागच्छन्ति स्वाध्यायार्थं, वा अयं कालः, शेषस्तु अकालः, तत्र 'वासो पुन कालचारीसु' वासस्तु तत्र्यसाधोः कालचारिश्रमणीयुक्तेषु भवतीति। अथ कालचारिसंयतीयुक्ताः साधवो न सन्ति ततः-

मू. (१७६) तेन परं पासत्थाइएसु न य वसइऽकालचारिसु।
गहिआवासगकरणं ठाणं गहिएणऽगहिएणं ॥

वृ. ततः पार्श्वस्थादिषु वसति, न च वसत्यकालचारिसंयतीयुक्तेषु, तेषु च पार्श्वस्थादिषु को विधिरित्येतदाह- 'गहिआवासगकरणं' तिकेन ? -उपधिना, अनिक्षिप्तेनेत्यर्थः, आवश्यकं-प्रतिक्रमणंकरोति, ततश्च प्रतिक्रान्ते सति तत्रैव 'ठाणं' ति कायोत्सर्गं करोति। 'गहिएणऽगहिएणं' ति यदि शक्नोति ततो

गृहीतनोपकरणेनकायोत्सर्गं करोति, अथ न शक्नोति ततः 'अगहिएणं'ति अगृहीतेनोप-करणेनकायोत्सर्गं करोति। अथ कायोत्सर्गं कर्तुं न शक्नोति श्रान्तः सन् ततः-

मू. (१७७) निसिअ तुयट्टण जग्गण विराधनभएण पासि निक्खिवइ।
पासत्थाईणंव निइव नवरं अपरिभुत्ते॥

वृ. ततो निषन्नः-उपविष्टः गृहीतेनोपकरणेनास्ते 'तुअट्टणं'ति त्वग्वर्त्तनं-निमज्जनं करोति, गृहीतेनोपकरणेन करोति यदि शक्नोति, 'जग्गण'त्ति यदिवा गृहीतेनैवोपकरणेन जाग्रदास्ते, न स्वपिति, अथ जागरणमपि कर्तुं न शक्नोति ततः 'विराधनभएणं'ति विराधनाभयेन-पात्रकभङ्गभयेनोपकरणं पार्श्वे निक्षिपति, ततः स्वपिति निक्षिप्तोपकरणः सन्, 'पासत्थादीनेव'पार्श्वस्थादीनां संबन्धिन्यां वसतौ एवंविधो विधिः-उक्तन लक्षणो द्रष्टव्यः। 'निइए नवर अपरिभुत्ते' नियतवासिनां वसतौ अयं विधिर्ज्ञेयः, यदुत-"गहिआवासयकरण"मित्यादि, यदि परं अपरिभुक्ते प्रदेशे पात्राद्युपकरणं स्थापयित्वा स्वपिन्तीति। यथा पार्श्वस्थादिषु वसतौ विधिरुक्तः, एवं अहाच्छंदेऽपि विधिरिति, अत आह-

मू. (१७८) एमेव अहाच्छंदे पडिहनना झाणअज्झयण कन्ना।
इंदणिहेो पिसामे सुवणाहरणा य गहिएणं॥

वृ. यः पार्श्वस्थादौ वसतौ विधिः प्रतिपादितः एवमेव अहाच्छन्देऽपि विधिर्द्रष्टव्यः, केवलमयं विशेषः-'पडिहणण'त्ति तस्य अहाच्छन्दस्य धर्मकथां कुर्वतोऽसन्मार्गप्ररूपिकां तेन साधुना 'प्रतिहननं' व्याघातः कर्तव्यः, यथैतदेवं न भवति, 'झाणि'त्ति अथ तद्धर्मकथायाः प्रतिघातं कर्तुं न शक्नोति ततो ध्यानं करोति, ध्यायन्नास्ते धर्मध्यानं, अथ ततोऽपि धर्मकथां करोति ततः 'अज्झयण'त्ति धर्मकथा-व्याघातार्थमध्ययनं करोति, अथ तथाऽपि न तिष्ठति ततः कर्णौ स्थगयति धर्मकथाव्याघातार्थमिति। अथवा 'सुवणाहरणा य'त्ति सुप्तः सन् आहरणा-घोरयति घोरणं करोति महता शब्देन सोऽपि निर्विण्णः सन् उपरंहरति धर्मकथामिति।

उक्तं वसतिद्वारं, षष्ठे द्वारे स्थानस्थितो भवति इदमुक्तं, स च एभिः कारणैः-

मू. (१७९) असिवे ओमोयरिए रायद्दुट्ठ भए नदुद्धाणे।
गिलाणे कालगवासे ठाणट्ठिओ होइ॥

वृ. 'असिवे' देवताजनितोपद्रवे सति तस्मिन यत्राभिप्रेतं गमनं कदाचिदपान्तराले वा भवति ततः-अनेन कारणेन स्थानस्थितो भवति, 'ओमोयरिए'त्ति दुर्भिक्षे विवक्षिते देशे जातमपान्तराले वा ततश्च स्थानस्थितो भवति, 'रायदुट्ठे'त्ति राजद्विष्टे कदाचित्तत्र भवत्याभिप्रेतदेशे अन्तराले वा तेनैव कारणेनस्थानस्थितो भवति, 'भए'त्ति म्लेच्छादिभयं विवक्षिते देशे अपान्तराले वा तेन कारणेन स्थानस्थितो भवति, 'नइ'त्ति कदाचित्तदा विवक्षिते देशेऽपान्तराले वा भवति तेन प्रतिबन्धेन स्थानस्थितो भवति ('उद्दिए'त्ति कदाचित्तत्रापान्तराले वा उद्गतं जातं तेन कारणेन स्थानस्थितो भवति) 'फिडियंति कादाचिदसावाचार्यः तस्मात् क्षेत्रात् च्युतः अपगतो भवति ततश्च तावदास्ते यावदागतो भवति, अनेन कारणेन स्थानस्थितो भवति। 'गिलाने'त्ति ग्लानः कदाचिन्मनाग् भवति स्वयं कदाचिदन्यः कश्चिद् ग्लानो भवति तेन प्रतिबन्धेन स्थानस्थितो भवति। 'कालगय'त्ति कदाचिदसावाचार्यः कालगतो-मृतो वा भवति, यावन्नश्चियो भवति तावत्स्थान व्रजतः साधोरेतेष्वनन्तरोदितेषुवक्ष्यमाणेषु मार्गणा-अन्वेषणं कर्तव्यम्। इयं द्वारगाथा वर्तते। इदानीमेतामेव गाथां प्रतिपदं व्याख्यानयन्नाह-स्थितो भवति। 'वासं'त्ति वर्षाकालः संजातस्ततस्तत्प्रतिबन्धात्स्थानस्थितो भवति-नैवेह शामादावास्ते। इयं द्वार-गाथा, इदानीं निर्युक्तिकार एव कानिचिद्द्वाराणि व्याख्यानयन्नाह-

मू. (१८०) तत्थेव तरा वा असिवादी सोउ परिरयस्सऽसइ।
संचिक्खे जाव सिवं अहवावी ते ततो फिडिआ॥

वृ. 'तत्रे'ति योऽसौ विवक्षितोः देशः 'अन्तरा' अन्तराले वा अशिवादयो जाता इति 'श्रुत्वा' आकर्ण्य, आदिग्रहणादवमोदरिकाराजद्विष्टभयानि परिगृह्यन्ते 'परिरयस्सऽसइ'त्ति भमाडयस्स 'असति' अभावे तिष्ठति, एतदुक्तं भवति-यदि गन्तुं शक्नोति भ्रमिणा ततोऽपान्तरालं परिहृत्या-मिलषितं स्थानं गच्छति। अथ न शक्यते गन्तुं ततः 'संचिक्खे'त्ति संतिष्ठेत, कियन्तं कालं यावदत आह-'जाव सिवं' यावच्छिवं निरुपद्रवं जातमिति। 'अहवावी ते ततो फिडिआ' अथवा 'ते' आचार्यादयः 'तस्मात्' क्षेत्रात् 'अपगताः' भ्रष्टा इति, ततश्च वार्त्तोपलम्भं यावत्तिष्ठति। इदानीं भाष्यकृच्छेषद्वाराणि व्याख्यानयन्नाह-

मू. (१८१) पत्ता व नई चउमासवाहिणी नवि अ कोइ उत्तारे।
तत्थंतरा व देसो व उट्ठिओ न य लब्भइ पवत्ती॥ [भा. ६५]

वृ. ''पुण्णा'' भृता, का ? -नदी, किंविशिष्टा ?- चतुर्मासवाहिनी, न कश्चिदुत्तार्यते, ततोऽपान्तराल एव तिष्ठति। 'तत्र' अन्तराले वा देशः 'उत्थितः उद्गमितः, न च 'प्रवृत्तिः' वार्ता लभ्यते अतस्तिष्ठति तावत्-

मू. (१८२) फिडिएसु जा पवित्ती सयं गिलाणो परं व पडियरइ।
कालगया व पवत्ती संसकिए जाव निस्संके। [भा. ६६]

वृ. तस्मात्क्षेत्रादपगतेषु सत्सु 'जा पवत्ती' यावद्वार्त्ता भवति तावत्तिष्ठति, तथा 'सयं गिलाणो' स्वयमेव ग्लानो भूतस्ततस्तिष्ठति, परं व पडियरइ' अन्यं वा ग्लानं सन्तं प्रतिचरति। द्वारम्। 'कालगया व पवत्ती' अथवा कालगतास्त आचार्य इत्येवंभूताः प्रवृत्तिः श्रुता-अतः 'ससंकिते जाव नीसंके' सशङ्कायां-वार्त्तायामनिश्चितायां तावत्तिष्ठन्ति यावन्निःशङ्कं संजातमिति॥

मू. (१८३) वासासु उब्भिन्ना बीयाई तेन अंतरा चिट्ठे।
तेगिच्छिभोइयारक्खणहेडं इच्छंति॥

वृ. वर्षासु उद्भिन्ना बीजादयः, आदिशब्दादनन्तकायः, तेन कारणेनापान्तराल एव तिष्ठति, तत्र च वर्षाकालप्रतिबन्धाद्ग्रामादौ तिष्ठन् किं करोति ?-'तेगिच्छि' चिकित्सकं वैद्यस्तमापृच्छति, यथा त्वया ममेह निष्ठतोमन्दयभलनीयम्'भोइ'त्ति 'भोगिकं' ग्रामस्वामिनंपृच्छति, किमर्थं पुनर्वैद्य-भोगिकयोःपृच्छनंकरोत्यत आह-'यारक्खणहेडं' वैद्यं पृच्छति मन्दतायां सत्यां दृढीकरणार्थं, भोगिकं पृच्छति संरक्षणार्थं परिभवादेः, ततः स्थानं- वसनमिच्छन्ति, कस्मिन्नित्यत आह-

मू. (१८४) संविग्गसंनिमदग अहप्पहाणेसु भोइयघरे वा।
ठवणा आयरियस्सा सामयारी पउंजणया॥

वृ. वैद्यभोगिकयोःकथयित्वासंविग्नेषु-मोक्षाभिलाषिषुतिष्ठति 'सन्नि'त्ति सञ्ज्ञी-श्रावकस्तद्गृहं भद्रकः, साधूनां तद्गृहं वा निवासं करोति। 'अहप्पहाणेसु'त्ति यथाप्रधानेष्विति-यो यत्र ग्रामादौ प्रधानः तेषु यथाप्रधानेष्वेव प्रधानतः तिष्ठति। एतेषामभावे 'भोइघरे व'त्ति 'भोगिकगृहं वा' ग्रामस्वामिनोगृहंयातिष्ठति, तत्र च तिष्ठन् किं करोतीत्यत आह- 'ठवणा आयरियस्सा' दण्डकादिकमाचार्यं कल्पयति निराबाधे प्रदेशे, अयंममाचार्यइति, तस्य चाग्रतःसकलां चक्रवालसामाचारींप्रयुङ्क्ते निवेद्य करोतीत्यर्थः। एषाएकःकारणिकः.

एतच्च कारणिकद्वारं,-

मू. (१८५)　　एवं ता कारणिओ दुइज्जइ जुत्त अप्पमाणं।
निक्कारणिअं एत्तो चइओ आहिंडिओ चेव।

वृ. एवं तावत् कारणिको 'दुइज्जइ' विहरति, कथं विहरति? -जुत्तो अप्पमाणं' प्रप्रमादेनयुक्त :प्रयत्नपर इत्यर्थः निष्कारणिकः इतः अतमुच्यते, स द्विविधः -चइओ -त्याजितःसारणावारणादि -भित्स्याजितः, आहिण्डकः -अर्गानार्थःस्तूपादि दर्शनप्रवृत्तः। तत्र तावत्त्याजित उच्यते -

मू. (१८६)　　जह सागरंमि मीणा संखोहं सागरस्स असहंता।
निंति तओ सुहकामी निग्गयमित्ता विनस्संति॥

वृ. यथा 'सागरे' समुद्रे 'मीना': मस्त्याः संक्षोभं सागरस्य असहमाना निर्गच्छन्ति ततः समुद्रात् 'सुखकामिनः' सुखाभिलाषिणो, निर्गमात्राश्च विनश्यन्ति॥

मू. (१८७)　　एवं गच्छसमुद्दे सारणवीईहिं चोइय संता।
निंति तओ सुहकामी मीणा व जहा विनस्संति॥

वृ. एवं गच्छसमुद्रे सारणावारणा एव वीचयस्ताभिस्त्याजिताः सन्तो निर्गच्छन्ति ततो गच्छसमुद्रात्-सुखाभिलाषिणो मीना इव -मीना यथा तथा विनश्यन्ति। उक्तं त्याजितद्वारम्, इदानीमाहिण्डक उच्यते -

मू. (१८८)　　उवएसं अनुवएसा दुविहा आहिंडआ समासेणं।
उवएस देवदंसण अनुवएसा इमे होंति॥

वृ. उपदेशहिण्डका अनुपदेशहिण्डकाश्च, एवं द्विविधा हिण्डकाः 'समासतः' सङ्क्षेपेण। 'उवएस'त्ति उपदेशहिण्डको यो देशदर्शनार्थं सूत्रार्थोभयनिष्पन्नो 'हिण्डते' विहरति। 'अणुवदेस'त्ति अनुपदेशाहिण्डका इमे भवन्ति वक्ष्यमाणकाः -

मू. (१८९)　　चक्के थूमे पडिमा जम्मण निक्खमण नाण विव्वाणे।
संखडि विहार आहार उवहि तह दंसणट्ठाए॥

वृ. 'चक्के' धर्मचक्रे 'स्तूपे' मथुरायां 'प्रतिमा' जीवन्तस्वामिसंबन्धिनी पुरिकायां पश्यति, 'जम्मण'त्ति जन्म -यत्रार्हतांसौरिकापुरादौव्रजति।निष्क्रमणभुवं -उज्जयन्तादिद्रष्टुंप्रयातिज्ञानंयत्रैवोत्पन्नं तत्प्रदेशदर्शनार्थं प्रयाति निर्वाणभूमि दर्शनार्थं प्रयाति। संखडिप्रकरणं तदर्थं व्रजति, 'विहारे'ति विहारार्थं व्रजति, स्थानाजीर्णं ममात्रेति. 'आहार'त्तियस्मिन विषयेस्वभावेनैव चाहारः शोभनस्तत्रप्रयाति 'उवहि'त्ति अभ्रकत्र विषये उपधिः शोभनो लभ्यत इत्यतः प्रयाति 'तह दंसणट्ठाए' तथा रम्यदेशदर्शनार्थं व्रजति।

मू. (१९०)　　एते अकारणा संजयस्स अममत्त तदुभयस्स भवे।
ते चेव कारणा पुन गीयत्थविहारिणो भणिआ॥

वृ. एतान्यकारणानि संयतस्य, किंविशिष्टस्य? -'अममत्ततदुभयस्य' अममासत्रार्थोभयस्य संयतस्य भवन्ति अकारणानीति। 'ते चेव'त्ति तान्येव धर्मचक्रादीनि कारणानि भवन्ति, कस्य? -'गीयत्थविहारिणो' गीतार्थविहारिणः सूत्रार्थोभयनिष्पन्नस्य दर्शनादिस्थिरीकरणार्थे विहरत इति। तथा चाह -

मू. (१९१)　　गीयत्थो च विहारो बिइओ गीयत्थमीसिओ भणिओ।
एत्तो तइअ विहारो नाणुन्नाओ जिनवरेहिं॥

वृ. 'गीयत्थो' गीतार्थानां 'विहारः' विहरणमुक्तम्। 'बिइतो गीयत्थमीसिओ' द्वितीयो विहारः द्वितीयं विहरणं गीतार्थमिश्र -गीतार्थेन सह. इतस्तृतीयो विहारो 'नानुज्ञातो' नोक्तो जिनवरैः किमर्थमित्यत आह -

मू. (१९२) संजमआय विराधन नाणे तह दंसणे चरित्ते अ।
आणालोव जिनानं कव्वइ दीहं तु संसारं॥

वृ. जातस्ततस्तिष्ठति, परं व पडियरइ' अन्यं वा ग्लानं सन्तं प्रतिचरति। 'कालगया व पवत्ती' अथवा कालगतास्तत आचार्यादित्येवंभूता प्रवृत्ति श्रुता:- अतः 'ससंकिते जाव नीसंकं' सराङ्कायावार्त्तायामनिश्चितायां तावदास्ते यावन्निःशङ्कं संजातमिति। संयमविराधना आत्मविराधना तथा ज्ञानदर्शनचारित्राणां विराधना आज्ञालोपश्च जिनानां कृतो भवति, तथा अगीतार्थ एकाकी हिण्डन् करोति दीर्घं च संसारमिति।

इदानीमेनामेव गाथां भाष्यकारो व्याख्यानयन्नाह-

मू. (१९३) संजमओ छक्काया आयाकंटऽट्ठिजीरगेलन्ने।
नाणे नाणायारो दंसण चरगाइवुग्गाहे॥ [भा. ६७]

वृ. 'संजमतो छक्काया' संयमविराधनामङ्गीकृत्यषट्कायविराधना संभवति। 'आय'त्ति आत्मविराधना संभवति, कथं?, 'कंटऽट्ठिजीरगेलन्ने' कण्टकेभ्यः अस्थिशकलेभ्यः हारस्यानरणेन तथा ग्लानत्वेन। 'नाणे' ज्ञानविराधना भवति, कथं? स हिण्डन् ज्ञानाचारं न करोति, 'दंसण चरगाइ-उग्गाहे' दर्शनविराधना, कथं संभवति?, सह्यगीतार्थश्चरकादिभिर्व्युद्ग्राह्यते, ततश्चापैति दर्शनम्, किंपुनःकारणं चारित्रेन व्याख्यातम्?, उच्यते, ज्ञानदर्शनभावे चारित्रस्याप्यभाव एव द्रष्टव्यः। एवं तावदेकः कारणिको 'निक्कारणिओ य सोवि ठाणट्ठिओ दूतिज्जंतओ य भणिओ' इदानीमनेकान् प्रत्यपेक्षकान् प्रतिपादयन्नाह-

मू. (१९४) नेगावि होंति दुविहा कारणनिक्कारणे दुविहभेओ।
जं एत्थं नाणत्तं तमहं वोच्छं समासेण॥

वृ. अनेकेऽपि द्विविधा भवन्ति, कतमेन द्वैविध्येन?, अत आह-'कारणनिक्कारणि'त्ति कारणमङ्गीकृत्य अकारणं चाङ्गीकृत्य द्विविधाः, 'दुविह भेद'त्ति पुनर्द्विविधो भेदः, ये ते कारणिकास्ते स्थानस्थिता दूइज्जमानाश्च, येऽपि ते निष्कारणिकास्तेऽपि स्थानस्थिता दूइज्जमानाश्च। तत्थ जे कारणिआ दूतिज्जंतगा ठाणट्ठिआ अ ते तहेव असिवादीकारणेहिं जहापुवं एगस्स गमनविहिं वक्खाणंतेण भणिअं, जेवि निक्कारणिआ दूइज्जंता ठाणट्ठिआ य तेऽवि तह चेव धूमाइहिं, 'जं एत्थ नाणत्तं' यदत्र नानात्वं-यो विशेषस्तमहं वक्ष्ये समासतः।

मू. (१९५) जयमाणा खलु। एवं तिविहा उ समासओ समक्खाया।
विहरंता दुविहा गच्छगया निग्गया चेव॥ [प्र. ५]

मू. (१९६) जयमाणा विहरंता ओहाणाहिंडगा चउद्धा उ।
जयमाणा तत्थ तिहा नाणट्ठा दंसणचरित्ते।

वृ. 'यती प्रयत्ने' 'यतमानाः' प्रयत्नपराः 'विरहन्तः' विहरमाणा मासकल्पेन पर्यटन्तः 'ओहाण'-त्ति अवधावमानाः, प्रव्रज्यातोऽवसर्पन्त इत्यर्थः, तथा 'आहिण्डकाः' भ्रमणशीलाः, एवमेते चतुर्विधाः, इदानीं "यथोद्देश निर्देशः" इति न्यायाद्यतमाना उच्यन्ते-"जयमाणा तत्थ तिहा' यतमानास्त्रिप्रकाराः, कथं?, 'नाणदंसणचरित्ते' तत्थणाणट्ठा कथं जयंति?, जदि आयरिआणं जं सुं अन्थो वा पग्गहिअ अन्ना य से सत्ती अत्थि घेत्तुं धारेउं वा ताहे विसज्जावेत्ता अनाणं अन्नओ वच्चंति, एवं चेव दंसणपभावगाणं सत्थाणं अट्ठाए वच्चंति, तत्त्वार्थादीनां, तथा चरित्तट्ठाए देसंतरं गयाणं केणइ कारणेणं, तत्थ जदि पुढविकाइयाइ पउरं ततो न चरितं सुं झड़ ताहे निग्गच्छन्ति, एसा चरित्तजयणा खलु, एवं तिविहा समासतो समक्खया। इदानीं

विहरमाणका उच्यन्ते, अत आह- "विहरंतावि अ दुविहा" विहरमाणका द्विप्रकारा, गच्छगता निर्गता चेव. एतदेव व्याख्यानयन्नाह-

मू. (१९७) पत्तेयबुद्ध जिनकप्पिया य पडिमासु चेव विहरंता।
आयरिअथेरवसमा भिक्खू खुड्डा य गच्छंमि॥

वृ. प्रत्येकबुद्धा जिनकल्पिकाश्च प्रतिमाप्रतिपन्नाश्च- 'मासाई सत्तंता' इत्येवमादि एते गच्छनिर्गता विहरमाणकाः। इदानीं गच्छप्रविष्टा उच्यन्ते- 'आयरिअ' आचार्यः-प्रसिद्धः, स्थविरा-यः सीदन्तं ज्ञानादौ स्थिरीकरोति, वृषभो-वैयावृत्त्यकरणसमर्थः भिक्षवः- एतद्व्यतिरिक्ताः, क्षुल्लकाः प्रसिद्धाः, 'एते गच्छागता-गच्छनिर्गताश्च' इत्थमुपन्यासः प्राक् कृतः, तस्कमाज्जिनकल्पिकादयो गच्छनिर्गता आदौ व्याख्याताः ? उच्यते, जिनकल्पिकादीनां प्राधान्यख्यापनार्थम्. आह-प्रथममेव कस्मादित्थं नोपन्यासः कृतः ?, उच्यते. तेऽपि जिनकल्पिकादयो गच्छगतपूर्वा एवास्यार्थस्य ज्ञापनार्थम्. आह-प्रत्येकबुद्धा न गच्छनिर्गताः, न. तेषा-मपि जन्मान्तरे तन्निर्गत्वसद्भावात्, यतस्तेषां नव पूर्वाणि पूर्वाधीतानि विद्यन्ते।

इदानीमवधावतः प्रतिपादयन्नाह-

मू. (१९८) ओहावंता दुविहा लिंगविहारे य होंति नायव्वा।
लिंगेनऽगारवासं नियया ओहावणं विहारे॥

वृ. "अवधावन्तः' प्रव्रज्यादेरपसर्पन्तः 'द्विविधाः' द्विप्रकाराः 'लिंगविहारे य'त्ति लिङ्गादवधावन्ते-अवसर्पन्तिगृहस्थतांप्रतिपद्यन्त इत्यर्थः, 'विहारेय'त्तिउद्यतविहारादुद्येऽवधावन्ति-अपसर्पन्तिपार्श्वस्थादयो भवन्ति, एवमेते विज्ञेया भवन्त्यवधावमानाः। एतदेव व्याख्यानयन्नाह- "लिंगेनऽगारवासं' लिङ्गेनावधावन् गृहवासं प्रतिपद्यते. 'नितिया ओहावणं विहारं' विहारादवधावन्नित्यादिषु वासं करोति। इदानीमाहिण्डकान् प्रतिपादयन्नाह-

मू. (१९९) उवएस अनुवएसा दुविहा आहिंडआ मुणेयव्वा।
उवएसदेसदंसण थूभाई हुंति नुवएसा॥

वृ. तत्र एके उपदेशाहिण्डकाः अपरेऽनुपदेशाहिण्डकाः एवमेते द्विविधा आहिण्डका मुणितव्याः। तत्र 'उवएस'त्ति द्वारपरामर्शः 'देसदंसणि'त्ति देशदर्शनार्थं द्वादश वर्षाणि ये पर्यटन्ति सूत्रार्थौ गृहीत्वा एते उपदेशाहिण्डकाः। अनुपदेशे त्वमी भवन्ति 'थूमादी होंतिऽनुवएसा' स्तूपादिगमनशीलाः अनुपदेशाहिण्डकाः। उक्ता आहिण्डकाः द्वारम्। अधुना ये ते गच्छता विहरमाणकास्तेषामेव विधिं प्रतिपादयन्नाह-

मू. (२००) पुन्नंमि मासकप्पे वासावासासु जयणसंकमणा।
आमंतणा य भावे सुत्तत्थ न हायई जत्थ॥

वृ. "मासकल्पे' मासावस्थाने पूर्णे सति तथा 'वासावासासु'त्ति वर्षायां वासो वर्षावासः तस्मिन् वा यो वासकल्पस्तस्मिन् पूर्णे सति। पुनश्च यतनया-संक्रामणया क्षेत्रसंक्रान्तिः कर्तव्या। किं कृत्वा ? 'आमंतणा य'त्ति आमन्त्रणं आचार्यः शिष्यानामन्त्रयति-पृच्छति क्षेत्रप्रत्युपेक्षकप्रेषणकाले, चशब्दादागतेषु क्षेत्रप्रत्युपेक्षकेषु क्षेत्रगमने वा, 'भावे'त्ति आगतेषु क्षेत्रप्रत्युपेक्षकेषु भावं प्रतीक्षते. कथ्य किंक्षेत्रं रोचते ?, तत्र सर्वेषां मतं गृहीत्वा यत्र सूत्रार्थहानिर्न भवति तत्रागमनं करिष्यत्याचार्यः॥ इदानीमेना-मेव गाथां व्याख्यानयति. अत्र यदुपन्यस्तं 'जयणसंकमण'त्ति तद् व्याख्यानयन्नाह-

मू. (२०१) अप्पडिलेहिअदोसा वसहीभिक्खं च दुल्लहं होज्जा।
बालाइगिलाणाण व पाउग्गं अहव सज्झाओ॥

वृ. अप्रत्युपेक्षणे दोषा भवन्ति, ते चामी- 'वसहि'त्ति कदाचिद्वसतिर्दुर्लभा भवेत्, तथा भिक्षा वा दुर्लभा भवेत तथा बालादिग्लानानां प्रायोग्यं दुर्लभं भवेत्। अथवा स्वाध्यायो दुर्लभः, मांसाद्याकीर्णत्वात् तस्मात किम्?-

मू. (२०२) तम्हा पुव्वं पडिलेहिभण पच्छा विहीए संकमणं।
पेसइ जइ अणापुच्छिउं गणं तत्थिमे दोसा॥

वृ. तस्मात्पूर्वमेव 'प्रत्युपेक्ष्य' निरूप्य पश्चाद् 'विधिना' यतनया संक्रमणं कर्त्तव्यम्। इदानीं यदुपन्यस्तं 'आमंतणा ये' त्यवयवेन तं व्याख्यानयन्नाह- 'पेसेति जइ अणापुच्छिउं गणं' प्रेषयति क्षेत्रप्रत्युपेक्षकान् यदि गणमनापृच्छय तत्रेमे 'दोषाः' वक्ष्यमाणलक्षणाः-

मू. (२०३) अइरंगोविहिपडिलेहणाए कत्थवि गयत्ति तो पुच्छे।
खेत्ते पडिलेहेउं अमुगत्थ गयत्ति ते दट्ठं॥

वृ. यदा क्षेत्रप्रत्युपेक्षकाः शीघ्रत्वं जिताननापृच्छय गतास्तदा कथं ज्ञायन्ते? अत आह- अतिरिक्ते पथिप्रत्युपेक्षणावां सत्यां ते पृच्छन्ति- कुत्र गतास्त इत्येवं पृच्छन्ति। आचार्योऽप्याह- क्षेत्रं प्रत्युपेक्षितुममुकत्र क्षेत्र गता इति, तेऽप्याहुः- 'तं दुट्ठति, 'तत्' क्षेत्रं न शोभनं, यतस्तत्र गच्छता,-

मू. (२०४) तेना सावय मसगा ओमऽसिवे सेह इत्थिपडिणीए।
थंडिल्लअगनि उड्डाण एवमाई भवे दोसा॥

वृ. स्तेनाः अर्द्धपथे स्वापदानि- व्याघ्रादीनि मशका वाऽतिदुष्टाः ओमं- दुर्भिक्षं 'असिवं' देवताकृत उपद्रवो यदिवा 'सेह' त्ति अभिनवप्रव्रजितस्य स्वजना विद्यन्ते, ते चोत्प्रव्राजयन्ति, 'इत्थि'त्ति स्त्रियो वा मोहप्रचुराः, 'पडिणीए'त्ति प्रत्यनीकपद्रवश्च, 'थंडिल्ल'त्ति स्थण्डिलानि वा न तत्र विद्यन्ते, 'अगनि'त्ति अग्निना वा दग्ध स देशः, 'उड्डाणे'त्ति 'उत्थितः' उद्भसित्तःप्रदेशो वाऽपान्तराले इत्येवमादयो दोषा भवन्ति, तत्रापि प्राग्रस्यैते दोषाः-

मू. (२०५) पच्चंति तावसीओ सावयदुब्भिक्त खेतेणपउराइ।
नियगपदट्ठट्ठाणे फेडणहरियाइ (हरिहरिय) णपन्नीए॥

वृ. स हि प्रतन्यन्तदेशः म्लेच्छाद्युपद्रवोपेतः 'तापस्यः' तापसप्रव्राजिकाः ताश्च प्रचुरमोहाः संयमाद्भ्रंशयन्ति श्वापदभयदुर्भिक्षभयस्तेनप्रचुराणि वा क्षेत्राणि 'नियग'त्ति अभिनवप्रव्रजितस्य निजः- स्वजनादिः स चोत्प्रव्राजयति 'पदट्ठ'त्ति प्रद्विष्टो वा तत्र कश्चित् 'उड्डाणे'त्ति उत्थितः- उद्भसितःसकदाचिद्देशो भवेत् 'फेडण'त्ति प्राक्तत्र वस्त्यतिशयसीत् इदानीं तु कदाचित्पर्णीना भवेत्। (हरि) 'हरित-पत्रीय'त्ति हरितं तत्र शाकादिबाहुल्येन भण्यते, तच्च साधूनां न कल्पते दुर्भिक्षप्रायं वा 'हरितपर्णी'ति तत्र देशे केषुचिद्भक्षेषु राज्ञो दण्डं दत्त्वा देवतायै बल्यर्थं पुरुषा मार्यन्ते, स च प्रव्रजितादिभिक्षार्थं प्रविष्टः सन्, तत्र गृहस्योपरि आर्द्रां वृक्षशाखां चिह्नं क्रियते, तच्च गृहीतसङ्केतो दूरत एव परिहरति, अगृहीतसङ्केतश्च विनश्यति. तस्माद्भणं पृष्ट्वा गन्तव्यमिति। अथवाऽन्यकर्तृकीयं गाथा, ततश्च न पुनरुक्त दोषः। इदानीं स आचार्यः क्षेत्रप्रत्युपेक्षकान् प्रेषयन सर्वं गणमालोचयति, अथ तु विशेष्यं कञ्चिदेकमालोचयति शिष्यादिकं ततश्चैते दोषा भवन्ति-

मू. (२०६) सीसे जइ आमंतइ पडिच्छगा तेन बाहिरं भावं।
जइ इयरा तो सीसा नेवि समत्तंमि गच्छंति॥

वृ. शिष्यान् विशिष्टं कवलान् यद्यामन्त्रयति ततश्चको दोषः ?, 'पडिच्छग'त्ति सूत्रार्थग्रहणार्थं ये आयाताः साधवस्ते प्रतीच्छकाः 'तेन'त्ति तेन अनालोचनेन 'बाहिरं भावं'ति बहिर्भावं चिन्तयन्ति, बाह्या वयमत्र। अथेतरान् प्रतीच्छकानालोचयति ततः शिष्या बहिर्भावं मन्यन्ते, प्रतीच्छकाश्च सूत्र-र्थग्रहणसमाप्तौ गच्छन्ति ततश्चाचार्य एकाकी संजायत इत्येवं दोषस्तावत्। अथ वृद्धान् पृच्छति ततः-

मू. (२०७) तरुणा बाहिरभावं न य पडिलेहोवही न किइकम्मं।
मूलयपत्तसरिसया परिभूया बच्चिमो थेरा॥

वृ. वृद्धानालोचयति तरुणा बहिर्भावं मन्यन्ते, ततश्च ते तरुणाः किं कुर्वन्त्यत आह-'न य पडिलेहोवहीं' उपधेः प्रत्युपेक्षणां न कुर्वन्ति, न च कृतिकर्म-पादप्रक्षालनादि कुर्वन्ति। अथ तरुणानेव पृच्छति ततः को दोष ?, वृद्धा एवं चिन्तयंति-'मूलयपत्तसरिसया' मूलं-आद्यं यत्पर्णं निस्सारं परिप-क्वप्रायं तत्तुल्या वयमत एव च परिभूतास्ततश्च व्रजामः इत्येवंभ्यविगश्चिन्तयन्ति, यदिवा 'मूलयपत्तसरिसया' मूलकपत्रतुल्याः शाकपत्रप्राया वयम्, अथ मतं स्थविरा न प्रष्टव्या एव, तत्तु न, यत आह-

मू. (२०८) जत्तमणहिं विहूणं जं जूहं होइ सुट्ठुवि महल्लं।
तं तरुणरहसपोइयभयगुम्मइअं सुहं हंतुं॥

वृ. जीर्णमृगैर्विहीनं यद्यूथं भवति सुष्ठ्वपि महत्तद्यूथं तरुणरभसे-रोगे पोतितं-निमग्नं मदेन गुल्मयितं-मूढं 'सुखं हन्तुं' विनाशयितुं-सुखेन तद्व्यापाद्यते। यस्मादेतदेवं तस्मात्सर्व एव मिलिताः सन्तः प्रष्टव्याः, कथम् ?,-

मू. (२०९) थुइमंगलमामंतण नागच्छइ जो य पुच्छिओ न कहे।
तस्सुवरिं ते दोसा तम्हा मिलिएसु पुच्छेज्जा॥

वृ. स्तुतिमङ्गलं कृत्वा-प्रतिक्रमणस्यान्ते स्तुतित्रयं पठित्वा ततश्चामन्त्रयति, आकारिते च दूरस्थो यदि नागच्छति कश्चिद्वा वा पृष्टः सन्न कथयति ततस्तस्योपरि ते दोषाः, तस्मान्मिलितेषु प्रच्छनीयमेकत्रीभूतेषु।

मू. (२१०) केई भणंति पुव्वं पडिलेहिअ एवमेव गंतव्वं।
तं च न जुज्जइ वसही फेडण आगंतु पडिनीए॥

वृ. केचनाचार्या एवं ब्रुवते-प्राक् प्रत्युपेक्षिते यस्मिन् क्षेत्रे प्रागपि स्थिता आसन् तस्मिन् पुनरप्रत्युपेक्ष्य गम्यते, तच्च न युज्यते, यस्मात्तत्र कदाचित् 'वसहीं फेडण'त्ति सा प्राक्तनी वसतिरपनीता, आगन्तुको वा प्रत्यनीकः संजातः, अत एव दोषभयात्पूर्वदृष्टाऽपि वसतिः प्रत्युपेक्षणीया। इदं च ते प्रष्टव्याः-

मू. (२११) कयरी दिसा पसत्था ? अमुई सव्वेसि अनुमई गमनं।
चउदिसि ति दु एगं वा सत्तग पनगं तिग जहन्नं॥

वृ. कतरा दिक् 'प्रशस्ता' शोभना ?, सुक्षेमपथेत्यर्थः, तेऽप्याहुः 'अमुई' अमुका दिक् सुक्षेमेति। एवं सर्वेषां यदा 'अनुमता अभिसंचिंता भवति, पथ्या इ)त्यर्थः, तदा गमनं कर्त्तव्यम्। तत्र 'चतसृष्वपि दिक्षु' पूर्वदक्षिणपश्चिमोत्तरासु प्रत्युपेक्षकाः प्रयान्ति, अथवा चतसृणां दिशामुपद्रवादिसम्भवे तिसृषु यान्ति, तदभावे द्वयोर्दिशोर्यान्ति, तदभावेऽप्येकस्यां दिशि। तासु च दिक्षु व्रजन्तः कियन्तो व्रजन्त्यत आह-'सत्तग पनगं तिग जहन्नं' एकैकस्यां दिशि उत्कृष्टतः सप्त सप्त प्रयान्ति, सप्तानामभावे पञ्च पञ्च व्रजन्ति, पञ्चानामभावे जघन्येन त्रयस्त्रयः प्रयान्तीति। अत्र च ये आभिग्रहिकास्ते प्रहेतव्याः, तेषां त्वभावे-

मू. (२१२) अनभिग्गहिए वावारणा उ तत्थ उ इमे न वावारे।

बालं वृद्धमगीतं जोगिं वसहं नहा स्वमगं ॥

वृ. 'अनभिग्गहिए' त्ति परैरभिगृहीतं न गृह्यतेस्तान् व्यापारयेद्-गमनाय चोदयेदित्यर्थः। तत्र तु बालं वृद्धं अगीतार्थं योगिनं 'वृषभं' वैयावृत्त्यकरं तथा 'क्षपकं' मासक्षपकादिकम्, एतान् व्यापारयेदभमनाय। इदानीमेतामेव गाथां भाष्यकृद् व्याख्यानयन्नाह-

भा. (२१३) हीनेज्ज व खंडेज्ज व कज्जाकज्जं न याणई बालो।
सो वाऽनुकंपणिज्जो न तिंति वा किंचि बालस्स ॥ [भा. ६८]

वृ. बालं प्रेष्यमाणं त्रयो दोषाः-क्रियते मनेच्छादिना क्रीडनं वा बालस्वभावत्वात् कार्याकार्यं च-कर्तव्याकर्तव्यं वा न जानातीति बालः, सच्चयोनः क्षेत्रप्रत्युपेक्षणार्थं प्रहितः सन् अनुकम्पया सर्वत्र भ्रमते, आगत्य चाचार्याय कथयति यद्-तत्सर्वत्र भ्रम्यते, गतश्चत्र गच्छोयावन्नाकोऽपि स्खलति भ्रमति, चेल्लक-स्थविरानुकम्पया सर्वत्र भ्रमति, अथवा न ह्रस्वति वा किञ्चिद्बालाय पात्रप्रक्षालनादिकं न व्यापारयेत्। वृद्धोऽपि न प्रेषणीयो, तत्रस्तत्रैते दोषाः-

भा. (२१४) वुड्ढोऽनुकंपणिज्जो चिरेण न य मग्गथंडिलं पेहे।
अहवावि बालवुड्ढा अगमंत्था गोयरतिअस्स ॥ [भा. ६९]

वृ. वृद्धोऽनुकम्पनीयस्तत्रस्थोयावद्बलभते, नान्यः, तथा 'चिरेण' त्ति 'चिरेण' प्रभूतनकालेनगमनंआगमनं च करोति, न च 'मार्गं' पन्थानं प्रत्युपेक्षितुं समर्थः नापि स्थण्डिलानि प्रत्युपेक्षितुं समर्थः, इदानीं तु द्वयोरपि बालवृद्धयोस्तुल्यदोषोद्भावनार्थमाह-अथवा बालो वृद्धश्च 'अगमत्थो' अशक्तौ 'गोचरत्रिकस्य' त्रिकालभिक्षाटनस्येत्यर्थः। दारं। अगीतार्थोऽपि प्रेष्यमाणे एते दोषाः-

भा. (२१५) पंथं च मासकप्पं उक्खेवं एच्चिरेण कालेणं।
एहामोत्ति न याणइ चउव्विहमणुन्न ठाणं च ॥ [भा. ७०]

वृ. 'पन्थानं' मार्गं न जानाति वक्ष्यमाणं 'मासं' ति मासकल्पं न जानाति 'वासं' ति वर्षाकल्पं न जानाति, तथा 'उपाश्रयं' वसतिं पर्यटितुं न जानाति, तथा शय्यातरेणपृष्टः-कदा आगमिष्यथ?, ततश्चब्रवीति-'एएं चिरेण एहामो' त्ति इयता कालेन-अर्द्धमासादिना एष्याम इत्येवं वदतो यो दोषः अविधिभाषणजनितस्तं न जानाति, यतः कदाचिदन्या दिक् शोभनतरा शुद्धा भवति तत्र गम्यते, अतो नैवं वक्तव्यम्-एतावता कालेनैष्यामः। तथा 'चउव्विह मणुन्न' त्ति तत्रोपाश्रये शय्यातरश्चतुर्विधमनुज्ञाप्यते-द्रव्यतः क्षेत्रतः कालतो भावतश्चेति, तत्र द्रव्यतस्तृणडगलादि अनुज्ञाप्यते, क्षेत्रतः पात्रकप्रक्षालनभूमिरनुज्ञाप्यते, कालतो दिवा रात्रौ वा निष्क्रमणमनुज्ञाप्यते, भावतोग्लानस्य कस्य-चिद्भावप्रतिबन्धार्थं कायिकाव्युत्सर्जादि निरूप्यते, एतां चतुर्विधामनुज्ञामनुज्ञापयितुं न जानाति। 'ठाणं च' ति वसतिः कीदृशे प्रशस्तेस्थाने भवतीत्येतन्न जानाति। योगिनमपि न प्रेषयेत्, कस्मात्?-

भा. (२१६) तुरंतो अ न पेहे पंथं पाहुडिओ न चिरं हिंडे।
विगडं पडिगेण्हेज्ज तम्हा जोगिं न पेसज्जा ॥ [भा. ७१]

वृ. त्वरमाणः सन्न प्रत्युपेक्षते पन्थानं, तथा पाहुडिओ सन्न चिरं भिक्षां हिण्डते, तथा लभ्यमाना विकृतीः-द्रव्यादिकाः प्रतिषेधयति, तस्माद्योगिनं न प्रेषयेत्। वृषभोऽपि न प्रेषणीयो यत एते दोषा भवन्ति-

भा. (२१७) अवणकुलाणि न याहे सिट्ठाणि न देंति जो विगधनया।
परिनावणं अनुकंपणं तिण्हऽसमत्थो भवे खमगो ॥ [भा. ७२]

वृ. वृषभो हि प्रेष्यमाणः कदाचिद्दुष्प्रज्ञापनाकुलानि 'न याहे' ति न कथयति, अथवा 'सिट्ठाणि न देंति' ति

कथिताऽन्यपि तानि स्थापनाकुलानि न दर्शितानि अन्यस्य, सम्यक् एव तानि परिचितानि, 'ना विराधनय' त्ति ततश्च स्थापनाकुलेषु अतर्क्यमानेषु या विराधना ग्लानादीनां सा सर्वा आचार्यस्य दोषेण कृता भवति। अथ क्षपकोऽपि न प्रेष्यते, यतः परितापना-दुःस्थासिका आतपादिना भवति क्षपकस्य, 'अनुकंपण' त्ति अनुकम्पया बालोकः क्षपकस्यैव ददाति, नान्यस्य, तथा 'तिण्हऽसमत्थो त्रयो वारा यदिभक्षाटनं तस्य-वारत्रयाटनस्याऽसमर्थः क्षपकः। यदा तु पुनः प्रेषणार्हा न भवन्ति-

मू. (२१८) एए चेव हवेज्जा पडिलोमेण तु पेसए विहिना।
अविही पेसिज्जंते ते चेव तहिं तु पडिलोमं॥

वृ. एत एव बालादयो भवेयुस्तदा किं कर्तव्यमित्याह-'पडिलोमेण तु पेसए विहिणा' अनुलोमः-उत्सर्गेणस्थितिपर्यंतः प्रतिलोमः- अपवादस्तं प्रतिलोमं-अपवादमङ्गीकृत्य एतानेव बालादीन् प्रेषयेत्, कथम? -'विधिना' यतनया-वक्ष्यमाणया। यदा पुनस्त एव बालादयोऽविधिना प्रेष्यन्ते तदाऽविधिना प्रेष्यमाणेषु न एव दोषाः, क्व?, 'तहिं तु' 'तस्मिन' क्षेत्रे प्रेष्यमाणानां, कथम? -'पडिलोमं' ति प्रतिलोमं अपवादमङ्गीकृत्य। अथवाऽविधिना प्रेष्यमाणेषु न एव दोषाः, तत्र 'पडिलोमं' ति अविधिप्रतिलोमो विधिस्तेन-प्रतिलोमविधिना प्रेषयेत। इदानीं बालादीनां प्रेषणार्हत्वं प्राप्तं यतना प्रतिपाद्यते-तत्र च गणावच्छेदकः प्रेष्यते, तदभावेऽन्यो गीतार्थः, तदभावेऽगीतार्थोऽपि प्रेष्यते, तस्य को विधिः?-

मू. (२१९) सामायारिमणीए जोगमनागाढ खवग पारावे।
वेयावच्चे दायणजुयलसभत्थं व सहिअं वा॥

वृ. अगीतार्थस्य सामाचारी कथ्यते, ततः प्रेष्यते, तदभावे योगी प्रेष्यते, किंविशिष्टः?-'अनागाढं' ति अनागाढयोगी-बाह्ययोगी योगं निक्षिप्य 'पारयित्वा' भोजयित्वा प्रेष्यते, ततस्तदभावे क्षपकः प्रेष्यते, कथं? 'पारावे' त्ति भोजयित्वा, तदभावे वैयावृत्यकरः, एतदेवाह-'वेयावच्चे' त्ति वैया-वृत्यकरः प्रेष्यते, 'दायण' त्ति सचवयावृत्यकरः कुलानि दर्शयति, तदभावे 'जुअल' त्ति युगलंप्रेष्यते-वृद्धस्तरुणसहितः बालस्तरुणसहितो वा, 'समत्थं व सहिअं व' त्ति समर्थं वृषभं प्रेष्यमाणं तरुणेन सह वृद्धेन वा सह, द्वितीयो वकारः पादपूरणे। आह-प्रथमं बालादय उपन्यस्ताः, तत्कस्मात्तेषामेवप्रेषण-विधिर्न प्रतिपादितः प्रथमं?, उच्यते, अयमेव प्रेषण-क्रमः, यदुत प्रथममगीतार्थः प्रेष्यते पश्चाद्योगिप्रभृतय इति, आह-इत्थमेवोपन्यासः कस्मान्न कृतः?, उच्यते, अप्रेषणार्हत्वे सर्वेषां तुल्ये वर्त्तते, ततश्च योऽस्तु सोऽस्तु प्रथममिति न कश्चिद्दोषः।

इदानीं तेषां गमनविधिं प्रतिपादयन्नाह-

मू. (२२०) पंथुच्चारे उड्ढे ठाणे भिक्खंतरा य वसहीओ।
तेना सावयवाला पच्चावाया य जानविही॥

वृ. 'पंथ' त्ति पन्थानं-मार्गं चतुर्विधया प्रत्युपेक्षणया निरूपयन्तो गच्छन्ति, 'उच्चारे' त्ति उच्चा-रण-प्रश्रवणभूमिं निरूपयन्तो व्रजन्ति, 'उड्ढे' त्ति पानकस्थानानि निरूपयन्ति, येन बालादीना पानीय-मानीय दीयते, 'ठाणे' त्ति विश्रामस्थानं गच्छस्य निरूपयन्तो व्रजन्ति, 'भिक्खंतरे' ति भिक्षां निरूपयन्ति, येषु प्रदेशेषु लभ्यते येषु वा न लभ्यत इति, 'अंतरा य वसहीउ' त्ति अन्तरान्तरा वसतीश्च निरूपयन्तो गच्छन्ति यत्र गच्छः सुखेन वसितुं याति, स्तेनाश्च यत्र न सन्ति, यत्र व्यालाः तथा श्वापदा न सन्ति-श्वापदभुजगादयो न सन्ति, 'पच्चावाय' त्ति एकस्मिन पथि गच्छतां दिवा प्रत्यपायः, अन्यत्र रात्रौ प्रत्यपायः, ततो निरूप्य गन्तव्यम। 'जानविहि' त्ति अयं गमनविधिः। इदानीं भाष्यकार एनामेव निर्युक्तिगाथां प्रतिपदं व्याख्यानयन्नाह-

मू. (२२१) सो चेव उ निग्गमणे विही उ जो वन्निओ उ एगस्स।
दव्वे खेत्ते काले भावे पंथं तु पडिलेहे॥ [भा. ७३]

वृ. स एव विधिर्यः एकस्य निर्गमने उक्तः, 'विसर्जनापञ्चमे' इत्येवमादिको विधिरुक्तः, इदानीं पथि व्रजतो विधिरुच्यतेस चायं- 'दव्वे खेत्ते काले भावे पंथं तु पडिलेहे' त्ति द्रव्यतः क्षेत्रतः कालतो भावतश्च मार्गं प्रत्युपेक्षते। इदानीमेतानेव द्रव्यादीन व्याख्यानयन्नाह-

मू. (२२२) कंटगतेणा वाला पडिणीया सावया य दव्वंमि।
समविसम उदयथंडिल भिक्खायरि अंतरा खेत्ते॥ [भा. ७४]

वृ. तत्र कण्टकाः स्तेना व्यालाः प्रत्यनीकाः श्वापदाः एतेषां पथि यत्प्रत्युपेक्षणं सा द्रव्यविषया प्रत्युपेक्षणा भवतीति। तथा समविषम उदकस्थण्डिलभिक्षाचर्यादीनां या 'अन्तरे' पथि प्रत्युपेक्षणा सा क्षेत्रतः प्रत्युपेक्षणा। द्वारम्। इदानीं कालप्रत्युपेक्षणां प्रतिपादयन्नाह-

मू. (२२३) दिवा व पच्चवाए य जाणई सुगमदुग्गमे काले।
भावे सपक्खपरपक्खपेल्लणा निण्हगाईया॥ [भा. ७५]

वृ. दिवा प्रत्यपायो रात्रौ वा प्रत्यपायो न वा प्रत्यपाय इत्येतज्जानाति, तथा दिवाऽयं पन्थाः सुगमो दुर्गमो वा रात्रौ वा सुगमो दुर्गमो वा एवं यत्परिज्ञानं सा कालतः प्रत्युपेक्षणा। भावतः प्रत्युपेक्षणा इयं, यदुत स विषयः स्वपक्षेण परपक्षेण वाऽऽक्रान्तो-व्याप्तः, कथमसौ स्वपक्षः परपक्षश्चात आह-'निण्हगाईया' निह्नवकादिः स्वपक्षः, आदिग्रहणाच्चरकपरिव्राजकादिः परपक्षः, एभिरनवरतं प्रार्थ्यमानो लोको न किञ्चित् दानमिच्छति इत्येवं या निरूपणा सा भावप्रत्युपेक्षणा। कथं पुनस्ते व्रजन्तीत्याह-

मू. (२२४) सुत्तत्थे अकरिंता भिक्खं काउं अइंति अवरण्हे।
बिइयदिणे सज्झाओ पोरिसिअद्धाइ संघाडो॥

वृ. सूत्रपौरुषीं अर्थपौरुषीं चाकुर्वन्तो व्रजन्ति तावद्यावदभिमतं क्षेत्रं प्राप्ता भवन्ति, पुनश्चते किंकुर्वन्तीत्यत आह-'भिक्खं काउं अइंति अवरण्हे' भिक्षां कृत्वा-नदासन्नग्रामे तद्दिवो भक्षयित्वा पुनश्चापराह्णे प्रविशन्ति, ततो वसतिमन्वेषयन्ति, लब्ध्वा यां च वसतौ कालं गृहीत्वा द्वितीयदिवसे किञ्चिन्न्यूनपौरुषीमात्रं कालं स्वाध्यायं कुर्वन्ति। पुनश्च 'पोरिसिअद्धाइ संघाडो' 'पौरुषीकाले सङ्घाटकं कृत्वा भिक्षार्थं प्रविशन्ति, अथवा स्वाध्यायं कियन्तमपि कालं कृत्वा 'पोरुसि-अद्धाए' अर्द्धपौरुष्यामित्यर्थः, सङ्घाटकं कृत्वा प्रविशन्तीति। इदानीं ते सङ्घाटकेन प्रविष्टास्तत्क्षेत्रं त्रिधा विभजयन्ति, एतदेवाह-

मू. (२२५) खेत्तं तिहा करेत्ता दोसीणं नणिअमि अ वयंति।
अन्नो लाहो बहुओ थोवं दे मा य रुंधेज्जा॥

वृ. क्षेत्रं त्रिधा कृत्वा-त्रिभिर्भागैर्विभज्य एको विभागः प्रत्युपेक्ष्यैव हिण्डन्ते, अपरो मध्याह्ने हिण्डयते, अपरोऽपराह्णे, एवं ते भिक्षामटन्ति। 'दोसीणं नोनियमि उ' वदंति' 'दोसीणं' पर्युषिते आहारे निश्चयार्थे एव वदन्ति-'अन्नो लाहो बहुओ' अन्य आहारो लब्धः प्रचुरः, ततश्च 'थोवं दे' ति 'स्तोकं ददस्व' स्वल्पं प्रयच्छ, 'मा य रुंधेज्ज' त्ति मा वा गेयं गृह्णीष्वस्मत्सकाशादजानितम्, एतच्चासौ परीक्षार्थं करोति, किमयं लोको दानशीलो ? न वेति।

मू. (२२६) अहव ण दोसीणं चिअ जायामो देहि देहि घयं खीरं।
खीरं घयगुलपेल्ला थोवं थोवं च सव्वत्थ॥

वृ. अथवा एतदसौ साधुर्ब्रवीति-न वयं दोषाणां त्रिभ्य याचयामः, किन्तु दधि याचयामः, तथा क्षीरं याचयामः, तथा क्षीरे लब्धे सति गुडं घृतं पेया ददस्व। 'सर्वत्र' सर्वेषु कुलेषु स्तोकं २ गृह्णन्ति ते साधवः, एवं तावत्प्रत्युषसि भिक्षाटनं कुर्वन्ति। अधुना मध्याह्नाटनविधिरुच्यते-

मू. (२२७) मज्झण्हि पउरभिक्खं परिताविअपिज्जजूसपयकढिअं।
ओहड्डमणाभट्ठं लब्भइ। जत्थ पउत्थं॥

वृ. मध्याह्ने प्रचुरा भिक्षा लभ्यते 'परिताविय'त्ति परितापितं सुकुमारिकादि, तथा पेया लभ्यते, जूषः पाटलादिः, तथा पयः-क्वथितं 'ओहड्डमणाभट्ठं लब्भति' प्रार्थितमप्रार्थितं वा लभ्यते 'जं जत्थ' 'यद्' यद्वस्तु 'यत्र' क्षेत्रे 'प्रायोग्यं' इष्टं तद्विधभूतं क्षेत्रं प्रधानमिति। इदानीमपराह्णे भिक्षावेलां प्रतिपादयन्नाह-

मू. (२२८) चरिमे परितावियपिज्जजूस आएस अलग्गणट्ठाए।
एक्कक्कगसंजुत्तं भत्तट्ठं एक्कमेक्कस्स॥

वृ. 'चरिमे' चरमपौरुष्यामटन्ति, तत्र च परितापितानि पेया यूषश्च यदि लभ्यते ततः 'आएस'त्ति प्राघूर्णकः 'अलग्ग'त्ति ग्लानस्तदर्थमर्थयित्वा भवति, ततश्चतल्लाभानम्। एवं च भ्रमित्वा 'भत्तट्ठं'ति उदरपूरणमेकस्यानयन्ति. कथम्? -'एक्कक्कगसंजुत्तं' एकः साधुरेकेन संयुक्तं यस्मिन्नानयने तदेकैक-संयुक्तं मानयन्ति, 'एक्कमेक्कस्स'त्ति परस्परस्य आनयन्ति, एदुक्तं भवति-द्वौ साधू अटतः एक आस्ते प्रत्युषसि पुनर्द्वितीयवेलायां तयोर्द्वयोर्मध्यादेक आस्ते अपरः प्रयाति प्रथमव्यवस्थितं गृहीत्वा. तृतीयवेलायां च योद्वितीयवेलायां रक्षपालः स्थितः स प्रथमस्थितरक्षपालेन सहव्रजति, इतरस्तुयेन वाराद्वयमटितं स तिष्ठति, एवमेव एषां त्रयाणामेकैकस्य सङ्घाटककल्पनया पर्यटनं द्वयोर्योजनीयम्। एवम्-

मू. (२२९) ओसह भेसज्जाणि अ कालं च कुलं य दानमाईणि।
सग्गामे पेहित्ता पेहंति तओ परग्गामे॥

वृ. एवं ओषधं-हरितक्यादि, भेषजं-पेयादि, एतच्च प्रार्थनाद्वारेण प्रत्युपेक्षते, 'कालं च'त्ति कालं प्रत्युपेक्षते, 'कुलं यदाणमाईणि' कुलानि च दानयोग्यकार्याणि, "दाणे अहिगमसद्धे" एवमादि, एतानि कुलानि प्रत्युपेक्षते। एतानि च स्वग्रामे 'पेहित्ता' प्रत्युपेक्ष्य ततः परग्रामे प्रत्युपेक्षन्ते।

मू. (२३०) चोयगवयणं दीहं पनीयगहणे य ननु भवे दोसा।
जुज्जइ तं गुरुपाहुणगिलाणगट्ठा न दप्पट्ठा॥

वृ. चोदकवचनं, किमित्यत आह-'दीहं' दीर्घं भिक्षाटनं कुर्वन्ति ते 'पणीयगहणे'त्ति स्नेहवद्द्रव्य-ग्रहणे च ननु भवन्ति दोषाः। आचार्यस्त्वाह-'जुज्जति तं' युज्यते तत्सर्वं दीर्घं भिक्षाटनं यत् प्रणीतग्रहणं च. यतः 'गुरुपाहुणगिलाणगट्ठा' गुरुप्राघूर्णकग्लानार्थमसौ प्रत्युपेक्षते न तपोर्थं, न चात्मार्थं प्रणीताद्यग्रहणमिति।

मू. (२३१) जइ पुन खद्धपनीए अकारणे एक्कसिंपि गिण्हेज्जा।
तहिअं दोसा तेन उ अकारणे खद्धनिद्धाइं॥

वृ. यदि पुनः खद्ध-प्रचुरं प्रणीतं-स्निग्धं एतानि अकारणे सकृदपि गृह्णीयात् 'तहिअं दोसा' ततस्तस्मिन ग्रहणेदोषा भवेयुः। किंकारणम्? -यतः 'तेन उ' 'तेन' साधुना 'अकारणे खद्धनिद्धाइं' 'अकारणे' कारणमन्तरेणैव खद्धाइं-भक्षितानि स्निग्धानि-स्नेहवन्ति द्रव्याणि, अथवा अकारणे 'खद्धनिद्धाइं' प्रचुरस्निग्धानि तेनासेवितानीति।

मू. (२३२) एवं-रूढए थंडिल वसहीं दउलिअमुत्तगेहमाईणि।

पाओग्गमणुन्नवणा वियालणे तस्स परिकहणा॥

वृ. 'एवं' उक्तेन प्रकारेण 'रुचिए' त्ति 'रुचिते' अभीष्टक्षेत्रसति 'थंडिल' त्तितत: स्थण्डिलानिप्रत्युपेक्षन्ते, येषु मृत: परिष्ठाप्यते महास्थण्डिलं 'वसहि' त्ति वसतिं निरूपयन्ति, किं प्रशस्ते प्रदेशे आहोस्विदप्रशस्ते-सिंगखोडादियुक्ते इति, पत्तनमध्ये शालादि, तदभावे 'देउलिआ' देवकुलं शून्यं प्रत्युपेक्ष्यते 'सुन्नगहमादीणि' शून्यगृहादीनि आदिशब्देनसभागृह्यते, तां च वसतिं लब्ध्वाकिं कर्त्तव्यं ?- 'पाउग्गमणुन्नवणा' प्रायोग्यानां-तृणडगलकादीनां शय्यातरोऽनुज्ञापना कार्यते-यथा अस्य-कलय एतानि वस्तूनि। अथासौ प्रायोग्यानि न जानाति 'वियालणे' त्ति विचार्यते, प्रायोग्यं किमभिधीयते ? इति, एवंविधे विचारे तस्य शय्यातरस्य कथ्यते 'परिकहणा' यथाऽस्माकंतृण-ग्रहाऽङ्गारादि उत्संकलयत। एतां निर्युक्ति गाथांभाष्यकारो व्याख्यानयति, तत्र रुचिते क्षेत्रे स्थण्डिलं दर्शयन्ति, तच्च बहुवक्तव्यत्वादपरिष्ठाप्यते, वसतिस्तु कीदृशे स्थाने कर्त्तव्या कीदृशे च न कर्त्तव्येति व्याख्यानयन्नाह-

मू. (२३३) सिंगक्खोडे कलहो ठाणं पुन नेव होइ चलणेसुं।
अहिठाणे पाइरागो पुच्छेमि अ फेडणं जाण॥ [भा. ७६]

मू. (२३४) मुहमूलंमि अ चारो सिरे य कउहे य पयसक्कारो।
खंधे पट्ठीए भरो पोट्टेमि य धायओ वसहो॥ [भा. ७७]

वृ. तत्रवामपार्श्वोपविष्टपूर्वाभिमुखवृषभरूपंक्षेत्रंबुद्ध्याकल्पयित्वातत्रलक्ष्यमुच्यते-'शृङ्गखोडे' शृङ्गप्रदेशे यदि वसतिं करोति ततः कलहो भवतीति क्रिया वक्ष्यति, 'स्थाने' अवस्थितिर्नास्ति 'चरणेषु' पादप्रदेशेषु, 'अधिष्ठाने' अपनप्रदेशे वसतौ क्रियमाणायामुदररोगो भवतीति क्रिया सर्वत्र योजनीया। 'पुच्छे' पुच्छप्रदेशे 'फेडणं' अपनयनं भवति वसत्या:॥ मुखमूलेचारो भवति, शिरसि-शृङ्गया-मध्येककुदेचपूजासत्कारो भवति, स्कन्धे पृष्ठे च भारो भवति, साधुभिरागच्छद्भिरसाकुला भवति, उदरप्रदेशे तु नित्यं तृण एव भवति क्षेत्र-वृषभः, । वसतिर्व्याख्याता, तद्व्याख्यानाच्च देवकुल-शून्यगृहाद्यपि व्याख्यानमेव द्रष्टव्यम। इयं च वृषभपरिकल्पना यावन्मात्रं वसतिनाऽऽक्रान्तं तस्मिन नोपरिष्टात, उपरिष्टात्तु तदनुसारेण कर्त्तव्या वसतिः। अधुना 'पाउग्गमणुन्नवण'त्यमुमेवावयवं व्याख्यानयन्नाह, तत्र प्रायोग्यानामनुज्ञापना कर्त्तव्या-द्रव्यतः क्षेत्रतः कालतो भावतश्च, तत्र द्रव्यतः-

मू. (२३५) उच्चमनुपुव्वीए रुद्धत्थं पहमाणिणो दोसा।
जेय गुणा पढमाए ते वाघायंमि सेसासु॥ [प्र. ५]

मू. (२३६) पउरत्ता पान पढमाए बीयाए भयान न लहंति।
तइया उवगरणहरी नत्थि च उत्थीए सन्ज्झाओ॥ [प्र. ६]

मू. (२३७) पंचमिआए संखडि छट्ठीए गणस्स भेयणं जाण।
सत्तमिआगंतूनं मरणं पुन अट्ठमी बिंति॥ [प्र. ७]

मू. (२३८) बलिए पुव्वमुहं वसहंमिओ गंतु उत्तरे पासे।
एवं पुव्वुत्तरओ वसहिं गिण्हिज्ज निद्दोसं॥ [प्र. ८]

मू. (२३९) रुद्धए मत्थो इल्लं पेहिज्जा चोयगो भणइ एवं।
ठायंतच्चि च सन्ज्झ य अमंगलं कुव्वहाभेलं॥ [प्र. ९]

मू. (२४०) आहायरिओ लोए नगरं निव्वसंमि पढम चत्थंमि।

सोयाणं पेहिज्जइ न य दिट्ठं न अमंगलत्थं ॥ [प्र. १०]

मू. (२४१) दिसा अवरदक्खिणा दक्खिणाअवरायदक्खिणपुव्वा ।
अवसुत्तरा य पुव्वा उत्तरपुव्वुत्तरा चेव ॥ [प्र. ११]

मू. (२४२) उद्दिट्ठ कमेणासिं पढमं पिल्लेहिऊण बाधाए ।
बीयं पडिलेहिज्जा एवं उहसज्जाऽऽहारो ॥ [प्र. १२]

मू. (२४३) सव्वं नणऽगलाई अच्छणभाणाऽवोवणा सेणे ।
काले उच्चारादी भावेन गिलाणकूरुवमा ॥ [भा. ७८]

वृ. 'द्रव्यतः' द्रव्यमङ्गीकृत्य तृणानां संस्तारकार्थं ग्लानस्य च-अशिष्टग्लानोऽल्पकार्थं लोष्टनामनुज्ञापना क्रियते । 'क्षेत्रे' क्षेत्रविषयाऽनुज्ञापना 'अच्छणं'ति आस्वा यत्रास्यते यथासुखेन स्वाध्यायपूर्वकं 'भाणादिधोवणा' भाजनादिधावनं-क्षालनं यावत्कालंयत्र क्रियते सा क्षेत्रानुज्ञा। कालविषयाऽनुज्ञा दिवा रात्रौ वा उच्चारादिव्युत्सर्जनम। 'भावविषयाऽनुज्ञापना ग्लानादेः साध्यकरणार्थं निर्वातप्रदेशादेरनुज्ञापना क्रियते। इदानीं 'विभालणे तस्स परिकहणं'ति अमुमवयवं व्याख्यानयन्नाह. 'कूरुवमा' यदा अभ्यन्तरमेवं ब्रूते-अयमि प्रदेशे मयाऽवस्थानमनुज्ञातं भवता नोपस्थितान, तदा तस्य परिकथना क्रियते कूरदृष्टान्तेन. योहि भोजनं कस्यचिद्ददाति स नियमेनैव भोजनोदकमेचनाद्यपि ददात्यनुक्तमपि सामर्थ्यादिति सम. एवं वसतिं प्रयच्छता उच्चारप्रश्रवणभूम्यादि सामर्थ्यादिति सर्वमेव दत्तं भवति. अथवा इदमसौ श्रव्यतारं विचारयति-कियन्तं कालमत्र स्थास्यन्ति भवन्तः ?, अस्मिन् विचारे तस्स परिकहणा-

मू. (२४४) जाव गुरुज्झ य तुज्झ य केवइया तत्थ सागरेनुवमा ।
केवइकालेनेहिह ? सासार ठवंति अन्नेवि ॥

वृ. यावद् गुरुर्ममा ते-तव च प्रतिभाति तावत्स्थानं करिष्यामः, अथवमसौ विचारयति-किया-लणा. यदुत 'केवइआ' कियन्त इक्ष्वस्थास्यन्ते ?, तस्स परिकहणा क्रियते, सदागरेणोपमा. यथा हि सागरः क्वचित्काले प्रचुरसलिलो भवति क्वचित्पुनर्मर्यादावस्थस्तिष्ठति, एवं गच्छोऽपि कदाचिद्बहुप्रव्रजितो भवति कदाचित्स्वल्पप्रव्रजितइति। अथासौ पुनरपि 'विआलणं'ति विचारयति-यथा 'केवइकालेणेहिह'ति कियता कालेनागमिष्यथ ?, एवमुक्ते सन्तः साधवः तत्र 'सासार ठविंति' सविकल्पं कुर्वन्त्यन्यथः, कथं कुर्वन्ति ?- 'अन्नेवि' अन्येऽपि साधवः क्षेत्रप्रत्युपेक्षणार्थं गता एव, ततश्च तदालोचनेनागमिष्याम इति ॥

मू. (२४५) पुव्वद्दिट्ठं इच्छइ अहव भणिज्जा हवंतु एवइया ।
तत्थ न कप्पइ वासो असई खेत्ताण ऽणुन्नाओ ॥

वृ. यदा त्वसौ पूर्वदृष्टानेवेच्छति यः प्राग मार्गकल्पः कृत आसीत, स्वभावेनैवान्तः स दृष्टप्रत्यया-निच्छति. नान्यान. तत्र न कल्पते वासः । अथवा भणेदसौ-एतावतैव तिष्ठन्तु, तत्र 'न कल्पते वासः' न युज्यतेऽवस्थानं, यतः साधवः कदाचित्लोकाः कदाचिद्बहवो भवन्ति। अथान्यानि क्षेत्राणि न सन्ति तदा 'असति' क्षेत्राणामन्वेषणाभावे 'अणुन्नाउ'त्ति तस्यामेव वसतावनुज्ञातो वासः । शेषक्षेत्राभावे सति तत्र च नियतपरिमितावां वसतौ यदि प्रायूर्णका आगच्छन्ति ततः को विधिः ?

मू. (२४६) सक्कारो सम्माणो भिक्खग्गहणं च होइ पाहुणए ।
जइ जाणइ वसइ तहिं साहम्मिअवच्छलत्ताऽणाई ॥

वृ. 'सत्कारः' वन्दनाभ्युत्थानादिकः 'सम्मानः' पादप्रक्षालनादिकः 'भिक्षाग्रहणं' भिक्षानयनं च.

एतत्प्राघूर्णकं आगतं सति क्रियते। पुनश्च तस्य प्राघूर्णकस्य वसतिस्वरूपं कथयन्ति यथा-पश्चिमतरंदेशा लब्धा, नान्यस्यावकाशः, ततश्च त्वयाऽन्यत्र वसतिर्व्यम्। 'यदि जाणउ वसइ तहिं' ति एवमसावुक्तो ज्ञोऽपि सन्-यदि जानन्नपि तत्र वसति ततः को दोषोऽत्र आह 'साहम्मिअवच्छलयाऽणाई' साधर्मिक-वात्सल्यं न कृतं भवति, यतोऽसौ शय्यातरं रुष्टस्तानपि निष्काटयति, आज्ञाभङ्गश्च कृतः-आज्ञालोपश्चैवं कृतो भवति सूत्रस्य, आदिशब्दात्तदव्यान्यद्रव्यव्य ग्रहः। इत्यनेनैतत्प्रत्युपेक्षका आचार्यसमीपमागच्छन्तः किंकुर्वन्तीत्याह-

मू. (२४७) जइ तिन्नि सव्वगमणं एसु न एसुंति दोसुवि अ तेसिं।
अन्नपहेणऽगुणेता निच्चयावासोऽह मा गुरुणो॥

वृ. यदि ते क्षेत्रप्रत्युपेक्षकास्त्रय एव ततः सर्वे एव गमनं कुर्वन्ति, अथ सप्त पञ्च वा ततः सङ्घाटकमेकं मुक्त्वा व्रजन्ति। 'एसु न एसु' त्ति शय्यातरेण पृष्टाः सन्तस्ते एवं वदन्ति-एष्यामो न वा एष्याम इति, यत एवं भणने दोषः, किं कारणं ?, यदेवं भणन्ति यदुत आगमिष्यामः, ततश्च शोभनतरे क्षेत्रे लब्धे सति नागच्छन्ति ततश्चानृतभाषः, अथ भणन्ति-नागमिष्यामः, ततश्चकदाचिदन्यत्क्षेत्रं नपरिशुद्ध्यति ततश्च पुनस्तत्रागच्छतां दोषोऽनृतजनितः। 'अन्नपहेणं' ति ते हि क्षेत्रप्रत्युपेक्षका गुरुसमीपमागच्छन्तोऽन्येन मार्गेणागच्छन्ति, कदाचित्तस्य शोभनतरो भवेत्, 'अगुणंते' ति सूत्रपौरुषीमकुर्वन्तः प्रयान्ति, मा भूत्तेषामवासो गुरोरिति, किं कारणं ?, यतस्तेषां विश्रब्धमागच्छतां मार्गकल्पोऽधिको भवति, ततश्च निच्चवासो गुरोरिति॥

मू. (२४८) गंतूण गुरुसमीवं आलोएत्ता कहेंति खेत्तगुणा।
नय सेसकहणं मा होज्ज संघडं रत्ति साहेंति॥

वृ. गत्वागुरुसमीपं आलोचयित्वा ईर्यापथिकातिचारं कथयन्त्याचार्यायक्षेत्रगुणान्। 'नयसेसकहणं' ति न च शेषसाधुभ्यः क्षेत्रगुणान् कथयन्ति। किं कारणम् ?-'मा होज्ज संघडं' मा भवेत् स्वक्षेत्रपक्षपातो नतिता गर्हितेति, तस्मात् 'रत्ति साहेंति' त्ति रात्रौ मिलितानां सर्वेषां साधूनां क्षेत्रगुणान् कथयन्ति। ते च गत्वा एतत्कथयन्ति-

मू. (२४९) पढमाए नत्थि पढमा तत्थ उ घयखीरकूरदहिलंभो।
बिइयाए बिइ तइयाह दोवि नेसिं च धुवलंभो॥

मू. (२५०) आभासिअधुवलंभो पाउग्गाणं चउत्थिए नियमा।
इहराविजहिच्छाए तिकालजोगं च सव्वेसिं॥

वृ. 'प्रथमायां' पूर्वस्यां दिशि नास्ति प्रथमा-नास्ति सूत्रपौरुषीत्यर्थः, किन्तु तत्र घृतक्षीरकूरदधिलाभोऽस्ति, अन्येत्वन्यस्यां दिशि कथयन्ति, द्वितीयायां दिशि नास्ति द्वितीयानास्त्यर्थपौरुषी, यतस्तत्र द्वितीयायां पौरुष्यामेव भोजनं, घृतादिकन्तु लभ्यत एव, 'तइयाए दोवि' त्ति तृतीयायां दिशि द्वे अपि सूत्रार्थपौरुष्यौ विद्येते 'नेसिं च धुव लंभो' त्ति तेषां घृतादीनां नियतं लाभः॥ 'आभासि-अधुवलंभो' त्ति प्रार्थितस्याध्रुवोलाभः, कथं ?-प्रायोग्यानां घृतादीनाम् 'चउत्थीए' चतुर्थ्यां दिशि 'नियमा' अवश्यं 'इहराविं' ति अप्रार्थितेऽपि यदृच्छया त्रिकालयोग्यं पानमध्याहारयाहरूपं त्रिकालमपि 'सव्वेसिं' ति 'सर्वेषां' कालातीतानां योग्यं प्राप्यत इति एवं ते सर्वे क्षेत्रप्रत्युपेक्षकास्त्रयोऽपि सन्त्याचार्यं किं कुर्वन्तीत्याह-

मू. (२५१) मयगहणं आयरिआ कत्थ वयामो त्ति ? तत्थ आयरिआ।
सूभिआ भणंति पढमं तं चिअ अणुआगतनिल्ला॥

वृ. 'मतगहणं' अभिप्रायग्रहणं आचार्याः शिष्याणां कुर्वन्ति, यदुत भो आयुष्मन्तः! तत्क्व व्रजामः ? कया

दिशागच्छामः? तत्रैवमामन्त्रिते शिष्यगणे आचार्येण 'तत्र औत्पत्तिकी' उत्पन्नभणीकचित्ताः 'क्षुभिताः' आकुला भणन्ति-यदुत 'पढमं' तिप्रथमां दिशंव्रजामः, यत्रप्रथमपौरुष्यांभुज्यते, 'तंचिय' त्तिनामेवदिशं अनुआगतत्ति-लक्षा व्याख्यानार्थिन इच्छन्ति, यतस्ते सूत्रग्रहणनिरपेक्षाः केवलमर्थग्रहणार्थिनः, ते चार्थग्रहणप्रथमद्वितीयायां पौरुष्यां भवतीत्यतस्तामेवेच्छन्तीति॥

मू. (२५२) विइयं सुत्तग्गाही उभयग्गाही अ तइयगं खेत्तं।
आयरिओ अ चउत्थं सो उ पमाणं हवइ तत्थ॥

वृ. द्वितीयांक्षेत्रं सूत्रग्राहिण इच्छन्ति, यतः प्रथमायांसूत्रमेव प्रायोऽधीतं भवति, स च तेषां-मस्ति, 'उभयग्राहिणश्च' सूत्रार्थग्राहिणस्तृतीयं क्षेत्रमिच्छन्ति, आचार्यस्तु चतुर्थं क्षेत्रमिच्छन्ति, यतस्तत्र चतुर्थ्यामपिपौरुष्यांप्रायेणकालःप्रायोऽधीयतेऽनयेति, 'सएवप्रमाणं' आचार्यएवयेषांप्रमाणंभवति 'तत्थ'ति तत्र शिष्यगणमध्ये, किं पुनः कारणं आचार्याश्चतुर्थमेव क्षेत्रमिच्छन्ति?, अत आह-

मू. (२५३) मोहब्भवो उ बलिए दुब्बलदेहो न साहए जोए।
तो मज्झबला साहू दुट्ठऽस्सेणत्थ दिट्ठंता॥

वृ. प्रथमद्वितीययोः क्षेत्रयोःप्रचुरभक्तपानकेभ्यःसकाशाद्बलवान भवति, बलिनश्च मोहोद्भवो भवति-कामोद्भवो भवतीत्यर्थः। आह-एवं तर्हि यत्र भिक्षा न लभ्यते तत्र प्रयान्तु, उच्यते, 'दुर्बलदेहः' कृशशरीरो न साधयति-नाराधयति 'योगान' व्यापारान यतस्ततो मध्यमबलाः साधव इष्यन्ते। दृष्टान्तेन चात्र दृष्टान्तः, दृष्टान्तो-गर्दभ उच्यते, स यथा प्रचुरभक्षणाद्दर्पिष्टः सन कुम्भकारारोपितभाण्डकानि भनक्ति दर्पोत्सेका-दुत्तन्तुन्य, पुनस्तेनैव कुम्भकारेण निरुद्धाहारः सन्नतिदुर्बलत्वात्प्रस्खलितः सन भनक्ति, स एव च गर्दभो मध्यमाहारक्रियया सम्यग् भाण्डानि वहति, एवं साधवोऽपि संयमक्रियां मध्यमबला वहन्ति।

मू. (२५४) पणपन्नगस्स हानी आरेणं जेन तेन वा धरइ।
जइ तरुणा नीरोगा वच्चंति चउत्थगं ताहे॥

वृ. अथ तस्मिन गच्छे पञ्चपञ्चाशदर्षदशायाः त्रिंशद्वर्षाः चत्वारिंशद्वर्षा वा भवन्ति, ततो गम्यते चतुर्थं क्षेत्रं, यतस्तेयेनकेनचिद्रियन्ते-थापयन्ति (प्यन्ते)। तथायदि चतरुणा 'नीरोगाः' शक्ता भवन्तिततश्चतुर्थमेव क्षेत्रं व्रजन्ति।

मू. (२५५) अह पुण जुन्ना थेरा रोगविमुक्का य अग्गहणी तरुणा।
ते अनुकूलं खेत्तं पसंति न थावि खग्गूडे॥

वृ. अथ पुनर्जूर्णा (जीर्णाः) स्थविरा भवन्ति रोगेण च-त्यक्तदिना मुक्त मात्राग्नितरुणाः, नाद्यापि येषां सामर्थ्यं भवतिशरीरस्य, ततस्तानननुकूलंक्षेत्रंप्रेषयन्त्याचार्याः। 'नथाविखग्गूड' त्ति 'खग्गडा' अलसा निष्कर्म-प्रायास्तान्नप्रेषयन्ति। कियता पुनःकालेन वृद्धादय आप्यायन्ते?, उच्यते, पञ्चमासैर्दिवसैः, यत उक्तं वृद्धवृद्ध-

मू. (२५६) एगपणअद्धमासं सट्ठी सुणमनुयगोणहत्थीणं।
राइंदिणेण उ बलं पवगं तो एक्क दो तिन्नि॥

वृ. एकेन रात्रिन्दिवेन शुनो बलं भवति, पञ्चभिर्दिनैर्मनुजस्य बलं भवति, अर्द्धमासेन बलीवर्दस्य, षष्टिभिर्दिनैर्हस्तिनो बलं भवति, एवमेतद्यथासङ्ख्यं योजनीयम। 'पवगं तो एक्क दो तिन्नि' एवमसौ तस्मिन क्षेत्रे पञ्चकमेकं धार्यते, अथ तथाऽपि बलं न गृह्णाति तो पञ्चकौ धार्येते, त्रीन वा पञ्चकान धार्यते, पुनरानीयत इति। एवं ते आलोचितशिष्यगणा आचार्याः शय्यातरमापृच्छ्य क्षेत्रान्तरं संक्रामन्ति। अथ न पृच्छन्ति ततो दोष

उपजायते। एतदेवाह-

मू. (२५७) सागारिअपुच्छणम्मि तहिं निच्छुहणा कयकारणा।
गिहि साहू अभिधारण तेनगसंकाइ जं चऽन्नं॥

वृ. 'सागारिके' शय्यातरे अनापृच्छ्य यदि गमनं क्रियते ततो 'बाहिर' त्ति साधवो लोकधर्मज्ञा इत्येवं वक्ति शय्यातरः, ये यथा लोकधर्मं न जानन्ति दृष्टे तेऽदृष्टं कथं जानन्ति? इत्यतः 'मिच्छ' त्ति मिथ्यात्वं प्रतिपद्यते, 'छेद' त्ति अपच्छेदो वसतिदानस्य, पुनस्तेऽन्यत्र वा वसतिं न लभन्ते, 'कतनासि' त्ति अकृतज्ञा ह्येते प्रव्रजिता इत्येवं मन्यते, 'गिहिसाधू अभिधारण' त्ति गृही कश्चिच्छ्रावकस्तमात्मार्थमभिधार्य-संचिन्त्यायातः प्रव्रज्यार्थं, तेनाप्यागत्य शय्यातरः पृष्टः-क्वाचार्यः?, सोऽपि स्पष्टः सन्नाह-यः कथयित्वा व्रजति स ज्ञायते, ते तु कां जानाति?, तमाकर्ण्य स श्रावकः कदाचिद्दर्शनमप्युज्झति, लोकज्ञानमप्येषां नास्ति कुतः परलोकज्ञानमिति?, कदाचित्साधुः कश्चित्तमाचार्यं अभिधार्य-मनस्सि कृत्वा' उपसंपदानार्थमायाति, सोऽपि शय्यातरं पृच्छति, शय्यातरेऽप्याह-न जानेऽक्वगत इति, ततः स साधुः अनाचार्यानाचार्यं ज्ञातविचिन्त्यान्यत्र गतः, सोऽपि निर्जरया आचार्योऽलाभार्थी ज्ञातइति। 'तेनग' त्ति कदाचित्तद्गृहं कैश्चित्तस्मिन्नेव दिवसे मुष्टं भवेत्तत एवंविधा बुद्धिर्भवेत्-यदुत एतैस्तेनास्ते इत्येवं शङ्कां करोति, आदिशब्दाद्गवेषितं केनकेनचित्सह गता ततो गृह्णीत तेऽप्यानाख्याय गताः ततश्च शङ्कोपपद्यते, 'जं चऽन्नं' ति यच्चान्यत् शङ्कादि जातं पत्तनगतं तत्सर्वमुपजायत इति गच्छद्भिश्च शय्यातर आपृच्छनीयः॥ स च विधिना, यतोऽविधिना पृच्छने एते दोषाः-

मू. (२५८) अविहिपुच्छा उग्गाहिएण सिज्जातरी उ रोएज्जा।
सागारियस्स संका कलहे य सएज्जिआ खिंसे॥

वृ. अविधिपृच्छा इयंवर्त्तते, यदुत- 'उग्गाहितेन' उत्क्षिप्तेनोपकरणेनपृच्छति, तत्र 'सेज्जातरी उरोएज्जा' तेनाकस्मिकेन गमनेन शय्यातर्यो रोदनं कुर्युः, ततश्च 'सागारिकस्य' शय्यातरस्य शङ्कोपजायते, कलहे च सति 'सइज्जिआए' सह सस्विक्रियया 'खिंस' त्ति यथा न शोभनात्वं येनत्वया तत्र काले भिक्षोर्गच्छतो रुदितं, किंच-तेनापिना भवति? येनरोदिषीति। अथानागतमेवकथयन्ति-अमुकदिवसंगमिष्यामः, तत्राप्येते दोषाः-

मू. (२५९) वसहीए वोच्छेओ अभिसंधारितयाण साहूणं।
पुनरावती होज्ज व पवज्जा उल्लअमईणं॥ [प्र. १३]

मू. (२६०) हरिअच्छेयण छप्पडय घच्चणं किच्चणं च पोत्ताणं।
छन्नेयरं च पगयं इच्छमिच्छं च वासा उ॥

वृ. तद्धि शय्यातरकुटुम्बं साधवो यास्यन्तीति विमुक्त शेषव्यापारं सत गृह एव तिष्ठति, कृष्या-दिप्रतिजागरणं न करोति, ततश्च क्षणिकं सत स्वगृहजातहरितच्छेदं करोति। तथा निर्व्यापारत्वादेव च ता स्वयंकृतः षट्पदीनां परस्परनिरूपणेनोपमर्दं कुर्वन्ति। 'किच्चणं च पोत्ताणं' ति तत्र दिवसे क्षणिका विमुक्त कृषिलक्षनव्यापारा वस्त्राणि शोधयन्ति। 'छन्नेयरं च पगयं' प्राकृत-भोजनं छन्नं कुर्वन्ति, अप्रगटमित्यर्थः, इतरेव 'त्ति प्रकटमेवभोजनं संयतार्थं कुर्वन्ति, तत्र चेच्छतामनिच्छतां चदोषा भवन्ति, कथं?, यदिनदभोजनं गृह्णन्ति ततस्तत्कल्पनायाम, अथ न गृह्णन्ति ततोऽपभावं कदाचिदपि पद्येत। एते दोषा अना-गतकथने, ततश्च कः पृच्छाविधिरित्याह-

मू. (२६१) जइआ चेव उ खेत्तं गया उ पडिलेहगा नओ पाए।
सागारियस्स भावं तनुएंति गुरू इमेहिं तु॥

वृ. एवमेतेऽनेकेऽनाकुलाः तनागादिनिनत्रभृतिं सागारिकस्य शय्यातरस्य भावं स्नेहप्रतिबन्धं तनूकुर्वन्ति. के ? - गुरवः 'एभिः' वक्ष्यमाणगाथाद्वयोपन्यस्तवचनैरिति-

मू. (२६२) उच्छू वालिति वडं तूवाओ नायपुत्तभंडा य।
वसभा जायत्थामा गामा पव्वायचिक्खल्ला॥

मू. (२६३) अप्पोदगा य मग्गा वसुहावि अ पक्कमट्टिआ जाया।
अन्नक्कंता पंथा साहूणं विहरिउं कालो॥

वृ. एतद्गाथाद्वयं श्रृण्वतः शय्यातरस्य पठन्ति. ततः सोऽपि श्रुत्वा भणति-किं यूयं गमनोत्सुकाः ?. आचार्योऽप्याह-

मू. (२६४) समणाणं समणीणं भमरकुलाणं च गोउलाणं च।
अनियाओ वसहीओ सागरिअ वाहिरिउं दिंति अनुसिट्ठिं

वृ. सुगमा॥ ततश्चैतां गाथां पठित्वा इदमाचरन्ति-

मू. (२६५) आवस्सगकयनियमा कल्लं गच्छाम तो इ आयरिआ।
सपरिजनं सागारिअ वाहिरिउं दिंति अनुसिट्ठिं

वृ. 'आवश्यककृतनियमाः' कृतप्रतिक्रमणा इत्यर्थः, विकालवेलायां कृतावश्यका इदं भणन्ति-यदुत कल्ले गच्छामः।पुनश्चैतेन आचार्यः सपरिजनं 'सागारिकं' शय्यातरं आहूय 'अनुशास्तिं ददति' धर्मकथां कुर्वन्नित्यर्थः।

मू. (२६६) पव्वज्ज सावओ वा देसण भद्दो जहन्नयं वसहिं।
जोगंमि वट्टमाणे अमुगं वेलं गमिस्सामो॥

वृ. सोऽपि सागारिको धर्मकथां श्रुत्वा एवंविधो भवति-प्रव्रज्यां प्रतिपद्यते श्रावको वा भवति दर्शन-धरो वा भवति भद्रको वा भवति, सर्वथा जघन्यतो वसतिमात्रमवश्यं ददाति। पुनश्च धर्मकथां कृत्वाऽऽचार्या एवं ब्रुवते-यदुत 'योगे वर्त्तमाने' सोऽस्मो योगो गमनाय मां प्रेरयति तस्मिन् वर्त्तमाने-भवति सति अमुकवेलायां गमिष्याम इति। इदानीं ते विकालवेलायां कथयित्वा प्रत्युषसि व्रजन्ति. किं कृत्वेत्यत आह-

मू. (२६७) तदुभय सुत्त पडिलेहणा य उग्गयमनुग्गए वावि।
पडिछाहिगरणतेनं नट्ठं खग्गूड संगारे॥

वृ. 'तदुभय' सूत्रपौरुषीमर्थपौरुषीं च कृत्वा व्रजन्ति. 'सूत्रं' ति सूत्रपौरुषीं वा कृत्वा व्रजन्ति. अथ दूरतरं क्षेत्रं भवति ततः पाठेनैकेनैव पात्रप्रतिलेखनामकृत्वा व्रजन्ति. 'उग्गए' ति उद्गतमात्र एव वा सूर्ये गच्छन्ति, 'अनुग्गए' ति अनुद्गते वा सूर्ये गच्छन्त एव गच्छन्ति. 'पडिच्छे' ति ते साधवस्तं-व्याहिनिर्गताः परस्परमपेक्षन्ते. 'अधिकरणं' ति अथ ते साधवो न प्रतीक्षन्ते ततो मार्गमजानानाः परस्परतः पृच्छन्ति, तेन च पृच्छनेन लोको विबुध्यते, ततश्चाधिकरणं भवति. 'तेन' ति स्तेनका वा विबुद्धाः सन्तो मोषणार्थं पश्चाद्व्रजन्ति 'नट्ठ' ति कदाचित्कश्चिन्नश्यति. ततश्च प्रद्वेष एव सञ्जायते क्रियते. अमुकत्र विषमं भिक्षाममुकत्र वसतिमिति, ततश्च गच्छो गच्छादिभ्यः संक्षुभ्यते क्रियते। 'खग्गूड' ति कश्चित् खग्गूडप्रायो भवति, स इदं ब्रूते-यदुत साधुना गच्छो न मुच्यत एव गन्तुं, पुनः स आयाति. ततश्च 'संगारे' ति संक्षुभ्यते खग्गूडाय प्रयच्छन्ति, यदुत त्वयाऽमुकत्र देशे आगन्तव्यमिति। इदानीमस्यां एव गाथायां भाष्यकृत् कांश्चिदवयवान् व्याख्या नयति. तत्र प्रथमावयवं व्याख्यानयन्नाह-

मू. (२६८) पडिलेहंतच्छिअ बेंटियाए काऊण पोरिसिं करिंति।

चरिमा उग्गाहेउं सोच्चा मज्झण्हि वच्चंति ॥ |भा. ७९|

वृ. तद्दिनाश्रयः प्रभातमात्र एव प्रतिलेख्यस्थित्वा उपधिका पुनश्चण्टलिकां कुर्वन्ति-संवर्तयन्ती-त्यर्थः, ततश्चानिक्षिप्तोपधय एव 'पारिसिं करेंति' सूत्रपौरुषीं कुर्वन्ति, 'चरिमा उग्गाहेउ' त्ति चरिम-वेलायां पादोनपौरुष्यां पात्रकाणि उद्ग्राह्य-संयन्त्रयित्वा पुनश्चानिक्षिप्तैरेव पात्रकैः 'सोच्च' त्ति श्रुत्वा अर्थपौरुषीं कृत्वेत्यर्थः, ततो मध्याह्ने व्रजन्तीति। न च शोभन एवाहि व्रजन्तीति। अत एवाह-

मू. (२६९) तिहिकरणंमि पसत्थे नक्खत्ते अहिवइस्स अनुकूले।
वेलाए निंति वसभा अक्खय सउणे परिक्खंता ॥ |भा. ८०|

वृ. 'तिथौ' प्रशस्तायां 'करणे' चबबादिके प्रशस्ते नक्षत्रे वा 'अधिपतेः' आचार्यस्य अनुकूले सति गृहीत्वा अक्षान् प्राग् वृषभा निर्गच्छन्ति, किंकुर्वाणा अत आह- 'सउणे परिक्खंता' 'शकुनान्' प्रशस्तान् परीक्षमाणाः सन्तो वृषभा निर्गच्छन्तीति पश्चादाचार्याः। किं पुनः कारणं पश्चादाचार्या निर्गच्छन्ति ?, तत्र कारणमाह-

मू. (२७०) वासस्स य आगमने अवसउणे पडिभा निवत्तंति।
ओहावणा पवयणे आयरिआ मग्गओ तस्सा ॥ |भा. ८१|

वृ. वर्षणं वर्षस्यागमनं कदाचिदभवति, अपशकुने वा दृष्टे प्रस्थिता अपि निवर्तन्ते वृषभाः, यदि पुनराचार्या एव प्राग् निर्गच्छन्ति ततोऽपशकुनदर्शने दृष्टे च निवर्त्तमानस्य सतः किं भवति ?, अत आह- 'ओहावणा पवयणे' प्रवचने हीलना भवति, यदुत-यद्यपि ज्यौतिषिकाणां विज्ञानं नष्टप्रेक्षितेषां नास्तीति, 'आयरिया मग्गओ' त्ति अत आचार्या 'मार्गतः' पृष्ठतो निर्गच्छन्तीति। गच्छद्भिश्च शकुना अपशकुना वा निरूपणीयाः, तत्रापशकुनं प्रतिपादयन्नाह-

मू. (२७१) मइल कुचेलं अब्भंगिएल्लयं साण खुज्जवडभं वा।
एए उ अप्पसत्था हवंति खित्ताउ निंताणं ॥ |भा. ८२|

मू. (२७२) नारिं पीवरगब्भा वहुकुमारिं च कट्ठभारं च।
कासायवत्थ कुच्चंधरं च कन्नं न साहंति ॥ |भा. ८३|

वृ. मलिनः शरीरकपटैः कुचेलो-जीर्णकर्पटः 'अब्भंगिएल्लय' त्ति स्नेहाभ्यक्त शरीरः श्वा यदि वामपार्श्वादक्षिणपार्श्वे प्रयाति कुब्जो-वक्रः वडभो-वामनः, एतेऽप्रशस्ताः-'पीवरगब्भा' आसन्नप्रसव-काला। शेषं सुगमम-

मू. (२७३) चक्कयरंभि भमाडो मुक्खाभागे य पंडुरंगंमि।
तच्चन्नि रुहिरपडणं बोडियमरणं धुवं मरणं ॥ |प्र. १४|

मू. (२७४) जंबू अ चागमऊरं भारहाए तहेव नउले अ।
दंसणमेव पसत्थं पयाहिणं सव्वसंपत्ती ॥ |भा. ८४|

मू. (२७५) नंदी तूरं पुन्नस्स दंसणं संखपडहसद्दो य।
सिंगारछत्तचामर धयपडागा पसत्थाइं ॥ |भा. ८५|

वृ. सुगमम, नवरं-पूर्णकलशदर्शनं, ध्वज एव पताका ध्वजपताका।

मू. (२७६) समणं संजयं दंतं सुमनं मोयगा वहिं।
भीणं घंटं पडागं च सिद्धमत्थं विआगरे ॥ |भा. ८६|

वृ. 'श्रमणः' लिङ्गमात्रधारी 'संयतः' सम्यक् संयमानुष्ठाने यतः-यत्नपरः 'दान्तः' इन्द्रियनोइन्द्रियैः

'सुमनसः' पुष्पाणि, शेषं सुगमम्। गच्छेत्थाम्ना-

मू. (२७७) सेज्जातरऽनुभासड आयरिओ संसगा चिलिमिलीए।
अंतो गिण्हन्तुवहिं सारविअपडिस्सया पुव्विं॥ [भा. ८७]

वृ. व्रजनसमये शय्यातरमनुभाषते-व्रजाम इत्येवमादि आचार्यः। 'संसगा चिलिमिलीए अंतो' शेषाः साधवः 'चिलिमिलिकायाः' जवनिकायाः 'अन्तः' अभ्यन्तरे, किम ?-अपधिं 'गृह्णन्ति' संवन्नयन्तीत्यर्थः। 'सारविअपडिस्सया पुव्विं' ति किंविशिष्टाः सन्तस्ते साधव उपधिं गृह्णन्ति ?-संमार्जितः-उपलिप्तः प्रतिश्रयो यैस्ते संमार्जितप्रतिश्रयाः 'पुव्विं' प्रागेव, प्रथममेवेत्यर्थः। इदानीं का कियदुपकरणं गृह्णातीत्याह-

मू. (२७८) बालाइं उवगरणं जावइयं तरति तत्तिअं गिण्ह।
जहन्नेण जहाजायं सेसं तरुणा विरिंचंति॥ [भा. ८८]

वृ. बालादयः, आदिशब्दाद्वृद्धा गृह्णन्ति. तद्यदुपकरणं यावन्मात्रं 'तरन्ति' शक्नुवन्ति तावन्मात्रं गृह्णन्ति. तेश्च बालादिभिः 'जघन्येन' जघन्यतः 'जहाजायं' ति यथोदाहरणं चोलपट्टकश्च. एतच्च शक्नुवद्भिरपि ग्राह्यं. शेषं उपगरणं तरुणाः आभिग्रहिकाः 'विरिञ्चन्ति' विभजन्ति बालादिभ्यस्तत्कम। यदा तु पुनराभिग्रहिका न सन्ति तदा-

मू. (२७९) आयरिआवहिं बालाइयाणगिण्हंति संघयणजुत्ता।
दो सुत्तिउ एगा ओणिउ कप्पो संथारए य गहणेक्कपासेणं॥ [भा. ८९]

वृ. आचार्योपधिं 'बालाइयाणं' ति बालादीनां च संबन्धिनमुपधिं गृह्णन्ति. के ?-'संघयणजुत्ता' येऽन्ये शेषा अनाभिग्रहिकाः संहननोपेतास्ते गृह्णन्ति. कथं पुनर्गृह्णन्ति तेउपधिं ?-'दो सुत्तिउ' त्ति द्वौ सौत्रिकौ कल्पौ एका और्णिकः कल्पः संस्तारकश्चशब्दादुत्तरपट्टकश्च. एषां ग्रहणं 'एकपासेणं' ति ग्रहणं एकस्मिन पार्श्वे-एकत्र स्कन्धे ग्रहणं कुर्वन्ति. द्वितीये तु 'पार्श्वे' स्कन्धे पात्रकाणि गृह्णन्ति, आत्मीयां तृपधिं विष्टलिकां कृत्वा यत्र स्कन्धे उपधिः कृतस्तत्रैव दिशा कक्षायां कुर्वन्ति। इदानीं 'अधिकरणतेणं' त्ति अमुमवयवं व्याख्यानयन्नाह-

मू. (२८०) आउज्जोवण वणिए अगनि कुडुंबी कुकम्म कम्मारिए।
तेने मालागारे उब्भामग पंथिए जंते॥ [भा. ९०]

वृ. तत्र यदि सशब्दं व्रजन्ति ततश्चलोको विबुध्यते, विबुद्धश्चसन 'आउज्जोवण' त्ति अप्काय-यन्त्राणि 'योजयिष्यन्ते' वहनाय सज्जीकरिष्यन्ते। अथवा 'आउ' त्ति अप्कायाय योषितो विबुद्धा व्रजन्ति 'जोवणं' ति धान्यप्रकरः तदर्थं लोको यास्यति, प्रकरः-मर्दनं धान्यस्य, लाटविषये 'जोवणं धन्नपडणं भन्नइ', 'वणिय' त्ति वणिजो-वालभ्रकादिभारमिति कृत्वा व्रजन्ति। 'अगनि' त्ति लोहकारशालादिषु अग्निः प्रज्वाल्यते 'कुडुंबिनि' कुटुम्बिनः स्वकर्मणि लगन्ति 'कुकम्म' त्ति कुत्सितं कर्म येषां ते कुकर्माणः मार्जिरकादयः कुत्सिता मारा: कुमाराः-मारकिका. एषां बोधो भवति सद्यो पुत्कारयतां. 'तेण' त्ति स्तेनकाश्च. 'मालाकार' त्ति मालिका विबुध्यन्ते 'उब्भामग' त्ति पारदारिका विबुध्यन्ते 'पंथिए' त्ति पथिका विबुध्यन्ते 'जंत' त्ति यान्त्रिकाः विबुद्धाः सन्तो यन्त्राणि वाहयन्ति चाक्रिकादयः। तत्र यदुक्तं प्राक् "नंदुरखग्गूडसिंगारा" तत्रैवमुक्तं निर्युक्तिकृता सङ्ग्रहैकवचनमात्रम. इह पुनः सर्वनिर्युक्तिकारः सम्यङ्नारकथा यतनया कर्तव्याः ? कस्यां चवेलायां कर्तव्याः ?

इत्येतदाह-

मू. (२८१) संगार्य बाय वसही नउए सन्नी चउत्थ साहम्मी।
पंचमगंमि अ वसही छट्ठे ठाणट्ठिओ होति॥

वृ. 'संगार'त्ति संङ्कोऽभिधीयते, सद्विधिवक्तव्यः, 'बितिअ वसहि'त्ति द्वितीये द्वारे वसतिः कर्तव्या, पर्वप्रत्युपेक्षिता तस्या व्याघाते वा वसतेर्ग्रहणविधिर्वक्तव्यः, 'तइए सन्नि'त्ति तृतीये द्वारे सञ्ज्ञी श्रावको वक्तव्यः, 'चउत्थ साहम्मि'त्ति चतुर्थे द्वारे साधर्मिका वक्तव्याः, 'पंचमगंमि अ वसहि'त्ति पञ्चमे द्वारे वसतिर्वक्तव्या-'विच्छिन्ना खुड्डलिआ' इत्येवमादि, 'छट्ठे ठाणट्ठिओ होंति' षष्ठे द्वारे स्थानस्थितो भवति।

इदानीं निर्युक्तिकृतोपन्यस्तं सङ्गारद्वयं भाष्यकृद व्याख्यानयन्नाह-

मू. (२८२) आओगे संगारो अमुई वेलाए निग्गए ठाणं।
अमुगत्थ वसहिभिक्खं बीओ सग्गृहसंगारो॥ [भा. ९१]

वृ. 'आओगे'त्ति प्रदर्शने 'संगारो'त्ति संङ्केतः आचार्येण कर्तव्यः, कथम् ?-'अमुई वेलाए'त्ति अमुकया वेलयायास्यामः, पुनश्च 'निग्गए ठाणं अमुगत्थ' निर्गतानां सतां अमुकत्र स्थाने-विश्रामसंस्थानं करिष्यामः, 'वसहि'त्ति अमुकत्र वसतिर्भविष्यति-वासको भविष्यतीत्यर्थः, 'भिक्ख'त्ति अमुकत्र ग्रामे भिक्षाटनं कर्तव्यम्, एकस्तावदयं 'सङ्गारः' संङ्केतः। 'बिति ओ सग्गृहसंगारो'त्ति द्वितीयः संङ्केतः स्वगृहस्य दीयते। स चैवमाह-

मू. (२८३) रत्तिं न चेव कप्पइ नीयदुवारे विराधना दुविहा।
पन्नवण बहुतरगुणे अनिच्छ बीउव्व उवही वा॥

वृ. 'रत्तिं न चेव कप्पति'त्ति रात्रौ साधूनां गमनं न कल्पयति, द्विविधविराधनासंभवात्, यत उक्तं दिवापि तावत्- 'नीयदुवारे विराधना दुविह'त्ति, दिवाऽपि तावदयं दोषः, "नीयदुवारं तमसं, कोट्ठगं परिवज्जए" इतिवचनात्, नीचद्वारे द्विविधा विराधना सतमस्कत्वाद् आस्तां तावद्रात्रौ, एष च धर्मश्रद्धया न निर्गच्छति। 'पन्नवणबहुतरगुणे'त्ति पुनश्चतस्य प्रज्ञापना-प्ररूपणा क्रियते, तत्र रात्रिगमने बहवो गुणा दृश्यन्ते, बालवृद्धादयः सुखेन गच्छन्ति रात्रौ, न तृषा बाध्यन्त इति, 'अनिच्छ'त्ति अथ तथाऽपि नेच्छति गमनम् 'बितिओ व'त्ति द्वितीयस्तस्य दीयतेऽनर्थं मृच्यत इति। 'अवही व'त्ति उपधिस्तस्य दीयते जीर्णा, तदीयश्च शोभनो गृह्यत इति, मा भूत्तत्पार्श्वे स्थितमुपधिं स्तेनका आच्छेत्स्यन्ति। इदानीमसावकाकी यदि स्यादिति ततो दोषः प्रमादजनितस्तत्रोपधिरुपहन्यते, उपहतश्चाकल्प्यो भवति, एतदेवाह-

मू. (२८४) सुवणं वासुवधानो पडिबज्झंतो अ जो उ न मिलेज्जा।
जग्गण अप्पडिबज्झण जइवि चिरेणं न उवहम्मे॥ [भा. ९३]

वृ. स्वपंश्च 'वासुं' एकाकिनो निद्रावशं गति, को दोषः ?-'उवघाउ'त्ति तस्यैकाकिनः सूत्रस्य उपधिरुपहन्यते, स ह्येकाकी स्वपन प्रमादवान् भवति ग्रन्थाद्यभियोगसंभवात्, ततश्च निद्रावशं प्राप्तस्य उपधिरुपहन्यते, अतोऽकल्पनीयो भवति परिष्ठापनीयश्चासौ। गच्छेतु स्वपतोऽपि नोपहन्यते, किंकारणम् ?, यतस्तत्रैकश्चित्सूत्रपौरुषीं कुर्वन्ति, अन्ये द्वितीयप्रहरेऽर्थानुचिन्तनं कुर्वन्ति, तृतीये तु प्रहरे आचार्य उत्तिष्ठति ध्यानाद्यर्थं, चतुर्थे तु प्रहरे भक्तेएव भिक्षवः उत्तिष्ठन्ति, ततश्च तत्रैकोऽपि प्रहरः शून्यः ततो नोपहन्यते उपधिः, एकाकिनस्तु जागरणं नास्त्यतः उपघातः। 'पडिबज्झंतो व जो उ न मिलेज्ज'-त्ति प्रतिबध्यमानो वा प्रव्राजादिषु क्षीरवाचनेच्छया प्रतिबध्यमानो यो न मिलेत् तस्याप्युपहन्यते उपधिः। किं कारणम् ?, एकाकिनः पर्यटनं नोक्तं स ?, एकाकी च पर्यटन प्रमादभाग् भवति अतो व्रजादिप्रतिबन्धेऽप्युपधिरुपहन्यते। यस्तु पुनर्जागर्ति तस्मिन् दिवसेऽमुक्तो न व्रजादिषु प्रतिबध्यते स एवंविधस्तस्मिन् दिवसे मिलन्नपि नोपधिमुपहन्ति। 'जइवि चिरेणं'ति किंबहुना ?, जागरिष्यिगोकुलादिषु व्रजाःप्रतिबध्यमानो यद्यपि चिरेण मिलति बहुभिर्दिवसैस्तथाऽप्युपधिस्तस्य नोपहन्यते, अप्रमादपरत्वात्तस्येति। इदानीं गच्छस्य गमनविधिं प्रतिपादयन्नाह-

मू. (२८५) पुरओ मज्झे तह मग्गओ य ठायंति खित्तपडिलेहा।
दाइंतुच्चाराइ भावामन्नाइरक्खट्ठा॥

वृ. क्षेत्रप्रत्युपेक्षका एषु विभागेषु भवन्ति-केचन 'पुरतः' अग्रतो गच्छन्ति, केचन मध्ये गच्छन्ति, ते हि मार्गाभिज्ञाः 'मार्गतश्च' पृष्ठतश्च निष्पन्नाः क्षेत्रप्रत्युपेक्षकाः। किमर्थं पुरत एव तिष्ठन्ति ?, 'दाइंतुच्चाराई' उच्चारप्रश्रवणस्थानानि दर्शयन्ति गच्छन्ति, गच्छन्ति 'भावामन्नादिरक्खट्ठं' त्ति भावामन्ना-अनभिप्रायमज्ञा, तद्रक्षणार्थम्, एतदुक्तं भवति-उच्चारादिना बाध्यमानस्य ते मार्गज्ञाः स्थण्डिलानि दर्शयन्ति।

मू. (२८६) डहरे भिक्खग्गामे अंतरगामंमि ठवए तरुणे।
अवमरणगहणं अन्नहु व ठावए जाणगं चेगं॥

वृ. 'डहरे भिक्खग्गामे' त्ति यत्र ग्रामे वासकोऽभिप्रेतः भिक्षा च अटित्वाभिप्रेता तस्मिन् 'डहरे' क्षुल्लके ग्रामे सति किं कर्त्तव्यमत आह-'अंतरगामंमि' अथान्तरालत एव यो ग्रामस्तस्मिन् भिक्षार्थं तरुणान् स्थापयेत्, 'उवगरणगहणं' तितदीयमुपकरणमन्ये भिक्षवो गृह्णन्ति, 'अन्नहु व ठावए' त्ति अथवैते तत्स्थापितेतरभिक्षुसत्कमुपकरणं ग्रहीतुं न शक्नुवन्ति ततोऽन्यानेव तत्रान्तरग्रामे भिक्षार्थं स्थाप्यन्ते 'जाणगं चेगं' ति ज्ञं चैकं-मार्गज्ञं चैकं तेषां मध्ये स्थापयेत् येन सूत्रेणेवागच्छन्ति

मू. (२८७) दूरट्ठिअ खुड्डलए नव भड अगणी य पंत पडिनीए।
संघाडेगो धुवकम्मिओ व सुत्ते नवरि रिक्खा॥

वृ. अथवाऽसौ वासकभिक्षार्थमभिप्रेतो ग्रामो दूरे स्थितः स्याद् उन्नितो वा-उद्वसितः क्षुल्लको वा प्राक् संपूर्णो दृष्टः इदानीमजर्जरमुद्वसितमतः क्षुल्लकः, 'नवः' प्राग् यस्मिन् स्थाने दृष्टस्ततः स्थाना-दन्यत्र प्रदेशे जातः 'भड' त्ति भटाक्रान्तो जातः 'अगनि' त्ति अग्निना वा इदानीं दग्धः 'प्रान्तः' प्राक् शोभनो दृष्ट इदानीं प्रान्तीभूतो विरूपो जातः 'पडिनीए' त्ति प्रत्यनीकाक्रान्त इदानीं जातः, प्राक्प्रति-लेखनाकाले प्रत्यनीकस्तत्रनासीत् इदानीं तु आयातः, पूर्वप्रतिलेखिते ग्रामे एवंविधे जाते सति दूरे स्थितादिदोषाभिभूते सति किं कर्त्तव्यं ? -'संघाड' त्ति तत्र सङ्घाटकः स्थाप्यते, पाश्चात्यप्रव्रजितमीलनार्थम् 'एगो वि' त्ति सङ्घाटकाभावे एकः स्थाप्यते साधुः 'धुवकम्मिओ' त्ति ध्रुव-कर्मिको-लोहकारादिस्तस्य कथ्यते-यथा वयमन्यत्र ग्रामे यास्यामः, त्वया पाश्चात्यसाधुभ्यः कथनीयं-यथाऽनेन मार्गेणागन्तव्यमिति, एवं तावत् वसति ग्राम एष विधिः। 'सुत्ते नवरि रिक्ख' त्ति यदा त्वसौ शून्यो ग्रामस्तदा किं कर्त्तव्यं ? -'नवरि रिक्ख' त्ति वर्त्मनि-अनभिप्रेते तिरश्चीनरेखाद्वयं पात्यते, येन तु वर्त्मना गतास्तत्र दीर्घरेखां कुर्वन्ति। यदा तु पुनरेभिरुक्तं दोषैर्युक्तं न भवति स ग्रामस्तदा तत्रैव यत्र वसतिस्तत्स्थाप्रविशति। ततश्चैवंते भिक्षार्थमन्तरालग्रामे स्थिता आगन्तेषां मध्ये यदि वर्त्मनिमार्गज्ञो भवति ततस्तस्यामेव वसतौ आगच्छन्ति, न कश्चित्प्रतिपालयति। एतदेवाह-

मू. (२८८) जाणंतट्ठिए ता एउ वसहीए नत्थि कोइ पडियरइ।
अन्नाए जाणंतेसु वावि संघाड धुवकम्मी॥

वृ. 'जाणंतट्ठिए' मार्गाभिज्ञे स्थिते तस्यां वसतावागच्छन्ति 'नत्थि कोइ पडियरइ' त्ति न कश्चित्तान् प्रतिपालयति बहिः-स्थितः, 'अन्नाए' त्ति यदा तस्याः पूर्वप्रत्युपेक्षितायां वसतेर्व्याघातः संजातः किन्त्वन्या, तस्यामन्यस्यां वसतौ जानायां अजाणंतेसु वावि, अथवा ये न भिक्षानिमित्तं स्थिताः पश्चाद्ग्रामिष्यन्ति तेषु अजानत्सु 'संघाड धुवकम्मि' त्ति वसतिपरिज्ञानार्थं सङ्घाटको बहिः स्थाप्यते, ध्रुवकर्मको-लोहकारस्तस्य कथ्यते, यथा-साधव आगमिष्यन्ति तेषामियं वसतिर्दर्शनीया कथनीया वेति। इदानीं येनाभिप्रायेण पश्चाद्ग्रामे

व्याप्तिनाम्नः किं कर्तव्यमत आह-

मू. (२८९) जइ अब्भासे गमनं दूरे भंतुं दुगाउयं पेसे।
तेवि असंथरमाणा इंती अहवा विसज्जंति॥

वृ. यदि 'अभ्यासे' आसन्ने गच्छस्ततस्ते 'गमणं'ति गच्छसमीपमेव गच्छन्ति, 'दूरे'त्ति अथ दूरं गच्छस्ततो 'भन्तुं'ति गव्यूतं गत्वा क्रोशद्वयं, किं ?-'पेसे'त्ति एकं श्रमणं गच्छसमीपे प्रेषयन्ति, 'तेवि असंथरमाणा इंति' 'तेऽपि' गच्छगताः साधवः 'असंस्तरमाणाः' अतृप्ताः सन्तः किं कुर्वन्ति ?-'इंति' आगच्छन्ति, कुतः ?-यत्र ते साधवो भिक्षायै गृहान्तरं तिष्ठन्ति, अथ च तृप्तास्ततस्ते साधुं विसर्जयन्ति, यदुत-पर्याप्तमस्माकं, यूयं भवत्वित्याऽऽगच्छत। संघाटक इति द्वारं व्याख्यातं, तत्प्रसङ्गायातं च व्याख्यातम्,

इदानीं वसतिद्वारमुच्यते, तत्प्रतिपादनायेदमाह-

मू. (२९०) पढमविइयाए गमनं गहणं पडिलेहणा पवेसो उ।
कालगए संघाडो वसंथरंताण तह चेव॥

वृ. 'पढम'त्ति तस्यां च वसतौ 'गमनं' प्राप्तिः कदाचित्प्रथमपौरुष्यां भवति कदाचिच्च 'बिति-याए'त्ति द्वितीयपौरुष्यां 'गमनं' प्राप्तिरित्यर्थः। 'गहणं'ति दंडउच्छ्रयणदारयंचिलिमिलीणं कृत्वा ग्रहणं वृषभाः प्रविशन्ति। पुनश्च 'पडिलेहणा'त्ति वसतिं प्रमार्जयन्ति, 'पवेसो'त्ति ततो गच्छः प्रविशति, 'काले'त्ति कदाचिद्भिक्षाकाल एव प्राप्तास्तत्र को विधिः ?, अत आह-सङ्घाटक एको वसतिं प्रमार्जयति, अन्ये भिक्षार्थं व्रजन्ति। 'एगो व'त्ति यदा सङ्घाटको न पर्याप्यते तदा एको गीतार्थो वसतिप्रत्युपेक्षणार्थं प्रेष्यते, यदा तु पुनरेकोऽपि न पर्याप्यते तदा किम् ?-'असंथरंताणं' अतृप्यद्भ्यो अतृप्यन्तः सर्व एवाटन्ति, या तु वसतिः पूर्वलब्धा तां कथमन्विषन्ति ?-'तह चेव'त्ति यथा भिक्षामन्विषन्ति एवं वसतिमपि सर्वे पूर्वप्रत्युपेक्षितामन्विषन्ति, अन्विष्य च तत्रैव प्रविशन्ति। यदा तु पूर्वप्रत्युपेक्षिताया वसतेर्व्याघातो जातस्तदाऽपि 'तह चेव'त्ति तथा हि भिक्षां मार्गयन्ति तथा वसतिमपि, लब्धायां च तत्रैव तरस्पटं हिण्डन्तः कथयन्ति, 'वसहीए निभाद्रिअव्वं'ति।

इदानीं "पढमबिइयाए"त्ति इदं द्वारं भाष्यकृत व्याख्यानयन्नाह-

मू. (२९१) पढमबितियाए गमनं बाहिं ठाणं च चिलिमिणी तोरं।
धित्तूण इंति वसहा वसहिं पडिलेहिउं पुव्विं॥ [भा. ९४]

वृ. प्रथमपौरुष्यां 'गमनं' प्राप्तिर्भवति तत्रक्षेत्रे, कदाचिद्द्वितीयायां प्राप्तिरित्यतः विधिरित्यत आह-'बाहिं ठाणं च' बहिश्च तावदवस्थानं कुर्वन्ति, स्थिताश्चान्तरकालं ततश्चिलिमिणी-जवनिकां दण्डिकांश्च गृहीत्वा प्रविशन्ति वसतौ वृषभाः, ग्रहणद्वारं व्याख्यातम्। किं कर्तुं ?-'वसतिं प्रत्युपेक्षितुं' वसतिप्रत्युपेक्षणार्थं प्राग् वृषभा गृहीतचिलिमिलिन्युपकरणा आगच्छन्ति, 'पडिलेहण'त्ति द्वारं भणितं। एवं तावत्पूर्वप्रत्युपेक्षितायां वसतौ विधिः, यदा तु पुनः पूर्वप्रत्युपेक्षिताया व्याघातस्तदा-

मू. (२९२) वाघाए अन्नं मग्गिऊण चिलिमिणिपमज्जणा वसहे।
पत्ताण भिक्खवेलं संघाडगो परिणओ वा॥

वृ. पूर्वप्रत्युपेक्षिताया वसतेर्व्याघाते सति अन्यां वसतिं मार्गयित्वा ततः किञ्चित 'चिलिमिणि-पमज्जणा वसहे'त्ति ततो वृषभाश्चिलिमिलिन्यादीनि गृहीत्वा प्रमार्जयन्ति। 'पत्ताण भिक्खवेलं' यदा तु पुनर्भिक्षावेलायामेव प्राप्तास्तदा किं कर्तव्यं ?-कालेत्ति भणितं, 'संघाडे'त्ति सङ्घाटको वसतिपर्यन्तप्रेक्षणार्थं प्रेष्यते, 'संघाडेत्ति भणितं, 'एगो व'त्ति सङ्घाटकभावे एको वा प्रेष्यते, किंविशिष्टः ?-'परिणतः' गीतार्थः,

ण्णोति भणिअं, यदा तु पुनरेको नास्ति तदा किम ?-

मू. (२९३) सव्वे वा हिंडंता वसहिं मग्गंति जह व समुयाणं।
लद्धे संकलिअनिवेअणं तु सव्वेव उ मियट्ठे ॥

वृ. सर्वे वा हिण्डन्तो एव वसतिं 'मार्गयन्ति' अन्विषन्ति, कथं ?-'जह व समुदानं' यथा समुदानं' भिक्षां 'प्रार्थयन्ति' निरूपयन्ति एवं वसतिमपि अन्विषन्ति, 'तह चेव'त्ति अवयवो भणितः, 'लद्धे संकलि-अनिवेअणं तु' भिक्षामटद्भिर्लब्धायां वसतौ संकलिकया निवेदनं-यो यथा यं पश्यति स तथा तं वक्ति -यदुत इह वसतिर्लब्धा इह निवर्त्तनीयं, तस्मात्तस्यामेव च वसतौ निवर्त्तन्ते। तत्र च प्रवेशे को विधिः ?-

मू. (२९४) एक्को धरेइ भाणं एक्को दोण्हवि पवेसए उवहिं।
सव्वो उवइ गच्छो सबालवुड्ढाउलो ताहे ॥

वृ. एको 'धार्यति' संगृह्णाति 'भाजनं' पात्रकम् 'एकः' अन्यस्तस्य द्वितीयः बहिर्व्यवस्थितः गच्छात् सकाशाद्भिक्षामटद्भ्यां मुक्त उपधिं द्वयोरपीति आत्मनः संबन्धिनौ तस्य च पात्रकसंगृह्णितुः संबन्धिनौ-उपधिं प्रवेशयति, तत उत्तरकालं गच्छ 'उपैति' प्रविशति सबालवृद्धत्वादाकुलः 'तदा' तस्मिन् काले।

मू. (२९५) चोयगपुच्छा दोसा मंडलिबंधंमि तह आगमणं।
संजमआयविराहण वियालगहणे य जे दोसा ॥

वृ. चोदकस्य पृच्छा चोदकपृच्छा-चोदकएवमाह-यदुत बाह्यत एव भुक्त्वा प्रवेशः क्रियते, किंकारणम् ?, उपधिमानयतः क्षुधार्त्तस्य तृषितस्य च ईर्यापथमशोधयतः संयमविराधना उपधिभारा-क्रान्तस्य कण्टकादीननिरूपयत आत्मविराधना, ततश्च बहिरेव भुक्त्वा विकालेप्रविशन्तु, आचार्य-त्वाह-बहिर्भुञ्जतां दोषाः, कथं ?-मण्डलिबन्धे सति आगमनं भवति सागारिकाणां, तत्र च संयमात्मविराधना भवति 'वियालगहणे'त्ति विकालवेलायां च दर्शनिग्रहणे ये दोषा भवन्ति ते वक्ष्यन्ते। द्वारगाथेयं। चोदकपृच्छेति व्याख्यानयन्नाह-

मू. (२९६) अडभारेण उ इरिअं न सोहए कंटगाड आयाए।
भत्तट्ठिअ वोसिरिआ अइंतु एवं जढा दोसा ॥

वृ. चोदक एवमाह यदुत गच्छसमीपादुपधिं प्रवेशयन तदतिभारेण बुभुक्षया च पीडितः सन्नीर्या-पथिकां न शोधयति यतोऽसौ संयमविराधना भवति, तथा कण्टकादीनि च न पश्यति बुभुक्षितत्वादेव यतोऽत आत्म-विराधना भवति, तस्माद 'भत्तट्ठिय'त्ति बहिरेव भुक्त्वा सन्तः, तथा 'वोसिरिय'त्ति उच्चारप्रश्रवणं कृत्वा ततः 'अइंतु'त्ति प्रविशन्तु, क्व ?-वसतौ, 'एवं जढा दोस'त्ति एवं क्रियमाणे दोषाः-आत्मविराधनादयः परित्यक्ता भवन्ति। एवमुक्ते सत्याहाचार्यः-

मू. (२९७) आयरिअवयण दोसा दुविहा नियमा उ संजमायाए।
बच्चह न तुज्झ सामी अम्हं खंडं मंडलीए वा ॥

वृ. आचार्यस्य वचनं आचार्यवचनं, किं तदित्याह-'दोसा' बाह्यतो भुञ्जतां दोषा भवन्तिद्विविधाः 'नियमाद' अवश्यतया, 'संजमि'त्ति संयमविराधनादोषः 'आयाए'त्ति आत्मविराधनादोषः। तत्र संयम-विराधनादोष एव भवति-तत्र च भोजनस्थाने सागारिका यदि बहुत्वेनिष्पद्यन्ते ततस्ते साधवो भिक्षामटित्वा गताः सन्तोयद्यवं भणन्ति-यदुतदच्यह-हेसागारिकागच्छतास्मात्स्थानात, ततश्चैवमुच्यमानेसंयमविराधना भवति। आत्मविराधना चैवं भवति-यदा ते सागारिका उच्यमाना न गच्छन्ति, किन्त्वेवं भणन्ति-'न तुज्झ सामी' नास्यप्रदेशस्य भवन्तः स्वामिनः, ततश्च अम्हंखंडं भवतिः स्वामिनः, ततश्च अस्मत्खंडं भवति। 'मंडलीए

व'त्ति अथ मण्डल्यां जातायां सत्यामे-

मू. (२९८) कोऊहल आगमनं संखोभणं अकंठगमनाइं।
ते चेव संखडाइं वसहिं व न देंति जं वडत्तं॥

वृ. मण्डलिप्रकाराणां जातायां कौतुकेन प्राघूर्णिका आगमनं कुर्वन्ति, ततश्च 'संखोभणं'ति संक्षोभेण तेषां प्रव्रजितानां अकण्ठगमणादि-कण्ठेन भक्तं कवलो नोपक्रामति, 'ते चेव संखडाइं'ति त एव वा संखडादयो दोषा भवन्ति 'वसहिं व ण देंति' एवं च सागारिका रुष्टाः सन्तो वसतिं न प्रयच्छन्ति, तत्र ग्रामे 'जं वडत्तं'ति ग्रहणाकर्षणादि कुर्वन्ति। इदानीं तस्मादुभामादन्यत्र ग्रामे भोजनं गृहीत्वा गन्तव्यं, तत्र चैते दोषाः-

मू. (२९९) भारेण वेयणाए न पेहए थाणुकंटआयाए।
इरियाइ संजमंमि अ परिगलमाणेन छक्काया॥

वृ. उपधिभिक्षाभारेण या वेदना क्षुद्वेदना वा तया न 'पेहइ'त्ति न पश्यति स्थाणुकण्टकादीन्, ततश्चात्मविराधना भवति, 'इरियाइ'त्ति संयमविषया विराधना ईर्यादि, तथा परिगलमाने च पात्रादौ षट्कायविराधना भवति। तथा चैते चान्यत्र ग्रामे गच्छतां दोषा भवन्ति-

मू. (३००) सावयतेणा दुविहा विराधना जा य उवहिणा उ विना।
तणअग्गिगहणसेवण वियालगमने इमे दोसा॥

वृ. श्वापदभयं भवति, तथा तेना दुविहा भवन्ति-शरीरापहारिण उपध्यपहारिणश्च, 'विराधना जा य उवहिणा उ विना' या च 'उपधिना' संस्तारकादिना विना विराधना भवति, का चासौ ?-'तणअग्गिगहण-सेवणा' यथासङ्ख्यंतृणानांग्रहणेसंयमविराधनाअग्नेश्चसेवनेसंयमविराधनेति। एवंतावदबाह्यतोभुञ्जानाना-मन्यग्रामे चगच्छतांदोषा व्याख्याताः, इदानीं तु यदुक्तं मार्गीच्चोदकेनयदुत विकाले प्रवेष्टुंयुज्यतेतन्निरस्य-न्नाह-'वियालगम(ह)णे इमे दोसा' विकालगमने वसतौ 'एते' वक्ष्यमाणलक्षणा दोषा भवन्ति, ते चामी-

मू. (३०१) पविसणमग्गणठाणे वेगिंचियदुगुंछिए य बोद्धव्वे।
सज्झाए संथारे उच्चारे चेव पासवणे॥

वृ. 'पविसण'त्तितत्रग्रामेविकालेप्रविशतांये दोषास्तान वक्ष्यामः, 'मग्गण'त्तिवसतिमार्गणा, अन्वेषणे चविकालवेलायांयेदोषास्तान वक्ष्यामः। 'ठाणेवेगिंचियदुगुंछिए अ' इत्येनद्व्याख्यतीतिविकालवेलायां 'बोद्धव्यं' ज्ञेयम। 'सज्झाए'त्ति अप्रत्युपेक्षितायां वसतौ संस्तारकभयं गच्छतः संयमात्मविराधना दोषः। 'उच्चारे'त्ति अप्रत्युपेक्षितायांवसतौस्थण्डिलेष्वनिरूपितेषुव्युत्सृजतांदोषा, धरणेऽपिदोषः, 'पासवणे'त्तिअप्रत्युपेक्षितेषु स्थण्डिलेषु व्युत्सृजतो दोषः धारयतोऽपि दोष एव। इयं हा-गाथा इदानीं प्रतिपदं व्याख्यायते-

मू. (३०२) सावयतेना दुविहा विराधना जा य उवहिणा उ विना।
गुम्मिअगहणाऽऽहनना गोणाइचमढणा चेव॥

वृ. विकाले प्रविशतां ग्रामे श्वापदभयं भवति। स्तेना द्विप्रकाराः-अगारस्तेना उपधिस्तेनाश्च, तदभयं भवतिविकालेप्रविशताम, विराधनाया च 'उपधिना विना भवति-अग्नितृणयोर्ग्रहणसेवनादिका, सा चविकाल प्रवेशे दोषः। 'गुम्मिय'त्ति गुल्मं-स्थानं तद्भयपाला गुल्मिकास्तंग्रहणमाहननं च भवति विकाले प्रविशतामयं दोषः। 'गोणाइचमढणा' बलीवर्दादिपादप्रहारादिश्च, एवमयं विकालप्रवेशे दोषः। ''पविसणे''त्ति गयं।

इदानीं 'मग्गणे'त्ति व्याख्यायते-

मू. (३०३) फिडिए अन्नोन्नारण तेन य राओ दिया य पंथंमि।

साणाइ वेसकुत्थिअ तवोवणं मूसिआ जं च ॥

वृ. 'फिडिए' त्ति विकालवेलायां वसतिमार्गणे-अन्वेषणे 'फिडितः' भ्रष्टो भवेत्तत्र 'अन्नोऽन्नं' परस्परतः 'आरणं' संशब्दनं तच्छ्रुत्वा स्तेनका रात्रौ मुषितुमभिलषन्ति, 'दिया य पंथंमि' त्ति दिवा वा प्रभाते पथि गच्छतस्तान श्रमणान मुष्णन्ति 'रायरि' त्ति रात्रौ [illegible], 'गच्छ' - त्ति भणिओ, 'वेसत्थिदुगुंछिए' त्ति व्याख्यायतेऽवयवः, तत्राह- 'वेसकुत्थिअ तवोवणं मूसिगा चेव' रात्रौ वसतिलाभे न जानन्ति किमेतत्स्थानं वेश्यापाटकासन्नमनासन्नं वा ?, ते चाजानानास्तस्यां वसतौ निवसन्ति, तत्र चायं दोषः-वेश्यासमीपे वसतां लोको भणति-अहो तपोवनमिति। कुत्सितछिण्डिकादिस्थानासन्नं लोको ब्रवीति-स्वस्थाने भूषिका गताः, एतेऽप्येवंजातीया एव। 'वेसित्थिकुत्सिते' त्ति गतं।

मू. (३०४) अप्पडिलेहिअकंटाविलंमि संथारगंमि आयाए।
छक्कायसंजमंमि अ चिलिणे सेहऽत्तणाभावो ॥

वृ. अप्रत्युपेक्षितायां वसतौ कण्टकाभवन्ति विलंवा, तत्रसंस्तारकक्रियमाणे 'आयाए' त्तिआत्मविराधना भवति 'छक्काय' त्ति षट्कायस्यापि अप्रत्युपेक्षितवसतौ स्वपतः 'संजमंमि' त्ति संयम-विषया विराधना भवति। 'चिलिणे' त्ति तथा चिली नं- अशुचिकं, भवति, तस्मिंश्च सेहस्य जुगुप्सा वा अश्रुतार्थस्यान्यथाभावः उन्निष्क्रमादिर्भवति। संथारुत्ति गतं, इदानीं 'उच्चारपासवणे' त्ति व्याख्यायते-

मू. (३०५) कंटगथाणुगवालाविलंमि जइ वोसिरेज्ज आयाए।
संजमओ छक्काया गमने पत्ते अइंते य ॥

वृ. अप्रत्युपेक्षितायां वसतौ कण्टकस्थाणुव्यालाविले-समाकुले प्रदेशे व्युत्सृजत आत्मविराधना भवति, 'संजमओ' त्ति संयमतो विराधना षट्कायोपमर्दे सति रात्रौ स्यात्, 'गमने' त्ति कायिकाव्युत्सृजनार्थं गमने दोषाः 'पत्ते' त्ति कायिकाभुवं प्राप्तस्य व्युत्सृजतः 'अयंते य' त्ति पुनः कायिकां व्युत्सृज्य वसतिं प्रविशतो षट्कायोपमर्दो भवतीति। अथ तु पुनर्निरोधं करोति, ततश्चैते दोषा भवन्ति-

मू. (३०६) मुत्तनिरोहे चक्खू वच्चनिरोहेण जीवियं चयइ।
उड्डनिरोहे कोट्ठं गेलन्नं वा भवे तिण्हं ॥

वृ. सुगमा ॥ 'उच्चारपासवणे' त्ति गतं। इदानीमपवाद उच्यते-

मू. (३०७) जइ पुन वियालपत्ता पए व पत्ता उवस्सयं न लभे।
सुन्नघरदेउले वा उज्जाने वा अपरिभोगे ॥

वृ. यदि पुनर्विकाल एव प्राप्ताः, ततश्च तेषु विकालवेलायां वसतौ प्रविशतां प्रमादकृतो दोषो न भवति, 'पए व पत्त' त्ति मार्गेव प्रत्युषस्यैव प्राप्ताः किन्तु उपाश्रयं न लभन्ते ततः क्व समुद्दिशन्तु ?-शून्यगृहे देवकुले वा उद्याने वा 'अपरिभोगे' लोकपरिभोगरहिते समुद्दिशन्तीति क्रिया स्यति।

मू. (३०८) आयरिअचिलिमिणीए रन्ने वा निब्भया समुद्दिसणं।
सभए पच्छन्नाऽसइ कमढय कुरुया य संतरिआ ॥

वृ. अथ शून्यगृहादौ मार्गाश्रिकाणामापाता भवति तत आपाते स्यति चिलिमिणी-यवनिका दीयते, 'रन्ने व' त्ति अथ शून्यगृहादि मार्गाश्रिकाक्रान्तं ततः अरण्ये निर्भये समुद्दिशनं क्रियते, सभयेऽरण्ये प्रच्छन्नस्य वा 'असति' अभावे ततो वसिमरमीपे एवकमढकं शुक्तिना लेपेन बाह्याभ्यन्तरेषु लिप्तेषु भुज्यते, 'कुरुआय' त्ति कुरुकुचा-पादप्रक्षालनादिका क्रियते 'संतरिय' त्ति सान्तराः-सावकाशा बृहदन्तरालाः उपविशन्ति। इदानीं

भुक्त्वा बहिः पुनर्विकाले वसतिमन्विष्यन्ति, सा च कोष्ठकादिका भवति. तत्र च उच्चायां वसतौ को विधिरित्यत्र आह-

मू. (३०९) कोट्ठग सभा व पुव्विं काल वियारभूमिपडिलेहा।
पच्छा अइंति रत्तिं पत्ता वा ते भवे रत्तिं॥

वृ. कोष्ठकः-आवासविशेषः सभा-प्रतीता कोष्ठकसभा वसतौ लब्धायां प्रावेग 'काले'त्ति कालभूमिं प्रत्युपेक्षन्ते यत्र कालो गृह्यते तथा 'वियारभूमिपडिलेहा' इचारभूमिः-सञ्ज्ञाकायिका-भूमिस्तस्याश्च प्रत्युपेक्षणा क्रियते। तत एवं प्रत्युपेक्षितायां विधाने सत्यां 'पच्छा अइंतिति रत्तिं'ति पश्चाच्छेषाः साधवो रात्रौ प्रविशन्ति। 'पत्ता वा मे भवे रत्तिं'ति यदा पुनरसौ आगच्छन्न एव कथमपि रात्रावेव प्राप्तस्तदा रात्रावपि प्रविशन्ति॥ तत्र च प्रविशतां-

मू. (३१०) गुत्तिभएगमणे गमणा निब्भय बहिठाण वसहि पडिलेहा।
सुन्नघरदुव्वभणिअं कंचुग तह दारुदंडेणं॥

वृ. गुप्तिकाः-स्थानरक्षपालाः 'भेषणं'ति वदिने कथञ्चिन्नाभयन्ति ततश्चेदं वक्तव्यं-यदुत श्रमणा वयं न चौराः, 'निब्भय'त्ति अथ तु स सन्निवेशो निर्भय एव नवेत्तदा 'बहिठाणं'ति बहिरेव गच्छस्तावत्तिष्ठति, वृषभास्तु वसतिप्रत्युपेक्षणार्थं व्रजन्ति। किंविशिष्टाऽसौ वसतिरन्विष्यते?-'शून्यगृहादि' पूर्वोक्तं, 'कंचुग तह दारुदंडेणं'ति दण्डकपुञ्छनं तद्धि कञ्चुकंपरिधाय सर्पपतनभयाद्दण्डनपुञ्छनकेन वसतिमुपरिष्टात्-प्रस्फोटयन्ति, गच्छश्च प्रविशति, ततः को विधिः स्वापे?-

मू. (३११) संथारगभूमितिगं आयरियाणं तु सेसगाणेगा।
रुंदाए पुप्फइन्ना मंडलिआ आवली इयरे॥

वृ. संस्तारकभूमित्रयमाचार्याणां निरूप्यते, एका निवाता संस्तारकभूमिरन्या प्रवाता अन्या निवातप्रवाता, 'सेसगाणेग'त्ति शेषाणां साधूनामेकका संस्तारकभूमिर्दीयते, 'रुंदाए'त्ति यद्यसौ वसतिर्विस्तीर्णा भवति ततः पुष्पावकीर्णाःस्वपन्तिपुष्पप्रकरवदयथायथं स्वपन्तियेनरागागिकावकाशोनभवति, 'मंडलिय'त्ति अथासौ वसतिः क्षुल्लिका भवति ततो मध्ये पात्रकाणि कृत्वा मण्डल्या पार्श्वे स्वपन्ति। 'आवलिय'त्ति प्रमाणयुक्तायां वसतौ 'आवल्या' पङ्क्त्या स्वपन्ति 'इयरे'त्ति क्षुल्लिका प्रमाणयुक्त-योर्वसत्योरयं विधिः-

मू. (३१२) संथारगगहणाए वेंटिअउक्खेवणं तु कायव्वं।
संथारो घेत्तव्वो मायामयविप्पमुक्केणं॥

वृ. 'संथारगगहणाय' संस्तारकभूमिग्रहणकाले, एतदुक्तं भवति- यदा स्थविरादिः संस्तारक-भूमिविभजनं करोति तदा साधुभिः किं कर्तव्यमत आह-'वेंटिअउक्खेवणं तु कायव्वं'वेंटिआ-उपधिवेष्टनिकास्तासां यदुत्क्षेपणं कर्तव्यं येन मुखेनैव दृष्टायां भूमौ विभजितुं संस्तारकाः शक्यन्ते। सच संस्तारको यो यस्मै दीयते साधवेऽकथनेन ग्राह्यइत्याह?-'मायामयविप्पमुक्केणं' नेन न माया कर्तव्या, यदुताहं वानार्थी ममेह प्रयच्छ, नापि मदः-अहङ्कारः कार्यो, यदुताहमस्यापि पूज्यो येन मम शोभना संस्तारकभूर्दत्तेति॥

जइ रत्तिं आगया नाहे कालं न गण्हंति, निब्भयसीओ संगहणीओ य सणिअं गुणेंति, मा वसित्थिदुगुंछिआदओसाओहिंति, काइकोमत्तापुच्छंति अच्चारंपि जयणाए। जइपुन कालभूमापडिलेहिया

ताहे कालं गिण्हंति, यदि सुद्धो करेंति सज्झायं, अह न सुद्धो न पडिलेहिआ वा वसही ताहे निज्जुत्तीओ गुणंति, पढमपोरिसिं काऊणं बहुपडिपुन्नाए पोरिसीए गुरुसगासं गंतूण भणंति- इच्छामि खमासमणो वंदिउं जावणिज्जाए निसीहिआए मत्थएण वंदामि, खमासमणा ! बहुपडिपुन्ना पोरिसी, अणुजाणह राईसंथारयं, ताहे पढमं कालिआभूमिं पच्चप्पिणंते, ताहे तत्थ संथारगभूमी तत्थ य थंडिलं, ताहे उवहिमि उवओगं करेंता पमज्जंता उवहीए दोरयं उच्छोडेंति, ताहे संथारगपट्टअं उत्तरपट्टयं च पडिलेहित्ता दोवि एगत्थ लाएत्ता ऊरुभि ठवेंति, ताहे संथारगभूमिं पडिलेहंति, ताहे संथारयं अच्छुरेंति सउत्तरपट्टं, तत्थ य लग्गा मुहपोत्तिआए उवरिल्लं कायं पमज्जंति, हट्ठिल्लं रयहरणेणं, कप्पं य वामपासे ठवेंति, पुणो संथारए चडंतो भणइ जेट्ठज्जाईणं पुरतो चिट्ठंताणं- अनुजाणेज्जहा, पुणो सामाइअं तिन्नि वारं कड्ढिऊणं सोवइ, एस ताव कम्मो।

मू. (३१३) पोरिसिआपुच्छणया सामाइय उभयकायपडिलेह।
साहिणि अदुवे पट्टे पमज्ज भूमिं जओ पाए॥

वृ. पौरुष्यां निर्युक्तीर्गुणयित्वा 'आपुच्छण'त्ति आचार्यसमीपे मुखवस्त्रिकां प्रतिलेखयित्वा भणति बहुपडिपुन्ना पोरिसी संदिशत संस्तारकं तिष्ठामीति, 'सामाइयं'ति सामायिकं वारत्रयमाकृष्य स्वपिति, 'उभयं'ति गज्जाकायिकोपयोगं कृत्वा 'कायपडिलेह'त्ति सकलं कायं प्रमृज्य 'साहणिअदुवेपट्टे'त्ति साहणिय-एकत्र लाएत्ता दुवे पट्टे- उत्तरपट्टो संथारपट्टो अ, तत ऊर्वोः स्थापयति, 'पमज्ज भूमिं पाओ जओ' त्ति पादौ यतस्तेन भूमिं प्रमृज्य ततः सोत्तरपट्टं संस्तारकं मुञ्चति, अस्याश्च सामाचार्यनुक्रमेण गाथायां संबन्धो न कृतः, किन्तु स्वबुद्धया यथाक्रमेण व्याख्येया। एवमसौ संस्तारकमारोहन् किं भणतीत्याह-

मू. (३१४) अनुजाणह संथारं बाहुवहाणेण वामपासेणं।
कुक्कुडिपायपसारण अतरंत पमज्जए भूमिं॥

वृ. अनुजानीध्वं संस्तारकं, पुनश्च बाहूपधानेन वामपार्श्वेनस्वपिति, 'कुक्कुडिपायपसारणं'त्ति यथा कुक्कुटी पादावाकाशे प्रथमं प्रसारयति एवं साधुनाऽप्याकाशे पादौ प्रथममशक्नुवता प्रसारणीयौ, 'अतरंतो'त्ति यदा आकाशव्यवस्थिताभ्यां पादाभ्यां न शक्नोति स्थातुं तदा 'पमज्जए भूमि'न्ति भुवं प्रमृज्य पादौ स्थापयति।

मू. (३१५) संकोए संडासं उव्वत्तंते य कायपडिलेहा।
दव्वाईउवओगं निस्सासनिरुंभणालोए॥

वृ. यदा तु पुनः सङ्कोचयति पादौ तदा 'संडासं'ति संदंश-ऊरुसन्धिं प्रमृज्य सङ्कोचयति 'उव्वत्तंते य'त्ति उद्वर्तयंश्चासौ साधुः कायं प्रमार्जयति, एवमस्य स्वपतो विधिरुक्तः। यदा पुनः कायिक-कार्थमुत्तिष्ठति स तदा किं करोतीत्याह- 'दव्वाईउवओगं' द्रव्यतः क्षेत्रतः कालतो भावतश्चोपयोगं ददाति, तत्र द्रव्यतः कोऽहं प्रव्रजितोऽप्रव्रजितो वा ?, क्षेत्रतः किमुपरितलेऽन्यत्र वा ?, कालतः किमियं रात्रिर्दिवसो वा ?, भावतः कायिकादिना पीडितोऽहं न वेति, एवमुपयोगे दत्तेऽपि यदा निद्रयाऽभिभूयते तदा 'निस्सासनिरुंभण'त्ति 'निःश्वासनिरुणद्धि' नासिकां दृढं गृह्णाति निःश्वासनिरोधार्थं, ततोऽपगतायां निद्रायां 'आलोए'त्ति आलोकं पश्यति द्वारम्। यतः-

मू. (३१६) दारं जा पडिलेहइ तेनभए दोन्नि सावए तिन्नि।
जइ य चिरं ना दारे अत्तं ठावेंतु पडिअरइ॥

वृ. संडासौ द्वारं यावत् 'प्रत्युपेक्षयन्' प्रमार्जयन् व्रजति, एवमसौ निर्गच्छति, तत्र च यदि स्तेनभयं भवति ततः 'दोन्नि'-त्ति द्वौ साधू निर्गच्छतः तयोरेको द्वारं तिष्ठति अन्यः कायिकां व्युत्सृजति, 'सावए तिन्नि'त्ति

श्वापदभये सति त्रयः साधव उत्तिष्ठन्ति तत्रैको द्वारे तिष्ठति अन्यः कायिकां व्युत्सृजति अन्यस्तत्समीपे रक्षपालस्तिष्ठति। 'जति व चिरं'ति यदि च चिरं तस्य व्युत्सृजतो जातं ततो योऽसौ द्वारे व्यवस्थितः साधुः सोऽन्यं द्वारे स्थापयित्वा साधुं पुनश्चासौ व्युत्सृजन्तं 'पडिअरति'त्ति प्रतिजागर्त्ति-

मू. (३१७) आगम्मपडिक्कंतो अनुपेहे जाव चोद्दसवि पुव्वे।
परिहानि जा तिगाढा निद्दपमाओ जढो एवं॥

वृ. सोऽपिसाधुः कायिकां व्युत्सृज्य आगत्यावगतो 'पडिक्कंतो'त्तिर्यापथिकां प्रतिक्रान्तः सन् 'अनुपेहे' अनुगुणनं करोति, कियद्दूरं यावदत आह-'जाव चोद्दसवि पुव्वे' यावच्चतुर्दश पूर्वाणि समाप्तानि यश्च साधुः सूक्ष्मानप्राणलब्धिसंपन्नः अथैव न शक्नोति ततः 'परिहाणि जा तिगाढा' परिहाण्या गुणयति स्तोकं स्तोकतरमिति यावद्भाभाद्यत्रयं जघन्येनयद्यत्तद्यपरिगुणयतिसोऽपि। एवं चकृते विधौ निद्राप्रमादो 'जढो' परित्यक्तो भवति।

मू. (३१८) अतरंतो व नियत्तं असंथरंतो अ पाउणे एक्कं।
गद्दभदिट्ठंतेणं दो तिन्नि वहू जहसमाही॥

वृ. अथासौ गाथात्रयमपि गुणयितुं न शक्नोति ततः 'णिवत्तं'त्ति ततः स्वपित्यवर्तति। 'असंथरंतो अ'त्ति उत्सर्गतस्तावत्प्रावरणरहितः स्वपिति, अथ न शक्नोति यापयितुमात्मानं ततोऽसंस्तरन् प्रावृणोति एकं कल्पं द्वौ त्रीन वा, तथाऽपि यदि शीतेन बाध्यते तदा बाह्यतोऽप्रावृतः कायोत्सर्गं करोति, ततश्च शीतव्याप्तोऽभ्यन्तरं प्रविशति, तत्र च प्रविष्टो निवातमिति मन्यते, तत्रापि स्थातुमशक्नुवन् कल्पं गृह्णाति, एवं द्वौ त्रींस्तावद्यावत्समाधानं जातम्। अत्र च गर्दभदृष्टान्तः, जहा मिच्छगद्दभो अनुरूवभारेण आरूविएण सो वहिउंनेच्छइ, ताहे जोऽवि अत्तस्स भारो सोवि चडाविज्जइ, अप्पणावि आरोहति, जाहे नातिदूरं गया ताहे अप्पणा उत्तरति, ताहे सो जाणति-उत्तरितो मम भारोत्ति तुरियतरं पहाविओ, पच्छा अन्नो से अवनीओ, ताहे सो सिग्घयरं पहाविओ। एवं साहूवि निवायतरं मन्नंतो सुहेण अच्छंति, जाहे रत्तिं, एस विही, अवक्काणं जहा वा समाही होति तहा कायव्वं। "संगारविनिअवसाहि"त्ति व्याख्यातम्, इदानीं सन्निद्वारं व्याख्यायते।

मू. (३१९) दुविहो य विहरियाविहरिओ उ भयणा उ विहरिए होइ।
संदिट्ठो जो विहरितो अविहरिअविही इमो होइ॥

वृ. एवं तु ब्रजन्तः कञ्चिद्ग्रामं प्राप्ताः, स च ग्रामो द्विविधः-विहतोऽविहतश्च, विहतः साधुभिर्यः क्षुल्लः, आसेवित इत्यर्थः इविहरितो यः साधुभिर्न क्षुल्लो-नासेवित इत्यर्थः। तृशब्दो विशेषणार्थः। किं विशिनष्टि?-योऽसौविहरितःसमसन्निज्ञियुक्तः सन्निरहितोवा। "भयणाउविहरिए होति"त्तियोऽसौ विहतःसन्निज्ञियुक्त स्तत्र "भजना" विकल्पना, यद्यसौ संज्ञी संविग्नभावितस्ततः प्रविशन्ति, अथ तु पार्श्वस्थादिभावितस्ततो न प्रविशन्ति। संदिट्ठो जो विहरितो'त्ति संविग्नविहते सन्निगृहे 'संदिष्टः' उक्तः यथाऽऽचार्यप्रायोग्यं त्वया सन्निकृलादानयनीयमित्यनः प्रविशन्ति। अथवाऽन्यथा व्याख्यायते-द्विविधः कतरः?, सन्निद्वारस्य प्रकान्तत्वाद् सन्नयो वा, कतमेन द्वैविध्यमत आह-विहतोऽविहतश्च, साधुभिः क्षुल्लोऽक्षुल्लश्च, तत्र भजना विहते श्रावके सति, यद्यसौ संविग्नविहतः प्रवेशः क्रियते, अथ पार्श्वस्थादिविहतस्ततो न प्रवेष्टव्यं, संदिष्टो विहरितोऽत्र न संविग्नः सामाचारिकोश्च यदिविहतस्ततोऽत्राचार्यसंदिष्टः प्रविशति आचार्यप्रायोग्यग्रहणार्थं, 'अविहरिअविही इमो होति'त्ति अविहते ग्रामे संज्ञिनि वा अयं विधिः-वक्ष्यमाणलक्षणः सप्तमगाथायाम्, "अविहरिअमसंदिट्ठो चेतिअ पाहुडिअ" अस्यां गाथायामिति।

इदानीं भाष्यकार एनामेव गाथां व्याख्यानयन्नाह-

मू. (३२०) अविहरिअ विहरिओ वा जइ सड्ढो नत्थि नत्थि उ निओगो।
नाए जइ ओसन्ना पविसंति तओ य पन्नरस॥ [भा. ९५]

वृ. अविहतो विहतो वा ग्रामः, तत्र विहते यदि श्राद्धको नास्ति ततो नास्ति नियोगः-न नियुज्यते साधुः आचार्यप्रायोग्यानयनार्थम। 'नाए'त्ति अथ तु 'ज्ञाते' विज्ञाते एवं यदुतास्मिन श्रावकः, तत्र च 'यदि ओसन्ना पविसंति' यद्यवसन्नाः प्रविशन्ति तथाऽपि नास्ति नियोगः, अथ नु प्रविशन्ति 'तओ उ पन्नरस'त्ति पञ्चदशोद्गमदोषा भवन्ति, ते चामी-

आहाकम्मुद्देसिअ पूईकम्मे य मीसजाए अ।
ठवणा पाहुडियाए पाउयरक्कीय पामिच्चे॥
परियट्टिए अभिहडे उब्भिन्ने मालोहडे इअ।
अच्छेज्जे अणिसट्ठे अज्झोयरए अ सोलसमे॥

ननु चामी षोडश उच्यन्ते-"अज्झोयरतो य मीसजाय च दोहिंवि एक्को चेव भेदो। अथवेयमपि गाथा सञ्जिनमेवाङ्गीकृत्य व्याख्यायते-द्विविधः श्रावकः-विहतोऽविहतो वा, यदि 'सड्ढो नत्थि नत्थि उ निओगो' तओ विहतो यदि श्राद्धो नास्ति ततो नास्ति नियोगः साधोः। 'नाए'त्ति अथ ज्ञाते सति श्राद्धके यदुतास्मिन ततश्च तत्रज्ञातेसति 'यदिओसन्ना एविसंति' 'यद्यवसन्नाःप्रविशन्ति'तथाऽपि नास्तिनियोगः। अथैवंविधेऽपिप्रविशन्ति ततश्च पञ्चदश दोषा उद्गमादयो नियमादभवन्ति। यद्यपि तत्रावमग्ना न गृह्णन्ति-

मू. (३२१) संविग्गमणुन्नाए अइंति अहवा कुले विरंचंति।
अन्नाउंछं व सहू एमेव य संजईवग्गे॥ [भा. ९६]

वृ. अथ तु समभ्रोः संविग्नश्च विहतः-अमनोज्ञैर्वस्त्रादिभिर्भावितः ततः 'अणुन्नाए अइंति'त्ति तैरेवा-नुज्ञाते सति श्रावकगृहे प्रविशन्ति। अथवा श्रावककुलानि 'विरंचन्ति' विभजन्ति, एते चान्य-सम्भोगिकाः संविग्नाः 'अन्नाउंछं व सहू' अन्नाउंछं जत्थ सावगा नत्थि तहिं हिंडंति वत्थव्वा। जइ सहू समत्था इयरे अपाहुणगा जप्पसरीरगा सावगकुलानि हिंडंति, अह वत्थव्वा जप्पसरीरगा पाहुणगा य सहू तओ अन्नायउंछं हिंडंति। 'एमेव य संजईवग्गे' एवमेव संयतीवर्गे विधिः, यदुत ताभिरनुज्ञातेषु श्रावककुलेषु प्रवेष्टव्यम। बहुषु च कुलेषु सत्सु ता एवं विरञ्चन्ति. "अन्नाउंछं व सहू" इति. अयं च विधिर्द्रष्टव्यः।

मू. (३२२) एवं तु अन्नसंभोइयाण संभोइयाण ते चेव।
जाणित्ता निब्बंधं वत्थव्वेणं च उ पमाणं॥ [भा. ९७]

वृ. एवमन्यसाम्भोगिकानां संभवे उक्त लक्षणो विधिर्द्रष्टव्यः। 'संभोइयाण ते चेव'त्ति अथ साम्भोगिकास्तत्रग्रामेभवन्ति ततः 'ते चेव'त्ति त एवावश्यव्याः साधवो भक्षमानयन्ति, अथतत्र साम्भोगिक-समीपे प्राप्तमात्राणां कश्चिच्छ्रावक आयातः, स च प्राघूर्णकवत्सत्व एवं भवति यदुत मदीये गृहे भिक्षार्थं साधुः प्रहेतव्यः, तत्राच्यते-वश्यव्याएव गमिष्यन्ति, अथैवमुक्तेऽपि 'निब्बन्धं' निर्बन्धं करोति आग्रहं करोत्यसौ श्रावकस्ततः 'वत्थव्वेणं' वश्यव्येन सहकेन गन्तव्यं, यतः स एव वश्यव्यः प्राघूर्णकानां प्रमाणमत्राधिकवस्तुग्रहणे। अथासौ साम्भोगिकवसतिः संकुला भवति ततः-

मू. (३२३) अगडे वगडीए वीसुं गडणिए वसहि भोयणागम्म।
असढ अपरिणया वा नाहं वीसुं सहू वियरे॥ [भा. ९८]

वृ. 'असति' अभावे विस्तीर्णाया वसतेः 'वीसुं'ति पृथग्-अन्यत्र वसतौ अवस्थानं कुर्वन्ति, तत्र च तेषां को भोजनविधिरित्यत आह- 'राइणिए वसहिं भोयणागम्म' रत्नाधिकस्य वसतौ भोजनमा-गम्य कर्तव्यं, स च रत्नाधिकः कदाचिद्वास्तव्यो भवति कदाचिदागन्तुक इति। 'असहू'त्ति अथान्यतरो रत्नाधिकः 'असहू' भिक्षावेलां प्रतिपालयितुमशक्तः तथाऽपरिणता वा साधवः स्नेहप्राया मा भूद् रोटिं करिष्यन्ति ततः 'वीसुं' पृथग् वसतिर्भवति। तथा यदि च वास्तव्याः साधवः 'सहू' समर्थास्ततो 'वियरे'ति भिक्षामटित्वा प्राघूर्णकेभ्यः प्रयच्छन्ति॥

मू. (३२४) तिण्हं एक्केण समं भत्तट्ठो अप्पणो अवड्ढं तु।
पच्छा इयरेण समं आगमनविरेगु सो चेव॥ [भा. ९९]

वृ. अथ तत्र त्रय आचार्या भवन्ति. द्वावागन्तुकौ एको वास्तव्यः तदा 'एक्केण समं'ति एकेनागन्तुकाचार्यव्रजितेन सह वास्तव्यः पर्यटति तावद्यावद् 'भत्तट्ठो'त्ति एकस्य प्राघूर्णकाचार्यस्य भक्तार्थो भवति-उदरपूरणमात्रमित्यर्थः अतः 'अप्पणो अवड्ढं तु'त्ति आत्माचार्यार्थं वाऽसौ वास्तव्यः 'अवड्ढं तु' अर्द्धध्रुवमात्रं श्रावककुलेभ्यो गृह्णाति। 'पच्छा इयरेण समं'ति पश्चादितरेण द्वितीयागन्तुकाचार्यव्रजितेन समं पर्यटति तत्रापि भक्तार्थो यावद्भवति प्राघूर्णकस्यतावत्पर्यटति. आत्मनश्चार्द्धध्रुवमात्रं गृह्णाति, उदरपूर्णो ध्रुवो भवति वास्तव्याचार्यस्य. 'आगमणं'ति एवं ते पर्यटित्वाऽऽत्मीयावां वसतौ आगमनं कुर्वन्ति। 'विरेगु सो चेव'त्ति स एव 'विरेगो' विभजनं श्रावककुलेषु, योऽसौ भिक्षामटद्भिः कृतः, न तु पुनर्वसतिकायां आगतानां भवतीति।

'असति वसहीह वीसुं राइणिए वसहिं भोयणागम्म।
असहू अपरिणया वा ताहे वीसुं सहू वियरे॥१॥' त्ति

योविधिरुक्तः, अयं च द्वितीयाद्याचार्येष्वप्यागतेषु द्रष्टव्य इति। एवं तावद्विहरितक्षेत्रे यत्र साधुषु तिष्ठत्सु यो विधिः स उक्तः, इदानीमविहरिते क्षेत्रे साधुरहिते च यो विधिस्तत्प्रतिपादयन्नाह-

मू. (३२५) चेइअवंदनिमंतण गुरुहिं संदिट्ठ जो वऽसंदिट्ठो।
निब्बंध जोगगहणं निवेय नयनं गुरुसगासे॥ [भा. १००]

वृ. एवं विहरन्तः क्वचिदग्रामादौ प्राप्ताः, तत्र च यदि सञ्ज्ञी विद्यते ततश्चैत्यवन्दनार्थमाचार्यो व्रजति, ततश्च श्रावको गृहागतमाचार्यं निमन्त्रयति, यथा-प्रायोग्यं गृहाण, ततश्च यो गुरुसंदिष्टः स गृह्णाति। 'जो वऽसंदिट्ठो'त्ति योवा 'असंदिष्टः' अनुक्तः सर्वा गृह्णाति श्रावकनिर्बन्धेसति, एकदुक्तं भवति-योऽसावाचार्येण संदिष्टः स यावन्नागच्छत्येव तावत्तेन श्रावकेणान्यः सङ्घाटको दृष्टः, स च निर्बन्धग्रहणं कृते सति योग्यग्रहणं-प्रायोग्योपादानं करोति। ततश्च 'निवेयणं'ति अन्येभ्यः सङ्घाटकेभ्यो निवेदयति, यथा यदुत मया श्रावकगृहे प्रायोग्यं गृहीतं ततस्तत्र भवद्भिः प्रवेष्टव्यम। ततश्च 'नयणं गुरुसगासे'त्ति तत्प्रायोग्यं गृहीत्वा गुरुसमीपं नयति तत्क्षणादेव येनासावुपभुङ्क्त इति।

इदानीं यदुक्तं प्राक् "अविहरिअविहीइ इमो होति"त्ति, तदव्याख्यानयन्नाह-

मू. (३२६) अविहरिअमसंदिट्ठो चेइय पाहुडिअमेत्त गेण्हंति।
पाउग्गपउरलंभे नऽन्ह किं वा न भुंजंति?॥ [भा. १०१]

वृ. अविहरिते ग्रामादौ असंदिष्टा एव सर्वे भिक्षार्थं प्रविष्टाः, तत्र च भिक्षामटन्तः श्रावकगृहं प्रविष्टाः, तत्र च 'चेइए'त्ति चैत्यानि च वदन्ते. तत्र च 'पाहुडिअमेत्तं गिण्हन्ति' प्राभृतिकामात्रं यदितत्र लभ्यते ततो गृह्णन्त्येव, अथाचार्यप्रायोग्यं लभ्यते प्रचुरं वा लभ्यते ततः 'पाउग्गपउरलंभे' सति इदमुच्यते 'णऽन्ह'त्ति न वयमाचार्य-

प्रायोग्यग्रहणे निर्युक्ताः, किन्त्वन्ये, एवमुक्ते श्रावकोऽप्याह-किं वा न भुंजंति'त्ति किं भवद्भिर्नीतं न भुज्यते आचार्यैः ?, एवं निर्बन्धे सति त एव गृह्णन्ति। कियत्पुनर्गृह्णन्तीत्यत आह-

मू. (३२७) गच्छस्स परीमाणं नाउं घेत्तुं तओ निवेयंति।
गुरुसंघाडगइयरे अ अंतेयं गुरुसमीवं॥ [भा. १०२]

वृ. गच्छस्य परिमाणं ज्ञात्वा गृह्णन्ति, गृहीत्वा चागतो निवेदयन्ति, कस्मै ?, अत आह-गुरुसंघाटकाय, यदुताचार्यग्लानायोग्यमन्येषां च गुडघृतादि लब्धं प्रचुरम्, 'इयरे व'त्ति इतरसङ्घाटकेभ्यो वा-शेषसङ्घाटकेभ्यो निवेदयति, 'मा वच्चह'त्ति मा व्रजत गृह्णीत गुरुयोग्यं, ततश्च लब्धमात्रमेव तद् गुरुसमीपं नेतव्यम्। तथा चाह-

मू. (३२८) मा वच्चह गिण्ह गुरुजोगं एवइयं वा नियमहयमंते।
अनिवेइए अगुरुणो छिंडंताणं हु दोसा॥ [प्र. १५]
मू. (३२९) दरछिंडिय वुड्ढाइ आगंतु समुद्दिसंति जंकिंचि।
दव्वविरुद्धं च कयं गुरुहिं किंचिवाभूयं॥ [प्र. १६]
मू. (३३०) एगागिसमुद्दिसगा भुत्ता उ पहेणएण दिट्ठंतो।
छिंडणदव्वविनासो निद्धं महुरं च पुव्वं तु॥ [भा. १०३]

वृ. एगागिसमुद्दिसगा ये न मण्डल्युपजीविनः पृथग् भुञ्जन्ते व्याध्याद्याक्रान्ताश्च तेषां भुक्तवतां सतां पश्चादानीतं नोपयुज्यते, अत्र च 'पहेणएण दिट्ठंतो'

'काले दिन्नस्स पहेणयस्स अग्घो न तीरए काउं।
तस्सेव अथक्कपणामियस्स गेण्हंतया नत्थि॥

तथाऽनानयनेऽयमपरो दोषः- येन द्रव्येण घृतादिना गृहीतेन छिण्डतां द्रव्यविनाशो भवति, कथञ्चित्प्रमादात्पात्रकविनाशे सति क्षीरादि च विनश्यत्येव, तथा 'निद्धमहुराइं पुव्विं' यदुक्तमागमे तच्च कृतं न भवति। "सत्ति"त्ति द्वारं गतं। इदानीं साधर्मिकद्वारं प्रतिपादयन्नाह-

मू. (३३१) भत्तट्ठिअ आवस्सग सोहेउं तो अडंति अवरण्हे।
अब्भुट्ठाणं दंडाइयाण गहणेक्कवयणेणं॥

वृ. इदानीं ते साधर्मिकसमीपं प्रविशन्त 'भत्तट्ठिअ'त्ति भुक्त्वा तथा 'आवस्सग सोहेउं'ति आवश्यकं च-कायिकोच्चारादि 'शोधयित्वा' कृत्वेत्यर्थः, अतोऽपराह्णसमये आगच्छन्ति, येन वास्तव्यानां भिक्षाटनाद्याकुलत्वं न भवति, वास्तव्या अपि कुर्वन्ति, किमित्यत आह-'अब्भुट्ठाणं'ति तेषां प्रविशतामभ्युत्थानादि कुर्वन्ति 'दंडाइयाण गहणं'ति दण्डकादीनां ग्रहणं कुर्वन्ति, कथं ?-'एगवयणेणं'ति एकेनैव वचनेन उक्तः सन्तः पात्रकादीन समर्पयन्ति, वास्तव्येनोक्तं मुञ्चस्वेति ततश्च मुञ्चन्ति, अथ न मुञ्चत्येकवचनेन ततो न गृह्णन्ति, मा भूत् प्रमाद इति॥

मू. (३३२) खुड्डुलविगट्ठतेना उण्हं अवरण्हि तेन उ पगेवि।
पक्खित्तं मोत्तूणं निक्खिवणमुक्खित्तमोहणं॥

वृ. यदा तु पुनस्तैः साधुभिरभिप्रेतो ग्रामः स क्षुल्लको नतत्र भिक्षा भवति ततश्च प्रत्यूष-स्येवागच्छन्ति, 'विगिट्ठ'त्ति विकृष्टमध्वानं यत्र साधर्मिकाग्निष्ठन्ति ततः प्रत्यूषस्येवागच्छन्ति 'तेन'त्ति अथ ततः अपराह्णे आगच्छतां स्तेनभयं भवेत्ततश्च प्रत्यूषस्येवागच्छन्तीति। उष्णं वा अपराह्णे आगच्छतां भवति यतोऽतः

प्रत्यूषस्येवागच्छन्ति। एवं ते प्रत्यूषसि तस्माद् ग्रामात्प्रवृत्ताः साधुभोजन-कालं प्राप्ताः साधर्मिकरणमापं निषेधिकां कृत्वा प्रविशन्ति। ततश्च तेषा प्रविशतां वास्तव्यसाधुभिः किं कर्तव्यमित्यत आह-'पक्किस्थनं मोत्तूणं'ति प्रक्षिप्तं-आस्यगतं मुखे प्रक्षिप्तं कवलं मुक्त्वा 'निक्खिवमुक्खिवनं'ति यदूत्क्षिप्तं भाजनगतं तत् 'निक्षिपन्ति' मुञ्चन्ति नैषेधिकीश्रवणानन्तरमेव, ततस्ते प्राघूर्णकाः 'ओघेण'ति सङ्क्षेपेण आलोचनां प्रयच्छन्ति। ततो भुञ्जते मण्डल्यां, सा चेयम-

मू. (३३३) अप्पा मूलगुणेसुं विराधना अप्प उत्तरगुणेसुं।
अप्पा पासत्थाइसु दानग्गहसंपओगोत्ति॥

वृ. अल्पा मूलगुणेषु, एतदुक्तं भवति-मूलगुणविषया न काचिद्विराधना, अल्पा उत्तरगुणविषया विराधना, अल्पापार्श्वस्थादिषु दानग्रहणसंबन्धिविराधना 'संपओगो'त्तिसंघ पार्श्वस्थादिभिः संप्रयोग-संपर्कः, एतदुक्तं भवति-न पार्श्वस्थादिभिः सह संप्रयोग आसीत्। 'ओघ'त्ति गतं 'ओघतः' सङ्क्षेपेण आलोचना दीयते, दत्त्वा आलोचनां यदि न अभुक्तास्तस्तो भुञ्जते। अथ भुक्तास्ते साधवस्तत इदं भणन्ति-

मू. (३३४) भुंजह भुत्ता अम्हे जो वा इच्छे अभुत्त सह भोज्जं।
सव्वं च तेसिं दाउं अन्नं गेण्हंति वत्थव्वा॥

वृ. भुञ्जीत यूयं भुक्ता वयं, 'यो वा इच्छे'त्ति यो वा साधुर्भोक्तु मिच्छति ततः 'अभुत्त सह भोज्जं'ति तेनाभुक्तेन सह भोज्यं कुर्वन्ति। एवं यदितेषामात्मनश्च पूर्वानीतं भक्तं पर्याप्यते ततः साध्वेव अथ न पर्याप्यते ततः सर्वं 'तेभ्यः' प्राघूर्णकेभ्यो दत्त्वा भक्त मन्यदुगृह्णन्ति-पर्यटन्ति वास्तव्यभिक्षवः। एवमानीयकति दिनानि भक्तं प्राघूर्णकेभ्यो दीयते इत्यत आह-

मू. (३३५) तिन्नि दिने पाहुन्नं सव्वेसिं असइ बालवुड्ढाणं।
जे तरुणा सग्गामं वत्थव्वा बाहिं हिंडंति॥

वृ. त्रीणि दिनानि प्राघूर्णकं सर्वेषामसति बालवृद्धानां कर्तव्यं, ततश्च ये प्राघूर्णकास्तरुणास्ते स्वग्राम एव भिक्षामटन्ति, वास्तव्यास्तु बहिर्ग्रामं हिण्डन्ति। अथ ते प्राघूर्णकाः केवला हिण्डितुं न जानन्ति ततः किं कर्तव्यमित्यत आह-

मू. (३३६) संघाडगसंजोगो आगंतुगभद्दएयरे बाहिं।
आगंतुगा व बाहिं वत्थव्वगभद्दए हिंडे॥

वृ. सङ्घाटकसंयोगः क्रियते, एतदुक्तं भवति-एको वास्तव्य एकश्च प्राघूर्णकः, ततश्चैवं सङ्घाटक-योगं कृत्वा भिक्षामटन्ति। 'आगंतुगभद्दएयरे'त्ति अथासौ ग्राम आगन्तुकानामेव भद्रकस्ततः 'इयरे'ति वास्तव्या 'बाहिं'ति बहिर्ग्रामं हिण्डन्ति, आगन्तुका वा बहिर्ग्रामं हिण्डन्ति वास्तव्यभद्रके सति ग्रामे। उक्तं साधर्मिकद्वारम्, इदानीं वसतिद्वारं प्रतिपादयन्नाह-

मू. (३३७) वित्थिन्ना सुहुल्लिआ पमाणजुत्ता य निविह वसहीओ।
पढमबिइयासुट्ठाणे तत्थ य दोसा इमे होंति॥

वृ. विस्तीर्णा शुल्लिकाप्रमाणयुक्ता त्रिविधा वसतिः 'पढमबिइयासुट्ठाणे'त्ति यदा प्रथमायां वसतौ स्थानं भवति विस्तीर्णायामित्यर्थः, द्वितीयां शुल्लिकां लब्ध्वा वसतौ वा यदा भवति तदा तत्र तयोर्वसत्योः 'एते' वक्ष्यमाणका दोषा भवन्ति-

मू. (३३८) खरकम्मिअवाणियगा कप्पडिअगरक्खगा य वेठा य।

संमीसावासेणं दोसा य हवंति नेगविहा ॥

वृ. तत्र विस्तीर्णायां वसतौ 'खरकम्मिअ'त्ति दण्डपाशगा रात्रिं भ्रान्त्वा स्वपन्ति, वाणिज्यकाश्च वालुअकप्राया आगत्य स्वपन्ति, तथा कार्पटिकाः वपन्ति, सरजस्काश्च-भीताः स्वपन्ति, वणठाश्च स्वपन्त्यागत्य 'अकयविद्दाहा भीतिजीविणो य घंटि'त्ति। एभिः सह यदा संमिश्र आवासो भवति तदा तेन संमिश्रवासेन दोषा वक्ष्यमाणका अनेकविधा भवन्ति।

मू. (३३९) आवासगअहिकरणे तदुभय उच्चारकाइ निरोहे।
संजयआयविराधन संका तेन नपुंसित्थी ॥

वृ. आवश्यके-प्रतिक्रमणे क्रियमाणे सागरिकाणामग्रतस्तएव उद्घट्टकान् कुर्वन्ति, ततश्चकेचिदसहना गोष्ठिं कुर्वन्ति, ततश्चाधिकरणदोः। 'तदुभए'त्ति सूत्रपौरुषीकरणे अर्थपौरुषीकरणे च दोष उद्घट्टकान् - कुर्वन्ति। निरोधश्च उच्चारस्य कायिकायाश्च निरोधे दोषः। अथ करोति तथाऽपि दोषः संयमात्म-विराधना-कृताऽप्रत्युपेक्षितस्थण्डिले। 'संका तेन'त्ति स्तेनकशङ्कातोपश्च-चौराशङ्कातोपश्च चौराशङ्का, नपुंसककृतदोषः संभवति ततश्च स्त्रीदोषश्च भवतीति द्वारगाथेयम्, इदानीं प्रतिपदं व्याख्यानयन्नाह-

मू. (३४०) आवासयं करिंते एवंचे झाणजोगवाघाओ।
असहण अपरिणया वा भायणभेओ य छक्काया ॥

वृ. 'आवश्यके' प्रतिक्रमणं कुर्वत्ताम्। 'एवंचए'त्ति सागरिका उद्घट्टकान् कुर्वन्ति, तथा ध्यान-योगव्याघातश्च भवति चलनमापद्यते चेतो यतः। द्वारं। अहिगरणं भन्नइ- 'असहणे'तिकश्चिद् 'असहनः' कोपनो भवति 'अपरिणता वा' सेहप्रायः एते राष्टिं सागारिकः सह कुर्वन्ति, ततश्च भाजनानि पात्रकाणि तद्भेदो विनाशी भवति, षट् कायाश्च विराध्यन्ते। द्वारं। 'तदुभयं'त्ति व्याख्यायते-

मू. (३४१) सुत्तत्थअकरण नासो करणे उड्डुंचगाइ अहिगरणं।
पासवणिअरनिरोहे गेलन्न विद्दि उड्डाहो ॥

वृ. 'सुत्तत्थअकरण'त्ति सूत्रार्थपौरुष्योरकरणे नाशः-तयोरेव विस्मरणम्। अथ सूत्रार्थपौरुष्यौ क्रियेते ततश्च 'उड्डुंचकादि' उद्घट्टकादि कुर्वन्ति। ततश्चाग्रहना राष्टिं कुर्वन्ति, ततोऽधिकरणदोष इति। ''उच्चारकाइजनिरोहो''त्ति व्याख्यायते- 'पासवणि'त्ति 'प्रश्रवणस्य' कायिकायाः 'इयर'-त्ति पुरीषस्य च निरोहे 'गेलन्नं' ग्लानत्वं भवति। अथ व्युत्सृजन्ति ततो 'विद्दि उड्डाहो'त्ति सागारिकैर्दृष्टे सति 'उड्डाहः' उपघातः प्रवचनस्य भवति। ''संजमआयविराधन''त्ति व्याख्यायते-

मू. (३४२) मा दिच्छिहिंति तो अप्पडितिहिए दूर गंतु वोसिरति।
संजमआयविराधनगहणं आरक्खितेनेहिं ॥

वृ. अथ सागारिका मां मा द्राक्षुरिति कृत्वाऽस्थण्डिलएव दूरं गत्वा व्युत्सृजति ततः संयमात्मनोर्विराधना भवति, ग्रहणं चारक्षिकाः कुर्वन्ति। 'तेन'त्ति तेनका वा ग्रहणं कुर्वन्ति। ''संकातेण''त्ति व्याख्यायते-

मू. (३४३) ओणयमपज्जमाणं दट्ठे तेनेत्ति आहणे कोई।
सागारिअसंघट्टण अपमत्थो गेण्ह साहइ वा ॥

वृ. स हि रात्रौ कायिकाद्यर्थमुत्थितः सन्नवनतः प्रमार्जयन्निर्गच्छति ततस्तमवनतकायं दृष्ट्वा स्तेन इति मत्वा आहन्यात्कश्चित्। द्वारं 'नपुंसित्थि'त्ति व्याख्यायते- 'सागारिअसंघट्टण'त्ति सागारिकसंस्पर्शे सति, स हि रात्रौ हस्तेन परामृशन्, गच्छति, यतस्ततः स्पर्शने सति कश्चित्सागारिको विबुद्ध एवं चिन्तयति-

यदुतायं 'अपुम' इति नपुंसकं तेन कारणेन मां स्पृशति, ततः सागारिकस्तं साधुं नपुंसकबुद्ध्या गृह्णाति। अथ कदाचित्स्त्री स्पृष्टा ततः शङ्कते, यदुतायं मम स्पर्शमपि आगच्छति, ततः 'साहति' कथयति निजभर्तुः सौभाग्यं ख्यापयन्ती परमार्थेन वा॥

मू. (३४४) ओरालसरीरा वा इत्थि नपुंसा बलावि गेण्हंति।
सावाहाए ठाणं नितं आवडणपडणादं॥

वृ. औदारिकशरीरं वा तं साधुं दृष्ट्वा दिवा ततो रात्रौ स्त्री नपुंसकं बलादभ्यागच्छति, औदारिकं-चङ्क्रिकम्। एतेविस्तीर्णावसतिदोषाव्याख्याताः। इदानीं क्षुल्लिकावसतिदोषानुपदिदर्शयिषयाह-'सावाहाए' तिसंकटायांवसतौ स्थानं-अवस्थानंगतिं 'णितं' आवडणपडणादी' तिनिर्गच्छतश्चापतितश्चनिर्गच्छन्नापतनपतनादयोदोषाः, तथा-

मू. (३४५) तेनोत्ति मत्तमाणो इमोवि तेनोत्ति आवडइ जुद्धं।
संजमआयविराधनभायणभेयादणा दोसा॥

वृ. एवं साधोरुपरि प्रस्खलितंतेनसाधोरयमप्युपरि प्रस्खलितः स्तेनकमिति मन्यमानः अयं चसुप्तोत्थितः अमुंप्रस्खलितंस्तेनकंमन्यमानः सन् 'आपतति युद्धं' युद्धंभवति, ततश्च संयमात्मनोर्विराधनाभाजनभेदादयश्च दोषाः, भाजनं पात्रकं भण्यते। उक्ता क्षुल्लिका वसतिः, यस्मात्क्षुल्लिकायामेते दोषास्तस्मात्प्रमाणयुक्ता वसतिर्ग्राह्या। एतदेवाह-

मू. (३४६) तम्हा पमाणजुत्ता एक्केकस्स उ तिहत्थसंथारो।
भायणसंथारंतर जह वीसं अंगुला हुंति॥

वृ. तस्मात्प्रमाणयुक्ता वसतिर्ग्राह्या, तत्र चैकैकस्यसाधोर्बाहुल्यतस्त्रिहस्तप्रमाणः संस्तारकः कर्त्तव्यः, तुशब्दो विशेषणार्थः, किं विशिनष्टि? -संस्तारकोऽत्र भूमिरूपइति, तत्रतेषु त्रिषु हस्तेषु ऊर्णामयः संस्तारको हस्तं चत्वारि अ अंगुलाइं रुंभइ भायणाइं इत्थं रुंधंति। इदानीं संस्तार-कभाजनयोर्यदन्तरालं तत्प्रमाणं प्रतिपादयन्नाह- 'भायणसंथारंतर' भाजनसंस्तारान्तरं-अन्तराले यथा। विंशतिरङ्गुलानि भवन्ति तथ कर्त्तव्यम्। एवं त्रिहस्तप्रमाणोऽपि संस्तारकः पूरितः, किं पुनः कारणमिह दूरं भाजनानि न स्थाप्यन्ते॥

मू. (३४७) मज्जारमूसगाइ य वारं नवि भजानुघट्टणया।
दो हत्था य अबाहा नियमा साहुस्स साहुओ॥

वृ. मार्जारमूषकादीन पात्रकेषु लगतो वारयेत। अथ कस्मादाभ्यन्तराणि न क्रियन्ते? उच्यते-'नवि य जानुघट्टणय' ति नाक्षिप्तप्रदेशात्प्रतिपात्रकेषु जानुकूर्परघट्टना-जानकृतं चलनं नभवति। इदानीं प्रवर्तितस्य, चान्तरालं प्रतिपादयन्नाह-द्वौ हस्तौ अबाधा-अन्तरालं नियमात्साधोः साधोश्च भवति, साधुश्चात्र त्रिहस्तसंस्तारकप्रमाणो ग्राह्यः। स्थापना चेयम्-उत्तमओ संथारओ अट्ठावी-संगुलप्पमाणो, संथारभायणाणं अंतरं वीसंगुला, भायणाणि अ इत्थप्पमाणे पाउंछणे ठविज्जंति, एवं तिहिंपरगहिं सव्वेवि तिन्नि हत्था, साहुस्स य अंतरं दो हत्था एवमेतद्भाथाद्वयं व्याख्यानम्। अत्र च त्रिहस्तप्रमाणायामबाधायां महदन्तरालं साधोः साधोश्च भवति, ततश्च तदन्तराले शून्यं महद् दृष्ट्वासागारिको बलात्स्वापिति, तस्मादन्यथा व्याख्यायते-तम्हा पमाणजुत्ता एक्केकस्स उ तिहत्थसंथारो। अत्रहस्तं साधु रुणद्धि, भाजनानि संस्तारकाद्विंशत्यङ्गुलानि भवन्ति। एतदेवाह-'भायणसंथारंतर जह वीसं अंगुलाइं होंति'। पात्रक मप्राङ्गुलानि रुणद्धि, पात्रकाद्विंशत्यङ्गुलानि भुक्त्वा परतोऽन्यः साधुः स्वपिति। एतश्च कुतो निर्धार्यते? यदुत-पात्रकात्परतो विंशत्यङ्गुलान्यतीत्य साधुः स्वपिति, यत उक्तम-'दो हत्थ व अबाहा नियमा साहुस्स साहुओ'। स्थापना

चेयम्-साहू सरीरेण हत्थं संघट्ट, साहुस्स सरीरप्पमाणं, संथारयस्स पत्तयाणं च अंतरं वीसंगुला अट्ठहिं अंगुलेहिं पत्तयाठइति। पत्तस्स बितियसाहुस्स य अंतरं वीसंगुलाइं, एवं एते सव्वेऽवि तिन्नि हत्था, एसो बितिओ साहू। एवं सव्वत्थ। अत्र चोर्णामयः संस्तारकः अष्टाविंशत्यङ्गुलप्रमाण एव बाहुल्येन द्रष्टव्यः, किन्तु साधुना शरीरेण चतुर्विंशत्यङ्गुलानि रुद्धानि, अन्यानि ऊर्णामयसंस्तारकसंबन्धीनि यानि चत्वार्यङ्गुलानि तैः सहयानिविंशत्यङ्गुलानि, तत्परतः पात्रकाणि भवन्ति। अत्रहस्तद्वयमबाधा साधुशरीराद्यावदन्यसाधुशरीरं तावद्रष्टव्यम्। "मज्जाय" इत्येद्वयाख्यानमेव।

मू (३४८) भुत्ताभुत्तसमुत्था भंडणदोसा य वज्जिआ एवं।
सीसंतेण व कुड्डं तु हत्थं मोत्तूण ठायंति॥

वृ. द्विहस्तान्तरालेन मृच्यमानेन 'भुत्ताभुत्तसमुत्था' इति यो भुक्त भोगः, 'अभुक्त' इतियः कुमार एव प्रव्रजितः, तत्र भुक्त भोगस्य आमन्त्रस्य [illegible] यदुतास्मद्योषितऽप्येवंविधः स्पर्श इति, अभुक्त भोगस्याप्यन्यसाधुसंस्पर्शेन सुकुमारेण कौतुकं स्त्रियं प्रति भवति, अयमभिप्रायः-तस्याः सुकुमारतरः स्पर्श इति, ततश्च द्विहस्तावाधायां स्वपतामेते दोषाः परिह्रता भवन्ति। तथा भंडणं-कलहः परस्परं हस्तस्पर्शतनित आसन्नशयने, ते च दोषाएवं वर्जिताभवन्ति, 'सीसंतेण व कुड्डं तु हत्थं मोत्तूण ठायंति'त्ति शिरो यतो यत्र कुड्यं तत्र हस्तमात्रं मुक्त्वा 'ठायंति'त्ति स्वपन्ति, पादन्तेऽनुगमनमार्गविमुच्य हस्तमात्रंस्वपन्ति। अथवाऽन्यथापाठः-'सीसंतेणव कुड्डंतिहत्थंमोत्तूणठायंति' तत्रप्रदीर्घायांवसतौ स्वापविधिरुक्तः, यदिपुनश्चतुरस्रा भवतिसदा 'सीसंतेणव कुड्डं'तिशिरो यतो यत्कुड्यं तस्मात्कुड्यात् हस्तत्रयं मुक्त्वा स्वपन्ति, तत्र कुड्यं हस्तमात्रेण प्रोज्झय ततो भाजनानि स्थाप्यन्ते, तानि च हस्तमात्रे पादपुच्छने क्रियन्ते ततो हस्तमात्रं व्याप्नुवन्ति, भाजनसाध्वोश्चान्तरालं हस्तमात्रमेव मुच्यते, ततः साधुः स्वपिति। एवमनया भङ्ग्या स्वपतां निर्यक् साधो साधोश्चान्तरालं हस्तत्रयं द्रष्टव्यम्।

मू. (३४९) पुव्वुद्दिट्ठो उ विही इहवि वसंताण होइ सो चेव।
सज्झ तिन्नि वारे निसन्न आउंटए सेसा॥

वृ. अत्र स्वापकाले पूर्वोद्दिष्ट एव विधिर्द्रष्टव्यः, कश्चासौ ?.

पोरिसिआपुच्छणया सामाइ-यउभयकायपडिलेहा।
साहणियदवे पंड्डे पमज्ज पाए जओ भूमिं॥

अणुजाणहसंथारं" इत्यवमादिकः। इहापिवसतांस्वपतां भवसिमणएवविधिः, किन्वयंविशेषः-'आसज्ज तिन्नि वारे निसन्नो'त्ति आसज्जत्रयो वारान् करोति 'निसन्नो'त्तितत्रैव संस्तारके उपविष्टः सन्, शेषाश्च साधवः किं कुर्वन्तीत्याह-'आउंटए सेसा' शेषाः साधवः पादान् आकुञ्चयन्ति।

पुनश्चासौ कायिकार्थं व्रजन किं करोतीत्यत्र आह-

मू. (३५०) आवस्सिअमासज्जं नीइ पमज्जंतु जाव उच्छन्नं।
सागारिय तेनुब्भामए य संका तउ परेणं॥

वृ. आवश्यिकीं आसज्जं चपुनःपुनः कुर्वन्प्रमार्जयन्निर्गच्छति, कियद्दूरं यावदित्यत्र आह-'जाव उच्छन्नं' यावच्छन्नं-यावद्गृहस्यैवाभ्यन्तरमित्यर्थः, बाह्यतश्च नैवं प्रमार्जनानिद कर्त्तव्यं, यतः 'सागारिय तेनुब्भामए य संका तउ परेणं' सागारिकानां स्तेनशङ्कोपजायते, यदुत किमयं चौरः ? 'उब्भामओ' पारदारिकस्तत्तस्य-शङ्कोपजायते, अतस्तत्परेण-गृहाद्बाह्यतो नैवं-प्रमार्जनानिद कर्त्तव्यमिति। एवं प्रमाणयुक्त यां वसतौ

विधिरुक्तः। यदा तु पुनः-

मू. (३५१) नत्थि उ पमाणजुत्ता खुड्डलिया चेव वसति जयणाए।
पुरहत्थ पच्छ पाए पभज्ज जयणाए निग्गमनं॥

वृ. यदा प्रमाणयुक्ता वसतिर्नास्ति तदा क्षुल्लिकायामेव वसतौ वसन्ति यतनया, का चासौ यतना? 'पुरहत्थ पच्छपाए' 'पुरतः' अग्रतो हस्तेन परामृशति पश्चात्पादौ प्रमृज्य न्यस्यन्ति, ततश्चैवं यतनया बाह्यतो निर्गच्छन्ति। एवं तावत्कायिकाद्यर्थं गमनागमने विधिरुक्तः, इदानीं स्वपनविधिं प्रतिपादयन्नाह-

मू. (३५२) उस्सीसभायणाइं भज्जे विगमे अहागडा उवरिं।
ओवग्गहिओ दोरो तेण य वेहासि लंबणया॥

वृ. उपर्शीर्षकाणां मध्ये भाजनानि-पात्रकाणि क्रियन्ते। 'विगमे' त्ति विषमा भूः गर्त्तोपेता भवति, ततश्च तस्यां गर्त्तायां पात्रकाणि पूर्व्वाक्रियन्ते। 'अहागडा उवरिं' ति प्राणुकानि-अल्परूपकर्माणि च यानि तान्येतेषां पात्रकाणामुपरि पूर्व्वाक्रियन्ते, माङ्गलिकत्वात्तेषाम्, अथानि-गच्छत्वाद्वसतेर्भूमौ नास्ति स्थानं पात्रकाणां ततश्च 'उवग्गहिओ दोरो' औपग्रहिको यो दवरको यवनिकार्थं गृह्यते-उपग्रहितो-गच्छस्याहारणो तेन 'विहायसि' आकाशे 'लंबणय' त्ति तेन दवरकेन लम्ब्यन्ते-कीलिकादौ क्रियन्ते।

मू. (३५३) खुड्डलियाए असई विच्छिन्नाए उ मालणा भूमी।
बिलधम्मोचारभडा साहरणेगंतकडपोत्ती॥

वृ. श्रुल्लिकाया वसतेरभावे 'विच्छिन्नाए उ' त्ति विस्तीर्णायां वसतौ स्थातव्यं, तत्र च का विधि-रित्यत आह-'मालणा भूमीए विस्तीर्णवसतेर्भूमिर्मार्ल्यते-व्याप्यते पुष्पप्रकरसदृशैः स्वपदिभिः, 'बिल-धम्मो चारभडे' त्ति अवलगकादय आगत्य इदं भणन्ति-यदुत बिलधर्मोयस्मिन्बिले यावतामवस्थानं भवन्ति तावन्तएव प्रविशन्ति, ततः साधवः किं कुर्वन्ति?, 'साहरणे' त्ति संहृत्य उपकरणजातं विरलत्वं च 'एगंत' त्ति एकान्ते निक्षिपन्ति। 'कडपोत्ती' त्ति यदि कडोऽस्ति ततस्तमन्तराले ददति, अथ स नास्ति ततः 'पोत्ति' चिलिमिलीं ददति।

मू. (३५४) असई य चिलिमिलीए भए व पच्छन्न भूइए लक्खं वे।
आहारा नीहारा निग्गमनपवेस वज्जेइ॥

वृ. 'असति' अभावे चिलिमिलिन्याः 'भए व' त्ति चिलिमिलीनिरूपणभये वा न ददति। किं वा कुर्वन्त्यत आह-'पच्छन्ने' त्ति ततः पच्छन्नतरे प्रदेशे निक्षिपन्ति। 'भूइए लक्खं' त्ति स च प्रदेशो भूत्या 'लक्ष्यते' चिह्नयते अन्यादृशोऽयं प्रदेश इति कथ्यते। इदं च नेऽमिधीयन्ते-आहारानीहारौ भवत्यवश्यमतो निर्गमनप्रवेशौ वर्जनीयावितिं। इदं च कर्त्तव्यं साधुभिः।

मू. (३५५) पिंडेण सुत्तकरणं आसन्न निसीहियं च न करिंति।
कारणे न पमज्जणया न य हत्थो तयणं वेरत्ति॥

वृ. 'पिण्डेन' समुदायेन 'सूत्रकरणं' सूत्रपौरुषीकरणं कर्त्तव्यं, मा भूत् कश्चित्पदं वाक्यं वा कर्त्ताहिंडिष्यातिति। तथा आसन्नं निषीधिकां च तत्र न कुर्वन्ति। किं वा कर्त्तव्यमित्यत आह-'कारणे' ति कारणं-स्थाटकरणं कारणे, न च प्रमार्जनं करोति 'न य हत्थो' त्ति न च हस्तेन पुरस्तात्पदमृज्य निर्गच्छन्ति, यतनया च वेरत्तिकां कुर्वन्ति। वेरत्तिओ कालो धण्णड दोण्हं पहराणं उवरिं, ततो सज्झाओ कीरति, अहिवा नाए वेलाए सज्झाओ। उक्तं वसतिद्वारम्, इदानीं स्थानस्थितद्वारमुच्यते, तत्राह-

मू. (३५६) पत्ताण चेव जयणा काऊणावस्सयं ततो ठवणा।

पडनीयपत्तमागमग भद्दगगल्ले य अचियंते ॥

वृ. एवंतेषांविहरतांप्राघूर्णकाभिमतक्षेत्रं [illegible] यउक्तंतत्र। यउक्तंनि. काउंआवश्यकं कृत्वा चावश्यकं-प्रतिक्रमणं 'ततोठवण'त्तिततःस्थापना क्रियतेकेषाश्चित्कुलानां, कानि चतानीत्यत आह-'प्रत्यनीकः' शासनादेः 'प्रान्तः' अदानशीलः मामगोयएवंवक्ति -मामंमसमणाघरमइंतु, भद्रकश्चार्द्धा प्रसिद्धो 'अचिअत्ति'त्ति यः साधुभिरागच्छद्भिर्दृष्ट्वेनान्ते. शोभनं भवति यद्येते नायान्ति गृहे। एतेषां कुलानां यो विभागः क्रियतेप्रतिषेधाप्रतिषेधस्यप्रसंस्थापनेत्युच्यत। इदानींभाष्यकारएनांगाथांप्रतिपदंव्याख्यानयन्नाह-

मू. (३५७) बाहिरगामे वुच्छा उज्जाने ठाणवसहिपडिलेहा।
इहरा उ गहिअभंडा वसही वाघाय उड्डाहो ॥ [भा. १०४]

वृ. एवंते ग्राह्यग्रामे आमन्त्रग्रामे पर्युषिताः सन्तोऽभिमतं क्षेत्रं प्राप्य तावदवतिष्ठन्ते। 'उज्जाणे ठाणं'त्ति उद्याने तावत्स्थाने आस्थां कुर्वन्ति। 'वसहिपडिलेह'त्ति पुनर्वसतिं प्रत्युपेक्षकाः प्रेष्यन्ते। 'इहरा उ'त्ति यदि प्रत्युपेक्षका वसतेर्नप्रेष्यन्ते ततः 'गृहीतभाण्डाः' गृहीतोपकरणा वसतिव्याघाते सति निवर्त्तन्ते ततश्च उड्डाहो भवति-उपघात इत्यर्थः। तत्र च प्रविशतां शकुनापशकुननिरूपणायाह-

मू. (३५८) मइल कुचेले अब्भंगिएल्लए साण खुज्ज वडभे या।
एए उ अप्पसत्था हवंति खित्ताउ निंताणं ॥ [भा. १०५]

मू. (३५९) नारी पीवरगब्भा वडुकुमारी य कडुभारो य।
कासायवत्थ कुच्चंधरा य कज्जं न साहेंति ॥ [भा. १०६]

मू. (३६०) चक्कपरिभि भमाडो भुक्खा मारो य पंडुरंगंमि।
तच्चन्निरुहिरपडणं बोडियमसिए धुवं मरणं ॥ [भा. १०७]

मू. (३६१) अंबूअ चास्स मउरे भारद्दाए नहेव नउले अ।
दंसणमेव पसत्था पयाहिणं सव्वमंघत्ती। [भा. १०८]

मू. (३६२) नंदीतूरं पुन्नस्स दंसणं संख पडह सद्दो य।
भिंगारछत्त चामर धयप्पडागा पसत्थाई ॥ [भा. १०९]

मू. (३६३) समणं संजयं दंतं सुमनं मोयगा दहिं।
मीणं घंटं पडागं च सिद्धमत्थं विआगरे ॥ [भा. ११०]

वृ. एता निगदसिद्धा।

मू. (३६४) तम्हा पडिलेहिअ दीवियंमि पुव्वगप असइ सारविए।
फड्डुयफड्डुपवेसो कहणान य उड्ड इयरेगिं ॥ [भा. १११]

वृ. यस्मात्पूर्वमप्रत्युपेक्षितायां वसतौ उड्डाहो भवति तस्मात्प्रत्युपेक्ष्य प्रवेष्टुम। 'दीवियंमि'त्ति दीपिते-कथिते शय्यातरस्य, यदुताचार्या आगताः. 'पुव्वगए'त्ति पूर्वगतक्षेत्रप्रत्युपेक्षकैः प्रमार्जितः ततः साध्वेवः. 'असति'त्ति पूर्वगतक्षेत्रप्रत्युपेक्षकाभावे, ततः क्षेत्रप्रत्युपेक्षकैः प्रविश्य 'सारविते' प्रमार्जितायां वसतौ, कथं प्रवेष्टव्यमित्यत आह-फड्डुकफड्डुकैः प्रवेशः कर्त्तव्यः। 'कहणं'त्ति यो धर्मकथालब्धिसंपन्नः स पूर्वमेव गत्वा शय्यातरस्य वसतेर्बहिर्धर्मकथां करोति। 'नय उट्ठ'त्ति न चासौ धर्मकथां कुर्वन् 'उत्तिष्ठति' अभ्युत्थानं करोति 'इयरेगिं'त्ति इतरेषामाचार्याणाम्, आह-किमाचार्यागमने धर्मकथी अभ्युत्थानं करोति उत नेति ?. आचार्य आह-अवश्यमेवाभ्युत्थानमाचार्यायं करोति. यतोऽकरणे एते दोषाः-

मू. (३६५) आयरियअणुट्ठाणे ओहावणबाहिरा यऽदक्खिन्ना।
साहणयवंदणिज्जा अनालवंतेऽवि आलावो॥ [भा. ११२]

वृ. आचार्यागमनेऽभ्युत्थाने 'ओहावण'त्ति मलना भवति, 'बाहिरि'त्ति लोकाचारस्याबाह्या एतइति, पञ्चानामप्यङ्गुलीं नामेका महत्तरा भवति, 'अदक्खिण'त्ति दाक्षिण्यमप्येषामाचार्याणां नास्तीत्येवं शय्यातरश्चिन्तयति। 'साहणय'त्ति तेनधर्मकथिनाऽऽचार्यायकथनीयंयदुतायमस्मत्सत्कस्तिदाता। 'वंदणिज्ज'त्ति शय्यातरेऽपिधर्मकथिनेऽवश्यं वन्द्यो-वन्दनीय आचार्यः, एव-मुक्ते यदिअसौवन्दनंकरोतितत:साध्वेव, अथनकरोतितत: 'अनालवंतेऽवि' तस्मिन्शय्यातरेऽनालपत्यपि आचार्येणालापकः कर्त्तव्यः, यदुक्तंकीदृशा यूयम्?। अथाचार्यआलपनंकरोतितत एतेदोषाः-

मू. (३६६) वुड्ढा निरोवयारा अग्गहणं लोगजत्त वोच्छेओ।
तम्हा खलु आलवणं सयमेव उ तत्थ धम्मकहा॥ [भा. ११३]

वृ. तथाहि-एत आचार्यास्तथा निरुपकारा-उपकारमपि न वक्तुं मन्यन्ते, 'अग्गहणं'ति अनादरोऽस्याचार्यस्य मां प्रति, 'अलोगजत'त्ति लोकयात्राबाह्याः, 'वोच्छेओ'त्ति व्यवच्छेदो वसतेरन्यद्रव्यस्य वा, तस्मात्खल्वालपना कर्त्तव्या, स्वयमेव च तत्र धर्मकथा कर्त्तव्याऽऽचार्येणेति॥

मू. (३६७) वसहिफलं धम्मकहा कहणअलद्धी उ मीस वावारे।
पच्छा अइंति वसहिं तत्थ य मुज्जो इमा जयणा॥ [भा. ११४]

वृ. धर्मकथां कुर्वन्वसतेःफलंकथयति, 'कहणअलद्धी उ' यदातुपुनराचार्यस्यधर्मकथालब्धिर्नभवति तदा 'मीस्स्य वावारि'त्ति शिष्यं 'व्यापारयति' नियुङ्क्ते धर्मकथाकथने, शिष्यं च धर्मकथावां व्यापार्य पश्चादाचार्याः प्रविशन्ति वसतिं, तत्र च वसतौ 'भूयः' पुनः 'इयं' यतना वक्ष्यमाणलक्षणा कर्त्तव्या।

मू. (३६८) पडिलेहण संथारग आयरिए तिन्नि सेस उ कमेण।
विंटिअउक्कुरुवणया पविसंऽतो हंदि य धम्मकही॥ [भा. ११५]

वृ. तत्र च वसतौप्रविष्टाः सन्तःपात्रकादिःप्रत्युपेक्षणां कुर्वन्ति, संस्तारकग्रहणं चक्रियते, ततआचार्यस्य त्रयः संस्तारका निरूप्यन्ते, शेषाणां, क्रमेण यथारत्नाधिकतया, ते च साधव आत्मीयात्मीयोपधिवेष्टलिकानामुत्क्षेपणं कुर्वन्ति येन भूमि भागो ज्ञायते, अस्मिन्नवसरे बाह्यतो धर्मकथी संस्तारकग्रहणार्थं प्रविशति॥

मू. (३६९) उच्चारे पासवणे लाउय निल्लेवणे य अच्छणए।
पुव्वट्ठिय तंसि कहेऽकहिए आयरण वोच्छेओ॥ [भा. ११६]

वृ. ते हि क्षेत्रप्रत्युपेक्षका उच्चाराय भूमिं दर्शयन्ति ग्लानाद्यर्थं, 'पासवणे'त्ति कायिकाभूमिं दर्शयन्ति, 'लाउए'त्ति तुम्बकक्षेपणभुवं दर्शयन्ति, निर्लेपनस्थानं च दर्शयन्ति, 'अच्छणए'त्ति यत्र स्वाध्यायं कुर्वद्भिरास्यते 'पूर्वस्थिताः' क्षेत्रप्रत्युपेक्षकाः, एवं तेषां आगन्तुकानां कथयन्ति। 'अकहिए'त्ति यदि न कथयन्ति ततः 'आयरण वोच्छेओ'ति अस्थाने कायिकादेराचरणे सति व्यवच्छेदस्तद्द्रव्यान्यद्रव्ययोः, वसतेर्निष्काशयतीति॥

मू. (३७०) भत्तट्ठिआ व खवगा अमंगलं चोयणं जिनाहरणं।
नउ ममगा वंदेत्ता दायंतियरे विहिं वोच्छं॥ [भा. ११७]

वृ. ते हि श्रमणाः क्षेत्रं प्रविशन्तः कदाचिद्भक्तार्थिनः कदाचित्क्षपका उपवासिका इत्यर्थः,

नत्रोपवासिकानांप्रविशतां, 'अमंगलं चोयाए' त्ति चोदकइदंवक्ति, यदुतक्षेत्रेप्रविशतां अमङ्गलमिदंयदुपवासः क्रियते, तत्र 'जिनाहरण' मितिजिनोदाहरणं, यथाहिजिनानिष्क्रमणकालेउपवासंकुर्वन्ति नचतेषां तदमङ्गलं, किन्तु प्रत्युत मङ्गलं तत्तेषामेवमिदमपीति। इदानीं यदि क्षपकारत्नस्मिन दिवसे साधव उपवासिकास्तत्र च सन्निवेशे यदि श्रावकाः सन्ति ततस्तदभद्रेषु चैत्यानि वन्दन्तो दर्शयन्ति, कानि ?-स्थापनादीनि कुलानि आगन्तुकेभ्यः, 'इयरेसंति भक्तार्थिषु यो विधिस्तं वक्ष्ये। कथमसौ विधिरित्यत आह-

मू. (३७१) सव्वे दट्ठुं उग्गाहिएण ओयरिअ भयं समुप्पज्जे।
तम्हातिदुएगोवा उग्गाहिअ चेइए वंदे॥ [भा. ११८]

वृ. ते हि भक्तार्थिनः श्रावककुलेषु चैत्यवन्दनार्थं व्रजन्तः यदि सर्वे एव पात्रकाण्युद्ग्राह्य प्रविशन्ति ततः- को दोष इत्यत आह-'दट्ठुमुग्गाहिएहिं ओदरिअ' त्ति दृष्ट्वा तान् साधून पात्रकैरुद्ग्राहितैः औदरिका एत इति-भक्षपुत्रा इति, एवं श्रावकश्चिन्तयति। 'भयं समुप्पज्जे' त्ति भयं च श्रावकस्योत्पद्यते, यदुत कस्याहमत्र दद्मि? कस्यवा न दद्मीति?, कथंवा एतावतां दास्यामीति, यस्मादेवं तस्मात 'तिदुएगो वा' त्रय उद्ग्राहितेन प्रविशन्ति आचार्येण सह द्वौ वा एको वा उद्ग्राहितेन प्रविशन्ति चैत्यवन्दनार्थमिति॥ अतः-

मू. (३७२) सद्धाभंगोऽनुग्गाहियंमि ठवणाइया य दोसा उ।
घरचेइअ आयरिए कडवयगमनं च गहणं च॥ [भा. ११९]

वृ. अथानुद्ग्राहितपात्रका एव प्रविशन्ति, दातव्ये च मतिर्जाता श्राद्धस्य, ततश्च पात्रकाभावेऽग्रहणमग्रहणाच्च श्रद्धाभङ्गो भवति। अथैवं भणन्ति-पात्रकं गृहीत्वाऽऽगच्छामि ततश्च स्थापनादिका दोषा भवन्ति, आदिशब्दात्कदाचिन्संस्कारमपि कुर्वन्ति, तस्मादभद्रचैत्यवन्दनार्थं आचार्येण कतिपयैः साधुभिः सह गमनं कार्यं, ग्रहणं धृतादेः कर्त्तव्यमिति। 'पत्ताणखेत्तजयण' त्ति व्याख्यायते-

मू. (३७३) खेत्तंमि अपुव्वंमी तिट्ठाणट्ठा कहिंति दानाइं।
असई अ चेइयाणं हिंडिंता चेव दायंति॥ [भा. १२०]

वृ. यदि तत्क्षेत्रमपूर्वं न तत्र मार्गकल्पः कृत आसीत् ततः 'तिट्ठाणत्थि' त्ति त्रिषु स्थानेषु श्रावकगृहचैत्यवन्दनवेलायां भिक्षामन्तरतः प्रतिक्रमणावसाने वा कथयन्ति दानादीनि कुलानि। 'असई अ चेइयाणं' यदापुनस्तत्र श्रावककुलेषु चैत्यानि न सन्ति ततोऽसति चैत्यानां भिक्षामेव हिण्डन्तः कथयन्ति। कानिपुनस्तानि कथयन्तीत्यत आह-

मू. (३७४) दाने अभिगमसड्ढे समणे खलु तहेव मिच्छत्ते।
मामाए अचियत्ते कुलाइं दायंति गीयत्था॥ [भा. १२१]

वृ. दानश्राद्धकान अभिगमश्राद्धः(द्धान्) अभिनवसम्यक्त्वश्राद्धः(श्राद्धान्) तथा मिथ्यादृष्टिकुलानि कथयन्ति। शेषं सुगम्। इदानीं यदि तत्र चैत्यानि न सन्ति उपवासेन भिक्षा पर्यटिता तत आवश्यकान्ते क्षेत्रप्रत्युपेक्षकाः कथयन्त्याचार्याय, एतदेवाह-

मू. (३७५) कयउस्सग्गामंतण पुच्छणया अकहिएगयरदोसा।
ठवणकुलाण य ठवणा पविसइ गीयत्थसंघाडो॥ [भा. १२२]

वृ. आवश्यककायोत्सर्गस्यान्ते 'आमंतण' त्ति आचार्यं आमन्त्र्य तान प्रत्युपेक्षकान 'पुच्छणय' त्ति पृच्छन्ति, यदुतकान्यत्रस्थापनाकुलानि? कानि चेतराणि?, पुनश्चते पृष्टाःकथयन्ति, 'अकहिएगतरदोस' त्ति क्षेत्रप्रत्युपेक्षकैरकथितेषु कुलेषु सत्सु एकतरः-अन्यतमो दोषः-संयमात्मविराधनाजनितः, कथिते न सति

स्थापनादिकुलानां स्थापना क्रियते। पुनश्च स्थापनाकुलेषु गीतार्थसद्भावकः प्रविशति॥

मू. (३७६) गच्छंमि एस कप्पो वासावासे तहेव उडुबद्धे।
गामागरनिगमेसुं अइरेगरी ठावए सड्ढा॥ [भा. १२३]

वृ. गच्छे 'एष कल्पः' एष विधिरित्यर्थः, यतः स्थापनाकुलानां स्थापना क्रियते, कदा?-'वासावासे तहेव उडुबद्धे' वर्षाकाले शीतोष्णकालयोश्च। केषु पुनरयं नियमः कृतः? इत्यत आह-'गामागरनिगमेसुं' ग्रामः प्रसिद्धः आकरः-सुवर्णादि रुत्पत्तिस्थानं निगमो-वाणिजकप्रायः सन्निवेशः, एषु स्थापनाकुलानि स्थापयेत। किंविशिष्टानीत्यत आह-'अतिरेगरी' तिस्फीतानीत्यर्थः 'सड्ढि'त्ति श्रद्धावन्ति कुलानि स्थापयेदिति।

मू. (३७७) किं कारणं चमढणा दव्वक्खओ उग्गमोऽवि अ न सुज्झे।
गच्छंमि निययकज्जे आयरियगिलाणपाहुणए॥

वृ. किंकारणंतानि कुलानि स्थाप्यन्ते?, यतः 'चमढण'त्ति अन्यैरन्येश्चरमाधुभिः प्रविशद्भिः-श्रमढ्यन्ते-कदर्थ्यन्त इत्यर्थः, ततः को दोष इत्यत आह-'दव्वक्खओ' आचार्यादियोग्यानां द्रव्याणां क्षयो भवति। 'उग्गमोऽवि अ न सुज्झे' उद्गमश्च तत्र गृहे न शुद्ध्यति। 'गच्छे'त्ति नियतं कार्यं योग्येन, केषामित्यत आह 'आयरिअगिलाणपाहुणए' आचार्यग्लानप्राघूर्णकानामर्थाय नित्यमेव कार्यं भवति इति निर्युक्तिगाथायम, इदानीं भाष्यकारो व्याख्यानयति, तत्र 'चमढण'त्ति व्याख्यानयन्नाह-

मू. (३७८) पुव्विंपि वीरसुणिआ छिक्का छिक्का पहावए तुरिअं।
सा चमढणाए सिन्ना संतंपि न इच्छए घेत्तुं॥ [भा. १२४]

वृ. जहा कांचित् वीरसुणिआ केणइ आहिंडइल्लेणं तित्तिरमयूराईणं गहणे छिक्कारिआ तित्तिराईणि गिण्हेइ, एवं पुणो तित्तिराईहिं विनावि सो छिछिक्कारेइ, सा य पढाविआ जया न किंचि पेच्छइ तया विआरिआ संती कज्जेवि न धावति, एवं सड्ढयकुलाइं अन्नमन्नेहिं चमढिज्जताइं पओयणे कारणे समुप्पन्नेऽवि संतंपि न देंति। किं कारणं?, जतो अकारणा एव निच्चोडयाणि तेन कारणं समुप्पन्नेवि न देंतित्ति। इदानीं गाथाऽक्षरार्थ उच्यते-पुनरपि वीरशुनी छीत्कृता छीत्कृता प्रधावति त्वरितं, पुनश्चागो अलीकचमढणतया सिन्ना-विश्रान्ता सदपि मयूरादि नेच्छति ग्रहीतुम॥

मू. (३७९) एवं सड्ढकुलाइ चमढिज्जंताइं ताइं अन्नोहिं।
निच्छंति किंचि दाउं संतंपि तयं गिलाणस्स॥ [भा. १२५]

वृ. सुगमा॥ "चमढण"त्ति गयं, "दव्वक्खय"त्ति व्याख्यायते-

मू. (३८०) दव्वक्खएण पंतो इत्थिं धाएज्ज कीस ते दिन्नं?।
भद्दो हट्ठपहट्ठो करेज्ज अन्नंपि समणट्ठा॥ [भा. १२६]

वृ. बहूनां गाथूनां धृतादिद्रव्ये दीयमाने तद्द्रव्यक्षयः संजातस्ततस्तेन द्रव्यक्षयेण यदि प्रान्तो गृहपतिस्ततः स्त्रियं घातयेत्, एतच्च भणति-किमिति तेभ्यः प्रव्रजितेभ्यो दत्तम? "दव्वक्खएण"त्ति गयं, "उग्गमोऽवि अ न सुज्झे"त्ति व्याख्यायते, तत्राह-'भद्दो हट्ठपहट्ठो करेज्ज अन्नंपि साहूणं' भद्रो यदि गृहपतिस्ततो दत्तमपि मोदकादि पुनरपि कारयेत। "उग्गमोऽविय न सुज्झे"त्ति गयं।

"गच्छंमि नियय-कज्जं आयरिए"त्ति व्याख्यानयन्नाह-

मू. (३८१) आयरिअनुकंपाए गच्छो अनुकंपिओ महाभागो।
गच्छानुकंपयाए अव्वोच्छित्ती कया तित्थे॥ [भा. १२७]

वृ. सुगमा ॥ इदानीं "गिलाण"त्ति व्याख्यायते-

मू. (३८२) परिहीनं तं दव्वं चमढिज्जंतं तु अन्नमन्नेहिं ।
परिहीनं मि य दव्वे नत्थि गिलाणस्स णं जोग्गं ॥ [भा. १२८]

वृ. सुगमा ॥ तथा चात्र दृष्टान्तो द्रष्टव्यः-

मू. (३८३) चत्ता होंति गिलाणा आयरिया बालवुड्ढसेहा य ।
सवगा पाहुणगाविय मज्झायं ठावयंतेणं ॥ [भा. १२९]

मू. (३८४) सारिक्खया गिलाणा आयरिया बालवुड्ढसेहा य ।
सवगा पाहुणगाविय मज्झायं ठावयंतेणं ॥ [भा. १३०]

मू. (३८५) जड्ढे महिसे चारी से गोणे अ तेसि जावसिआ ।
एएसिं पडिवक्खे चत्तारि उ संजया हुंति ॥

वृ. जहा एक्कं महाबीयं परिसुअं, तत्थ य चारीओ नानाविहाओ अत्थि, तंजहा-जड्ढस्स-हत्थिस्स जा होइ सा होउ सा तत्थ अत्थि, महिसस्स सुकुमारा जोग्गा सावि तत्थ अत्थि, आमस्स महुरा जोग्गा सावि तत्थ अत्थि, गोणस्स. सुयंधा जोग्गा सावि तत्थ अत्थि, तं च रायपुरिसेहिं रक्खिज्जइ ताणं चेव जड्ढाईणं, जइ परं कारणे घसिआ आनेंति, अह पुन तं मोक्कलयं मुच्चइ ताहे पहुणगोणेहिं गामगोणेहिं चमढिज्जइ, चमढिए अ तस्सिं महापरिसूए ताणं रायकेराणं जड्ढाईणं अमुरूवा चारी न लब्भई, विध्वंसितत्वात् गोधनैस्तस्य, एवं सहयकुलाणिवि जइ न रक्खिज्जंति ततो अन्नमन्नेहिं चमढिज्जंति, तेसु चमढिएसु जं जड्ढाइसब्भावपाहुणयाणं पाउग्गं तं न देंति ॥ इदानीमक्षरार्थ उच्यते-जड्ढो-हस्ती महिषः-प्रसिद्धस्तयोरनुरूपां चारीं यावसिका-वासवाहिका ददति, तथा अश्वस्य, गोणो-बलीवर्दस्तस्य च चारीमानयन्ति यावसिकाः । 'एतेषां' जड्ढादीनां प्रतिरूपः-अनुरूपः पक्षः प्रतिपक्षः तुल्यपक्ष इत्यर्थः तस्मिन् चत्वारः संयताः प्राघूर्णका भवन्ति ।

इदानीमेतेषामेव जड्ढादीनां यथासङ्ख्येयन भोजनं प्रतिपादयन्नाह-

मू. (३८६) जड्ढा जं वा तं वा सुकुमारं महिसिओ महुरमासो ।
गोणो सुगंधदव्वं इच्छइ एमेव साहूवि ॥ [भा. १३१]

वृ. सुगमा ॥ नवरं साधुरप्येवमेव द्रष्टव्यः-तत्थ पढमो पाहुणसाहू भणइ-जं मम दोगीणं अण्णगं वा कंजिअं वा लब्भइ तं चेव आनेहि, तेन एवं भणिते किं ? -दोसीणं चेव आनिअव्वं, न विसेसेणं तस्स सोहणं तस्स आणेयव्वं । बितिओ पाहुणसाहू भणइ-वरं मे नेहरहियावि पूयलिआ सुकुमाला होउ । ततिओ भणति-महुरं नवरि मे होउ । चउत्थो भणति निप्पडिगंधं अंबपाणं वा होउ । एवं ताणं भणंताणं जं जोग्गं तं सहयकुलेहिंतोवि सेसयं आनिज्जइ । एवमुक्ते सत्याह परः-यस्मादेवं तस्मादेवं तस्मात्त कदाचित्केनचित्प्रवेष्टव्यं प्राघूर्णकागमनमन्तरेण श्रावककुलेषु, यदेव प्राघूर्णका आगमिष्यन्ति तदेव तेषु प्रवेशो युक्तः, एवमुक्ते सत्याहाचार्यः-

मू. (३८७) एवं च पुणो ठविए अप्पविसंते भवे इमे दोसा ।
वीसरण संजयाणं विसुक्खगोणी अ आरामो ॥ [भा. १३२]

वृ. एवं च पुनः 'ठविते' स्थापिते स्थापनाकुले यदि सर्वथा न प्रवेशः क्रियते तदेते दोषाः । अप्रविशन्त्यु एते दोषाः- 'वीसरणसंजयाणं' विस्मरणं तेषां श्रावकाणां भवति, तत्र च विशुष्कगोण्या-

गया आरामेण च दृष्टान्तः, जहा एगस्स माहणस्स गोणी सा कुंडदोहणी ताहे सा चिंतितं-एसा गावी बहुअं खीरं देइ मज्झ य मासेन परगणं होहिति तो अच्छउ ताहे चेव एक्कवारिआए दुज्झिहिति, एवं सा न दुहति, ताहे सा तेन कालेन विसुक्का तद्दिवसं बिंदुंपि न देइ। एवं संजया तेसिं सड्ढाणं अनल्लिअंता तेसिं सड्ढाणं पम्हट्ठा न चेव आनंति किं संजया अत्थि न वा ? तेवि संजया जंमि दिवसे कज्जं जायं तद्दिवसे गया जाव नत्थि नानि दव्वाणि, तम्हा दोण्ह वा तिण्ह वा दिवसाणं अवस्स गंतव्वं ॥ अथवा आरामदिट्ठंतो, एगो मालिओ चिंतेइ-अच्छंतु एयाणि पुप्फाणि अहं कोमुईए एक्कवारिआए उव्वेहामि जेन बहूणि हुंति, ताहे सो आरामो उफुल्लो कोमुईए न एक्कंपि फुल्लं जायं। एवं सावगकुलेसु एए चेव दोसा एक्कवारिआए पविसणे तम्हा पविसिअव्वं कहिंचि दिवसेत्ति ॥ इदानीं योऽसौ आचार्यादीनां वैय्यावृत्त्यकर- श्राद्धकुलेषु प्रविशति स एभिर्दोषैर्विरहितो नियोक्तव्यः-

मू. (३८८) अलसं थद्धिरं सुविरं सबलं कोहमाणमायलोहिल्लं।
कोऊहलपडिबद्धं वेयावच्चं न कारिज्जा ॥ [भा. १३३]

मू. (३८९) ता अच्छइ जा पिंडिओ सइकालो अलस सोविरे दोस।
गुरुभार तेन विना विराहणुरसकृक ॥

मू. (३९०) अप्पत्ते अगिलंमी हत्थी ओसासुगाइ सइरेगे।
अनहिंडितो अचिरं नलहइ जंकिंचि वा नेइ ॥

मू. (३९१) गिण्हामि अप्पणो ता पज्जत्तं तो गुरुण पच्छाउ।
घित्तूण तेसिपच्छा सीअल ओसक्कमाईआ ॥

मू. (३९२) परिआवज्जइ खवगो अह गिण्हइ अप्पणो इयरहानी।
अविदिन्ने उमपाणाइ थद्धो न उगच्छइ ज च ॥ [प्र. २०]

मू. (३९३) ओहासइ खीराइ विज्जंतं वानवाराइ लुद्धो।
जे अदगवेसणदोसा एगस्स यतेउलुद्धस्स ॥ [प्र. २१]

मू. (३९४) एयदोसविमुक्कं कहजोगीं नायसील मायारं।
गुरुभत्तिमं विनियं वेयावच्च तु कारेज्जा ॥ [प्र. २२]

वृ. अलसो आलसितो सो वेयावच्चं न कारेयव्वो, जदि कारवे असमाचारी, सो आलस्सेन ताव अच्छउ जाव पिंडिओ देसकालो, ताहे पच्छा सड्ढयाणि जं किंचि देंति तेण आयरिआईणं विराधना, अहवा सो अइप्पए वच्चइ कम्मं निव्वाहिअं होउत्ति, ताहे तत्थ अकाले वच्चंतस्स तस्स ते चेव दोसा, अथवा तानि धम्मग्गहियआ ओसक्कणदोसे अस्सक्कणदोसे वा करेज्जा ठवियगदोसा वा, अहवा आय-ग्यिाणं निमित्तं पए वा उस्सूरं उववस्सएजा, एते एवमाइया अलसे दोसा। धम्मिगे बहुभक्खगो, सोवि न पट्ठवेयव्वो; सो पढमं चेव अप्पणो अट्ठाए हिंडइ पज्जत्तं, जाव सो अप्पणो पज्जत्तं हिंडइ ताव पिंडिआ वेला, अहवा तत्थेव पढमं वच्चइ पच्छा तत्थेव ण चेव वेला होइ, ते चेवोस्सक्काणादिआ दोसा, अहवा तत्थ सड्ढकुले पभूयं गेण्हइ ताहे उग्गमदोसा न सुज्झंति। सुविरो ताव सुवइ जाव पिंडिआ भिक्खावेला, अहवा पढमं तत्थ गंतुं अवेलाए पच्छा सुयइ ते चेव दोसा। खवओ जइ अप्पणो हिंडइ ताहे आयरिआ परितावणादि पावंति, अह खवओ आयरिआणं गेण्हइ ततो अप्पणो परितावणादि पावइ। कोहिल्लो पुव्वलाभओ पिंडितो सकोहिओ संतो भणइ-अम्हे अन्नतो लभामः, तंपि तुज्झपच्चाण न गेण्हामो, अहवा थेवं लब्भइ तत्थ भंडइ, अहवा ऊणं

पानेन वा तेमनेन वा तत्थवि ग्लायति। मानिओ भइ न अल्पबुद्धिलानि तो पुनो न एइ, को विसेसो सावगाणंति ? माइल्लो भद्दगं भद्दगं अप्पमागरिअं भोच्चा पंते आनेति। लोभिल्लो जत्तिअं लभति तं सव्वं गेण्हति, एसणं वा लोभेणं पल्लेज्जा कोऊहल्लिलो जत्थ नडादि पेच्छइ तत्थ वच्चंतो अच्छइ। पडिबद्धो जो सुत्तत्थेसु अल्लिओ तो सो ताव अच्छइ जाव कालवेला जाया एए दोसा तम्हा एरिसं साहुं वेयावच्चं न कारेज्जा। कीदृशं पुनः कारयेद्वैयावृत्त्यम ? इत्यत आह-

मू. (३९५) एतद्दोसविमुक्कं कडजोगिं नायसीलमायारं।
गुरुभत्तिसंविनीयं वेवायच्चं तु कारेज्जा॥ [भा. १३४]

वृ. एभिरुक्तदोषैर्विमुक्तं, किंविशिष्टम ? इत्याह- 'कडजोगि'त्ति कृतो योगो-घटना ज्ञानदर्शन-चारित्रैः सह येन स कृतयोगी-गीतार्थः तं, पुनरसावेव विशिष्यते-ज्ञातो शीलमाचारश्च तस्य तं वैयावृत्त्यं कारयेत्। गुरौ भक्तिः-भावप्रतिबन्धः संविनीतो-बाह्योपचारेण॥

मू. (३९६) गाइंति अ पिअधम्मा एसणदोसे अभिग्गहविसेसे।
एवं तु विहिग्गहणे सव्वं गहुंति नं काया॥ [भा. १३५]

वृ. ते चैव वैयावृत्यकराः श्राद्धकुलेषु प्रविष्टाः सन्तः कथयन्ति 'एषणादोषान्' शङ्कितादीन् अभिग्रहविशेषांश्च साधुसंबन्धिनः, कीदृशास्ते वैयावृत्यकराः ?-प्रियः-इष्टो धर्मो येषां ते प्रियधर्माणः 'एवं' उक्तेन प्रकारेणविधिग्रहणं द्रष्टव्यं, घृतादिवृद्धिं नयन्ति अव्यवच्छित्तिलाभेन, के ?-गीतार्थाः। तैश्च गीतार्थैर्भिक्षां गृह्णद्भिः श्राद्धकुले इदं ज्ञातव्यम्-

मू. (३९७) दव्वप्पमाणगणणा खारिअफोडिअ तहेव अद्धा य।
संविग्ग एगठाणे अनेगसाहूसु पन्नरस॥ [भा. १३६]

वृ. द्रव्यं-गोधूमादि तद्विज्ञेयं कियत्सूपकारशालायां प्रविशति दिने दिने ततश्च तदनुरूपं गृह्णाति, 'गणणा'त्ति एतावन्मात्राणि घृतगुडादीनि प्रविशन्त्यस्मिन् इत्येतावन्मात्रं ग्राह्यम्। 'खारिअ'त्ति सलवणानि कानि ?-व्यञ्जनानि-सलवणकरीरादीनि कियन्ति सन्ति ? इति, ततश्च ज्ञात्वा यथाऽनुरूपाणि गृह्णाति। 'फोडिअ'त्ति वाइंगणाणि मत्थाफोडिआणि कत्तिआणि घरे मिज्जिज्जंति नाऊण जहारुव्वाणि घेप्पंति। तथा 'अद्धा य'त्ति काल उच्यते, किमत्र प्रहरे वेला आहोश्चित्प्रहरद्वये इति विज्ञेयं, 'संविग्ग एगठाणे'त्ति संविग्नो-मोक्षाभिलाषी 'एगट्ठाणे'त्ति एकः सङ्घाटकः प्रविशति, 'अणेगसाहूसु'त्ति अनेकेषु साधुषु प्रविशत्सु 'पन्नरस'त्ति पञ्चदश दोषा नियमादभवन्ति "आहाकम्मुद्देसिअ" इत्येवमादयः। अज्झोयरओ मीसजायं च एक्को भंओ, यस्मादनेकेषु साधुषु दोषास्तस्मात्

मू. (३९८) संघाडगो ठवणाकुलेसु सेसेसु बालवुड्ढाइ।
तरुणा बाहिरगामे पुच्छा दिट्ठंतउग्गारो॥ [भा. १३७]

वृ. सङ्घाटकः एकः स्थापनाकुलेषु प्रविशति, शेषेषु कुलेषु बाला वृद्धाश्च प्रविशन्ति, आदिशब्दात्क्षपकाश्च। तरुणाः-शक्तिमन्तो बहिर्ग्रामं हिण्डन्ति। अत्र चोदकः पृच्छति-पूर्वमेव क्षेत्रं प्रत्युपेक्षितं यत्र सबालवृद्धस्य गच्छस्यान्नपानं पर्याप्त्या भवति तत्रैव स्थीयते ततः कस्मात्तरुणा बहिर्ग्रामं हिण्डन्ति ?, आचार्य आह-'दिट्ठंतउग्गारो' एकस्या अगार्या दृष्टान्तो ज्ञातव्यः, तं च तृतीयगाथायां भाष्यकारो वक्ष्यति।

तथा इयमपरा द्वारगाथा-

मू. (३९९) पुच्छा गिहिणो चिंता दिट्ठंतो तत्थ खज्जवोगेण।

आपुच्छिऊण गमनं दोसा य इमे अनापुच्छे ॥

वृ. 'पुच्छ'त्ति चोदकः पृच्छति, ननु च तस्या अगार्या घृतादिसङ्ग्रहः कर्तुं युक्तः। भर्तृपदत्ततर्पणमध्यात्तेनप्राघूर्णकादेः सुखेनैवोपचारः क्रियते, साधूनां पुनः स्थापनाकुलसंरक्षणेन किञ्चित्प्रयोजनं यतस्तत्र यावन्मात्रस्याहारस्य पाकः क्रियते तत्सर्वं प्रतिदिवसमुपयुज्यते, न तु तानि कुलानि संचयित्वा साधुप्राघूर्णकागमनेसर्वमेकमुखेनैव प्रयच्छंति, एवं चोदकेनोक्ते आचार्य आह- गिहिणो दिता गृहिणश्चिन्तः भवति, यदुत-एते साधवः प्राघूर्णकाद्यागमने आगच्छन्ति ततश्च एतेभ्यो यत्नेन देयमिति, एवंविधामादरपूर्विकां चिन्तां करोति। यच्चोक्तं तरुणा बहिर्ग्रामं किमिति हिण्डन्ति ?, 'दिट्ठंतो तत्थ खुज्जबोरीए' स च दृष्टान्तो वक्ष्यमाणः। 'आपुच्छिऊण गमनं'ति तत्र च बहिर्ग्रामादौ आचार्यमापृच्छ्य गन्तव्यं, यतः 'दोसा य इमे अनापुच्छ'त्ति दोषा अनापृच्छायामेते च वक्ष्यमाणलक्षणा दोषाः। इदानीं भाष्यकारः प्रतिपदमेतानि द्वाराणि व्याख्यानयति. तत्र च यदुक्तं दृष्टान्तोऽगार्याः, स उच्यते-एगा वाणिओ परिमिअं भत्तं अप्पणो महिलाए देइ, सा य ततो दिणे दिणे थोवं थोवं अवनेइ, किं निमित्तं ?, जदा एयस्स अंतेलाए मित्तो वा सही वा एइस्सइ तदा किं सक्का आवनाउ आनेउं ?, एवं सव्वतो संगहं करोति, अन्नया तस्स अंतेलाए पाहुणगो आगतो. ताहे सो भणइ-किं कीरउ ? रयणी वट्टइ णासंचाराओ रत्थाओ. ताहे ताए भणिअं-मा आतुरो होहि, ताहे तस्स पाहुणगस्स उवक्खडिअं, सतो तग्गुणसहस्सेहिं वट्टंतो भत्तारोऽवि से परितुट्ठो। एवं आयरिआवि ठवणकुलाइं ठवेंतिजेन अवेलागयस्स पाहुणयस्स तेहिंतो आनेउं दिज्जइ, तेन तरुणा संतेसुवि कुलेसु बाहिरगामे हिंड-तित्ति। इदानिं एसिं चेव विवरीओ भन्नइ, अन्नो अन्नाए गारीए परिमिअं देइ, सा य तओ मज्झाओ थोवं थोवं न गेण्हइ. तओ पाहुणए आगए विसूरेति, अमुमेवार्थं गाथाद्वयेनोपसंहरन्नाह-

मू. (४००) परिमिअभत्तगदाने नेहादवहरइ थोवं थोवं तु।
पाहुण वियाल आगम विसन्न आसासणादानं ॥ [भा. १३८]

वृ. परिमितभक्तप्रदाने सति साऽगारी स्नेहादि-घृतादि स्तोकं स्तोकमपहरति। पुनश्च प्राघूर्णकस्य विकालागमने विषन्नः स्त्रिया आश्वासितः 'दानं'ति तया स्त्रिया भक्तं दानं दत्तं प्राघूर्णकायेति ॥

मू. (४०१) एवं पीइविवुड्ढी विवरीयत्तेण होइ दिट्ठंतो।
लोउत्तरे विसेसो असंचया जेन समणा उ ॥ [भा. १३९]

वृ. एवंनयोर्दम्पत्योः प्रीतिवृद्धिः संजाता. विपरीतश्चान्येनप्रकारेण भवति दृष्टान्तः। एवं तावद्गृहस्था अपि सश्रयपरा भवन्ति-अनागतमेव चिन्तयन्ति, साधुना पुनः कक्षिशम्बलेन सुतरामनागतमेव चिन्तनीयं. यदि परं लोकोत्तरेऽयं विशेषः, यदुत निःसश्रयाः सुतरां चिन्तामाचार्या वहन्तीति। ''पुच्छा दिट्ठंतगारी''त्ति भणितं. इदानीं ''पुच्छा गिहिणो चिंत''त्ति गाथायाः प्रथमावयवं व्याख्यानयन्नाह-

मू. (४०२) जनलावो परगामे हिंडिताऽनेति वसइ इह गामे।
दिन्नइ बालादीणं कारणजाए य सुलभं तु ॥ [भा. १४०]

वृ. यच्चोदकेन पृष्टमासीत्तेनमुत्तरं-जनानामालापो जनालापो-लोक एवं ब्रवीति, यदुत परग्रामे हिण्डयित्वाऽनयन्ति-अत्र भुञ्जते। 'वसहि इह गामे'त्ति वसतिः केवलमत्र एतेषां साधूनां, ततश्च 'दिन्नइ' बालादीनां दत्तध्वम, आदिशब्दात्प्राघूर्णकादयो गृह्यन्ते. एवंविधां चिन्तां गृहस्थः करोति। ततश्च 'कारणजाते य सुलभं तु' त्ति एवंविधायां चिन्तायां प्राघूर्णकादिकारणे उत्पन्ने घृतादि सुलभं भवतीति। आह-किं पुनः कारणं प्राघूर्णकानां दीयते ?, तथा चायमपरो गुणः-

मू. (४०३) पाहुणविसग्गदाने निज्जर किती अ इहर विवरीयं ।
पव्वं चमढणसिग्घा न देंति संतेपि कज्जेसु ॥ [भा. १४१]

वृ. प्राघूर्णकाय विशेषदाने सति निर्जरा कर्मक्षयो भवति, इहलोके च कीर्तिश्च भवति । 'इहर विवरीय'त्ति यदि प्राघूर्णकविशेषदानं न क्रियते ततश्च निर्जराकीर्त्ती न भवतः, एवं प्राघूर्णकविशेषदाने न भवति. यस्मात्पूर्वं चमढणसिग्घा ततश्च न देंति संतेपि कज्जेसु गिहिणो । चिंतंति वक्खाणिअं ।

मू. (४०४) गामब्भासे वयरी नीसंदकदुप्फला य खुज्जा य ।
पक्कामलसडिंभा खायंति घरे गया दूरं ॥ [भा. १४२]

वृ. एगो गामो तत्थ खुज्जबोरी सा य नाम निम्बासेन कडुया तत्थ चेडरूवाणि भणंति व्रजामो बोराणि खामो तत्थ खुज्जबोरीविलग्गाइं ताइं डिंभरूवाणि तूवराईणिवि खायंति. न य पज्जत्तीए होइ, अन्नाणि भणंति. किं एएहिं, ताहे अडविंगतया तत्थ बोराणि घरगाए घेत्तूण बहूनि पोट्टलगा बंधिऊण आगया सिग्घतरं जाव इमे झाडेंता चेव अच्छंति न तत्तीया जाया, ताहे ते तेसिं अन्नेसिं च देंति । एवं चेव इमं संसं चमढिअं, एत्थ अंबिलकूरो घेत्तूणं चेव आगच्छंति दिक्खं च हिंडेयव्वं एवं किलेसो अप्पगं च भत्तं होंति, जहा ते अनालसचेडा (तहा जे तरुणा) आयपरहिआवहा ते बाहिरगामभिक्खारिअं जंति ताहे ते अचमढिअगामाओ खीरं दहिमाइयाइं घेत्तूण लहुं आगया उग्गमदोसाई य जढा होंति, बालवुड्ढा य अनुकंपया होंति, वीरियायारो य अनुचिन्नो होइ, तम्हा गंतव्वं बाहिरगामं हिंडएहिं तरुणएहिं । इदानीममुमेवार्थं गाथाभिरुपसंहरन्नाह-

मू. (४०५) गामब्भासे वयरी नीसंदकदुप्फला य खुज्जा य ।
पक्कामलसडिंभा खायंतियरे गया दूरं ॥ [भा. १४३]

मू. (४०६) सिग्घयरं आगमनं तेसिंतेसिं च देंति सयमेव ।
खायंता एमेव उ आयपरिहिआवहा तरुणा ॥ [भा. १४४]

मू. (४०७) खीरदहिमाइयाणं लंभो सिग्घतरगं च आगमनं ।
पडरिक्क उग्गमाइ विजढा अनुकंपिआ इयरे ॥ [भा. १४५]

वृ. गामब्भासे बदरीसा च निम्स्वन्दकटुकफला कुब्जा च, सा च फलानि 'पक्काम'त्ति तानि च फलानि पक्वानि आमानि च पक्वामानि-अर्द्धपक्वानीत्यर्थः, ये अलसा डिम्भास्ते भक्षयन्ति। 'इयर'त्ति अनलसाः-उत्साहवन्तो डिम्भरूपास्ते दूरं गताः। तेषां च शीघ्रतरमागमनं संजातं ततश्च बाह्यत आगत्य 'तेसिं अन्नेसिं च दिंति' तेषामलसशिशूनां-मन्येषां च ददति स्वयमेव च भक्षयन्ति, एवमेव तरुणा अपि आत्मपरयोर्हितमावहन्तीति आत्मपरहितावहास्तरुणाः, एवं तरुणानां क्षीरदध्यादीनां लम्भः शीघ्रतरं चागमनं 'पडरिक्क'त्ति प्रचुरतरं लभन्ते, उद्गमादयश्च दोषाः परित्यक्ता भवन्ति, तथाऽनुकम्पिताश्चेतरे-बालवृद्धादयो भवन्तीति। उक्तः कुब्जबदरीदृष्टान्तः, "आपुच्छिऊण गमनं"ति व्याख्यानयन्नाह-

मू. (४०८) आपुच्छिअ उग्गहिअं अन्नं गामं वयं तु वच्चामो ।
अन्नं च अपज्जत्तं होंति अपुच्छे इमे दोसा ॥ [भा. १४६]

वृ. आपृच्छ्य गुरुमुद्ग्रहीतपात्रकाः एवं भणन्ति. यदुत अन्यं ग्रामं वयं व्रजामः. 'अन्नं च अपज्जत्तं'ति यदि तस्मिन ग्रामे पर्याप्तं न भविष्यति ततस्तस्मादपि ग्रामादन्यं ग्रामं गमिष्यामः । "आपुच्छिऊण गमन"न्ति भणितं. इदानिं "तस्स य इमे अनापुच्छि"त्ति व्याख्यानयन्नाह. दोषा एतेऽनापृच्छ्य गतानां

भवन्ति, के च ते दोषा ? (तान्) व्याख्यानयन्नाह -

मू. (४०९) तेनाएसंगिलाणं साधय इत्थी -पुंसपुच्छा य ।
आयरिअबालवुड्ढा सेहा खमगा य परिचरगा ॥ [भा. १४७]

वृ. कदाचिदन्यग्रामान्तराले व्रजतां स्तेना भवन्ति, ततश्च तद्ग्रहणे (तत्र गमने) उपधिशरीरा-पहरणं भवन्ति, आचार्योऽप्यकथितो न जानाति कया दिशा गता ? इति, ततश्च दुःखेनान्वेषणं करोति । अथवा आएसः-प्राघूर्णक आयातः, ते चानापृच्छ्य गताः, ते य आयरिया एवं भणंता जहा पाहुणयस्स वट्टावेह, अहवा गिलाणस्स पाओग्गं गेण्हह, अहवा अंतराले सावयाणि अत्थि तेहिं भक्खियाणि होंति, अहवा तत्थ गामे इत्थिदोसा वा, अहवा मुच्छो पडेज्जा ताहे न नज्जइ, अपुच्छिए कयराए दिसाए गयत्ति न नज्जति । ततश्चानापृच्छ्य गच्छतां बालवृद्धसेहक्षपकाः परित्यक्ता भवन्ति, यत आचार्यादीनां प्रायोग्यमात्रं नायन्ति अनुक्तत्वात न च प्रच्छनं कृतं येनोच्यन्ते, यत एते दोषाः परित्यागजनिता स्तस्मादतद्दोषभयात ।

मू. (४१०) आयरिए आपुच्छा तस्संदिट्ठे व तंमि उवसंते ।
चेइयगिलाणकज्जाइएसु गुरुणो अ निग्गमनं ॥

वृ. तस्मादाचार्यमापृच्छ्य गन्तव्यं । अथाचार्यः कथञ्चिन्न भवति "तस्संदिट्ठे व"त्ति तेनाचार्येण यः संदिष्टः यथाऽमुमापृच्छ्य गन्तव्यं ततस्तमापृच्छ्य व्रजन्ति । तस्मिन्नसति-आचार्ये अविद्यमाने क्वचिन्निर्गते, केन पुनः कारणेनाचार्यो निर्गच्छति । अत आह-'चेइय' चैत्यवन्दनार्थं स्तवनादिकार्ये। गुरोर्निर्गमनं भवति । अथाचार्येण गच्छता न कश्चिन्नियुक्त स्ततः ?

मू. (४११) भण्णइ पुव्वनिउत्ते आपुच्छित्ता वयंति ते समणा ।
अनभोगे आसन्ने काइयउच्चारभोमाई ॥

वृ. अभणिते पर्वनियुक्त ना-कस्मिंश्चिद्भिक्षावेलायां यः प्रागेव निर्युक्तः आस्ते तमापृच्छ्य व्रजन्ति ते श्रमणा भिक्षार्थं । 'अनाभोग'त्ति अनाभोगेन' अत्यन्तस्मृतिभंशेन गताः ततः 'आसन्ने'त्ति आसन्ने भूमिप्रदेशे यदि स्मृतं तत आगत्य पुनः कथयित्वा यान्ति, 'काइय' कायिकार्थं यो निर्गतः सास्तस्मै कथयन्ति, यदुत वयममुकत्र गताः । 'उच्चारभोमादि'त्ति संज्ञाभूमिं यो गतस्तस्मै कथयन्ति, यदुत कथनीयमहममुकत्र गत इति, आदिग्रहणात्प्रथमालिकार्थं वा यो गतस्तस्य वा हस्ते संदिशन्ति ।

मू. (४१२) दवमाइनिग्गयं वा सेज्जायर पाहुणं च अप्पाहे ।
असइ दूरअगीवि नियत्त इहरा उ ते दोसा ।

वृ. द्रवं-पानकं तदर्थं निर्गतो यः साधुस्तं दृष्ट्वा कथयन्ति, 'सेज्जायर पाहुणं च अप्पाहे'त्ति शय्यातरं वा दृष्ट्वा संदिशन्ति प्राघूर्णकं वा-साध्वादि दृष्ट्वा संदिशन्ति, यत- कथनीयं मम विस्मृतमिमि। यदा त्वेनान गच्छन्तं पश्यति तदा दूरगतः 'विनियत्ति'त्ति दूरगतः सन्निवर्तत, 'इहरा उ'त्ति यदि न निवर्तते ततः 'ते दोस'त्ति ते पूर्वोक्ता स्तेनादयो दोषाः भवन्तीति ।

मू. (४१३) अन्नं गामं च वए इमाइं कज्जाइं तत्थ नाऊणं ।
तत्थवि अप्पाहणया नियत्तई वा सई काले ॥

वृ. अथासौ साधुस्तस्माद्ग्रामादन्यं ग्रामं व्रजन एतानि कार्याणि-वक्ष्यमाणलक्षणानि कानि ?- "दूरट्ठिअखंडुल्लए" इत्यवमादीनि 'तत्थे'ति तस्मिन ग्रामे योऽसावभिप्रेतो 'ज्ञात्वा' विज्ञाय, ततश्च किं कर्तव्यमित्यत आह- "तत्थापि" अन्यस्मिन ग्रामे व्रजता 'अप्पाहणया' संदेशकस्समर्थयितव्यः, अथ

कश्चिनाग्नि यस्य हस्ते संदिश्यते ततो निवर्तनं वा क्रियते. कदा ?, अत आह- 'सति काले' विद्यमाने पहुप्पंति काले ततदनुष्ठीयते यदुक्तं, एतानि कार्याणि तत्र ज्ञात्वाऽन्यत्र ग्रामे व्रजन्ति, तानि दर्शयन्नाह-

मू. (४१४) दुरट्ठिअखुड्डलए नव भड अगनी य पंत पडिणीए ।
पाओग्गकालइक्कम एक्कगलंभो अपज्जत्तं ॥

वृ. प्रथमं गाथार्द्धं सुगमं. एतानि दुरवस्थितादीनि कारणानि अर्द्धपथ एव ज्ञातानि. कदाचिद्गतः सन् तत्र 'पाउग्ग'त्ति तत्र ग्रामे प्रायोग्यमाचार्यादीनां न लब्धं ततोऽन्यत्र व्रजति. 'कालातिक्रम' भिक्षाकालस्य वाऽतिक्रमो जाव एकस्य वा साधोस्तत्र भोजनलाभो जातस्ततोऽन्यग्रामं व्रजन्ति । 'अपज्जत्त'ति न वा पर्याप्त्या तत्र भक्तं जातं लब्धं पानकं वा न लब्धं. एभिरनन्तरोक्तैः कारणैरन्यग्रामं व्रजन्तीति ॥

मू. (४१५) भाउग्गाइणमसइ सोएणं सोत्तिमाइ अप्पाहे ।
जइ य चिरं तो इयरे ठवित्तु साहारणं भुंजे ॥

वृ. एवमसौ प्रायोग्यादीनां अगति अन्यग्रामं व्रजति. व्रजंश्च साधुं यदि पश्यति ततस्तस्यहस्ते संदिशति, सञ्ज्ञी श्रावकस्तस्य हस्ते संदिशत्यन्यस्य वा आदिग्रहणात् पूर्ववच्छेषम् । एवं तावद्भिक्षामटतां विधिरुक्तः. ये पुनर्वसतौ तिष्ठन्ति साधवस्तैः किं कर्तव्यमित्यत आह- "जइ य चिरं' यदि च चिरं तेषां ग्रामं गतानां तत इतरे-वसतिनिवासिनः साधवः 'ठवेत्तु साहारणं' यदग्रच्छसाहारणं विशिष्टं किञ्चित्स्थापयित्वा शेषमपरप्रान्तप्रायं भुञ्जते। अथ तथाऽपि चिरयंति-

मू. (४१६) जाए दिसाए उ गया भत्तं घेत्तुं तओ पडियरंति ।
अनपुच्छनिग्गयाणं चउहिसं होइ पडिलेहा ॥

वृ. 'जाए दिसाए उ गया' यया दिशा भिक्षाटनार्थं गतास्तया दिशा गृहीतभक्तपानकाः साधवः 'पडियरंति'त्ति प्रतिजागरणां-निरूपणां कुर्वन्ति. अथ नु ते भिक्षाटका अ न भोगेनकथयित्वैव गतास्ततः किं कर्तव्यमित्यत आह-अनापृच्छ्य निर्गतानां भिक्षाहिण्डकानां चतसृष्वपि दिक्षु 'प्रतिजागरणं' निरूपणं कर्तव्यं साधुभिः । प्रतिजागरणमनगमनविधिः कः ?,

मू. (४१७) पंथेनेगो दो उप्पहेण सहं करेंति वच्चंता ।
अक्खरपहिसाडणया पडियरनिअरेसि मग्गेणं ॥

वृ. 'पन्था' मार्गेण प्रस्थितेन एकः साधुः, प्रयाति. द्वौ साधू 'उत्पथेन' उन्मार्गेण व्रजतः. वर्तन्या एक एकया दिशाऽन्यश्चान्यया, तौ च त्रयोऽपि व्रजन्तः शब्दं कुर्वन्ति, न च व्रजन्तः स्तेनादिना नीयमानाः साधवः किं कुर्वन्तीत्यत आह- 'अक्खर'त्ति वर्तिन्यामक्षराणि लिखन्तः पादादिना व्रजन्ति, 'परिसाडणय'त्ति परिशातनं वस्त्रादेः कुर्वन्तो व्रजन्ति येन कश्चित्तेन मार्गेणान्वेषयति । 'पडिअरनिअरेसि'ति इतरेषामन्वेषणार्थं निर्गतानां साधूनां मार्गेणं तत्कृते चिह्नेन प्रतिजागरणं कर्तव्यं ।

मू. (४१८) गामे गंतुं पुच्छे घरपरिवाडीए जत्थ उ न दिट्ठा ।
तत्थेव बोलकरणं पिंडियजनसाहणं चेव ॥

वृ. यदा नु पुनस्तेषां स्तेननीतानां चिह्नं न किञ्चित्पश्यति तदाऽपि ग्राममेव गत्वा पृच्छति. कथं ?. गृहपरिपाट्या, 'जत्थ उ न दिट्ठ'त्ति यत्र न दृष्टास्तस्मिन ग्रामे. न च तद्ग्रामनिर्गतानां वार्ता तत्रैव 'बोलकरणं' शब्दं कुर्वन्ति. पश्चाच्च 'पिंडितजणसाहणं पिण्डिता-मिलिता यो जनस्तस्य कथयन्ति यदु-अस्मिन ग्रामे यैर्व्रजिता भिक्षार्थं प्रविष्टाः न च तेषां पुनरस्मात ग्रामाद्वार्त्ता श्रुयंते । एवं तैस्तरुणैरतदेव

च कृतं भवति अन्यग्रामेऽतदिभः-

मू. (४१९) एवं उग्गमदोसा विजढा पडिरिक्कया अमाणं।
मोहचिकिच्छा अ कया विरियायारो य अनुचिन्नो ॥

वृ. 'एवं' अन्यग्रामे भिक्षाटनेन 'उद्गमदोषाः' आधाकर्मादयः 'विजढा' परित्यक्ता भवन्ति, 'पडिरिक्कय'त्ति प्रचुरस्य भक्तादेर्लाभो भवति 'अमाणंति न वा 'अपमानं' अनादरकृतं भवति लोकै, तथा मोहचिकित्सा च कृता भवति, श्रमानपवेयावृत्त्यादिभिर्मोहस्य निग्रहः कृतो भवति-अवकाशो दत्तो न भवतीति, 'विरियायारो य' वीर्याचारश्च 'अनुचीर्णः' अनुष्ठितो भवति।

मू. (४२०) अनुकंपायरियाई दोसा पडिरिक्कजयणमंसट्ठं।
पुरिसे काले खवणे पढमालिय तीसु ठाणेसु ॥

वृ. एवमुक्ते सति चोदक आह-सत्यमाचार्यादयोऽनुकम्पिता भवन्ति, किन्तु त एव वृषभाः परित्यक्ता भवन्ति, आचार्योऽप्यनेनैव वाक्येन प्रत्युत्तरं ददाति काक्वा-'अनुकंपायरिआई'त्ति एवमाचार्यादीनामनुकम्पा, यत एव परलोके निर्जरा इहलोके प्रशंसा, पुनरप्याहपरः-'दोसा' इति भवतु नाम परलोकार्थं आचार्यादीनामनुकम्पा किन्तु क्षुत्पीडा पिपासापीडा च तदवस्थैव, आचार्योऽप्याह-क्रियत एव प्रथमालिका, किन्तु ? त्रिषु स्थानेषु, कानि च तानि ?, अत आह 'पुरिसे'त्ति पुरुषः असहिष्णुः पुरुषो यद्यसहिष्णुस्ततः करोति, काले-उष्णकालादौ, यद्युष्णकालस्ततः करोति, 'खवण'त्ति कदाचित्क्षपको भवति अक्षपको वा, यदि क्षपकस्ततः करोति, एवमेतेषु त्रिषु स्थानकेषु प्रथमालिकां करोति, कथं करोति ?, आचार्योऽप्यनेनैव वाक्येनोत्तरंददाति, कथं वा करोति ?, अत आह- 'पडिरिक्के जयण'त्ति प्रतिरिक्ते -एकान्ते यतनया करोति, पुनरप्याह परः-आचार्यादीनां तेन तद्भक्तं संसृष्टं कृतं भवति, आचार्योऽप्यनेनैव वाक्येनोत्तरं ददाति-'पडिरिक्कयणसंसट्ठं' एकान्ते यतनायाऽसंसृष्टं च यथा भवति तथा प्रथमालियंति-मात्रके प्रथममाकृष्य भुङ्क्ते हस्तेन वा द्वितीयहस्ते कृत्वा, अकाग्रश्लेष आचार्यवाक्ये द्रष्टव्यः।

इदानीमेतामेव गाथां भाष्यकारः प्रतिपदं व्याख्यानयन्नाह,

मू. (४२१) चोयगवयणं अप्पानुकंपिओ ते अ भे परिच्चत्ता।
आयरियनुकंपाए परलोए इह पसंसणया ॥ [भा. १४८]

वृ. चोदकस्य वचनं, किं तद् ?, आत्मैवेमनुकम्पित आचार्येण, ते च भवता परित्यक्ता भवन्ति। आचार्योऽप्याह- आचार्यानुकम्पया परलोको भवति, इहलोके च प्रशंसा भवति। 'अनुकंपा आयरियाई' व्याख्यातमिदं, इदानीं ''दोस''त्ति व्याख्यानयन्नाह-

मू. (४२२) एवंपि अपरिचत्ता काले खवणे अ अन्नहपुरिसे य।
कालो गिम्हो अ भवे खवगो वा पढमछिण्डाहिं ॥ [भा. १४९]

वृ. चोदकः पुनराह-एवमपि ते परित्यक्ता एव, ततः क्षुधादिना बाध्यन्ते, आचार्योऽप्याह-'काले'त्ति काले-उष्णकाले करोति 'खवण'त्ति क्षपको यदि भवति ततः स करोति प्रथमालिकामसहिष्णुश्च पुरुषो यदि भवति ततः स करोति प्रथमालिकां, तत्र कालो-ग्रीष्मो यदि भवत्पुरुषः क्षपको यदि भवति, 'पढमछिण्डाहिं'ति अत्र पुरुषः केन कारणेनासहिष्णुर्भवति ?-'पढमे'त्ति प्रथमपरीषहेण बाध्यमानः क्षुधित इत्यर्थः, द्वितीयपरीषहेण-तृषा बाध्यमानः, पिपासया पीड्यमानोऽसहिष्णुर्भवति। अत्राह परः-

मू. (४२३) जइ एवं संसट्ठं अपत्ते दोसिणाइणं गहणं।

लंबणभिक्खा दुविहा जहन्नमुक्कोस तिअपणए ॥ [भा. १५०]

वृ. यद्यवमसौ बाहत एव प्रथमालिकां करोति ततो भक्तं संसृष्टं कृतं भवति, आचार्योऽप्याह-'अप्पत्ते दोसिणादिनं गहणं' प्रघूर्णायामेव भिक्षावेलायां पर्युषितान्नग्रहणं कृत्वा प्रथमालयति, कियत्प्रमाणां पुनः प्रथमालिकां करोत्यसौ ?, द्विविधा प्रथमालिका भवति-'लंबणभिक्खा दुविहा' लम्बनैः-कवलैर्भिक्षामिश्रा द्विविधा प्रथमालिका भवति, इदानीं जघन्योत्कृष्टतः प्रमाणप्रतिपादनायाह-'जहन्नमुक्कोस तिअपणए' यथासङ्ख्येन जघन्यतस्त्रयः कवलास्तिस्रो वा भिक्षाः, उत्कृष्टः- पञ्च कवलाः पञ्च वा भिक्षाः। इदानीं तेन सङ्घाटकेन किं वस्तु केषु पात्रकेषु गृह्यते ? का वा प्रथमालिकाकरणे यतना क्रियते ?, एतत्प्रतिपादयन्नाह-

मू. (४२४) एगत्थ होइ भत्तं बिइअंमि पडिग्गहे दवं होइ।
पाउग्गायरियाइं भत्तं बिइए उ संसत्तं ॥

वृ. एकस्मिन् पात्रके भक्तं गृह्यति द्वितीये च पतद्ग्रहे द्रवं भवति। तथा 'पाउग्गापरियाइं भत्तं' इति प्रायोग्यमाचार्यादीनामेकस्मिन् पात्रके भक्तं गृह्यते द्वितीये तु पात्रके संसृष्टं किञ्चित्पानकं गृह्यते ॥

मू. (४२५) जइ रित्तो तो दवमत्तसंपिढमालियाए करणं तु।
संसत्तगहणं दवदुल्लहे य तत्थेव जं पत्ते ॥

वृ. यदि रिक्तः संसक्तेन द्रवमात्रकेणान्यतस्तस्मिन् प्रथमालिकायाः करणं, 'संसत्तगहणं'ति अथ तस्मिन् द्रवमात्रके संसक्तं द्रवग्रहणं कृतं ततस्तेनैव पात्रके यत्पानं तदभुङ्क्ते। 'दवदुल्लभे यत्ति अथ दुर्लभं पानकं तत्र क्षेत्रे ततश्च तत्रापि संसक्तमात्रके पानकाक्षणिके सति 'तत्थेव'त्ति तस्मिन्नेव भक्तं पतद्ग्रहे यत्पानं तल्लस्तेनाकृष्यान्यस्मिन् हस्ते कृत्वा समुद्दिशति। एवं चासौ सङ्घाटकः प्रथमालिकां करोति-

मू. (४२६) अंतरपल्लीगहिअं पढमागहियं व सव्वं भुंजेज्जा।
धुवलंभसंखडीयं व जं गहिअं दोसिणं वावि ॥

वृ. अन्तरपल्ली-तस्माद्ग्रामात्परतो योऽन्य आसन्नग्रामस्तत्र यद्गृहीतं तदभुङ्क्ते, पुनस्तत्तत्र क्षेत्रातिक्रान्तत्वादभोज्यं भवति, 'पढमागहिअं व'त्ति प्रथमायां वा पौरुष्यां यद्गृहीतं तत्सर्वं भुङ्क्ते, तृतीयपौरुष्यामकल्प्यं यतस्तदभवति। "ध्रुवलंभो संखडी यं व अथवा ध्रुवो वा-अवश्यभावी-अत्र सङ्घट्टके लाभो भविष्यतीति मत्वा, ततश्च यद्गृहीतं 'दोसिणं वावि' पर्युषितमन्नं तत्सर्वं भुङ्क्ते ॥

मू. (४२७) अद्धहिंडिए व भाणं भरिअं भोच्चा पुणोवि हिंडिज्जा।
कालो वाऽइक्कमई भुंजेज्जा अंतरे सव्वं ॥

वृ. अर्द्धहिण्डिते वा यत्पात्रकं गृहीतं तदभुक्त्वा, ततश्च तदभुक्त्वा पुनरपि हिण्डते। भोजनकालो वा प्रव्रजितानामतिक्रामति यावद्यत् तदभक्तं गृहीत्वा व्रजति ततश्चान्तराल एव सर्वं भुक्त्वा प्रविशति।

मू. (४२८) एसो उ विही भणिओ तंमि वसंताण होइ खेत्तंमि।
पडिलेहणंपि इत्तो वोच्छं अप्पक्खरमहत्थं ॥

वृ. एष विधिः 'भणितः' उक्तस्तस्मिन् क्षेत्रे वसतां भवति, प्रतिलेखनामधीत ऊर्ध्वं वक्ष्ये, किंविशिष्टाम ?-अल्पाक्षरां महार्थां चेति। उक्तं स्थानस्थितद्वारं, तत्प्रतिपादनाश्च व्याख्यातेयं गाथा, यदुत "सिंगारविनिअवसही तनिए मत्ती" इत्येवमादिका, तत्प्रतिपादनाच्चोक्ता अनेके प्रत्युपेक्षकाः, तत्प्रतिपादनाच्चोक्तं प्रत्युपेक्षकद्वारमिति, तत्र यदुक्तम-"एत्तो पडिलेहणं वुच्छं" तामिदानीं व्याख्यानयन्नाह-

मू. (४२९) दुविहा खलु पडिलेहा छउमत्थाणं च केवलीणं च।

अब्भिंतर बाहिरिआ दुविहा दव्वे य भावे य ॥

वृ. द्विविधा प्रत्युपेक्षणा भवति, कतमेन द्विविध्येनेत्यत आह-छद्मस्थानां संबन्धिनां केवलिनां च, सा चैकैका द्विविधाअभ्यन्तरा बाह्या च. याऽसौ छद्मस्थानां सा द्विविधा-बाह्या अभ्यन्तरा. च. या च केवलिनां साऽपि अभ्यन्तरा बाह्या च। 'दव्वे य भावे य'त्ति याऽसौ बाह्या प्रत्युपेक्षणा सा द्रव्यविषया, याऽभ्यन्तरा सा भावविषयेति। तत्र केवलिप्रत्युपेक्षणां प्रतिपादयन्नाह-

मू. (४३०) पाणेहि उ संसत्ता पडिलेहा होइ केवलीणं तु।
संसत्तमसंसत्ता छउमत्थाणं तु पडिलेहा ॥

वृ. प्राणाभिः संसक्तं यद्द्रव्यं तद्विषया प्रत्युपेक्षणा भवति केवलिनां, 'संसत्तमसंसत्त'त्ति संसक्त द्रव्यविषया असंसक्त द्रव्य विषया च छद्मस्थानां प्रत्युपेक्षणा भवतीति। आह-'यथोपन्यासस्तथा निर्देश' इति न्यायतः प्रथमं छद्मस्थानां प्रत्युपेक्षणा वक्तव्या कुतः पश्चात्केवलिनामिति. उच्यते. प्रधानत्वात्केवलिनां प्रथमं व्याख्या कृता पश्चाच्छद्मस्थानामिति. आह-तत्कथं प्रथममेवैवमुपन्यासो न कृतः ? इति, उच्यते, तत्पूर्वकाः, केवलिनो भवन्तीत्यस्यार्थस्याज्ञापनार्थमिति॥ अनेनवाकारणेनकेवलिनः प्रत्युपेक्षणांकुर्वन्तीति प्रतिपादयन्नाह-

मू. (४३१) संसज्जइ धुवमेअं अपेहिअं तेन पुव्व पडिलेहे।
पडिलेहिअंपि संसज्जइत्ति संसत्तमेव जिन्ना ॥

वृ. 'संसज्यते' प्राणिभिः सह संसर्गमुपयाति 'ध्रुवं' अवश्यं 'एतत्' प्रत्युपेक्षमितपि उपभोगकाले संसज्यते तदा 'संसत्तमेव जिन'ति संसक्तमेव 'जिनाः' केवलिनः प्रत्युपेक्षन्ते न त्वानागतमेव, परिमन्थदोषात। उक्ता केवलिद्रव्यप्रत्युपेक्षणा, इदानीं केवलिन एव भावप्रत्युपेक्षणां प्रतिपादयन्नाह-

मू. (४३२) नाऊण वेयणिज्जं अइबहुअं आउअं च थोवागं।
कम्मं पडिलेहेउं वच्चंति जिना समुग्घायं ॥

वृ. ज्ञात्वा 'वेदनीयं' कर्म अतिप्रभूतं तथाऽऽयुष्कं च स्तोकं कर्म 'प्रत्युपेक्ष्य' ज्ञात्वेत्यर्थः, किमित्यत आह 'वच्चंति जिना समुग्घायं' कर्म अतिप्रभूतं केवलिनः समुदघातं व्रजन्ति. अत्र च भावः- कर्मण उदयः औदयिको भाव इत्यर्थः। उक्ता केवलिभावप्रत्युपेक्षणा, इदानीं छद्मस्थद्रव्यप्रत्युपेक्षणामाह-

मू. (४३३) संसत्तमसंसत्ता छउमत्थाणं तु होइ पडिलेहा।
चोयग जह आरक्खी हिंडिनाहिंडिआ चेव ॥

वृ. 'संसत्त'त्ति संसक्त द्रव्यविषया असंसक्त द्रव्यविषया च छद्मस्थानां भवति प्रत्युपेक्षणा. अत्र चोदक आह-युक्तं तावत संसक्त च वस्त्रादेः प्रत्युपेक्षणाकरणं. असंक्तस्य तु कस्मात प्रत्युपेक्षणा क्रियते ?. आचार्य आह-यथा आरक्षकयोर्हिण्डितयोर्हिण्डितयोर्यथासाधन प्रमादविनाशो संजातो तथाऽत्रापि द्रष्टव्यं. तथाहि-किंचिन्नगरं. तत्थ राया, तेन चोरनिग्गहणत्थं आरक्खिआ ओ ठविओ, सो एगं दिवसं हिंडए बीए तइए हिंडंतो चोरं न किंचे पासति ताहे ठितो निव्विन्नो. चोरेहिं आगमिअं जहा वीसत्था जो आरक्खिओ. ताहे एकदिवसेणं सव्वं नगरं मुट्ठं. ताहे नागरगा उद्दिआ मुट्ठा. तो राया भणइ बाहरह आरक्खिअं. बाहिरा पुच्छंतो-किं तुमए अज्जाहिंडिं न नगरं ?. सो भणति-न हिंडिअं. ताहे रुट्ठो राया भणइ जइ नज्ज एत्तिए दिवसे चोरेहिं न मुट्ठे सो तास चेव गुणो, तए पुन पमायं करिन्नेणं. मुसाविअं. तनो सो निग्गाहिओ राइणा. अन्नो पइट्ठविओ, सो पुन जइ न दिक्खति चोरे तहेव रत्तिं सयलं हिंडति, अह तत्थ एगदिवसं अन्नस्तो गयं नाऊणं

चोरहिं गयत्तं ग्यणिअं, सो य नागरओ रायउले उवट्ठिओ. राइणा पुच्छिओ रक्खिओ-जहा तुमं हिंडसि ?, सो भणइ-आमं हिंडामि. ताहे राइणा लोगो पुच्छिओ भणइ-आमं हिंडइत्ति. ताहे सो निद्दोसो कीरति। एवं चेव सायत्थाणीया तित्थयरा आरक्खियअत्थानीओ साहू उवगरणं नगरत्थाणीअं कुंथुकीडीयत्थोणीया चोराक्खिवणदंसणचरित्ताणि हिरण्यात्यानीयानि संसारो दंडो। वं केनविआ यरिएणं भणितो सीसो दिवसे दिवसे पडिलेहड, जाहे न पेच्छइ ताहे न पडिलेहेइ, एवं तस्स अपडिलेहंतस्स सो संसत्तो उवही न सक्को सोढुं. ततो तेणं तित्थयराणा भग्गा, नं च दव्वं अपरिभोगं जायं. एवं अन्नो भणितो. तेन य सव्वं कयं तित्थ्ययरायणा य कया, एवं परिभोगं जायं ॥ अमुमेवार्थं गाथायामुपसंहरन्नाह-

मू. (४३४) तित्थकरा रायाणो साहू आरक्खि भंडगं च पुरं।
तेनसरिग्गा य पाणा तिगं च रयणा भवो दंडो ॥

वृ. उक्ता छद्मस्थविषया द्रव्यप्रत्युपेक्षणा, इदानीं भावप्रत्युपेक्षणां प्रतिपादयन्नाह-

मू. (४३५) किं कय किं वा लेसं किं वक्खित्तं तवं च न करेमि ?
पुव्वावरत्तकाले जागरओ भावपडिलेहा ॥

वृ. सुगमा ॥ नवरं 'पुव्वावरत्तकाले' त्ति पूर्वरात्रकाले रात्रिप्रहरद्वयस्याद्यस्यान्तः-उपरिष्टादपरात्रकाल-स्तस्मिन जाग्रतः- चिन्तयतः। एवमुक्ता छद्मस्थविषया भावप्रत्युपेक्षणा, तदभणनाच्च भणिता प्रत्युपेक्षणा, इदानीं प्रत्युपेक्षणीयमुच्यते, तत्प्रतिपादयन्नाह-

मू. (४३६) ठाणे उवगरणे या थंडिलउवथंममग्गपडिलेहा।
किमाई पडिलेहा पुव्वण्हे चेव अवरण्हे ॥

वृ. 'स्थाने' कायोत्सर्गादि त्रिविधं वक्ष्यति, तथा 'उपकरणं' पात्रकादि 'स्थण्डिलं' यत्र कायिकादि क्रियते, 'अवष्टम्भनं' अवष्टम्भस्तप्रत्युपेक्षणा 'मार्गः' पन्था, यदेतत्पञ्चकमुपन्यस्तम्, एतद्विषया प्रत्यु-पेक्षणा भवति। किमाई पडिलेहा पुव्वण्हे' किमादिका प्रत्युपेक्षणा पूर्वाह्णे ?, मुखवस्त्रिकादिकेति, अपराह्णे किमादिका ?, तत्रापि मुखवस्त्रिकादिका। द्वारगाथेयं, भाष्यकारः प्रतिपदं व्याख्यानयति, तत्र सामान्येन तावत्सर्वाण्येव द्वाराणि व्याख्यानयन्नाह-

मू. (४३७) ठाणनिसीयतुयट्टणउवगरणाईण गहणनिक्खेवे।
पुव्वं पडिलेहे चक्खुणा उ पच्छा पमज्जेज्जा ॥ [भा. ३५१]

वृ. स्थानं-कायोत्सर्गस्तं कुर्वन् प्रथमं चक्षुषा प्रत्युपेक्षते पश्चात्प्रमार्जयति, तथा निषादनम्-उपविशनं त्वग्वर्त्तनं-स्वपनं तथोपकरणादीनां ग्रहणं निक्षेपं च, आदिग्रहणात्स्थण्डिलमवष्टम्भञ्च गृह्णाति, एतानि सर्वा-ण्येव पूर्वं चक्षुषा प्रत्युपेक्ष्यन्ते पश्चाद्रजोहरणेन प्रमृज्यन्ते। इदमेतामेव द्वारगाथां विशेषेण व्याख्यानयन्नाह-

मू. (४३८) उड्ढं निसीयतुयट्टण ठाणं तिविहं तु होइ नायव्वं।
उड्ढं उच्चाराई गुरुमूलपडिक्कमागम्म ॥ [भा. ३५२]

वृ. तत्र स्थानं त्रिविधं ज्ञातव्यं-ऊर्द्धस्थानं निषादनास्थानं त्वग्वर्त्तनास्थानं च, तत्राद्यमूर्द्धस्थानं व्या-ख्यानयन्नाह-'उड्ढं उच्चाराई' ऊर्द्धस्थानके कायोत्सर्गः, स चोच्चारादीन् कृत्वा, आदिग्रहणात्प्रश्रवणं कृत्वा, ततश्च गुरुमूले आगत्य प्रतिक्रामतः, किम् ? - ईर्यापथिकां प्रतिक्रामतो वति ऊर्द्धस्थानम् ॥

मू. (४३९) पक्खे उस्सासाई परतो अविनीय मग्गओ वाऊ।
निक्खमपवेसवज्जण भावासन्ने गिलाणाई ॥ [भा. ३५३]

वृ. कायोत्सर्गं च कुर्वता आचार्यपक्षाक-पक्षाग्रदेशे न स्थातव्यं, यतो गुरूच्छ्वासेनाभिहन्यते, नापि पुरतः स्थातव्यं, यतः पुरतोऽविनीतत्वमुपजायते गुरुमाच्छाद्य निष्ठतो, नापि मार्गतो-गुरोः पृष्ठतो यतो गुरोर्वायुनिरोधेन ग्लानता भवति, वायुरपानेन निर्गच्छति, कथं पुनः स्थातव्यं ?, तत्र निष्क्रमप्रवेशस्थानं वर्जयित्वा कायोत्सर्गं करोति, 'भावासन्ने'त्ति उच्चारादिना पीडितः स च निर्गमे रुद्धे सञ्ज्ञानिरोधं करोति, ततश्च ग्लानता भवति, अथ निर्गच्छति तदा कायोत्सर्गभङ्गः ।

मू. (४४०) भारे वेयणमग्गमुच्छपरियावछिंदणे कलहो ।
अव्वाबाहे ठाणे सागारपमज्जणा जयणा ॥ [भा. १५४]

वृ. तथा च मार्गे कायोत्सर्गकरणे एते दोषाः, भिक्षामटित्वा कश्चिदायातः साधुः, स भारे सति यदि प्रतिपालयति ततो वेदना भवति, तथा क्षपकः कश्चिदभक्तं गृहीत्वाऽऽयातस्तथाऽन्य उष्णसंतप्त आयातः, अनयोर्द्वयोरपि प्रतिपालयतोः क्रमेणार्थयासन्नं मूर्च्छापरितापौ भवतः, क्षपकस्य मूर्च्छा उष्णतप्तस्य परितापः, अर्थेन कायोत्सर्गं छित्त्वा प्रविशन्ति ततः परस्परं कलहो भवति, तस्माद्व्याबाधे स्थाने कायोत्सर्गः कर्तव्यः तद्दोषभयात् । 'सागारपमज्जणा जयण'त्ति, यदा तु परस्परं कलहो भवति, तस्माद्व्याबाधे स्थाने कायोत्सर्गः एतद्दोषभयात् । 'सागारपमज्जणा जयण'त्ति, यदा पुनः सागारिको भवति कायोत्सर्गं कुर्वंस्तदाऽप्रमार्जनमेव करोति, यतनया वा प्रमार्जयति, कथं ?, रजोहरणबाह्यनिषद्यया प्रमृज्य कोत्सर्गस्थानं ततस्तां निषद्यां सागारिकपुरत एकान्ते मुञ्चति, गते च तत्र गृह्णाति ।

उक्तमूर्ध्ववंस्थानं, इदानीं निषीदनास्थानं प्रतिपादयन्नाह-

मू. (४४१) संडास पमज्जित्ता पुणोवि भूमिं पमज्जिआ निसिए ।
राओ य पुव्वभणिअं तुयट्टणं कप्पई न दिवा ॥ [भा. १५५]

वृ. सण्डासं-जङ्घोर्वोरन्तरालं प्रमृज्य उत्कुटुकः स्थित्वा पुनर्भुवं प्रमृज्य निषीदेत् । उक्तं निषीदनास्थानं, इदानीं त्वग्वर्तनास्थानमुच्यते, रात्रौ पूर्वोक्तमेवत्यग्वर्तनं, दिवा न पुनस्त्वग्वर्तनं न कल्पते, नोक्तं भगवद्भिः, किं सर्वथैव न कल्पते ? इति, न इत्याह-

मू. (४४२) अद्धाणपरिस्संतो गिलाणवुड्ढा अणुन्नवेत्ताणं ।
संथारुत्तरपट्टो अत्थरण निवज्जणाऽऽलोगं ॥ [भा. १५६]

वृ. अद्धानपरिश्रान्तस्तथा ग्लानो वृद्धश्च, एते त्रयोऽप्यनुज्ञाप्याचार्यास्तेषु संस्तारकोत्तरपट्टा आस्तीर्य 'निवज्जणं'त्ति स्वपन्ति 'आलोक'न्ति सावकाशं मुक्त्वाऽभ्यन्तरे स्वपन्ति, मा भूत् सागारिकस्य शङ्का स्यात्, यदुत-नूनं रात्रौ सुरतसङ्गे स्थितोऽयमार्यः, कुतोऽन्यथाऽस्य निद्रेति ? । त्वग्वर्तनास्थानमुक्तं, तत्प्रतिपादनाच्च स्थानद्वारमुक्तमपि । इदानीमुपकरणप्रतिपादनायाह

मू. (४४३) उवगरणाईयाणं गहणे निक्खेवणे य संकमणे ।
ठाणे निरिक्खयपमज्जणं काउं पडिलेहए उवहिं ॥ [भा. १५७]

वृ. उपकरणादीनां 'ग्रहणे' आदाने यत्स्थानं तन्निर्गत्य-निरूप्य प्रमृज्य च उपधिः प्रत्युपेक्षणीय इत्यत्र संबन्धः, तथा उपकरणादीनां च निक्षेपणे च यत्स्थानं तन्निर्गत्य प्रमृज्य चोपधिः प्रत्युपेक्षणीयः, तथा उपकरणादीनामेव यत्संक्रमणं-स्थानात्स्थानान्तरसंक्रमणं तस्मिन यत्स्थानं तन्निर्गत्य प्रमार्जनं कृत्वा उपधिं प्रत्युपेक्षेत, योऽयमादिशब्दः अयमुपधिप्रकार प्रतिपादनार्थः । उपकरणादिग्रहणनिक्षेपणसंक्रमणेषु यत्स्थानं तस्य निरीक्षणप्रमार्जनमुक्तं, इदानीमुपकरणप्रत्युपेक्षणा प्रतिपादनायाह-

मू. (४४४) उवगरणं वत्थपाए वत्थे पडिलेहणं तु वोच्छामि।
पुव्वण्हे अवरण्हे सुहणंतगमाइ पडिलेहा ॥ [भा. १५८]

वृ. उपकरणप्रत्युपेक्षणा द्विविधा-'वत्थे पाए'त्ति वस्त्रविषया पात्रविषया चेति, तत्र तावद्वस्त्रविषया प्रत्युपेक्षणा उच्यते, यतः प्रव्रजतः प्रथमं वस्त्रोपकरणमेव दीयते न पात्रोपकरणं, सा च वस्त्रप्रत्युपेक्षा भवतीत्यत आह-'मुहपोत्तीयमादि पडिलेह'त्ति मुखवस्त्रिका आदौ यस्याः प्रत्युपेक्षणायाः सा मुखवस्त्रिकादिका प्रत्युपेक्षणा, पूर्वाह्णेऽपराह्णे चेति, तत्र मुखवस्त्रिकाऽऽदिवस्त्रप्रत्युपेक्षणामाश्रित्य विधिः-

मू. (४४५) उड्ढं थिरं अतुरिअं सव्वं ता वत्थ पुव्व पडिलेहे।
तो बिइअं पप्फोडे तइयं च पुणो पमज्जेज्जा ॥

वृ. तत्र वस्त्रोर्ध्वं कायोर्ध्वं च आचार्यमतेन भविष्यति, चोदकमतेन वक्ष्यमाणं, तत्र वस्त्रोर्ध्वं च यथा भवति तथा प्रत्युपेक्षेत, 'थिरं'ति यथास्थितं सुगृहीतं कृत्वा प्रत्युपेक्षेत, 'अतुरिअं'ति अत्वरितं स्तिमितं प्रत्युपेक्षेत-निरीक्षेत, 'सव्वं'ति सर्वं-कृत्स्नं वस्त्रं तावत्पूर्वं-प्रथमं प्रत्युपेक्षणत-चक्षुषा निरीक्षेत, एवं तावदर्वाग्भागः, परभागोऽपि परावृत्त्य एवमेव चक्षुषा निरीक्षेत, 'तो बिइयं पप्फोडे'ति ततो द्वितीयायां वारायां प्रस्फोटयेद्वस्त्रं षट् पुरिमाः कर्त्तव्या इत्यर्थः, 'तइयं च पुणो पमज्जेज्ज'त्ति तृतीयायां वारायां हस्तगतान् प्राणिनः प्रमार्जयति। इदानीमेनामेव गाथां भाष्यकारो व्याख्यानयन्नाह-

मू. (४४६) वत्थे काउड्ढंमि अ परवयणठिओ गहाय दसिअंते।
तं न भवति उक्कुडुओ तिरिअं पेहे जह विलित्तो ॥ [भा. १५९]

वृ. तत्रोर्द्धं द्विधा-वस्त्रोर्द्धं कायोर्द्धं चेति, अस्मिन्नुक्ते 'परवयणं'ति परः चोदकस्तस्य वचनं परवचनं, किं तद् ? इत्याह, 'ठिओ गहाय दसिअंति'त्ति स्थितस्य-ऊर्द्धस्थस्य गृहीत्वा दशान्ते वस्त्रं प्रस्फोटयतः कायोर्द्धं च वस्त्रोर्द्धं च यथा भवति, एवमुक्ते सत्याचार्य आह-'तन्न भवति' तदेतन्न भवति यच्चोदकेनाभिहितं, कुतः ?, यस्मात् 'उक्कुडुओ तिरिअं पेहे' उत्कुटुकस्थितस्तिर्यक् प्रसार्य वस्त्रं प्रत्युपेक्षेत, एतदेव च नः कायोर्द्धं वस्त्रोर्द्धं च, नान्यत्, यथा चन्दनादिना विलिप्ताङ्गः परस्परमङ्गानि न लगयति एवं सोऽपि प्रत्युपेक्षते, ततश्चैवमुत्कुटुकस्य कायोर्द्धं भवति, तिर्यक्प्रसारितवस्त्रस्य च वस्त्रोर्ध्वं भवति। 'उड्ढं'ति भणितं, इदानीं स्थिरसदानि पदानि भाष्यकार एव व्याख्यानयन्नाह-

मू. (४४७) घेत्तुं थिरं अतुरिअं तिभागबुद्धीय चक्खुणा पेहे।
तो बिइयं पप्फोडे तइयं च पुणो पमज्जेज्जा ॥ [भा. १६०]

वृ. गृहीत्वा 'स्थिरं' निविडं-दृढं वस्त्रं ततः प्रत्युपेक्षेत 'अत्वरितं' स्तिमितं प्रत्युपेक्षेत, 'तिभागबुद्धिए'त्ति भागत्रयबुद्ध्या इत्यर्थः, चक्षुषा प्रत्युपेक्षेत, ततो द्वितीयवारायां प्रस्फोटयेत् तृतीयवारायां प्रमार्जयेदिति पूर्ववत्। इदानीं प्रत्युपेक्षणां कुर्वता इदं कर्त्तव्यम-

मू. (४४८) अनच्चावियं अवलियं अनानुबंधिं अमोसलिं चेव।
छप्पुरिमा नव खोडा पाणी पाणपमज्जनं ॥

वृ. तत्र प्रत्युपेक्षणां कुर्वता वस्त्रमात्मा वा न नर्त्तयितव्यः, तथा अवलितं च वस्त्रं शरीरं च कर्त्तव्यं, 'अनानुबंधि'न्ति न अनुबन्धः अननुबन्धः सोऽस्मिन्नस्तीति अननुबन्धिअध प्रत्युपेक्षणं नानवरत-मास्खोटकादि कर्त्तव्यं सान्तरं-सविच्छेदमित्यर्थः, 'अमोसलि'न्ति न मोसली क्रिया यस्मिन प्रत्युपेक्षणे तदमोसलि प्रत्युपेक्षणं, यथा मुशलेनाटति ऊर्द्धमधस्तिर्यक् च, न एवं प्रत्युपेक्षणा कर्त्तव्या, किन्तु यथा

प्रत्युपेक्षणायाम् ऊर्ध्वं पोलिंदु न लगति न च तिर्यक्कुड्ये न च भूमौ तथा कर्त्तव्यं। 'छप्पुरिमा' तत्र वस्त्रं चक्षुषा निरूप्य-अवगाभागं निरूप्य त्रयःपुरिमाः कर्त्तव्याः, तथा परावर्त्य-परभागं निरूप्य पुनरपरेऽपि त्रयः पुरिमाः कर्त्तव्याः, एवं एतेषु पुरिमाः, षड्वाराः प्रस्फोटनानीत्यर्थः, 'नव खोड'त्ति नव वाराः स्फोटकाः कर्त्तव्याः पाणेरुपरि 'पाणी पाणमज्जणं'ति प्राणानां-कुन्थ्वादीनां पाणौ-हस्ते प्रमार्जनं नैवैव वाराः कर्त्तव्यः।

मू. (४४९) वत्थे अप्पाणंमि अ चउहा अनच्चाविअं अवलिअं च।
अनुबंधि निरंतरया तिरिउड्ढह य घट्टणा मुसली॥ [भा. १६१]

वृ. वस्त्रे आत्मनि चेत्यनेन पदद्वयेन भङ्गकचतुष्टयं सूचितं भवति, ततश्चानेन प्रकारेण अनर्त्तायितं चतुर्धा भवति, कथं ?, तत्थं अनच्चावितं अप्पाणं च अनच्चावितं एगो भंगो १, तथा वत्थं अनच्चावितं अप्पाणं च नच्चावितं २, तहा वत्थं नच्चावितं अप्पाणं अनच्चावितं ३, तथा वत्थंपि नच्चावितं अप्पाणंपि नच्चावितं ४, एस चउत्थो, एत्थ पढमो भंगो सुद्धो। एवं अवलितेऽपि-अवलितेऽपि चत्वारो भङ्गाः, यथा वत्थं अवलितं अप्पाणं च अवलितं दगो १, तहा वत्थं अवलितं अप्पाणं च वलितं २, तहा अप्पाणं अवलितं वत्थं वलितं ३, अप्पाणंपि वलितं वत्थंपि वलितं ४, एत्थवि पढमो भंगो सुद्धो। एवं अवलितेऽपि-अवलितेऽपि चत्वारो भङ्गाः, यथा वत्थं अवलितं अप्पाणं च अवलितं एगो १, तहा वत्थं अवलितं अप्पाणं च वलितं २, तहा अप्पाणं अवलितं वत्थं वलितं ३, अप्पाणंपि वलितं वत्थंपि वलितं ४, एत्थवि पढमो भंगो सुद्धो। 'अनुबंधि निरंतरय'त्ति अनुबन्धो निरन्तरतोच्यते, ततश्च न च अनुबन्धेन-निरन्तर्येण प्रत्युपेक्षणा कर्त्तव्या। इदानीममीषां व्याख्यानयन्नाह-'तिरिउड्ढह य घट्टणा मुसलि'त्ति त्रिविधा मुसली-तिर्यग्घटना १, उर्ध्वघट्टना २ अधो घट्टना ३ चेति, तत्र प्रत्युपेक्षणां कुर्वन् वस्त्रेण तिर्यक् कुड्यादि घट्टयति उर्ध्वं कुड्यिकादिपटलानि घट्टयति अधो भुवं घट्टयति, एवं न मुशली-न किञ्चित्प्रत्युपेक्षणां कुर्वन् वस्त्रेण घट्टयति, इदं तु वक्ष्यमाणं न कर्त्तव्यं, किं तद् ?, इत्याह-

मू. (४५०) आरभडा सम्मद्दा वज्जयव्वा य मोसली तइया।
पप्फोडणा चउत्थी विक्खित्ता वेइया छट्ठा॥

वृ. 'आरभड'त्ति आरभटा प्रत्युपेक्षणा न कार्या, 'सम्मद्द'त्ति संमर्दा न कार्या, वर्जनीया च मोसली तृतीया, प्रस्फोटना चतुर्थी विक्षिप्ता पञ्चमी वर्जनीया, वेदिका षष्ठी वर्जनीयेति द्वारगाथेयं।

इदानीं प्रतिपदं भाष्यकारो व्याख्यानयति, तत्राद्यावयवव्याचिख्यासयाऽऽह-

मू. (४५१) विहिकरणं च तूरिअं अन्नं व गेण्हणाऽऽरभडा।
अंतो व होज्ज कोणा निसियण तत्थेव संमद्दा॥ [भा. १६२]

वृ. विहियं-विपरीतं यत्करणं तदारभडाशब्देनोच्यते, सा चारभटा प्रत्युपेक्षणा न कार्या, विपरीता प्रत्युपेक्षणा न कार्येत्यर्थः, वा-विकल्पे, इयं वाऽऽरभटोच्यते यदुतत्वरितः-आकुलं यदन्यान्यवस्त्रग्रहणं तदारभटाशब्देनोच्यते, सा च प्रत्युपेक्षणा न कार्या, त्वरितमन्यान्यवस्त्रग्रहणं न कर्त्तव्यमित्यर्थः। "आरभड"त्ति भणितं, इदानीं संमर्दा व्याख्यायते, तत्राह-'अंतो व होज्ज कोणा निसियण तत्थेव संमद्दा' अन्तः-मध्यप्रदेशे वस्त्रस्य संवलिताः कोणा यत्र भवन्ति सा संमर्दोच्यते, सा प्रत्युपेक्षणा तादृशी न कार्या, 'निसियण तत्थेव'त्ति तत्रैव-उपधिकायां उपविश्य यत्प्रत्युपेक्षणाकरणं सा वा संमर्दोच्यते, सा च न कर्त्तव्येति। "संमद्द"त्ति भणितं, इदानीं मोसलीवर्जनप्रतिपादनायाह-

मू. (४५२) मोसलि पुव्वुद्दिट्ठा पप्फोडणं रयुग्गिरणे चेव।

विक्खेवं तुरक्खेवो वेइयपणगं च छद्दोसा ॥ [भा. १६३]

वृ. मोसली पूर्वमेवोद्दिष्टा-पूर्वमेव भणितेत्यर्थः "मोसलि"त्ति गयं, इदानीं पप्फोडणत्ति व्याख्यायते-'पप्फोडण रेणुगुंडिए चेव' प्रकर्षेण धूननं-स्फोटनं तद्रेणुगुण्डितस्यैव वस्त्रस्य करोति, यथाऽन्यः कश्चिद्गृहस्थः रेणुना गुण्डितं सद्वस्त्रं प्रस्फोटयति एवमसावपि. इयं च न कर्त्तव्या। 'पप्फोडण'त्ति गयं, "विक्खित्त"त्ति भण्यते. तत्राह-'विक्खेवं तुरक्खेवो' विक्षेपो तु तां विद्धि यत्र विद्धि यत्र वस्त्रान्यत्र क्षेपणं, एतदुक्तं भवति-प्रतिलेख्यित्वा वस्त्रमन्यत्र जवनिकादौ क्षिपति, अथवा विक्षेपो-वस्त्राञ्चलानाभुग्नवं यत्क्षेपणं स उच्यते, स च प्रत्युपेक्षणां न कर्त्तव्यः। "विक्खित्त"त्ति गयं, "वेदिय"त्ति व्याख्यायते, तत्राह 'वेदिअपणगंच' वेदिका पञ्चप्रकारा, तंजहा-उद्ध्ववेइया अहो जत्तुयाण इत्थे काऊण पडिलेहइ. तिरियंवेइया संडासगमंते हत्थे काऊण पडिलेहइ, दुओवेदिया बाहाओ अंतरा दोन्नि अत्तुगुणा काऊण पडिलेहति, एवंतोवेदिया एगजत्तुअं बाहाणं अंतरे काऊणं पडिलेहेति. इदं वेदिकापञ्चकं प्रत्युपेक्षणां कुर्वता न कर्त्तव्यम। 'छ दोसा' इति एत आरभटादयः षड् दोषाः प्रत्युपेक्षणायां न कर्त्तव्या इति। तथा एते च दोषाः प्रत्युपेक्षणायां न कर्त्तव्याः-

मू. (४५३) पसिढिल पलंब एगामोसा अनेगरूवधुणा।
कुणइ पमाणपमायं संकियगणनोवगं कुज्जा ॥

वृ. पसिढिलं-दृढं न गृहीतं 'पलंब'त्ति प्रलम्बमानाञ्चलं गृहीतं ततश्च प्रलम्बते, 'लोला'इति भूमौ लोलते हस्ते वा पुनः पुनर्लोलयति प्रत्युपेक्षयन्। लोलत्ति गयं, "एगामोस"त्ति मज्झे गहिऊण हत्थेहिं वत्थं घसंतो तिभागावसेसं जाव नेइ दोहिं वा पासेहिं जाव गेण्हणा इत्यर्थः. अहवा तिहिं अंगुलीहिं घेत्तव्वं तं एक्काए चेव गेण्हइ, अहवा 'नेगामोसा' इति केचित्पठन्ति, तत्र न एके आमर्शाः अनेकामर्शाः, अनेकस्पर्शा इत्यर्थः। 'अनेग-रूवधुणण'त्ति अनेगपगारं कंपेइ, अथवा अनेगाणि वत्थाणि एगओ काऊण धुणइ। तथा 'कुणइ पमाणपमायं'ति पुरिमेषु खोटकेषु वा यत्प्रमाणमुक्तं तत्र प्रमादं करोति, एतदुक्तं भवति-तान् पुरिमादीन् ऊनानधिकान् वा करोति, 'संकियगणणोवगं कुज्ज'त्ति शङ्किता चासौ गणना च शङ्कितगणना तां शङ्कितगणनामुपगच्छति या प्रत्युपेक्षणा सा शङ्कितगणनोपगा तामेवंगुणविशिष्टां न कुर्यात्, एतदुक्तं भवति-पुरिमादयः शङ्किता-न जानामि कियन्तो गता इति ततो गणनां करोति, अथवाऽनाभोगात शङ्किते सति गणनोपगां-गणनामुपगच्छतीति गणनोपगा तां गणनोपगांगणनायुक्तां प्रत्युपेक्षणां करोति पुरिमादीन गणयन्नित्यर्थः। द्वारगाथेयम्, इदानीं भाष्यकारः प्रतिपदं व्याख्यानयन्नाह-

मू. (४५४) पसिढिलमघणं नतिराइयं च विसमगहणं व कोणं वा।
भूमीकरलोलणया कट्ठणगहणेक्कआमोसा ॥ [भा. १६४]

वृ. प्रशिथिलं-अघनं अदृढं गृहीतं 'अतिरायितं वा' अताडितं वा प्रशिथिलमुच्यते। 'पसिढिलं'त्ति गयं, पलंबत्ति भण्यते-'विसमगहणं व कोणंव'त्ति विषमग्रहणे सति लम्बकोणं भवति वस्त्रं। 'पलंब'त्ति गयं, लोला भण्यते. तत्राह-'भूमीकरलोलणया' भूमौ लोलयति करे-हस्ते वा लोलयति प्रत्युपेक्षमाणः। 'लोला'त्ति गयं, एगामोसत्ति भण्यते, तत्राह-'कट्ठणगहणेगआमोसा' मध्ये वस्त्रं गृहीत्वा तावदाकर्षणं करोतियावत्त्रिभागशेषजातग्रहणं जातं, इयं 'एगामोसा' एकाकर्षणमित्यर्थः, अथवाऽऽकर्षणे ग्रहणे चानेके आमोसा अनेकानि स्पर्शनानि. एतदुक्तं भवति-तद्वस्त्रमनेकधा स्पृशति ॥ एगामोसत्ति गयं

मू. (४५५) धुनना तिण्ह परेणं बहुणि वा घेत्तु एक्कई धुनइ।

खोडणपमज्जणासु य संकियगणणं करि पमाई ॥ [भा. १६५]

वृ. 'धुनना' कम्पना 'त्रयाणां' पृथिव्यादीनां परत इति यदुक्तं तत्रैकवस्त्रापेक्षया, बहूनि वा गृहीत्वा वस्त्राणि 'एकीकृत्य' योगपद्येन 'धूनाति' प्रस्फोटयति। 'अनेगधुनन'त्ति भणितं, "कुणइ पमाणे पमायं" ति भवइ. तत्राह- 'खोडणपमज्जणासु य' खोटकेषु नवसु प्रमार्जनासु च नवसु प्रमादं करोति। "कुणइ पमाणे पमायं" ति गयं, "संकिए गणणोवगं" ति भवइ. तत्राह- 'संकियगहणं करि पमाई' शङ्किते सति गणनां करोति यः प्रमादी भवति, एवमियमित्थंभूता प्रत्युपेक्षणा न कर्तव्येति स्थितं। किंविशिष्टा पुनः कर्त्तव्या इति?, अत आह-

मू. (४५६) अनूनाइरित्तपडिलेहा, अविवच्चासा तहेव य।
पढमं पयं पसत्थं, सेसाणि उ अप्पसत्थाणि ॥

वृ. अन्यूनातिरिक्ता अविपर्यासेन प्रत्युपेक्षणा कर्तव्या. एभिश्च त्रिभिः पदैरष्टौ भङ्गाः सूचिताः- एतेषां प्रथमं पदं प्रशस्तं शेषाणि तु 'अप्रशस्तानि' अनादेयानि। इदानीं भाष्यकारः शुद्धाशुद्धप्रदर्शनायाह-

मू. (४५७) नवि ऊणा नवि रित्ता अविवच्चासा उ पढमओ सुद्धो।
सेसा होइ असुद्धा अदंसिया सत्त जे भंगा ॥ [भा. १६६]

वृ. नापि न्यूना नाप्यतिरिक्ता अविपर्यासेण च. अयं प्रथमो भङ्गः शुद्धः, शेषं सुगमं। इदानीं ये तेऽशुद्धाः सप्त भङ्गका प्रदर्शितास्त एवं भवन्ति-

मू. (४५८) [illegible] अरुणावासग? पुव्वं २ परोप्परं ३ पाणिपडिलेहा ४ ॥

वृ. खोटका यदि ऊना अधिका वा क्रियन्ते ततोऽशुद्धता भवति, प्रमार्जना च नवसङ्ख्याया न्यूना अधिका वा क्रियते ततोऽशुद्धता भवति, वेलायां च न्यूनायामधिकायां वा प्रत्युपेक्षणायां क्रियमाणायामशुद्धा भङ्गका भवन्ति। एवं ते न्यूनाधिका भवन्तीति विज्ञेयाः। आह-वेलायां न्यूनाधिकायां प्रत्युपेक्षणायां क्रियमाणायां दोष उक्तस्तत्कस्यां पुनर्वेलायां प्रत्युपेक्षणा कर्तव्या?, तत्र केचनाहुः- 'अरुणावासग पुव्वं' अरुणावश्यकं पूर्वमेव कृत्वा ततः अरुणोदगमनसमये-प्रभास्फाटनवेलायां प्रत्युपेक्षणा क्रियते १, अपरे त्वाहुः- अरुणोग्गमेमंति-प्रभायां स्फाटितायां सत्यामावश्यकं 'पुव्वं' प्रथमं कृत्वा ततः प्रत्युपेक्षणा क्रियते २. अन्ये त्वाहुः- 'परोप्परं'ति परस्परं यदा मुखानि विभाव्यन्ते तदा प्रत्युपेक्षणा क्रियते ३, अन्ये त्वाहुः- 'पाणिपडिलेहा' यस्यां वेलायां पाणिरेखा दृश्यन्ते तस्यां वेलायां प्रत्युपेक्षणा क्रियते ४। सिद्धान्तवाद्याह-

मू. (४५९) एते उ अनादेसा अंधारे उग्गएवि हु न होंगे।
मुहपोत्तियनिसिज्जचोले कप्पतिगदुपट्टथुई सूरो ॥

वृ. ते सर्वे एव 'अनादेशाः' असत्पक्षाः. यतः 'अंधारे उग्गएवि हु न होंगे' अन्धकारे प्रतिश्रये उद्गतेऽपि सूर्ये रत्या न दृश्यन्ते तस्मादसत्पक्षाएते, शेषं पक्षत्रयं सान्धकारत्वादेव दूषितं द्रष्टव्यं. तत्कस्यां पुनर्वेलायां प्रत्युपेक्षणा कार्या? इत्यत्र आह- 'मुख' इति मुखवस्त्रिका 'रय' इति रजोहरणं 'निसेज्जा' रयहरणस्योपरितनाः 'चोले'त्ति चोलपट्टकः 'कप्पतिग'त्ति एक आर्णिको द्वौ सौत्रिकौ. 'दुपट्ट'त्ति संस्तारकपट्ट उत्तरपट्टकश्च 'थुइ'त्ति प्रतिक्रमणप्रतिस्रमणयोर्ज्ञानदर्शनचारित्रार्थं स्तुतित्रये दत्ते सति एतेषां मुखवस्त्रिकादीनां प्रत्युपेक्षणासमाप्त्यनन्तरं यथा सूर्य उद्गच्छति एष प्रत्युपेक्षणाकालविभाग इति। यदुक्तं प्रागपवादविषयोऽसौ प्रत्युपेक्षणायां न कर्तव्य इत्युत्सर्गतोऽभिहितं, तस्यापवादमाह-

मू. (४६०) पुरिमपच्छिमविवच्चासा सागारिए करिज्ज उवहिवच्चासं।

आपुच्छित्ताण गुरुं पहुव्वमाणंयरं वितहं ॥

वृ. तत्र विपर्यासः त्रिविधः-वस्त्रपात्रकंबलादिषु उपधिविषयोऽसौ, तत्रोपधिविषयासप्रतिपादनायाह-'सागरिए करेज्ज उवहिवच्चासं' 'सागारिकं' स्त्रीनादिकं सन्त्यागत इति विपर्यासः क्रियते प्रत्युपेक्षणायाः, प्रथमं पात्रकाणि प्रत्युपेक्ष्यन्ते पश्चाद्वस्त्राणि। एवमत्र प्रत्युषसि विपर्यासः प्रत्युपेक्षणायाः, एवं विकालेऽपि सागारिकानागन्तुकान् ज्ञात्वा। इदानीं पुरुषविपर्यास उच्यते, तत्राह-'आपुच्छित्ताण गुरुं पहुव्वमाणं' आपृच्छ्य गुरुमात्मीयामुपधिं ग्लानसत्कां वा प्रत्युपेक्षते, कदा ? अत आह-'पहुव्वमाणे' यदा आभिग्रहिका उपधिप्रत्युपेक्षकाः 'पहुव्वंति' पर्याप्नुवन्ति तदेवं करोति 'इतरं वितहं'ति इतरेऽभिग्रहिका यदा न सन्ति तदा प्रथममात्मीयामुपधिं प्रत्युपेक्षमाणस्य 'वितथं' अनाचारो भवतीत्यर्थः, तत्र न केवलं प्रत्युपेक्षणाकाले उपधिविपर्यासं कुर्वतो वितथं-अनाचारो भवति। एवं च वितथं भवति-

मू. (४६१) पडिलेहणं करेंतो मिहो कहं कुणइ जणवयकहं वा।
देइ पच्चक्खाणं वाएइ सयं पडिच्छइ वा॥

वृ. प्रत्युपेक्षणां कुर्वन्मिथः कथां मैथुनसंबद्धां करोति जनपदकथां वा, प्रत्याख्यानं वा श्रावकादिर्ददाति, 'वाचयति' कञ्चित्साधुं पाठयतीत्यर्थः, 'सयं पडिच्छति वा' स्वयं वा प्रतीच्छति-आत्मना वाऽऽलापं दीयमानं प्रतीच्छति-गृह्णाति। एतच्च कुर्वन् षण्णामपि कायानां विराधको भवति, अत आह-

मू. (४६२) पुढवी आउक्काए तेऊवाऊवणस्सइतसाणं।
पडिलेहणापमत्तो छण्हंपि विराधओ होइ॥

वृ. सुगमा॥ कथं पुनः कायानां षण्णामपि विराधकः ?, अत आह-

मू. (४६३) घडगाइपलोट्टणया मट्टिअ अगनी य बीय कुंथाई।
उदगगया व तसेयर ओमुय संघट्ट झावणया॥

मू. (४६४) इयदव्वओ छइहपि विराधओ भावओ इहलावि।
उवउत्तो पुनचाहू संपत्तए अयहओ अ॥ [प्र. २३]

वृ. स हि साधुः कुम्भकारशालादौ वसतौ प्रत्युपेक्षणां कुर्वन्ननुपयुक्तस्तोयघटादि प्रलोठयेत्, स च तोयभृतो घटो मृत्तिकाग्निबीजकुन्थ्वादीनामुपरि प्रलुठितस्ततश्चैतान् व्यापादयेत्, यत्राग्निस्तत्र वायुरप्यवश्यंभावी, अथवाऽनया भङ्ग्या षण्णां कायानां व्यापादकः 'उदगगता व तसेयर'ति योऽसौ उदकघटः प्रलोठितस्तत्रस्था एव त्रसा भवन्ति पुनरकायाः 'इतर'ति वनस्पतिकायश्च, तथाविधास्तेन चाल्मुकं 'सङ्घट्टयेत्' चालयेत् ततश्च 'झावणया' ति तेनोल्मुकेन चालितेन सता प्रदीपनकं संजातं ततश्च संयमात्मनोर्विराधना जायेति। अथोपयुक्तः प्रत्युपेक्षणां करोति तत एतेषां जीवनिकायानामाराधको भवति, एतदेवाह-

मू. (४६५) पुढवी आउक्काए तेऊवाऊवणस्सइतसाणं।
पडिलेहणामाउत्तो छण्हंऽपाराहओ होइ॥

वृ. सुगमा॥ नवरम् 'आराधकः' अविराधको भवति। न केवलं प्रत्युपेक्षणा, अन्योऽपि यः कश्चिद् व्यापारो भगवन्मते सम्यक् प्रयुज्यते स एव दुःखक्षयायालं भवति, एतदेवाह-

मू. (४६६) जोगो जोगो जिनसासणंमि दुक्खक्खयाय पउंजंते।
अन्नोन्नमबाहाए अमवत्तो होइ कायव्वो॥

वृ. योगो योग इति वाप्सा, ततश्च व्यापारो जिनशासने प्रयुज्यमानो दुःखक्षयाय 'प्रयुज्यमानः'

क्रियमाणः. कथम् ? 'अन्योऽन्याबाधया' परस्परपीडया. एतदुक्तं भवति-यथा क्रिया क्रियमाणाऽन्येन क्रियान्तरेण न बाध्यते एवमन्योऽन्याबाधया प्रयुज्यमानः 'असक्तो' असंपक्तः अविरुद्धो भवति कर्तव्यः।

मू. (४६७) जोगे जोगे जिनसासणंमि दुक्खक्खयट्ठया पउंजंते।
एक्कक्कंमि अनंता वट्टंता केवली जाया!

वृ. सुगमा। नवरम्-एकैकस्मिन् 'योगे' व्यापारे वर्त्तमाना अनन्ताः केवलिनो जाता इति॥

मू. (४६८) एवं पडिलेहंता अईयकाले अनंतगा सिद्धा।
चोयगवयणं सययं पडिलेहेमो जओ सिद्धी॥

वृ. एवं प्रत्युपेक्षणां कुर्वन्तोऽतीतकालेऽनन्ताः सिद्धाः। एवमाचार्येणोक्ते सति 'चोयगवयणं' अत्र चोदकवचने-चोदकपक्षः, किं तद् ? इत्याह-'सततं पडिलेहमो' यदेवं प्रत्युपेक्षणाप्रभावादनन्ताः सिद्धास्ततः सततमेव प्रत्युपेक्षणां कुर्मः. किमन्येनानुष्ठितेन ?, यतस्तत एव सिद्धिर्भवति। आचार्यः प्राह-

मू. (४६९) संसयमु अवट्टंता पडिलेहंतोवि दंसमाराहे।
जइ पुन सव्वाराधनमिच्छसि तो णं निसामेहि॥

वृ. शेषेषु योगेषु अवर्त्तमानः यः एक आत्मीयको न स्यात्, प्रत्युपेक्षणां कुर्वन्नपि दर्शनाराधक एवा-सौ, न तु सर्वमाराधितं भवति, तेन यदि पुनः संपूर्णामाराधनामिच्छसीति, शेषं सुगमं। कथं च सर्वाराधको भवति ?, अत आह-

मू. (४७०) पंचिंदिएहिं गुत्तो मनिमाईतिविहकरणमाउत्तो।
नवनियमसंजमंमि अ जुत्तो आराधओ होइ॥

वृ. पञ्चभिरिन्द्रियैर्गुप्तो मनसादिना त्रिविधेन करणेन युक्तः' यत्नवान् तपसा-द्वादशविधेन युक्तः नियमः-इन्द्रियनियमो नोइन्द्रियनियमश्च तेन युक्तः, संयमः-सप्तदशप्रकारः पृथिवीकायो आउक्कायो तेउक्कायो वाउक्कायो वणप्फइकायो बेंदियतेंदिअचउरिंदिअपंचिंदिअजीवकायसंजमो पेहाउपेहापमज्जणपरिट्ठवण-मनोवइकाए। अत्र संयतः सन् मोक्षस्याराधको भवति प्रव्रज्याया वाऽराधकः। द्वारगाथेयम्। इदानीं भाष्यकार एतां गाथां प्रतिपदं व्याख्यानयति, तत्र 'पंचिंदिएहिं गुत्तो'त्ति प्रथमावयवं व्याख्यानयन्नाह-

मू. (४७१) इंदियविसयनिरोहो पत्तसुवि रागदोसनिग्गहणं।
अकुसलजोगनिरोहो कुसलोदय एगभावो वा॥ [भा. १६७]

वृ. इन्द्रियाणामपि इन्द्रियाणि तेषां विषयाः- शब्दादयः तेषां च यो निरोधः सा पञ्चेन्द्रियगुप्तिरभिधीयते, अयमपरामर्शः शब्दादिविषयाणां निरोधः, तथा 'पत्तसुवि रागदोसनिग्गहणं'ति तथा 'प्राप्तेषु' गोचरमागतेष्वपि शब्दादिषु विषयेषु रागद्वेषयोर्निग्रहणं यत्सा पञ्चेन्द्रियगुप्तता. तत्रेष्टशब्दादिविषयप्राप्तौ रागं न गच्छति अनिष्टशब्दादिविषयप्राप्तौ द्वेषं न गच्छतीति, भणिता पञ्चेन्द्रियगुप्तता, इदानीं मनमाईति-विहकरणमाउत्तया' भवति, तत्राह-'अकुसलजोगनिरोहो' अकुशलानाम्-अशोभनानां मनोवाक्काय-योगानां-व्यापाराणां यो निरोधः सा त्रिविधकरणयुक्तता, तथा 'कुसलोदय'त्ति कुशलानां-प्रशस्तानां मनोवाक्काथव्यापाराणां य उदयः सा त्रिविधकरणगुप्तता तथा 'एगभावो व'त्ति न कुशलेषु योगेषु प्रवृत्ति-र्नाप्यकुशलेषु योगेषु प्रवृत्तिर्यो मध्यस्थता सा त्रिविधकरणगुप्तता। भणिता त्रिविधकरणगुप्तता इदानीं नवनि-

मू. (४७२) अब्भिंतरबाहिरगं तवोवहाणं दुवालसविहं तु।
इंदियतो पुव्वुत्तो नियमो कोहाडओ विडओ॥ [भा. १६८]

वृ. आभ्यन्तरं बाह्यं च यत्तप उपधानम्-उपदधातीत्युपधानम्-उपकरोतीत्यर्थः, तच्चोपधानं द्वादशविधमपि तप उच्यते। तवो गओ, नियमो भन्नति, स च द्विधा-इन्द्रियनियमो नोइन्द्रियनियमश्च तत्रेन्द्रियतः-इन्द्रियाण्यङ्गीकृत्य पूर्वोक्तं। नियमः, 'कोहाइओ विइओ'त्ति द्वितीयो नोइन्द्रियनियमः क्रोधादिकः, आदिग्रहणान्मानमायालोभा गृह्यन्ते, एतेषां नियमोनिरोधः।

नियमोत्ति गयं. इदानीं संजमो भन्नइ, स च सप्तदशप्रकारस्तत्राह-

मू. (४७३) पुढविदगअगनिमारुअवणस्सइबेतिचउपंचिंदी।
उज्जीव पोत्थगाइसु गहिएसु असंजमो जेणं॥ [भा. १६९]

वृ. पृढविदगअगनिमारुअवणस्सइबेइंदिअतेइंदिअचउरिंदिअपंचिंदिआ। तथा 'अजीव'त्ति 'अजीवेषु' पनकसंसक्त पुस्तकादिषु गृहीतेषु असंयमो भवति येन तत्र ग्राह्य, आदिशब्दात् दूसपणगं तणपणगं च एतेषु अपरिगृहीतेषु संयमः परिगृहीतेषु त्वसंयमः। तहा-

मू. (४७४) पेहेत्ता संजमो वुत्तो, उपेहित्तावि संजमो।
पमज्जेत्ता संजमो वुत्तो, परिट्ठावेत्तावि संजमो॥ [भा. १७०]

वृ. प्रेक्षासंयमः-चक्षुषा यन्निरूपणं, ततश्चैवं पूर्वं चक्षुषा निरूपयतः प्रेक्षासंयम उक्तः। 'उप्पेहित्तावि संज-मो'त्ति उपेक्षा द्विप्रकारा तां कुर्वतः संयम उक्तस्ता च वक्ष्यति। 'पमज्जित्ता संजमो वुत्तो'त्ति प्रमार्जयतः संयम उक्तः। 'परिट्ठवेत्तावि संजमो'त्ति 'परिष्ठापयतः' परित्यजतोऽपि पानकादि अतिरिक्तं संयम उक्तः। एवमेते चतुर्दश, मनोवाक्कायसंयमश्च त्रिविध उक्त एव द्रष्टव्यः। इदानीं भाष्यकृद्व्याख्यानयति-प्रथमगाथार्थः एकाकिकारणिकगमनयतनायामुक्तः, अजीवपुस्तकादिसंयमोऽपि अचित्तवनस्पतिगमनयतनायां व्याख्यात एव द्रष्टव्यः, इदानीं यदुपन्यस्तं 'उपेहित्तावि संयमो'त्ति तत्र क्वचिदव्याख्यातमिति व्याख्यानयन्नाह-

मू. (४७५) ठाणाइ जत्थ चेए पुव्वं पडिलेहिऊण चेएज्जा।
संजयगिहिचोयणउचोयणे य वावारओवेहा॥ [भा. १७१]

वृ. स्थानं-ऊर्ध्वस्थानं कायोत्सर्गादि, आदिग्रहणान्निषीदनस्थानं त्वग्वर्तनास्थानं च गृह्यते, तत्स्थानादि यत्र चेतयते 'चिती संज्ञाने' जानाति चेष्टते करोति अभिलषतीत्यर्थः, तत्र पूर्व-प्रथमं प्रत्युपेक्ष्य-चक्षुषा निरीक्ष्य ततश्चेतयते स्थानं-कायोत्सर्गादि, आदिग्रहणान्निषीदनस्थानं त्वग्वर्तनास्थानं च. उक्तः प्रेक्षासंयमः, इदानीं उपेक्षासंयम उच्यते, सा चोपेक्षा द्विविधा, कथं?-संयतव्यापारोपेक्षा गृहस्थव्यापारोपेक्षा च, तत्र यथासङ्ख्यं संयतस्य चोदनविषया व्यापारोपेक्षा, गृहस्थस्य चाचोदनविषया व्यापारोपेक्षा, एतदुक्तं भवति-साधुं विषीदन्तं दृष्ट्वा संयमव्यापारेषु चोदयतः संयमव्यापारोपेक्षा, उपेक्षाशब्द श्चात्र 'ईक्ष दर्शने' उप-सामीप्येनेक्षा उपेक्षा, तथा गृहस्थस्य व्यापारोपेक्षा, गृहस्थमधिकरणव्यापारेषु प्रवृत्तं दृष्ट्वाऽचोदयतो गृहस्थव्यापारोपेक्षा उच्यते, उपेक्षाशब्दश्चात्रावधीरणायां वर्त्तत इति।

इदानीं 'परिट्ठावेत्तावि संजमो'त्ति व्याख्यायते, तत्राह-

मू. (४७६) उवगरणं अइरेगं पाणाई वाऽवहट्टु संजमणं।
मागासिएऽपमज्जण संजम सेसे पमज्जणया॥ [भा. १७२]

वृ. 'उपकरणं' वस्त्रादि यदतिरिक्तं गृहीतं तथा 'पाणाइ वा' तथा पानकादि वा यदतिरिक्तं गृहीतं तद 'अवहट्टु'त्ति परित्यज्य, किं?-'संजमणा' संयमो भवतीति, आदिग्रहणादभक्तं वाऽतिरिक्तं परित्यज्य

संयमः। अधेदानीं "पमज्जितावि संजमो" व्याख्यायते-"सागारिए पमज्जण संजमो' सागारिकानामग्रतो यत्पादाग्रमार्जनमसावेव संयमः, 'सेसे पमज्जणय'त्ति 'शेषे' सागारिकाद्यभावे प्रमार्जनमेव संयमः।

मू. (४७७) जोगत्तिग पुव्वभणिअं समत्तपडिलेहणाए सज्झाओ।
चरिमाए पोरिसीए पडिलेह तओ उ पायदुगं॥ [भा. १७३]

वृ. योगत्रयं पूर्वमेव व्याख्यातं, "मनमाईतिविहकरणमाउत्तो" इत्यस्मिन् ग्रन्थे, अत्रापि तथैव द्रष्टव्यं। उक्तः सप्तदशप्रकारः संयमः, तत्प्रतिपादनाश्चोक्ता। वस्त्रान्वपेक्षणा, तत्समाप्तौ च किं कर्तव्यमित्यत आह-'समत्तपडिलेहणाए सज्झाओ' समाप्तायां प्रत्युपेक्षणायां स्वाध्यायः कर्तव्यः सूत्रपौरुषीत्यर्थः पादोनप्रहरं यावत्। इदानीं पात्रप्रत्युपेक्षणामाह- 'चरिमाए' चरमायां पादोनपौरुष्यां प्रत्युपेक्षेत 'ताहे'त्ति 'तदा' तस्मिन् काले स्वाध्यायानन्तरं पात्रकद्वितयं प्रत्युपेक्षते। इदानीं यदुक्तं 'चरमपौरुष्यां पात्रकद्वितयं प्रत्युपेक्षणीयं' तत्र पौरुष्येव न ज्ञायते किंप्रमाणा? अतस्तत्प्रतिपादनायाह-

मू. (४७८) पोरिसि पमाणकालो निच्छयववहारिओ जिनक्खाओ।
निच्छयओ करणजुओ ववहारमतो परं वोच्छं॥

वृ. पौरुष्याः प्रमाणकालो द्विविधः- निश्चयतो व्यवहारतश्च ज्ञातव्यः, तत्र 'निश्चयतो' निश्चयनयाभिप्रायेण करणयुक्तो-गणितन्यायात्, अतः परं 'व्यावहारिको' व्यवहारनयमतेन वक्ष्ये। तत्र निश्चयपौरुषीप्रमाणकालप्रतिपादनायाह-

मू. (४७९) अयणाडंयदिनमझे अट्ठगुणेगट्ठिभाइए लद्धं।
उत्तरदाहिणमाई पोरिसि पयसुन्नपक्खेवा॥

वृ. दक्षिणायनं उत्तरायणदिनानि उत्तरायणे दक्षिणायनदिनानि मीलयित्वा गण्यन्ते, स राशिरष्टभिर्गुण्यते, एकषष्ट्या भागो ह्रियते, लब्धेऽङ्गुलानि, द्वादशाङ्गुलैः पादः, यावता भवति उत्तरस्यां मकरदिने ४ पादाः। व्यवहारतोऽधुना पौरुषीप्रमाण-कालप्रतिपादनायाह-

मू. (४८०) आसाढे मासे दो पया, पोसे मासे चउप्पया।
चित्तासोएसु मासेसु, तिपया हवइ पोरिसी॥

मू. (४८१) अंगुलपोहिभागा खयवुड्ढी होइ जं अहोरत्ते।
तेणट्ठगुणकारो एक्केही सरतेणं॥ [प्र. २५]

वृ. आषाढे मासे पौर्णमास्यां द्विपदा पौरुषी भवति, पदं च द्वादशाङ्गुलं ग्राह्यं, पौषे मासे पौर्णमास्यां चतुष्पदा पौरुषी भवति, तथा चैत्राश्वयुजपौर्णमास्यां त्रिपदा पौरुषी भवति॥ अधुना कियती वृद्धिः कियत्यु दिने? कियती वा हानिरित्येतत्प्रतिपाद्यन्नाह-

मू. (४८२) अंगुलं सत्तरसेणं, पक्खेणं तु दुअंगुलं।
वड्ढए हायए वावि, मासेणं चउरंगुलं॥

वृ. आषाढपौर्णमास्या आरभ्याङ्गुलं सप्तरात्रेण वर्द्धते, पक्षेण तु अङ्गुलद्वयं वर्धते, तथा मासेनाङ्गुलचतुष्टयं वर्द्धते, इयं च वृद्धिरुत्तरोत्तरं तावत्तेया यावत्पौषमास्यपौर्णमास्यां पदचतुष्टयेन पौरुषी जायते, हानिरपि पौर्णमास्याः परत एवमेव च द्रष्टव्या, यदुताङ्गुलं सप्तरात्रेणापह्रियते, पक्षेणाङ्गुलद्वयं, मासेनाङ्गुलचतुष्टयं, एवमियं हानिरुत्तरोत्तरं तावत्तेया यावदाषाढपौर्णमास्यां द्विपदा पौरुषी जायेत। स्थापना चेयम- आसाढपुन्निमाए पद २ पोरिसी, सावणपुन्निमाए पद २ अंगुल ४, भद्दवयपुन्निमाए पद २ अंगुल ८,

आसोयपुन्निमाए पद ३, कत्तियपुन्निमाए पद ३ अंगुल ४, मग्गसिरपुन्निमाए पद ३ अंगुल, ८, पोसपुन्निमाए पद ४, एतिअं जाव बुड्ढी होइ। माहपुन्निमाए पद ३ अंगुल ८ फग्गुणपुन्निमाए पद ३ अंगुल ४, चेत्तपुन्निमाए पद ३, वइसाहपुन्निमाए पद ३, वइसाहपुन्निमाए पद २ अंगुल, ८, जेट्ठपुन्निमाए पद २ अंगुल ४, आसाढपुन्निमाए पद २, इत्तिअं जाव हाणी। मावत्थो इमो-सावणस्स पढमदिवसाओ आरब्भ वुड्ढी जदा भवति तदा दिवसे दिवसे अंगुलस्स सत्तमे भागे किंचिप्पूणा वड्ढइ, इमं भणिअं होइ-सावणस्स पढमदिवसे दोहिं पएहिं पोरिसी होइ अंगुलस्स सत्तमेण भागेण किंचिप्पूणेण अहिया, एवं बितियदिवसे दो पयाइं दो अ सत्तमभागा अंगुलस्स किंचिप्पूणा, एवं एक्काए वुड्ढीए ताव जाव सावणपुन्निमाए दो पयाइं चत्तारि य अंगुलाइं वुड्ढी जाया, एवं इमाए कमवुड्ढीए ताव नेयव्वं जाव पोसमासपुन्निमा, तत्थ चउप्पया पोरिसी, ततो परं माहपढमदिवसाउ आरब्भ हाणी एतेण चेव कमेण नायव्वा जाव आसाढपुन्निमा। आह-इदमुक्तं सप्तभिर्दिवसैरङ्गुलं वर्द्धते, नथा पक्षेणाङ्गुलद्वयं वर्द्धते इत्युक्तं, तदयं विरोधः, कुतो ?, यदा पक्षेणाङ्गुलद्वयं वर्द्धते तदाऽङ्गुलं सप्तभिः स्याद्दिवसैर्वर्द्धते ?, आचार्यस्त्वाह, सत्यमेतत्, किन्त्वनेन तत्प्रख्याप्यते-यत् किञ्चिदूनायां पौरुष्यां पौरिसी मा भून्पूर्णायां, प्रत्यासन्नमङ्गभवात्, न्यूनता च पौरुष्यामेवं भवति, यदि याऽसौ मातुमारब्धा छाया यस्यां यदि प्रदीर्घायां भुञ्जते तदा न्यूना पौरुषी, अधिका च तदा भवति यदा सा छाया स्वल्पा भवतीति। अधुना येषु मासेष्वहोरात्राणि पतन्ति तान् मासान् प्रतिपादयन्नाह-

मू. (४८३) आसाढबहुलपक्खे भद्दवए कत्तिए य पोसे य।
फग्गुणवइसाहेसु य बोद्धव्वा ओमरत्ताओ ॥

वृ. आषाढस्य मासस्य बहुलपक्षे-कृष्णपक्षेऽहोरात्रं पतति, तथा भाद्रपदबहुलपक्षे कार्तिकबहुलपक्षे पौषबहुलपक्षे फाल्गुनबहुलपक्षे वैशाखबहुलपक्षे चाहोरात्राणि पतन्ति। 'ओमरत्तं' अहोरात्रं, न च तदहोरात्रैः पतद्भिरपिपौरुष्या न्यूनता वेदितव्या, अस्यार्थस्य ज्ञापनार्थमिदमुक्तं। एवं तावत्पौरुष्याः प्रमाणमुपगतं, या तु पुनश्चरमपौरुषी सा कियत्प्रमाणा भवतीत्यतस्तत्स्वरूपप्रतिपादनायाह-

मू. (४८४) जेट्ठामूले आसाढसावणे छहिं अंगुलेहिं पडिलेहा।
अट्ठहिं बीअतियंमि अ तइए दस अट्ठहि चउत्थे ॥

वृ. ज्येष्ठामूले मासे तथाऽऽषाढश्रावणे षड्भिरङ्गुलैर्यावदद्यापि पौरुषी न पूर्यते तावच्चरमपौरुषी भवति। 'अट्ठहिं बितिअतियंमि' त्ति भाद्रपदे आश्वयुजि कार्तिके चास्मिन् द्वितीयत्रिके ऽष्टभिरङ्गुलैर्यावदद्यापि पौरुषी न पूर्यते तावच्चरमपौरुषी भवति। 'तइए दस' त्ति मार्गशिरे पौषे माघे च एतस्मिन् तृतीये त्रिके दशभिरङ्गुलैर्यावदद्यापि पौरुषी न पूर्यते तावच्चरमपौरुषी भवति। 'अट्ठहिं चउत्थे' त्ति फाल्गुने चैत्रे वैशाखे च अस्मिंश्चतुर्थे त्रिकेऽष्टभिरङ्गुलैर्यावन्न पूर्यते पौरुषी तावच्चरमपौरुषी भवति, एतस्यां चरमपौरुष्यां पात्रकाणि प्रतिलेखयन्ति। स च पात्रकप्रत्युपेक्षणासमये पूर्वं कं व्यापारं करोतीत्याह-

मू. (४८५) उवउज्जिऊण पुव्वं तल्लेसं जइ करेइ उवओगं।
सोएण चक्खुणा घाणओ य जीवाहं फासेणं ॥

वृ. 'उपयुज्य' उपयोगं दत्त्वा पूर्वमेव, यदुक्तं मयाऽस्यां वेलायां पात्रकाणि प्रत्युपेक्षणीयानीत्येवमुपयुज्य पुनः 'तल्लेश्य एव' प्रत्युपेक्षणाभिमुख एव 'जति'त्ति 'यतिः' प्रव्रजितः पात्रकसमीपे उपविश्य 'उपयोगं करोति' मतिं व्यापारयति, कथं ?-'श्रोत्रेण' श्रोत्रेन्द्रियेण पात्रके उपयोगं करोति, कदाचित्तत्र भ्रमरादिं गृह्णन्तं शृणोति, पुनस्तं यतनयाऽपनीय तत्पात्रकं प्रत्युपेक्षते, तथा चक्षुषा उपयोगं ददाति कदाचित्तत्र मूषि-

कोरकेणादिज्जो भवति, ततस्तद्यतनयाऽपनयति. घ्राणेन्द्रियेण ज्ञात्वा यतनयाऽपनयति, जिह्वया च रसं ज्ञात्वा यत्र गन्धस्तत्र रसोऽपि गन्धपुद्गलरोधो यदा व्यामो भवति, तदा जिह्वया रसं जानातीति, स्पर्शनेन्द्रियेण चोपयोगं ददाति कदाचित्तत्र मूषिकादिः प्रविष्टस्तन्निःश्वासवायुश्च शरीरे लगति, ततश्चैवमुपयोगं दत्त्वा पात्रकाणि प्रत्युपेक्ष्यन्ते ॥ इदानीं भाष्यकृत्किंचिदव्याख्यानयन्नाह-

मू. (४८६) पडिलेहणियाकाले फिडिए कल्लाणगं तु पच्छित्तं ।
पायस्स पासु बद्धो सोधाइवउत्त तल्लेसो ॥ (भा. १७४)

वृ. प्रत्युपेक्षणाकाले 'फिटिते' अतिक्रान्ते एकं कल्याणकं यतः प्रायश्चित्तं भवति अतः पूर्वमुपयोगं प्रत्युपेक्षणाविषयं करोति। किंविशिष्टोऽसौ उपयोगं करोतीत्यत आह- 'पायस्स पासु बद्धो' पात्रकस्य पार्श्वे उपविष्टः श्रोत्रादिभिरुपयुक्त स्तल्लेश्यः- तच्चित्तो भवतीति। कथं पुनः पात्रकप्रत्युपेक्षणां करोतीत्यत आह-

मू. (४८७) मुहणंतएण गोच्छं गोच्छगलद्धिअंगुलीहिं पडलाइं ।
उक्कुडुयभाणवत्थे पलिमंथाइंमु तं न भवे ॥

वृ. 'मुहणंतएण'त्ति रजोहरणमुखवस्त्रिकया 'गोच्छं' वक्ष्यमाणलक्षणं प्रमार्जयति, पुनस्तमेव गोच्छकमङ्गुलीभिर्गृहीत्वा पटलानि प्रमार्जयति। अत्राह परः- 'उक्कुडुयभाणवत्थे' उत्कुटुकः सन् 'भाजनवस्त्राणि' गोच्छकादीनि प्रत्युपेक्षयेत् यतो वस्त्रप्रत्युपेक्षणा उत्कुटुकेनैव कर्त्तव्या, आचार्य आह- 'पलिमंथाइंमु तं न भवे' तदेतन्न भवति यच्चोडुकेनोक्तं यतः पलिमन्थः सूत्रार्थयोर्भवति, कथं ?, प्रथममसौ पादप्रोञ्छने निषीदति पश्चात् पात्रकवस्त्रप्रत्युपेक्षणायामुत्कटुको भवति पुनः पात्रकप्रत्युपेक्षणायां पादप्रोञ्छने निषीदति, एवं तस्य साधोश्चिरयतः सूत्रार्थयोः पलिमन्थो भवति यतः अतः पादप्रोञ्छने निषण्णेनैव पात्रकवस्त्रप्रत्युपेक्षणा कर्त्तव्येति ॥ ततः किं करोतीत्याह-

मू. (४८८) चउकोण भाणकन्नं पमज्ज पाएसरीय तिगुणं तु ।
भाणस्स पुप्फगं तो इमेहिं कज्जेहिं पडिलेहे ॥

वृ. पटलानि प्रत्युपेक्ष्य पुनर्गोच्छकं वामहस्तानामिकाङ्गुल्या गृह्णाति, ततः पात्रकेसरिकां-पात्रक मुखवस्त्रिकां पात्रकस्थापनमेव गृह्णाति, 'चउक्कोण'त्ति चतुरः पात्रबन्धकोणान् संवर्त्योपरिस्थापितान् प्रमार्जयति, पुनर्भाजनस्य कर्णं प्रमार्जयति, पुनश्च पात्रकेसरिकयैव 'तिगुणं' तिस्रो धारा बाह्यतोऽभ्यन्तस्तस्तिस्र एव धाराः प्रमार्जयति, ततः 'भाणस्स' पात्रकस्य 'पुप्फगं' बुध्नं ततः एतानि वक्ष्यमाणलक्षणानि कार्याणि यदि न भवन्ति ततः प्रथमं बुध्नं पात्रकस्य प्रत्युपेक्ष्यते। कानि पुनस्तानि कार्याणि ?

मू. (४८९) मूसयरयउक्केरे, घणसंताणए इय ।
उदय मट्टिआ चेव, एमेया पडिवत्तिओ ॥

वृ. कदाचित्तत्र मूषिकोत्करस्तो लग्नं भवति ततस्तद्यतनयाऽपनीयते, तथा घनः सन्तानको वा-कदाचित् तत्र कोलिकसंतानकं लग्नं स्यात् ततस्तद्यतनयाऽपनीयते। तथा 'उदए'त्ति कदाचिदुदकं लग्नं भवति, साद्रीया भूमेस्तत्र लग्नं लगति, तत्र यतनां वक्ष्यति, 'मट्टिआ चेव' कदाचित् मृत्तिका कोल्थलकारिकायाः संबन्धिनी लगति तत्र यतनां वक्ष्यति, एवमेताः प्रतिपत्तयः-प्रकाराः-भेदा यदि न भवन्ति ततो बुध्नं प्रत्युपेक्ष्यते। कुतः पुनस्तत्प्रकारादिसम्भवः ? इत्यत आह-

मू. (४९०) नवगनिवेसे हराउ उक्केरो मूसएहिं उक्किन्नो ।
निल्लमहि हरतनु वा ठाणं भत्तुण पविसेज्जा ॥

वृ. 'नवगणिवेसे' यत्र ग्रामादौ ते साधव आवासिताः सन्तवः- अभिनवो निवेशः कदाचिद्भवति, तत्र च पात्रकस्वामीव मृत्तिकाकल्केन उत्कीर्णस्तेन रजसा पात्रकं गुण्ठ्यते। मूरगरउक्केरेत्ति भणितं, 'निद्धमहिहरतनु वा' तथा स्निग्धायां-आर्द्रायां भुवि 'हरतनु व' त्ति सलिलबिन्दव उन्मज्ज्य लगन्ति ततो भुव उन्मज्ज्य पात्रकस्थापनकं भित्त्वा प्रविशेत् स लग्नो भवेत् तद्यतनां वक्ष्यति। उदएत्ति गयं, इह कस्मादुदकस्थानमेव-मुक्तम ?, उच्यते, पृथिवीकायस्य घनमन्तानस्य च तत्रैव नातिगतनार्थं। तथा-

मू. (४९१) कोत्थलगारिअघणं घनसंताणाइया व लग्गेज्जा।
उक्केरं सट्ठाणे हरतनु संचिट्ठ जा सुक्को ॥

वृ. 'कोत्थलकारिका' गृहकारिका गृहकं मृन्मयं करोति तत्र यतनां वक्ष्यति। मंडूइत्ति भणितं, घनसन्तानिका वा कदाचिल्लगति घनसंतानिया लग्गा, आदिशब्दात्तदण्डकादिः। अधुना सर्वेषामेवैतेषां यतनां प्रतिपादयन्नाह-'उक्केरं सट्ठाणे' मृत्तिकोत्केरः स्वस्थाने मुच्यते-यतनया मृत्तिकोत्करमध्य एव स्थाप्यते प्रमृज्य, 'हरतनु' अथ हरतनुः अधस्तात्सलिलबिन्दव उन्मज्ज्य लग्नास्तत्रैवावत्प्रतिपालयति यावदेते शोषमुपगच्छन्ति, ततः पश्चात्पात्रं प्रत्युपेक्ष्यते। उदएत्ति गयं ॥

मू. (४९२) इयरेसु पोरिसितिगं संचिक्खावेत्तु तत्तिअं छिंदे।
सव्वं वावि विगिंचइ पोराणं मट्टिअं ताहे ॥

वृ. 'इयरेसु' त्ति कोत्थलकारिआघनसंताणयादियाण 'पोरिसितिगं संचिक्खावेउ' त्ति प्रहरत्रयं यावत्तत्पात्रकं संचिक्खावेत्तु प्रतिपालयति, यदि तावत्यांऽपि वेलया नापयाति ततः पात्रकस्थापनादेस्तावन्मात्रं छित्त्वा परित्यज्यते। 'सव्वं वावि विगिंचति' अन्येषां वा पात्रकस्थापनादीनां सद्भावे सर्वमेव तत्पात्रस्थापनादि परित्यजति। 'पोराणं मट्टिअं ताहे' त्ति अथ तत्कोत्थलकागृहकं न सचेतनया मृत्तिकया कृतं किन्तु पुराणमृत्तिकया ततस्तां पुराणमृत्तिकां 'ताहे' त्ति तस्मिन्नेव प्रतिलेखनाकालेऽपनयति यदि तत्र कृमिकास्तया न प्रवेशिता इति।

मू. (४९३) पत्तं पमज्जिऊणं अंतो बाहिं सइं तु पप्फोडे।
केइ पुण तिन्नि वारा चउरंगुल भूमि पडणभया ॥

वृ. इदानीं तत्पात्रकं पात्रकेसरिकया-मुखवस्त्रिकया तिस्रो वारा बाह्यतः प्रमृज्य संपूर्णास्ततो हस्ते स्थापयित्वाऽभ्यन्तरतस्त्रयो वाराः पुनः समन्ततः 'सइं तु पप्फोडे' त्ति सकृद-एकां वारामधोमुखं कृत्वा भूम्यां प्रस्फोटयेत्, एवं केचिदाचार्या ब्रुवते, केचित्पुनराचार्या एवं भणन्ति, तदेतत्तिस्रो वाराः प्रस्फोटनीयं, एतदुक्तं भवति-एकां वारां प्रमृज्य पश्चादधोमुखं प्रस्फोट्यते पुनरपि प्रमृज्य प्रस्फोट्यते ३, एवं तास्तिस्रो वाराः प्रस्फोटनीयं। तच्च पात्रकं भुव उपरि कियद्दूरे प्रत्युपेक्षणीयमित्यत आह 'चउरंगुल भूमि' चतुर्भिरङ्गुलैर्भुव उपरि धारयित्वा प्रत्युपेक्षणीयं, मा भूत्पतनभङ्गभयं स्यादिति। एतं तावत्प्रत्यूषसि वस्त्रपात्रप्रत्युपेक्षणा उक्ता। इदानीमुपधिं पात्रकं च प्रत्युपेक्ष्य किमुपधेः कर्तव्यं ? क्व वा पात्रकं स्थापनीयमित्यत आह-

मू. (४९४) विंटिअबंधनधरणं अगनी तेने य दंडियक्खोभे।
उवहडधरणबंधन वासासु अबंधणा ठवणा ॥

वृ. उपधिविण्टिकानां बन्धनं कर्तव्यं, 'धरणं' त्ति पात्रकस्य चात्मसमीपे-आत्मात्सङ्गे धरणं कार्यम्, अनिक्षिप्तमित्यर्थः, किमर्थं पुनरेतदेवं क्रियते ? यदुपधिका बध्यते पात्रकमनिक्षिप्तं क्रियत इति ?, उच्यते,

'अगनि' त्ति 'अग्निभयात्' प्रदीपनभयात् स्तेनकभयात् दण्डिकक्षोभाच्च एतदेवं क्रियते, कस्मिन् पुनः काले क्रियते कस्मिन पुनः काले एतदेवं न क्रियते इत्यत आह-'उउबद्धे' ऋतुबद्ध उच्यते शीतकाल उष्णकालश्च, तत्र पात्रकधरणमुपधेश्च बन्धनं कर्त्तव्यं 'वासासु' त्ति वर्षाकाले 'अबंधन' त्ति उपधेरबन्धनं कर्त्तव्यं-उपधिर्न बध्यते, 'ठवण' त्ति पात्रकं च निक्षिप्यते-एकदेशे स्थाप्यते, प्रयोजनमुपधेरबन्धने पात्रकस्य च निक्षेपणे वक्ष्यति। इदानीं भाष्यकारो व्याख्यानयन्नाह-

मू. (४९५) रयताण भाण धरणा उउबद्धे निक्खिवेज्ज वासासु।
अगनीतेनभएण व रायक्खोभे विराधनया॥ [भा. १७५]

वृ. रजस्त्राणस्य भाजनस्य च धरणम्-अनिक्षेपणं कर्त्तव्यं, कदा ?- 'ऋतुबद्धे' शीतोष्णकालयोः, वर्षासु पुनर्भाजनं निक्षिपेदेकान्ते, किमयं पुनर्भाजनस्य उत्सङ्गे धरणं क्रियते ? अत आह-'अगनी' अग्निभयेन-प्रदीपनकभयेन स्तेनभयेन वा राजक्षोभेण वा, मा भूदाकुलस्य गृह्णतः पतितमन्येनात्मविराधना संयमविराधना वा स्यात॥

मू. (४९६) परिगलमाणा हीरज्ज डहणा भया तहेव छक्काया।
गुत्तो व सयं डज्झे हीरज्ज व जं च तेन विना॥ [भा. १७६]

वृ. अग्न्यादिक्षोभे निर्गच्छत आकुलस्य अपरिबद्धा परिगलति ततश्च परिगलमाना केनचिदपह्रियते 'डहण' त्ति दह्येत वा अबद्धा सती उपधिर्यादृग् गृह्यते, 'भया' इति आकुलस्य निर्गच्छतोऽनासन्नं पात्रकं गृह्णतो 'भेदो वा' विनाशो वा भवेत्, ततश्च षट्कायस्यापि विराधना संभवति। 'गुत्तो व सयं डज्झे' संमूढो वा उपधिपात्रग्रहणे स्वयं दह्येत, स्तेनकसंक्षोभे च सति उपधिपात्रकग्रहणव्याक्षेपेण स्तेनकैः-स्तेनच्छेरपह्रियते, 'जं च तेन विन'त्ति यच्च 'तेन विना' उपधिपात्रकादिना विना भवति आत्मविराधना संयमविराधना च तत्तदवस्थमेवेति। आह-पुनः किं कारणं वर्षासु उपधिर्न बध्यते पात्रकाणि वा निक्षिप्यन्ते ?, उच्यते-

मू. (४९७) वासासु नत्थि अगनी नेव य तेना उ दंडिया सत्था।
तेन अबंधण ठवणा एवं पडिलेहणा पाए॥ [भा. १७७]

वृ. वर्षासु नास्ति अग्निभयं नापि च स्तेनभयं, स्तेनाश्चात्र पल्लीपतिकादयो द्रष्टव्याः, यतस्त एव वर्षासु प्रतिबन्धेन नागच्छन्तीति, दण्डिका-अन्यराजानो वर्षासु स्वस्थास्तिष्ठन्ति, विग्रहस्य तस्मिन् कालेऽभावात्, अतस्तेन कारणेन 'अबंधन' त्ति अबन्धनमुपधेः 'ठवण' त्ति पात्रकं च पार्श्वे निक्षिप्तं न क्रियते अपि तु स्थाप्यते-मुच्यते। एवं प्रत्युपेक्षणा पात्रविषया प्रतिपादिता, तत्प्रतिपादनाच्चोक्तमुपकरणप्रत्युपेक्षणाद्वारम्, इदानीं स्थण्डिलद्वारस्वरूपप्रतिपादनायाह-

मू. (४९८) अनावायमसंलोए अनावाए चेव होइ संलोए।
आवायमसंलोए आवाइ चेव संलोए॥

वृ. 'अनावायमसंलोए' त्ति न आपातः-अभ्यागमः स्वपक्षपरपक्षयोर्यत्र स्थण्डिले तदनापातं, 'संलोक दर्शने' न संलोकोन दर्शने छन्नस्थाद्यत्र स्थण्डिले तदनासंलोकम, अनापातं च तदसंलोकं च अनापातासंलोकं एको भेदः स्थण्डिलस्य, तथा 'अनवाए चेव होइ संलोए' नापातः कस्यचिद्यत्र तदनापातं अनापातं च संलोकं च अच्छन्नं च, एतदुक्तं भवतियत्र न पुरीषं व्युत्सृजन्ति तत्र न कस्यचिदापातः किन्तु दूरस्थिताः पश्यन्ति आकाशत्वादिति अयं द्वितीयो भेदः, तथाऽन्यदापातमसंलोकम,आपातः यत्र कश्चिदागच्छति असंलोकं-छन्नम् आपातं च तदसंलोकं च आपातासंलोकम, एतदुक्तं भवति-आपातोऽस्ति

गारिकागमो भवति दूरस्थिताश्च सागारिकाः पश्यन्ति साधुं व्युत्सृजन्तं, एष तृतीयो भेदः, तथाऽन्यत्र 'आवाए चेव होइ संलोए' त्ति 'आपातः' अभ्यागमः कस्यचिदत्र संलोकः संदर्शनं यत्र, तत्र आपातं च तत्संलोकं च आपातसंलोकं सागारिकागमो भवति दूरस्थिताश्च सागारिकाः पश्यन्ति साधुं व्युत्सृजन्तं, अयं चतुर्थः। इदानीं चतुर्थमेव तावद्भेदं व्याख्यानयति, यतस्तद्व्याख्याने ऽन्ये विधिप्रतिषेधद्वाराः सूत्राणा भवन्तीति।

मू. (४९९) तत्थावायं दुविहं सपक्खपरपक्खओ य नायव्वं।
दुविहं होइ सपक्खे संजय तह संजईणं च॥

वृ. तत्रापातं स्थण्डिलं 'द्विविधं' द्विप्रकारं वर्त्तते, कथं द्विविधं भवतीत्यत आह- 'सपक्खपरपक्खओ य नायव्वं' तत्र स्वपक्षः-संयतवर्गः परपक्षः-गृहस्थादिः, तत्र स्वपक्षापातं द्विविधं संयतस्वपक्षापातं संयतीस्वपक्षापातं च।

मू. (५००) संविग्गमसंविग्गा संविग्गमनुन्नएयरा चेव।
असंविग्गावि दुविहा तप्पक्खियएअरा चेव॥

वृ. तत्र ये ते संयतास्ते संविग्नाश्च असंविग्नाश्च, ये ते संविग्नास्ते मनोज्ञा इतर-अमनोज्ञाश्च, असंविग्ना अपि द्विविधाः- 'तत्पाक्षिकाः' संविग्नपाक्षिकाः इतरे-असंविग्नपाक्षिकाः निह्नवा नैव श्लाघन्ते तपस्विनस्तु ये निन्दन्ति। उक्तः स्वपक्षः, इदानीं परपक्ष उच्यते-

मू. (५०१) परपक्खेवि अ दुविहं मानुस्सं तेरिच्छिअं च नायव्वं।
एक्केक्केपि अ तिविहं पुरिसित्थिनपुंसगं चेव॥

वृ. परपक्षेऽपि च दुविहं स्थण्डिलं मानुष्यापातं तिर्यगापातं च ज्ञातव्यं, यत्तन्मानुष्यापातं तद्विविधं-पुरुषापातं स्त्र्यापातं नपुंसकापातं च, तिर्यगापातमपि त्रिविधं-तिर्यक्पुरुषस्तिर्यक्स्त्री तिर्यग्नपुंसकम।

मू. (५०२) पुरिसावायं तिविहं दंडिअ कोडुंबिए य पाभइए।
ते सोयऽसोयवाई एमेवित्थी नपुंसा य॥

वृ. तत्र पुरुषापातं त्रिविधं-'दण्डिकः' राजा 'कौटुम्बिकः' श्रेष्ठ्यादिः 'प्राकृतिकः' प्रकृतिनां मध्ये यः, अयं त्रिविधः पुरुषः, तेषामेककस्त्रयाणामपि पुरुषाणां शौचवादी अशौचवादी चेति। 'एमेवित्थी नपुंसा य' त्ति एवमेव दण्डिककौटुम्बिकप्राकृतिकरूपाः शौचाशौचवादिनः स्त्रीनपुंसका ज्ञातव्या एभिर्भेदैर्भिन्नाः।

इदानीं मनुष्याणां मध्ये द्वितीयं परपक्षभेदं प्रतिपादयन्नाह-

मू. (५०३) एए चेव विभागा परतित्थीणंपि होंति मनुयाणं।
तिरिआणंपि विभागा अओ परं कित्तइस्सामि॥

वृ. एत एव 'विभागा' भेदा दण्डिककौटुम्बिकप्राकृतिकशौचवाद्यशौचवादिरूपाः परतीर्थिकानामपि भवन्ति मनुष्याणां, इदानीं तिरश्चामपि 'विभागान' भेदाननतः परं 'कीर्तयिष्यामि' प्रतिपादयिष्यामीत्यर्थः।

मू. (५०४) दित्ताइणा तिरिआ जह्नमुक्कोलमज्झिमा तिविहा।
एमेवित्थिनपुंसा दुगुंछिअदुगुंछिआ नेया॥

वृ. द्विविधास्तिर्यञ्चो-दमाश्चादमाश्च-मारकाश्चामारकाश्चेति, पुनरेककास्त्रिविधा दीप्ता अदीप्ताश्च य उक्तास्ते जघन्या उत्कृष्टा मध्यमाश्च, तत्र जघन्या मूल्यमङ्गीकृत्य मेण्ढकादयः, उत्कृष्टा हस्त्यश्वादयः मध्यमा गवादयः। 'एमेवित्थिनपुंसा' ये ते दीप्ता अदीप्ताश्च ते सर्व एव प्राग्वत् स्त्रियः पुरुषानपुंसकाश्चेति, ते

च पुनः सर्वे एव 'जुगुप्सिताः' निन्दिताः 'अजुगुप्सिताः' अनिन्दिता ज्ञेयाः ॥ तदेतेषां भेदानां मध्ये केषामापाते सति गमनं कर्तव्यमित्यत आह-

मू. (५०५) गमन मणुन्न इयरे वितहायरणंमि होइ अहिगरणं ।
पउरदवकरण दट्ठुं कुसील सेहऽन्नहाभावो ॥

वृ. मनोज्ञानामापाते यत्र स्थण्डिले तत्र गमनं कर्तव्यं, 'इयरे' त्ति अमनोज्ञानामापाते गमनं न कर्तव्यं, यतः 'वितहायरणंमि होति अहिगरणं' ति विनयाचरणम्-अन्यथाचरणं आचार्या आचरणं तस्मिन् सति शिक्षकाणां परस्परं स्वस्वामाचार्यपक्षपातेन राटिर्भवति ततश्चाधिकरणं भवति । तथा कुशीलापातेऽपि न गन्तव्यं, यतः 'पउरदवकरण दट्ठुं' प्रचुरेण द्रवेण शौचकरणक्रियामुच्छोलनया दृष्ट्वा कुशीलानाम्-असंविज्ञानां संबन्धिनी पुनश्च सेहादीनामन्यथा भावोभवेत्, तद्यथैते शुचयो न वयमन्ये साधवः तस्मादेत एव शोभनाः पूज्याश्चेति तत्पार्श्वे यान्ति, संयतापातेऽयं दोषः, संयतीनां त्वापातमेकान्तेनैव वर्जनीयं ।

अधुना परपक्षमानुषापातदोषान दर्शयन्नाह-

मू. (५०६) जत्थऽम्हे वच्चामो जत्थ य आयरउ नाइवग्गो णे ।
परिभव कामेमाणा संकेयगदिन्नया वावि ॥

वृ. तत्पुरुषा एवमाहुः यदुत-यस्यैव दिशा पुरीषव्युत्सर्जनार्थं वयं व्रजामः यत्र चाचरति-सञ्ज्ञाव्युत्सृजनं करोति नः-अस्मदीयो ज्ञातिवर्गः- स्वजनयोषिद्वर्गः तस्यैव दिशा एतेऽपि व्रजन्ति, ततश्चैते परिभवमस्माकं कुर्वन्ति, 'कामेमाण' त्ति नूनमेते 'कामयन्ति' अभिलषन्ति स्त्रियं तेन तत्र प्रयान्ति, 'संकेतगदिन्नआ वावि' दत्तसङ्केता वा तेन स्व्यापाते व्रजन्ति । एते च दोषाः-

मू. (५०७) दव अप्प कलुस असई अवन्नपडिसेहविप्परीणामो ।
संकाडया दोसा पंडित्थि गहे य जं चऽन्नं ॥

वृ. कदाचिद्द्रवमल्पं भवति तत उक्तादिह 'कलुसं' ति कलुषं वा उत्कं भवति, 'असई' ति अभावो वा द्रवस्य भवति, ततश्चैते दोषाः-अवर्णः-अश्लाघा प्रवचने भवति, प्रधानो वा कश्चिदुड्डा प्रतिषेधं भिक्षादेः करोति, 'विपरिणामो वा' कस्यचिदमिनवश्राद्धस्य, शङ्कादयश्च दोषाः पण्डकस्त्रीविषया भवन्ति, 'गहिए जं चऽन्नं' ति पण्डकस्त्रीभ्यां बलादगृहीतस्य यच्चान्यदाकर्षणाकर्षादि भवति स च दोषः ।

अधुना तिर्यगापातदोषं दर्शयन्नाह-

मू. (५०८) आहणणाई दिन्ने गरहि अतिरिएसु संकभाडया ।
एमेव य संलोए तिरिए वज्जेतु मनुयाणं ॥

वृ. इहतिर्यगापाते-मार्गाकतिर्यगापाते आहननादिदोषाः, आदिग्रहणादभक्षणदोषश्च मर्कटादिकृतः, गर्हितेषु-गर्हणीयादिषु तिर्यक्षु मैथुनाशङ्कादयः आदिग्रहणात्तिःशङ्कमेव वा भवति । एवं तावदत आपातदोषा उक्ताः, 'एमेव य संलाए' एवमेव संलोकेऽपि 'मनुष्याणां' मनुष्यसंबन्धिनि दोषा द्रष्टव्याः, किन्तु 'तिरिए वज्जेतु' ति तिरश्चो मुक्त्वा, एतदुक्तं भवति-तिर्यक्संलोके न कश्चिद्दोषो भवतीति । इदानीं संलोके दोषान

मू. (५०९) कलुसदवे असई य व पुरिसालोए हवंति दोसा उ ।
पंडित्थीगुवि एए खल्ले वेउव्वि मुच्छा य ॥

वृ. कलुषे द्रवे सति 'असति' अभावे वा द्रवस्य पुरुषालोके पुरुषो यत्र स्थितः पश्यति, पण्डकस्त्री-जनितश्च शङ्कादोषाः पूर्वोक्ताः तथा 'खल्ले' बृहत्प्रमाणे सति 'वेउव्वि' ति विक्रियामापन्ने शौचे दृष्ट्वा यति

पण्डकस्य स्त्रिया वा मूर्च्छा अनुगतो भवति। उक्तं चतुर्थस्थण्डिलमापातसंलोकरूपम्, इदानीं तृतीयमापातसंलोकरूपमुच्यते, तत्राह-

मू. (५१०) आवायदोस तइए बिइए संलोयओ भवे दोसा।
ते दोवि नत्थि पढमे तहिं गमनं तत्थिमा मेरा॥

वृ. तृतीयं स्थण्डिलं यद्यप्यसंलोकं तथाऽप्यापातदोषेण दुष्टं वर्तते। उक्तं तृतीयम्, इदानीं द्वितीयमनापातसंलोकरूपमुच्यते, तत्राह-'बिइए संलोयओ भवे दोसा' द्वितीये यद्यप्यापातदोषो नास्ति तथापि संलोकता भवति दोषः, उक्तं द्वितीयं स्थण्डिलं, इदानीं प्रथममनापातमसंलोकमुच्यते, तत्राह-'ते दोवि नत्थि पढमे' ते दोषा आपातजनिताः संलोकजनिताश्च न सन्ति प्रथमे स्थण्डिलेऽतस्तत्रैव गमनं कर्त्तव्यं, तत्र चेयं 'मेरा' मर्यादा-वक्ष्यमाणा इयं नीतिरिति॥ तत्र यदुक्तं प्रथमस्थण्डिले गच्छतामियं मेरा साऽभिधीयते-

मू. (५११) कालमकालं सन्ना कालो तइयाइ सेसयमकालो।
पढमा पोरिसि आपुच्छ पानगमपुप्फियऽन्नदिसिं॥

वृ. तत्रैका कालेन सञ्ज्ञा भवति अन्याऽकालेन सञ्ज्ञा भवति, 'कालो ततियाए'त्ति 'कालः' सञ्ज्ञाकालः तृतीयायां पौरुष्यां भवति 'सेसयमकालो'त्ति शेषकाले या सञ्ज्ञा भवति साऽकालसञ्ज्ञेत्युच्यते, 'पढमपोरिसि'त्ति तत्राकालसञ्ज्ञा प्रथमपौरुष्यां यदि भवति ततः 'आपुच्छ पानग'त्ति आपृच्छ्य साधून्, एतदुक्तं भवति-साधूनेवमसावापृच्छति यदुत-भवतां किं कश्चिच्चङ्क्रमणभूमिं यास्यति न वा? इति, पुनः 'पानग'त्ति तद्वनुरूपं पानकमानयति, किंविशिष्टम्?-'अपुष्पितं' तरिकारहितं येन स्वच्छतया उदकभ्रान्तिर्भवति, 'अन्नदिसं'ति अन्यया पत्तनस्य दिशा उदकं गृह्यते अन्यया च दिशा चङ्क्रमणभूमिं प्रयाति येन सागारिकाशङ्का न भवति यदुतेति काञ्जिकेन शौचं कुर्वन्ति॥

मू. (५१२) अडरेगगहणं उग्गाहिऊ आलोअ पुच्छिअं गच्छे।
एसा उ अकालंमी अनहिंडिअ हिंडिआ कालो॥

वृ. अतिरिक्तं च तत्पानकं गृह्यते कदाचिदन्यसाधोः कार्यं भवेत् सागारिकपुरस्ताद्वा उच्छोलनादि क्रियते। 'उग्गाहिएणं'ति उद्ग्राहितेन-पात्रबन्धबद्धेन पात्रकेण समानीय गुप्तं सत् 'आलोए'त्ति आनीयाचार्यस्य तदालोच्यते, 'पुच्छिउं गच्छे'त्ति पुनस्तमेवाचार्यं पृष्ट्वा चङ्क्रमणिकया गच्छति, इयमकाले सञ्ज्ञा अकालसञ्ज्ञेत्यर्थः अहिण्डितानां सतां भवति, कालसञ्ज्ञा पुनर्हिण्डितानां भिक्षाटनकालस्योत्तरकालं भुक्त्वा या भवति सा कालसञ्ज्ञा भवति। अन्ये त्वाहुः-'अनहिंडिय हिंडियाकालो'त्ति अहिण्डितानामर्थपौरुषी-करणोत्तरकाले यका भवति सा कालसञ्ज्ञैव, तथा हिण्डितानां भिक्षाभ्रमणभोजनोत्तरकालं या भवति साऽपि कालसञ्ज्ञोच्यते। भुक्त्वोत्तरकालं या सञ्ज्ञा भवति तत्र किं कृत्वा कथं वा गम्यते?

मू. (५१३) कप्पेऊणं पाए एक्केक्कस्स उ दुवे पडिग्गहए।
दाउं दो दो गच्छे तिण्हट्ठा दवं तु घेत्तूणं॥

वृ. पात्रकाणि कल्पयित्वा पत्ताई तेणिऊण इत्यर्थः पुनरेककस्य साधोः पतद्ग्रहद्वयं दत्त्वा, एतदुक्तं भवति-योऽसौ तिष्ठति साधुस्तस्यात्मायत्त एव एकः पतद्ग्रहो द्वितीयस्तु पतद्ग्रहो योऽसौ साधुश्चङ्क्रमणभूमिं प्रयाति स समर्पयित्वा व्रजति अत एककस्य द्वौ द्वौ पतद्ग्रहौ भवतः। 'दो दो गच्छे'त्ति द्वौ द्वौ गच्छतः नैकैको गच्छति, तत्र च तिण्हट्ठा दवं च घेत्तूणं' त्रयाणां साधूनामर्थे यावदुदकं भवति तावन्मात्रं तत् गृहीत्वा व्रजतः। न

च कथं गच्छन्ति ? अत आह-

मू. (५१४) अजुगलिआ अतुरंता विकहारहिआ वयंति पढमं तु।
निसिइत्तु डगलगहणं आवडणं वच्चमासज्ज ॥

वृ. न युगलिताः-समश्रेणिस्था व्रजन्ति किन्तु अयुगलिताः अत्वरमाणा विकथारहिताश्च व्रजन्ति, ततश्चङ्क्रमणभुवं प्राप्य प्रथमं 'निषीदयित्वा' उपविश्य डगलकानां-अधिष्ठानप्राप्तछिन्नार्थमिष्टकाखण्डकानां लघुपाषाणकानां वा ग्रहणं करोति. 'आवडणं'ति प्रस्फोटनं तेषां डगलकानां करोति, कदाचित्तत्र पिपीलिकादि स्यात्, तेषां च रक्षणं स्यात् किं प्रारभ्यमाने काले 'वच्चमासज्ज' पुरीषमाश्रित्य, अनेन किमिति विज्ञाय पुरीषं ततस्तद्ग्रहणाय डगलकानि गृह्णाति, ततो डगलकानि गृहीत्वा सच्छायस्थण्डिले उपविशति।

मू. (५१५) अनावायमसंलोए, परस्सऽनुवघाइए।
समे अज्झुसिरे यावि, अचिरकालकयंमि अ ॥

वृ. अनापातः असंलोकश्च परस्य यस्मिन् तदनापातासंलोकं स्थण्डिलं लोकस्य. तथा 'अनुवघाइए'त्ति उपघातश्च यत्र न भवति उक्तलक्षणादि तस्मिन्ननुपघातिके. तथा समं यत्र लुठनं न भवति. लुठने स्थण्डिले आत्मपतनभयं पुरीषं च मुक्तं कीटिकादीश्चूर्णयति तथा 'अझुसिर यावि'त्ति यत्तृणादिगच्छन्नं न भवति, तत्र हि वृश्चिकादिसंगत्य दशति कीटकादि वा प्लाव्यते, 'अचिरकालकयंमि य'त्ति अचिरकालकृतं तस्मिन्नेव ऋतुमासिके ऋतौ यदग्न्यादिना प्रासुकीकृतं तस्मिन्।

मू. (५१६) वित्थिन्ने दूरमोगाढे, नासन्ने बिलवज्जिए।
तसपाणबीयरहिए, उच्चाराईणि वोसिरे ॥

वृ. तथा विस्तीर्णे, तत्र विस्तीर्णं जघन्येन हस्तप्रमाणं चतुरस्रमुत्कृष्टेन चक्रवर्त्यावासनिकाप्रमाणं द्वादशयोजनमिति गम्यते, तस्मिन्, 'दूरमोगाढे'त्ति दूरमधोऽवगाह्य अग्न्यादितापेन प्रासुकीकृतं जघन्येन चत्वार्यङ्गुलानि अधः, 'नासन्ने'त्ति तत्रासन्नं द्विविधं द्रव्यासन्नं भावासन्नं च, भावासन्नं अनहियासओ अतिवेगेण आसन्ने चेव वोसिरइ, द्रव्यासन्नं धवलगरुआरामाईणं आसन्ने वोसिरइ, न आसन्नं अनासन्नं-यद्द्रव्यासन्नं भावासन्नं वा न भवति तस्मिन् व्युत्सृजति, तथा 'बिलवर्जिते' बिलादिरहिते स्थण्डिले व्युत्सृजति, तथा त्रसप्राणबीजरहितयोर्व्युत्सृजतीति. एतस्मिन् दशदोषरहिते स्थण्डिले सति उच्चारादीनि व्युत्सृजेत्। इदानीमेकादिसंयोगेन यावन्ति स्थण्डिलानि भवन्ति तावन्ति प्रतिपादयन्नाह-

मू. (५१७) एगदुगतिगचउक्कगपंचगछस्सत्तट्ठनवगदसगेहिं।
संजोगा कायव्वा भंगसहस्सं चउव्वीसं ॥

वृ. एकद्वित्रिचतुष्पञ्चषट्सप्ताष्टनवदशकैः संयोगाः कर्त्तव्याः, ततश्च सर्वैरभिनिष्पन्नं भङ्गकसहस्रं चतुर्विंशत्युत्तरं भवति। इदानीं भाष्यकार एतान्येव स्थण्डिलपदानि व्याख्यानयति, तत्राद्यमनापातासंलोकं व्याख्यातमेव, इदानीमनुपघातिकपदव्याचिख्यासयाऽऽह-

मू. (५१८) उभयमुहं गासिदुगं हेट्ठिल्लाणं तरेण भय पढमं।
लद्धहरागविमत्तं तस्सवरि गुणं तु संजोगा ॥ [प्र. ३५]

मू. (५१९) आयापवयणसंजमतिहिवहमुग्घाडमं तु नायव्वं।
आगम वच्च अगनी पिट्ठण अगट्ठ य अन्नत्थ ॥ [भा. १७८]

वृ. औपघातिकं त्रिविधं ज्ञातव्य-आत्मौपघातिकं प्रवचनौपघातिकं संयमौपघातिकं च, तत्रा-

त्मोपघातिकं कथं भवतीत्यत आह- आरामे- आगमादौ व्युत्सृजतः, प्रवचनोपघातिकं च कथं भवतीत्यत आह- 'वच्च' वर्चो- मूत्रं तत्करीषे व्युत्सृजतः, संयमोपघातिकं क्व भवतीत्यत आह- 'अगनी' अग्निः स यत्र प्रज्वाल्यते, एतच्च यथासङ्ख्येन योजनीयं। कथमात्मोपघातादि भवतीत्यत आह- यथासङ्ख्येन 'पिट्ठण असुई य अन्नत्थ' आरामे व्युत्सृजतः पिट्टणं- ताडनं भवति, वर्चः करीषे व्युत्सृजतोऽशुचिरयमिति लोक एवं संभा- वयति, अङ्गारदहनभूमौ व्युत्सृजतः सोऽङ्गारदाहकः 'अन्नत्थ'त्ति अन्यत्राङ्गारार्थं प्रज्वालयति ततश्च संयमोपघात इति, यतश्चैते दोषा भवन्ति अतोऽनुपघातिके स्थण्डिले व्युत्सृजनीयमिति। अनुपघातिकं गतम, इदानीं 'समे'त्ति व्याख्यानयन्नाह-

मू. (५२०) विसम पलोट्टण आया इयरस्स पलोट्टणंमि छक्कायो।
झुसिरंमि विच्छुगाई उभयक्कमणे तसाईया ॥ [भा. १७९]

वृ. विषमे स्थण्डिले व्युत्सृजतः प्रलुठनं स्याद्धरेरिव भवति ततश्चात्मविराधना, 'उभय'त्ति मूत्रपुरीषं तदाक्रमणेन त्रसादयो विराध्यन्ते ततश्च संयमोपघातो भवति, 'इतरस्स'त्ति इतरयोः कायिकापुरीषयोः प्रलुठने सति षट् काया विराध्यन्ते, ततः समे व्युत्सृजनीयम। समेति गतं, 'झुसिरंमि'त्ति व्याख्यायते, तत्राह- 'झुसिरंमि पिच्छुगाई' झुसिरं पलाल्लादिच्छन्नं तत्र व्युत्सृजता वृश्चिकादिदंशनं संभवति ततश्चात्मवि' विधना, 'उभय'त्ति मूत्रपुरीषं तदाक्रमणेन त्रसादयो विराध्यन्ते ततश्च संयमोपघातो भवति ततोऽशुषिरे व्युत्सृजनीयं, द्वारम्। इदानीं 'अचिरकालकयंमि य'त्ति व्याख्यायते-

मू. (५२१) जे जंमि उउंमि य कया पयावणाईहि थंडिला ते उ।
होंतियरंमि चिरकया वासा वुच्छेय बारसगं ॥ [भा. १८०]

वृ. यानि यस्मिन ऋतौ- शीतकालादौ प्रतापनादिभिः- अग्निप्रज्वालनादिभिः- अग्निप्रज्वालनादिभिः स्थण्डिलानि कृतानि तस्मिन्नेव च ऋतौ स्थण्डिलान्यचिराणि भवन्ति, तानि स्थण्डिलानि इतरस्मिन- अनन्तरऋतौ चिरकृतानि मिश्रीभूतानि चयोग्यानि भवन्ति। 'वासा वुच्छेय बारसगं'ति यस्मिन प्रदेशे एकं वर्षाकालं ग्राम उषितः, स च प्रदेशो 'द्वादश' द्वादश वर्षाणि यावत्स्थण्डिलं भवति, यत्र तु पुनर्वर्षामात्रमुषितो ग्रामस्तत्र भवत्येव स्थण्डिलं द्वादश वर्षाणीति। इदानीं 'विच्छिन्नं' ति व्याख्यानयन्नाह-

मू. (५२२) हत्थायामं चउरस्स जहन्नं जोयणं विच्छिन्नयरं।
चउरंगुलप्पमाणं जहन्नयं दूरमोगाढं ॥ [भा. १८१]

वृ. विस्तीर्णं द्विधा- जघन्यमुत्कृष्टं च, तत्र जघन्यं हस्तायामं चतुरस्रं च जघन्यतो विस्तीर्णं स्थण्डिलं, 'जोयणं विच्छिन्नं इयरं'ति इतरद्- उत्कृष्टं विस्तीर्णं योजनानां द्विषट्कं, द्वादशयोजनविस्तीर्णमित्यर्थः। विच्छिन्नमिति गतं, इदानीं 'दूरमोगाढं'त्ति व्याख्यायते, तत्राह- 'चतुरंगुलप्पमाणं' चत्वार्यङ्गुलानि भुवोऽधो यदवगाढं तज्जघन्यतो दूरमोगाढमुच्यते, मध्यममुत्कृष्टं च चतुर्णामङ्गुलानामधस्ताद्विज्ञेयमिति।

आसन्नं व्याख्यायते, तत्राह-

मू. (५२३) दव्वासन्नं भवणाइयाण तहियं तु संजमायाए।
आयापवयणसंजमदोसा पुन भावआसन्ने ॥ [भा. १८२]

वृ. आसन्नं द्विविधं- द्रव्यतो भावतश्च, तत्र द्रव्यासन्नं भवनादीनामासन्ने व्युत्सृजतो द्रव्यासन्नं भवति, तत्र स्वमात्मोपघातो भवति, तत्र च संयमोपघात एवं भवति- स गृहपतिस्तत्पुरीषं साधुव्युत्सृष्टं केनचित्कर्म-करेणान्यत्र त्याजयति ततश्च तत्प्रदेशविलेपने हस्तप्रक्षालने च संयमोपघातो भवति, आत्मोपघातश्च स

गृहपतौ रुष्टः सन् कदाचिन्नाऽऽयाति ततश्चात्मोपघात इति, तस्माद्व्याघाते न व्युत्सृजनीयं। इदानीं भावासन्नं प्रतिपादयन्नाह-'आयावघायण'त्ति आत्मप्रवचनसंयमोपघातदोषा भावासन्ने भवन्ति. कथं ?, स हि साधुरन्य-योगव्यावृत्तस्तावदास्ते यावदसौ भावासन्नः संजातः. ततश्च त्वरितं प्रयाति. पुनश्च केनचिच्छूलेनोपलक्ष्य भावासन्नतां धर्मप्रच्छनव्याजेनार्द्धपथ एव धृतः ततश्च तस्य पुरीषवेगं धारयत आत्मोपघातो भवति. अथार्द्धपथ एव व्युत्सृजति ततश्च प्रवचनोपघातो भवति. संयमोपघातोऽपि तत्रैवाप्रत्युपेक्षितस्थण्डिले व्युत्सृजतो भवति. तस्मादनागतमेव गमने प्रवर्तते। इदानीं बिलवर्जितं व्याख्यायते. यत्राह-

मू. (५२४) होंति बिले दो दोसा तसेसु बीएसुवावि ते चेव।
संजोगओ अदोसा मूलगमा होंति सविसेसा॥ [भा. १८३]

वृ. बिलप्रदेशे व्युत्सृजतो दोषद्वयं भवति-आत्मविराधना संयमविराधना च, तत्र। इदानीं "तसपाण-बीयरहियं"ति व्याख्यायते, तत्राह-'तसेसु बीएसु वावि ते चेव' त्रसेषु व्युत्सृजतः संयमविराधनाऽऽ-त्मविराधना च भवति. बीजेषु च व्युत्सृजतस्त एव दोषा भवन्ति- आत्मविराधना संयमविराधना च. तत्रात्मविराधना गोक्षुरकादिभूतिगामुपरि व्युत्सृजतो भवति, संयमविराधना तथैवेति. तत्र। एवं तावदेककदोषदुष्टं स्थण्डिलमुक्तं भ. इदानीं द्वितीयादिसंयोगेन दोषदुष्टतां प्रतिपादयन्नाह-'संजोगओ य' संयोगतो-द्रव्यादिदोषसंबन्धेन 'मूलगमात' मूलदोषभेदात्सकाशात 'सविशेषाः' द्विगुणतरादयो दोषा भवन्ति, मूलभेदे तावदापातसंलोकदोषदुष्टता तथाऽन्यस्मिन्नेव यद्युपघातदोषो भवति ततो द्विदोषसंयोगतः सविशेषा दोषा भवन्ति। एवं दोषत्रयादिसंयोगतः संक्षिप्ता ऊह्यका एककादिके स्थण्डिले ज्ञेया इति।

इदानीं तस्मिन् दोषरहिते स्थण्डिले प्रासस्य यो विधिः स उच्यते-

मू. (५२५) दिसिपवणगामसूरियछायाए पमज्जिऊण तिक्खुत्तो।
जस्सोग्गहोत्ति काऊण वोसिरे आयमज्जा वा॥

वृ. तत्र तेन साधुना सञ्ज्ञाव्युत्सृजता 'दिस'त्ति उत्तरस्यां दिशि पूर्वस्यां च न पृष्ठं दातव्यं, लोकविरोधात्, तथा पवनग्रामसूर्याणां च पृष्ठं दत्त्वा न व्युत्सृजनीयं, लोकविरोधादेव. तथा छायायां प्रमार्जयित्वा 'तिक्खुत्तो'त्ति तिस्रो वाराः प्रमार्जयित्वा यत्र व्युत्सृजनीयं, 'जस्सोग्गहो'त्ति यस्यायमवग्रहस्तेनानुज्ञातव्य इत्येवं कृत्वा व्युत्सृजनीयं 'आयमज्जा वा' निर्लेपनं चापानं एवमेव कुर्यात्, यदुत स्थण्डिलेऽनुज्ञापयित्वा चेति। इदानीमेतामेव गाथां भाष्यकारो व्याख्यानयन्नाह-

मू. (५२६) उत्तरपुव्वा पुज्जा जम्माए निसियरा अहिवडंति।
घाणाऽरिया य पवणे सूरियगामे अवन्नो उ॥ [भा. १८४]

वृ. उत्तरा दिक् पूर्वा च किल लोके उ अपि पूज्ये, ततश्च तयोः पृष्ठं न दातव्यं, 'जम्माए निसियरा अभिवडंति' याम्या-दक्षिणा दिक् तस्यां च रात्रौ पृष्ठं न दातव्यं, किमित्येतदेवम् ?, उच्यते, रात्रौ निशाचराः-पिशाचादयः 'अभिपतंति'त्ति अभिमुखा आगच्छन्ति, एतदुक्तं भवति-रात्रौ दक्षिणाया दिशि उत्तरस्यां दिशि देवाः प्रयान्ति (इति) लोके श्रुतिः. ततश्च तत्र पृष्ठं न दातव्यं, प्रयच्छतो लोकविरोधो भवति, 'घाणारिया य पवणे'त्ति पवनस्य च पृष्ठं यदि दीयते ततो घ्राणार्याणि भवन्ति, सूर्यग्रामयोश्च पृष्ठप्रदाने अवर्णः-अयशो भवति.। इदानीं 'छायाए'त्ति व्याख्यानयन्नाह-

मू. (५२७) संजतग्गहणी पुन छायाए निग्गयाए वोसिरइ।
छायासइ रण्णंमिवि वोसिरिअ मुहत्तयं चिट्ठे॥ [भा. १८५]

वृ. "संसक्तग्रहणिः" कृमिसंसक्तोदर इत्यर्थः यत्रासौ साधुर्भवेत् ततो वृक्षच्छायायां निर्गतायां व्युत्सृजति, अथ छाया न भवति ततश्च व्युत्सृज्य मुहूर्तमात्रं तिष्ठेद् येन ते कृमयः स्वयमेव परिणमन्ति।

किं चासौ करोतीत्यत आह-

मू. (५२८) उवगरणं वामे ऊरुगंमि मत्तं च दाहिणे हत्थे।
तत्थऽन्नत्थ व पुंछं तिहि आयमनं अदूरंमि॥

वृ. 'उपकरणं' रजोहरणदण्डकादि वामे ऊरौ स्थापयति, मात्रकं च दक्षिणे हस्ते करोति, प्रोञ्छनं च अपानस्य तत्रान्यत्र वा करोति, यदि कठिनं ततस्तत्रैव प्रोञ्छयति, अथ श्लक्ष्णं ततोऽन्यत्र, 'तिहि आयमनं'ति त्रिभिश्चुलुकैर्निर्लेपनं करोति, 'अदूरंमि'त्ति स्थण्डिलस्यासन्नप्रदेशे निर्लेपनीयमिति।

इदानीं स्थण्डिलयतनोच्यते, तत्राह-

मू. (५२९) पढमस्सऽणुन्नवणा गिहियाण वावि आलोए।
पत्तेयमत्त कुरुकुय तवं च पडुरं गिहत्थेसु॥

वृ. प्रथमस्य-अनापातासंलोकरूपस्य 'असति' अभावे अथवा प्रथमस्य-संविग्नसमनोज्ञापात-स्थण्डिलस्यासति क्व गन्तव्यमत आह-'अणुन्न'त्ति अमनोज्ञानामापाते स्थण्डिले गम्यते, 'इतराण'त्ति कुशीलानां संविग्नपाक्षिकाणामसंविग्नपाक्षिकाणां चापातस्थण्डिले गन्तव्यं, एतेषां चानन्तरोद्दिष्टानां सर्वेषामेवमर्थमालोको नोपात्तो यतस्ते दूरस्थिता नाभोगयन्त्येव। 'गिहियाण वावि आलोए'त्ति तदभावे गृहस्थालोके स्थण्डिले गम्यते। 'पत्तेयमत्त'त्ति प्रत्येकं प्रत्येकं यानि मात्रकाणि गृहीतानि तैः प्रत्येकमात्रकैः 'कुरुकुचां' पादप्रक्षालनाचमनरूपां प्रचुरद्रवेण कुर्वन्ति, 'गिहत्थेसु'त्ति गृहस्थविषये आलोके सति इदं पूर्वोक्तं कुरुकुचादि कुर्वन्तीति॥

मू. (५३०) तेन परं पुरिसाणं असोयवाईण वच्च आवायं।
इत्थिनपुंसालोए परंमुहो कुरुकुया सा उ॥

वृ. ततः परं यदि गृहस्थालोकं नास्ति स्थण्डिलं ततः पुरुषाणामापाते तत्राप्यशौचवादिनां व्रज आपातस्थण्डिलं। अथाशौचवादिपुरुषापातस्थण्डिलं नास्ति ततः 'इत्थिनपुंसालोए' स्त्रीनपुंसकालोके स्थण्डिले पराङ्मुखो व्युत्सृजति कुरुकुचा च तैव कर्त्तव्या।

मू. (५३१) तेन परं आवायं पुरिसेअरइत्थियाण तिरियाणं।
तत्थवि अ परिहरेज्जा दुगुंछिए दित्तचित्ते य॥

वृ. ततः परं तदभावे सति पूर्वोक्तस्थण्डिलस्य तिरश्चां संबन्धिनो ये पुरुषा इतरे च नपुंसकाः स्त्रियः एतेषामापातस्थण्डिले व्युत्सृजनीयं, 'तत्थवि य'त्ति तत्रापि-तिरश्चां मध्ये जुगुप्सिता दृप्तचित्ताश्च परिहरणीयाः, यतस्तत्रात्मसंयमोपघातो भवति॥

मू. (५३२) तत्तो इत्थिनपुंसा तिविहा तत्थवि अणोयवाईसु।
तद्दिअं तु गहकरणं आउलगमनं कुरुकुया य॥

वृ. ततस्तदभावे स्त्रीनपुंसकापातस्थण्डिले गन्तव्यं, तत्र स्त्री त्रिविधा-दण्डिककौटुम्बिकप्राकृत-भेदभिन्ना, नपुंसकमपि त्रिविधं-दण्डिककौटुम्बिकप्राकृतभेदभिन्नं, तत्राप्यशौचवादिनामापाते व्युत्सृजनीयं, आह- स्यादाशङ्कादयस्तत्र तदवस्था एव दोषाः ?, उच्यते, 'तद्दियं तु गहकरणं' तत्र स्थण्डिले व्रजन् अन्येषामाशङ्काविनिवृत्त्यर्थमूर्ध्वः काशितादिरूपं शब्दं करोति परस्परं वा जल्पन्तो व्रजन्ति ततस्ते गृहस्था

नाशङ्का-म्रक्षाद्यभिलाषणरूपां कुर्वंति यतन्ते प्रस्थं प्रयान्तीति, अनाकुलगमनं वा करोति, एकत्र मिलिता गच्छन्तीत्यर्थः, कुसुक्षा च पूर्ववत्कार्या। उक्तं स्थण्डिलद्वारम्, इदानीमवष्टम्भद्वारं प्रतिपादयन्नाह-

मू. (५३३) अव्वोच्छित्ता तसा पाणा, पडिलेहा न सुज्झइ।
तम्हा हट्ठपहट्ठस्स, अवट्ठंभो न कप्पई॥

वृ. अवष्टम्भः स्तम्भादौ न कर्त्तव्यः, यतः प्रत्युपेक्षितेऽपि तत्र पश्चादपि 'अव्यवच्छिन्नाः' अनवरतं त्रसाः प्राणा भवन्ति, ततश्च तत्र प्रत्युपेक्षणा न शुद्ध्यति, 'तम्हा हट्ठपहट्ठस्स' हृष्टो-नीरोगः प्रहृष्टः-समर्थस्तरुणस्तस्य एवंविधस्य साधोरवष्टम्भो 'न कल्पते' नोक्तः। इदानीं के ते त्रसाः प्राणिन इत्येतत्प्रदर्शनायाह-

मू. (५३४) संचर कुंथूहेहिअलूयावेहे तहेव दालीअ।
घरकोइलिआ सप्पे विस्संभर उंदुरे सरडे॥

वृ. तत्रावष्टम्भे-स्तम्भादौ संचरन्ति-प्रसर्पन्ति, के ते?-कुन्थवः-सत्त्वा उद्देहिकाश्च लूता-कोलिनयकस्तत्कृता वधा-भक्षणं भवति, तथा च दालौ-सञ्जिर्भवति तस्यां च वृश्चिकादिसम्भवो भवति, तथा 'गृहकोकिलिका' घरोलिका उपरिष्टाद्गृह्यते, कण्भूतेन खोम्नेव तो भवति सर्पः, सर्पो वा तद्भक्षिनो भवेत्, विश्वम्भरो जीवविशेष उंदुरो वा भवेत्, 'सरटः' कृकलासः, स च दशनादि करोति। इदानीं भाष्यकारो व्याख्यानयन्नाह-

मू. (५३५) संचारगा चउद्दिसिं पुव्विं पडिलेहिएवि अत्तंति।
उद्देहि मूल पडणे विराधना तदुभए भेओ॥ [भा. १८६]

वृ. 'सञ्चारकाः' कुन्थ्वादयः पूर्वोक्ता श्चतसृषु दिक्षु तस्मिन्नवष्टम्भे परिभ्रमन्ति, पूर्वं प्रत्युपेक्षितेऽपि तत्र स्तम्भादाववष्टम्भेऽनुयन्ति आगच्छन्ति। उद्देहि'त्ति कदाचिदसौ स्तम्भादिरवष्टम्भो मूल उद्देहिकादिभक्षितः ततश्चावष्टम्भं कुर्वतः पतति, पुनश्च विराधना 'तदुभए' भवति आत्मनि संयमे च भेदश्च पात्रकादेर्भवति।

मू. (५३६) लूयाइचमद्दणा संजमंमि आयाए विच्छुगाईया।
एवं घरकोइलिआ अहिउंदुरसरडमाईसु॥ [भा. १८७]

वृ. लूतादिचमर्दने-मर्दने संयमे-संयमविषया विराधना भवति, आत्मविराधना च वृश्चिकादिभिः क्रियते। एवं गृहकोलिका (अहि) उन्दरसरडादिविषया संयमविराधना आत्मविराधना च भवति।

उक्त उत्सर्गः, इदानीमपवाद उच्यते-

मू. (५३७) अतरंतस्स उ पासा गाढं दुक्खंति तेन उवट्ठंभे।
संजयपट्टी थंभे सेत्त छुहाकुक्कुडिविहीए॥

वृ. 'अतरंतस्स' अशक्नुवतो ग्लानादेः पार्श्वानि गाढं-अत्यर्थं दुःखंति तेन कारणेनावष्टम्भं कुर्वन्ति, अत आह-संयतपृष्ठे स्तम्भे वा 'सेत्त'त्ति पाषाणमये स्तम्भे सुधामाष्टयें कुड्ये वाऽवष्टम्भं कुर्वीत, उपधिकां विष्टिकां वा कुड्यादौ कृत्वा ततोऽवष्टम्भे करोति। उक्तमवष्टम्भद्वारम्, इदानीं मार्गद्वारं प्रतिपादयन्नाह-

मू. (५३८) पंथं तु वच्चमाणा जुगंतरं चक्खुणा व पडिलेहा।
अइदूरचक्खुपाए सुहुमनिरिंगचलणगय न पेहे॥

वृ. पथि व्रजन् 'युगान्तरं' युगं-चतुर्हस्तप्रमाणं तन्मात्रान्तरं चक्षुषा प्रत्युपेक्षेत, किं कारणं?, यतोऽतिदूरचक्षुःपाते सति सूक्ष्मान्तिर्यग्गतान् प्राणिनः 'न पेहे' न पश्यति, दूरे दूरं प्रहितत्वाच्चक्षुषः।

मू. (५३९) अच्चासन्ननिरोहे दुक्खं दट्ठंपि पायसंहरणं।

छक्कायविओरमणं सरीर तह भत्तपान य ॥

वृ. अत्यायत्तं निरोधं करोति चक्षुषस्तता दृष्ट्वाऽपि प्राणिनां दुःखेन पादसंहरणं, पादं प्राणिनि निपतन्तं धारयतीत्यर्थः, अतिसन्निकृष्टत्वाच्चक्षुषः। 'छक्कायविओरमणं'ति षट्कायानां विराधनं भवति, शरीरविराधनां तथा भक्तपानविराधनां करोतीति। इदानीमस्या एव गाथायाः पश्चार्द्धं व्याख्यानयन्नाह-

मू. (५४०) उड्ढमुहो कहरतो अवयक्खंतो वियक्खमाणो य।
बायरकाए वहए तसेतरे संजमे दोग्गा ॥ [भा. १८८]

वृ. उर्ध्वमुखो ब्रजन् कथासु च रक्तः-सक्तः 'अवयक्खंतो'त्ति पृष्ठतोऽभिमुखं निरूपयन् 'वियक्खमाणो'त्ति विविधं सर्वासु दिक्षु पश्यन्, स एवंविधो बादरकायानपि व्यापादयेत् 'त्रसेतरांश्च' पृथिव्यादीन स्थावरकायान् ततश्च 'संयमे' संयमविषया एते दोषा भवन्तीति। इदानीं शरीरविराधनां प्रतिपादयन्नाह-

मू. (५४१) निरवेक्खो वच्चंतो आवडिओ खाणुकंटविसमेसु।
पंचण्ह इंदियाणं अन्नतरं सो विराहेज्जा ॥ [भा. १८९]

वृ. निरपेक्षो ब्रजन् आपतितः सन् स्थाणुकण्टकविषमेषु, विषमम्-उन्नतं, तेष्वापतितः पञ्चानामिन्द्रियाणां-चक्षुरादीनां अन्यतरत् स विराधयेत। इदानीं 'भत्तपाने य'त्ति अवयवं व्याख्यानयन्नाह-

मू. (५४२) भत्ते वा पाने वा आवडियपडियस्स भिन्नपाए वा।
छक्कायविओरमणं उड्डाहो अप्पणो हानी ॥ [भा. १९०]

वृ. आपतितश्चासौ पतितश्च २ तस्य साधोः भिन्ने-भग्ने वा पात्रके सति भक्ते वा प्रोज्झिते पानके वा ततः षट्कायव्युपरमणं भवति, उड्डाहश्च भवति आत्मनश्च 'हानिः' क्षुधा बाधनं भवति ततः पुनः षट्कायव्युपरमणमुड्डाहश्च।

मू. (५४३) नहि वय तक्कं पयमंबिलं व सत्थं तसेतराण भवे।
खद्धंमि य जनवाओ बहुफोडो जं च परिहानी ॥ [भा. १९१]

वृ. तानि गृहीतानि कदाचिद्दधियुतनक्रपयःकाञ्जिकानि भवन्ति, ततश्च यानि शस्त्रं, केषां ?-त्रसानामितरेषां च-पृथिव्यादीनां भवेत्, 'खद्धंमि'त्ति प्रचुरे च तत्र भक्ते लोकेन दृष्टे सति जनापवादो भवति-उड्डाहः, यदुत 'बहुफोड'त्ति बहुभक्षका एत इति, वा चात्मपरितापनिकादिका परिहाणिः सा च भवति।

तथा पात्रविराधनायां याचनादोषान् प्रदर्शयन्नाह-

मू. (५४४) पत्तं च मग्गमाणं हवेज्ज पंथे विराधना दुविहा।
दुविहा य भवे तेना परिकम्मे सुत्तपरिहानी ॥

वृ. पात्रं चान्विष्यति सति ग्रामादौ भवेत् पथि विराधना द्विविधा-आत्मविराधना संयमविराधना च, पथिस्तेनाश्च द्विप्रकारा भवन्ति-उपधिस्तेनाः शरीरस्तेनाश्च, लब्धेऽपि कृच्छ्रात्पात्रके तत् परिकर्मयतः-तद्व्यापारे लग्नस्य सूत्रार्थपरिहानिः ॥

मू. (५४५) एसा पडिलेहणविही कहिआ भे धीरपुरिसपन्नत्ता।
संजमगुणट्ठगाणं निग्गंथाणं महरिसीणं ॥

वृ. अयं च प्रत्युपेक्षणाविधिः कथितो 'भे' भवताम्, 'किंविशिष्टः ?-'धीरपुरुषैः प्रज्ञप्तः' गणधरैः प्ररूपितः, संयमगुणैराढ्यानां निर्ग्रन्थानां 'महर्षीणां' सत्यवादिनां कथित इति ॥ तथा-

मू. (५४६) एसा पडिलेहणविही जुंजंता चरणकरणमाउत्ता।

साहू खवंति कम्मं अनेगभवसंचिअमनंतं ॥

वृ. एतं प्रत्युपेक्षणाविधिं 'युञ्जन्तः' कुर्वाणाः चरणकरणयोगयुक्ता: सन्तः साधवः क्षपयन्ति कर्म. किं-विशिष्टम् ?- 'अनेगभवसंचिअम्' अनेकभवे यावत् 'अनन्तम्' अनन्तसंसारनिर्वृत्तत्वात्तदनन्तमिति, अनन्तानां वा भवानां हेत्वंत्तदनन्तं क्षपयन्तीति । उक्तं मार्गप्रत्युपेक्षणाद्वारं, तत्प्रतिपादनाच्चोक्तं प्रत्युपेक्षणाद्वारमिति प्रतिलेखनाद्वारं समाप्तं ॥ इदानीं पिण्डद्वारप्रतिपादनायाह-

मू. (५४७) पिंडं व एसणं वा एत्तो वोच्छं गुरूवएसेणं ।
गवेसणगहणयासेसणाए तिविहाए विसुद्धं ॥

वृ. पिण्डं वक्ष्ये एषणां च, एषणा-गवेषणा तां च अतः परं वक्ष्ये, गुरूपदेशेन न स्वमनीषिकया, सा चैषणा त्रिविधा भवति-गवेषणैषणा ग्रहणैषणा ग्रासैषणा चेति, अनया त्रिविधयाऽप्येषणया विशुद्धः-शुचिर्यः पिण्डस्तं वक्ष्य इति योगः । 'यथोद्देशं निर्देश' इतिन्यायात्प्रथमं पिण्डमेव व्याख्यानयन्नाह-

मू. (५४८) पिंडस्स उ निक्खेवो चउक्कओ छक्कओ य कायव्वो ।
निक्खेवं काऊणं परूवणा तस्स कायव्वा ॥

वृ. तत्र पिण्डनं-पिण्डः, 'पिण्ड सङ्घाते', पिण्ड इत्यस्य पदस्य निक्षेपः कर्तव्यः स च निक्षेपकश्चतुष्कः क्रियते षट्को वा, एवं निक्षेपं कृत्वा प्ररूपणा-व्याख्या तस्यैव पिण्डस्य कर्तव्या ॥

तत्र चतुष्ककनिक्षेपं-

मू. (५४९) नामं ठवणापिंडो दव्वपिंडो य भावपिंडो य ।
एसो खलु पिंडस्स उ निक्खेवो चउव्विहो होइ ॥

वृ. नामपिण्डः स्थापनापिण्डो द्रव्यपिण्डो भावपिण्डश्चेत्येष तावच्चतुष्को निक्षेपः, यदा पुनः क्षेत्र-पिण्डः कालपिण्डश्च निक्षिप्यते तदाऽयमेव षट्को वा भवति, तत्र नामपिण्डः-पिण्ड इति नाम यस्य स नामपिण्डः । तच्च-

मू. (५५०) गोन्नं समयकयं वा जं वावि हवेज्ज तदुभएन कयं ।
तं बिंति नामपिंडं ठवणापिंडं अओ वोच्छं ॥

वृ. तच्च नाम गोन्नं भवति यथा गुडपिण्ड इति, तथाऽन्यत्समयकृतं भवति, समयः-सिद्धान्तस्तेन कृतं, यथा "से भिक्खू वा भिक्खुणी वा गाहावइकुलं पिंडवायपडियाए पविट्ठे समाणे जं पाणेज्जा अंबपानगं वा" इत्यादि, यद्यप्यसौ पानकस्य द्रवस्वभावस्य (कृते) प्रविष्टस्तथाऽप्यसौ पिण्डार्थं प्रविष्ट इत्युच्यते, एष समयसिद्धः पिण्डः, यद्वा नाम भवेत्तदुभयेन कृतलौकिकलोकोत्तरकृतं वा यन्नाम भवेत्, यथा 'गाहावइकुलं पिंडवायपडियाए पविट्ठेण पिंडो चेव सत्तुगाणं वेरओ लद्धओ गुडपिंडो वा" तत्र लोके गुडपिण्डकः गुलपिण्डक एवोच्यते, समयेऽप्येवमेव पिण्डक उच्यते, एवमेवंगुणविशिष्टं सर्वमेव नामपिण्डं ब्रुवते, अत ऊर्ध्वं स्थापना-पिण्डं वक्ष्य इति ।

मू. (५५१) अक्खे वराडए वा कट्ठे पोत्थे व चित्तकम्मे वा ।
सब्भावमसब्भावा ठवणापिंडं वियाणाहि ॥

वृ. स्थापना द्विविधा-सद्भावस्थापना असद्भावस्थापना चेति, तत्राक्षविषया सद्भावस्थापना असद्भावस्थापना च भवति, कथं ?, यदा एक एवाक्षः पिण्डकल्पनया बुद्ध्या कल्प्यते तदाऽ-सद्भावस्थापना, यत्र पुनरन्ये एवाक्षाश्चित्रप्रभृतय एकत्र स्थाप्यन्ते तदा सद्भावस्थापना, एवं 'वराटकेषु' कपर्दकेषु.

तथा काष्ठकर्मणि वेति, तदेकमेव काष्ठं पिण्ड एव इत्येवं कल्प्यते तदाऽसद्भावस्थापना, यदा तु एकत्र बहूनि मिलितानि पिण्डत्वेन कल्प्यन्ते तदा सद्भावस्थापना, एवं 'पुस्ते' धौतल्लिकादौ पुत्तलिकादिष्वपि एवं चित्तकर्मण्यपि, यदेकचित्रकर्मणि पुत्तलपिण्ड इति स्थाप्यते तदाऽसद्भावपिण्डस्थापना यदा त्रिप्रभृति पिण्डबुद्ध्या कल्प्यते तदा सद्भावस्थापना, एवं सद्भावपिण्डसमसद्भावपिण्डं च जानीहि।

इदानीं द्रव्यपिण्डस्य ज्ञशरीरभव्यशरीरव्यतिरिक्तस्य प्रतिपादनायाह-

मू. (५५२) तिविहो य दव्वपिंडो सच्चित्तो मीसओ य अच्चित्तो।
अच्चित्तो य दसविहो सच्चित्तो मीसओ नवहा॥

वृ. त्रिविधो द्रव्यपिण्डः-सचित्ताऽचित्तो मिश्रश्चेति, तत्र योऽसावचितः स दशविधः सचित्तो नवप्रकारः मिश्रश्च नवधा॥ तत्राचित्तपिण्डप्रतिपादनायाह-

मू. (५५३) पुढवी आउक्काए तेउवाऊवणस्सई चेव।
बिअतिअचउरो पंचिंदिया य तेवो य दसमो उ॥

वृ. पृथिवीकायपिण्डः अप्कायपिण्डस्तेजस्कायपिण्डः वायुकायपिण्डः वनस्पतिकायपिण्डः द्वीन्द्रियपिण्डः त्रीन्द्रियपिण्डः चतुरिन्द्रियपिण्डः पञ्चेन्द्रियपिण्डः पात्रकार्थं लेपपिण्डश्चेति दशमः। एवमयं दशप्रकारोऽचित्तपिण्डः, इदानीं योऽयं अचित्तः पृथिवीकायादिपिण्डः स सचित्तपूर्वको भवतीतिकृत्वा(ऽतः)स एव प्रथमं सचितः प्रतिपाद्यते, तथोपन्यासोऽपि सचित्तस्यैव प्रथमं कृतः, तथा योऽसौ सचित्तो मिश्रश्च एकैको नवप्रकार उक्तः सोऽप्यनेनैव क्रमेण व्याख्यातो भवतीतिकृत्वा पूर्वं सचित्तं व्याख्यानयन्नाह-

मू. (५५४) पुढविक्काओ तिविहो सच्चित्तो मीसओ य अचित्तो।
सच्चित्तो पुन दुविहो निच्छयववहारिओ चेव॥

वृ. पृथिवीकायस्त्रिविधः सचित्तो मिश्रोऽचित्तश्च, तत्र सचित्तो द्विविधः-निश्चयसचित्तो व्यवहारसचित्तश्च।

मू. (५५५) निच्छयओ सच्चित्तो पुढविमहापव्वयाण बहुमज्झे।
अच्चित्तमीसवज्जो गेरुय ववहारसच्चित्तो॥

वृ. निश्चयतःसचित्तःपृथिवीनां-रत्नशर्करप्रभृतीनांसंबन्धीयः 'महापर्वतानां' हिमवदादीनां च 'बहुमध्ये' मध्यप्रदेशभागे। इदानीं व्यवहारसचित्तप्रतिपादनायाह-अचित्तवर्जःमिश्रवर्जश्च, एतदुक्तं भवति-योऽचित्तो न भवति न च मिश्रः स व्यवहारतः सचेतन इति, स चारण्यादौ भवति यत्र वा गोमयादि नास्ति।

उक्तः सचित्तः पृथिवीकायः, इदानीं मिश्रपृथिवीकायं प्रतिपादयन्नाह-

मू. (५५६) खीरदुमेइ पंथे कट्ठोल्ला इंधने य मीसो य।
पोरिसि एगदुगतिगं बहुइंधणमज्झधोवे अ॥

वृ. क्षीरद्रुमाः-उदुम्बरादयस्तेषामधो यः पृथिवीकायः स मिश्रः, ते हि क्षीरद्रुमा मधुरस्वभावा भवन्ति, पथि च मिश्रपृथिवीकायः 'कट्ठोल्लो'त्ति हलकृष्टो यः पृथिवीकायस्तत्क्षणादेव आर्द्रश्च शुष्कश्च क्वचिन्मिश्रपृथिवीकायः 'इंधने'त्ति इन्धनंगोमयो भण्यते, तत्थ कुम्भकारेण सद्रवो आनिओ तेन मिलितो सन्तो पृथिवीकायो मिश्रो भवति, कियत्कालं यावद् ?अत आह-'पोरिसीएगदुगतिगं' यथासङ्ख्येन च 'बहुइंधणमज्झिंधणथोविंधण' यदि बहु इन्धनं स्वल्पः पृथिवीकायस्ततः पौरुषीमात्रं यावत् मिश्रो भवति, मध्ये तु इन्धने अर्द्धमिन्धनस्य अर्द्धं पृथिवीकायस्य यत्र स पौरुषीद्वितयं यावन्मिश्रः, स्वल्पेन्धनस्तु

पृथिवीकायः पारभाषायां यावन्मिश्रो भवति। उक्तो मिश्रः, इदानीमचित्त उच्यते, स चेयं भवति-

मू. (५५७) सीउण्हखाररुक्खे उग्गीलोणूस अंबिले नेहे।
वक्कंत जोणिएणं पओयणं तणिमं होति॥

वृ. शीतशस्त्राभिहतः उष्णशस्त्राभिहतः क्षारः-तिलक्षारादिस्तेनाभिहतो यः क्षत्रशस्त्रेणाभिहतः, क्षत्रं-करीषविशेषः, अग्निशस्त्राभिहतः लवणशस्त्राभिहतः (अवश्यायवशस्त्राभिहितः) कायिकशस्त्राभिहतः, स्नेहेन-घृतादिना शस्त्रेणाभिहतः स च योन्युत्क्रान्तयोनिकः, अथवा 'विद्धंसणोणिएवि य' नेच्छन्ति, तत्राथमर्थः-व्युत्क्रान्ता-अपगता योनिः स्वयमेव यस्य पृथिवीकायस्य तेन च 'इदं' वक्ष्यमाणं प्रयोजनं भवति। किं तत्प्रयोजनमित्यत आह-

मू. (५५८) अवरद्धिगा विसंधे लवणेन व सुरभिउवलणे च।
अच्चित्तस्स उ गहणं पओयणं होइ जं चऽन्नं॥

वृ. अवरद्धिगा-लूता फोडिआ तस्यां लूतास्फोटिकायामुत्थितायां दाहोपशमार्थमचेतनेन पृथिवीकायेन परिषेकः क्रियते, यद्विषा अवरद्धिगा-सर्पदंशस्तस्मिन परिषेकादि क्रियते, दंशे विषे वा पतिते सति तयाऽचेतनया मृत्तिकया बन्धो दीयते, लवणेन वा प्रयोजनमचित्तेन भवति, 'सुरहिलोकरणेण व'त्ति गन्धारोहकेणापि किञ्चित्प्रयोजनं भवत्यामादौ. एभिः प्रयोजनैरचेतनस्य पृथिवीकायस्य ग्रहणं भवति-प्रयोजनं भवति। इदं च वक्ष्यमाणलक्षणमन्यत्-

मू. (५५९) ठाणनिसीयतुयट्टण उच्चाराईणि चेव उस्सग्गो।
घट्टगडगलगलेवो एमाइ पओयणं बहुहा॥

वृ. स्थाने-कायोत्सर्गः सोऽचेतने पृथिवीकाये क्रियते निषीदनम्-उपवेशनं त्वग्वर्तनं-निमज्जनं च क्रियते उच्चारादीनां वोत्सर्गः क्रियते, 'घट्टग'त्ति घट्टकः-पाषाणकः येन पात्रके लेपितं सद् घृष्यते, तथा डगलकाः अपानप्रोञ्छनार्थं लेपकश्च पात्रकाणां, एवमादि प्रयोजनमचित्तेन पृथिवीकायः, इदानीमप्काय उच्यते, असावपि त्रिविधः सचित्तमिश्राचित्तभेदः, तत्र सचित्तप्रतिपादनायाह-

मू. (५६०) घनउदहीघनवलया करगसमुद्दद्दहाण बहुमज्झे।
अह निच्छयसच्चित्तो ववहारनयस्स अगडाई॥

वृ. घनोदधयो रत्नप्रभापृथिव्यादीनां घनवलयानि च करकाश्च एतेषु निश्चयतः सचित्तोऽप्कायः समुद्रबहुमध्ये-मध्यप्रदेशे ह्रदमध्ये च निश्चयसचेतनः, व्यवहारनयस्य पुनरगडादौ-कूपादौ योऽप्कायः स व्यवहारतः सचितः। इदानीं मिश्रप्रतिपादनायाह-

मू. (५६१) उसिणोदगमनुक्कंते दंडे वासे य पडिअमेत्ते य।
सोत्तेणाएसतिगं चाउलउदगं बहुपसन्नं॥

वृ. उष्णोदकमनुत्क्रान्ते दण्डे मिश्रं भवति, तत्थ मुग्गो नीवसंघाओ पिंडीभूओ अच्छइ पच्छा उव्वत्तं सो परिणमइ, सो जाव परिणमइ ताव मीसो, वासे य पडियमित्ते-वर्षे च पतितमात्रे मिश्रो भवत्यप्कायः, तत्कालोत्के व्यवस्था का ?, तदुच्यते, 'सोत्तेण' इत्यादि, तत्रापि मिश्रे बहु प्रसन्नं स्वच्छेतने भवति आदेशत्रितयं मुक्त्वा तदनेकान्तात्॥ के च ते आदेशाः ?,

मू. (५६२) आएसतिगं वुच्चइ बिन्दू तह चाउला न सिज्झंति।
सोत्तेण तिन्निवेए चाउलउदगं बहु पसन्नं॥

वृ. केई भणंति- जाव चुल्लुया न फिट्टंति ताव तं मीसं, अन्ने भणंति- संदयलग्गा बिंदुणो ण सुक्कंति ताव मीसं, अन्ने भणंति- जाव चाउला न सिज्झंति ताव मीसं. एतं अणाएसा, जम्हा एयाणि तिन्नि वत्थूणि कयाइ चिरेण होंति कयाइ सिग्घतरं चेव आधारवशात्, तम्हा चाउलोदगं जदा बहु पप्पन्नं होइ तदा तं अचित्तं भवति, अथवा मुक्त्वा तन्दुलोदकं बहुप्रसन्नं यदन्यदादेशत्रितयं प्रतिपादितं तच्च मिश्रं द्रष्टव्यमिति।

उक्तो मिश्रोऽप्कायः, इदानीमचित्तप्रतिपादनायाह-

मू. (५६३) सीउण्हखारखवणं अग्गीलोणूस अंबिले नेहे।
वक्कंतजोणिएणं पओयणं तेणिमं होंति॥

वृ. पूर्ववत्। तेन चाचित्ताप्कायेन इदं प्रयोजनं क्रियते-

मू. (५६४) परिसेयपियणहत्थाइधोयणा चीरधोयणा चेव।
आयमण भाणधुवणे एमाइ पओयणं बहुहा॥

वृ. परिषेकः-सेचनं कृष्णाधुन्धिते सति क्रियते. तथा पानं हस्तादिधावनं च क्रियते. तथा आचमनं भाजनप्रक्षालनं च क्रियते. एवमादीनि प्रयोजनानि बहुधा भवन्ति। इदानीं चीरप्रक्षालनं क्रियत इत्युक्तं तच्च ऋतुबद्धे न कर्तव्यं अथ क्रियते तत एते दोषा भवन्ति-

मू. (५६५) उउबद्धधुवण बाउस बंभविनासो उड्डाणठवणं च।
संपाइमवाउवहो पलवण आतोपघातो य॥

वृ. ऋतुबद्धः-शीतोष्णकाली मिलितावपि चैव भण्यते, तत्र यदि चीवराणां धावनं क्रियते ततो बाकुशिको भवति विभूषणशील इत्यर्थः, यदा च विभूषणशीलस्तदा ब्रह्मविनाशो भवति, तथा अस्थानस्थापनं च भवति. यदुत नूनमयं कामी तेनात्मानं मण्डयति ततश्चास्थानस्थापनम्-अयोग्यतास्थापनं भवतीति, तथा संपातिमसत्त्वानां वायोश्च वधो भवति, तथा प्लवनेन च भन्त्रवधो भवति, तथाऽऽत्मोपघातश्च भवति हस्त कण्डकपतनादिति। आह-यद्येवं न धावितव्यान्येव चीवराणि, उच्यते, वर्षाकाले प्रक्षालयितव्यानि, अथ न प्रक्षाल्यन्ते तत एते दोषा भवन्ति-

मू. (५६६) अट्ठभारचुडणपणए सीयलपावरण अजीरगेलन्ने।
ओभावणकायवहो वासासु अधोवणे दोसा॥

वृ. मलेनातिगुरूणि भवन्ति. तथा 'चुडण'त्ति जीर्यन्ते पनकश्चात्र लगति पनक-फुल्ली. शीतलप्रावरणे चाजीर्णं भवति, ततश्च ग्लानता भवति, तथा 'उवहावणा' परिभवो भवति कायवधश्च भवति, तानि हि आर्द्राणि श्च्योतन्ति सन्ति अप्कायादि विनाशयन्ति. एते वर्षास्वधावने दोषाः। कदा प्रक्षालनं कार्यमित्याह-

मू. (५६७) अप्पत्ते चिय वासे सव्वं उवहिं धुवंति जयणाए।
अद्धइए व दवस्स उ जहन्नओ पायनिज्जोगो॥

वृ. वर्षाकाले अप्राप्ते एव अर्द्धमासमात्रेण सर्वमुपधिं प्रक्षालयन्ति यतनया। अथोदके प्राशुके प्रचुरे नास्ति ततो जघन्येन 'पात्रनियोगं' पात्रकोपकरणं प्रक्षालनीयं येन गृहस्था भिक्षां प्रयच्छन्तो न जुगुप्सन्ते इति। आह-सर्वेषां वर्षापर्यन्ते एवोपधिः प्रक्षाल्यते ?, न इत्याह-

मू. (५६८) आयरियगिलाणाणं मडला मडला पुणोवि धोवंति।
मा हु गुरूण अवन्नो लोगंमि अजीरणं इयरे॥

वृ. सुगमा॥ नवरं 'अजीर्णं इयरे'त्ति इतरेषां ग्लानानां चीवराणि प्रक्षालनीयानि यदि न प्रक्षाल्यन्ते

ततोऽर्जीर्णं भवति। इदानीमुपधिप्रक्षालनकाले कानि न विश्रामणीयानि ? इत्याह-

मू. (५६९) पायस्स पडोयारं दुनिसज्जं तिपट्टपोत्तिस्सहरणं।
एते न उ विस्सामे जयणा संकामणा धुवणा॥

वृ. पात्रस्य 'पडोयारं' परिकरणं पात्रबन्धादिकं न विश्रामयेत्, तथा 'दुन्नि निसज्जे'त्तिरजोहरणमियधाबद्धे एका और्णिका बाह्यनिषद्या द्वितीया मध्यवस्त्रिनी क्षोमनिषद्या इदं द्वयं न विश्रामणीयं 'तिपट्ट'त्ति एकः संस्तारकपट्टको द्वितीय उत्तरपट्टकः तृतीयश्चोलपट्टकः 'पोत्ति'त्ति मुखवस्त्रिका रजोहरणं-एतानिमेव एतानि न विश्रामयेत्, यतो नाम्यान्यनुपभोग्यानि सन्ति। तत्र च षट्पदसङ्क्रमणं कथमित्याह- 'जयणा संकमणा' यतना वस्त्रान्तरितेन हस्तेनान्यस्मिन् वस्त्रे षट्पदीः सङ्क्रमयति ततो धावनं करोति।

इदानीं शेषमुपधिं विश्रा-मयतो विधिमाह-

मू. (५७०) अब्भिंतरपरिभोगं उवरिं पाउणइ नातिदूरे य।
निन्नि य तिन्नि य न एक्के निसिं उ काउं पडिच्छेज्जा॥

वृ. 'अब्भिंतरपरिभोगं' क्षोमकल्पं शेषकल्पयोरुपरि प्रावृणोति, कतरः ?, त्रयस्तिस्रश्च इति वक्ष्यति, तथा नातिदूरे नात्यासन्ने तमेव कल्पं रात्रित्रयमेव स्थापयति, 'निन्नि य तिन्नि य'त्ति पदद्वयं योजितमेव द्रष्टव्यं, 'एक्के निसिं काउं'ति एकां रात्रिमात्मोपरि कीलकादौ लम्बमानं करोति, एवं त्रिरात्रं यावत्परीक्ष्यते, पश्चाच्च तं कल्पं पुनः प्रावृणोति, प्रावृते च कल्पे यदि न लगन्ति षट्पदास्ततो धावयेत्-प्रक्षालयेत्। ते च प्रक्षालयन्तः-

मू. (५७१) निल्लोदगस्स गहणं केई भाणेसु असुइ पडिसेहो।
गिहिभायणेसु गहणं ठियवाते मीसिमं छारो॥

वृ. ते च साधवश्चारप्रक्षालनार्थं नीलोदकस्य ग्रहणं कुर्वन्ति, तत्राह- 'केई भाणेसु'त्ति कश्चनैव ब्रूते यदुत 'भाजनेषु' पात्रेषु नीलोदकग्रहणं कार्यं, आचार्य आह- 'असुइ' लोका एवं भणन्ति, यदुत- अशुचय एते, ततश्च प्रतिषेधं कुर्वन्ति। कस्य पुनर्ग्राह्यमित्यत आह- 'गिहिभायणेसु' गृहस्थसत्केषु भाजनेषु-कृष्णशिलासु भाजनेषु गृह्यते, कदा ?- 'ठियवाते' स्थिते प्रवर्षणे-थक्के वरिसिस्सए, 'मीसगं'ति अथात्र प्रवर्षति पर्जन्ये गृह्यते ततो गृह्यतो मिश्रं भवत्यन्तरिक्षोदकपातात् तस्मात्स्थिते प्रवर्षणे ग्राह्यं, गृहीते च क्षारः क्षेपणीयो येन सचित्तता न याति। कस्य पुनः प्रथममुपधिः प्रक्षालनीय इत्यत आह-

मू. (५७२) गुरुपच्चक्खाणिस्साणमेहमाईण धोवणं पुव्वं।
तो अप्पणो पुव्वमहाकडे य इतरे व पच्छा॥

वृ. प्रथमं गुरोरुपधिः प्रक्षाल्यते ततः 'पच्चक्खाय'त्ति प्रत्याख्याता-अनशनस्थस्तस्योपधिः प्रक्षाल्यते समाधानार्थं ततो ग्लानस्य पश्चान्नवकस्य वा 'भुञ्जतां परीषहपीडया चित्तभङ्गः, एवमेतयो पूर्वमुपधिःक्षाल्यते

तत आत्मनः क्षालयन्त्युपधिं। इदानीं कानि प्रथमं क्षालनीयानि ? इत्याह-'पुव्वमद्धाकंदे'त्ति यान्येकत्वेऽपि अनूर्णितानि च तानि यथाकृतानि पूर्वं प्रक्षालयति, 'इयरे दुवे पच्छ'त्ति इतरौ द्वौ वस्त्रभेदौ पश्चात्प्रक्षालयन्ति, एकान्यल्पपरिकर्माणि-यानि कचिन्मनाक् नूर्णितानि अन्यानि बहुपरिकर्माणि-यानि द्विधा सीवितानि तूर्णितानि च, अल्पपरिकर्माणि च क्षालयित्वा ततो बहुपरिकर्माणि क्षालयति।

मू. (५७४) अच्छोडपिट्ठणासु त न धुवे धावे पतावणं न करे।
परिभोगमपरिभोगे छायातवे पट्ट कल्लाणं॥

वृ. इदानीं स साधुः प्रक्षालयन कर्पटानि नाच्छोटयति रजकवत्, नापि च पिट्टयति काष्ठपिट्टेन स्त्रीवत्, किन्तु हस्तेन मनाग् यतनया धावनं करोति, धौतानि च वस्त्राणि नातीव प्रतापयति, मा भूत्तत्र काचित् षट्पदी, स्यात् कानि पुनरातपे कार्याणि कानि वा न ? इत्याह-'परिभोगमपरिभोगे'त्ति तानि कर्पटानि द्विविधानि भवन्ति-परिभोग्यानि अपरिभोग्यानि च, तत्र यथासङ्ख्येन छायातपयोः कार्याणि, परिभोग्यानि छायायां शोष्यन्ते, मा भूत्तत्र षट्पदी स्यात्, अपरिभोग्यान्यातपे, 'पट्ट'त्ति तानि च कर्पटानि शुष्यन्ति सन्ति निरूपयत्यपहरणभयात्। 'कल्लाणगं'ति पश्चात्तस्य प्रक्षालनप्रत्ययमेककल्याणके प्रायश्चित्तं दीयते। उक्तं उप्कायः-

मू. (५७५) इङ्गणपागाईणं बहुमज्झे विज्जुयाइ निच्छड्डओ।
इंगालाई इयरो मुम्मुरमाई य मिस्सो उ॥

वृ. अस्मावपि त्रिविधः, तत्र सचित्त इष्टकापाकादीनां बहुमध्ये विद्युदादिको नैश्चयिको भवति, अङ्गारादिश्चेतरो व्यावहारिकः मुर्मुरादिकः-उल्मुकादिर्मिश्रो भवति।

इदानीमचिताग्निकायस्योपयोगमचित्ता-ग्निशरीरोपयोगं च दर्शयन्नाह-

मू. (५७६) ओदनवंजणपानगआयामुसिणोदगं च कुम्मासा।
इंगलगसरक्खसूई पिप्पलमाई य परिभोगो॥

वृ. ओदनं-कूरादि व्यञ्जनं-तिम्मणं पानकं-आचाम्लं आयामं-अवश्रावणं उष्णोदकं कुल्माषाश्च, एतानि अग्निनिर्वर्त्यानि कार्याणि, ततश्चैभिरुपयोगः क्रियते। इदानीमग्निनिर्वर्त्तितशरीरोपभोगं दर्शयन्नाह-इङ्गलका-इष्टकाखण्डा अर्तावं पक्वाः सरक्खो-भस्म सूच्यः पिप्पलकः-क्षुरकः, एवमादिभिरचित्तैरग्निशरीरैरुपयोगः क्रियते, अग्निशरीराणि च द्विविधानि भवन्ति-बद्धेल्लयाणि मुक्केल्लयाणि च, तत्राद्य मुक्केल्लयाणि द्रष्टव्यानि। इदानीं वायुकाय उच्यते, अस्मावपि त्रिविधः सचित्तादिरूपः, तत्र नैश्चयिकसचित्तप्रतिपादनायाह-

मू. (५७७) सवलयघणतनुवाया अनिहिमअतिदुद्दिणे य निच्छड्डओ।
ववहार पायमाई अक्कंतादी य अच्चित्तो॥

वृ. सह वलयैर्वर्त्तन्त इति सवलयाः घनवाताश्च तनुवाताश्च सवलयाश्च ते घनतनुवाताश्च २ ते निश्चयतः सचित्ताः। तथाऽतिहिमपाते यो वायुरतिदुर्दिने च यो वायुः स नैश्चयिकः सचित्तः, व्यवहारतः पुनः प्राच्यादिपूर्वस्यां या दिशि, आदिग्रहणादुत्तरादिग्रहणं, एतदुक्तं भवति-अतिहिमअतिदुर्दिनरहितो यः प्राच्यादिवायुः स व्यवहारतः सचित्तः। इदानीमचित्तः 'अक्कंताई य अचित्तो'त्ति यः कटमादावाक्रान्ते सति भवति सोऽचित्तः, स च पञ्चधा-अक्कंतं धंतं पीलिए सरीराणुगए समुच्छिमे, तत्थ अक्कंतो चिक्किच्चलाइस्सु, धंतो दोनियाइस्सु, पीलिओ पोतचम्माईसु, सरीराणुगओ ऊसासनीसासवाऊ उदरत्थाणीओ, समुच्छिमो तालियंटाईहिं जणिओ। इदानीं मिश्र उच्यते, आह-किं पुनः कारणं मिश्रः पश्चादव्याख्यायते ?, उच्यते, अचित्तेनैव साध्वव्यवहारं करोति, स च गृहीतः सन्नेव मिश्रीभवति, अन्यार्थस्य प्रदर्शनार्थं पश्चान्मिश्र उच्यते।

मू. (५७८) हत्थस्सयमेग गंता वइउ अचित्तो विइय मीसो।
तइयंमि उ सच्चित्तो वत्थी पुन पोरिसिदिनेहिं॥

वृ. अचित्तवायुभृतो दतिस्तरणार्थं गृह्यते, स च क्षेत्रतो हस्तशतमेकं यावद्गत्वाऽपि अचित्त एव, तीर्त्वाऽपि ततो हस्तशतादूर्ध्वं द्वितीयहस्तशतप्रारम्भेऽपि मिश्रो भवति, तृतीयहस्तशतप्रारम्भे सचित्तो भवति, क्षेत्रमङ्गीकृत्य यावता कालेन मिश्रो भवति तमाह-'वत्थी पुण पोरिसिदिनेहिं' इति तत्र बस्तिः चर्ममयी स्वल्पोच्यते, सा चाचित्तवायोरापूरिता अतिस्निग्धकाले पौरुषीमात्रं कालं यावत्तत्र स्थितो वायुरचित्त एवास्ते, अयमत्र भावार्थः-कालो हि द्विविधः-निद्धो लुक्खो य, तत्थ निद्धो कालो वुत्तोणिद्धो इयरो लुक्खो, तत्थ निद्धो तिविहो-उक्कोसो मज्झिमो जहन्नो य, तत्थ उक्कोसनिद्धे काले पोरुषीमात्रं कालं यावत् वत्थी वायुणाऽऽपूरितो अचित्तो होइ तदुवरिं सो चेव तइए पहरे सचित्तो होइ, मज्झिमनिद्धे काले वत्थी वाउणाऽऽपूरिओ दो पोरुसीओ जाव अचित्तो होइ तदुवरिं सो चेव चउत्थे पहरे सचित्तो होइ, जहन्ने पहरे सचित्तो होइ, जहन्ने निद्धे काले वत्थी वाउणाऽऽपूरिओ तिन्नि पहरे जाव अचित्तो होइ, तदुवरिं सो चेव चउत्थे पहरे मिस्सो होइ, तदुवरिं पंचमे पहरे सो चेव सचित्तो होइ। एवं निद्धकाले माणं भणिअं, इदाणिं लुक्खकाले दिनेहिं परूवणा किज्जइ, तत्थ लुक्खकालोऽवि तिविहो जहन्नलुक्खो मज्झिमलुक्खो उक्कोसलुक्खो य, तत्थ जहन्नलुक्खे काले वत्थी वाउणाऽऽपूरिओ एगदिवसं जाव अचित्तो होइ, तदुवरिं सो चेव बिइयदिवसे मिस्सो होइ, सो चेव ततिए दिवसे सचित्तो होइ, मज्झिमलुक्खे काले वत्थी वाउणाऽऽपूरिओ दो दिना जाव अचित्तो अच्छइ, तदुवरिं सो चेव तइए दिवसे मिस्सो होइ, तदुवरिं चउत्थे दिवसे सचित्तो होइ, सो चेव वाऊ उक्कोसलुक्खे काले दिवसतिगं जाव अचित्तो होइ, तदुवरिं सो चेव चउत्थे दिवसे मीसो होइ, तदुवरिं सो चेव पंचमे दिवसे सचित्तो होइ। एवं एगादुगतिगसंखा पोरिसिदिनेसुं अनुवट्टावणीआ।

इदानीमचित्तेन वायुना यत्प्रयोजनं भवति तत्प्रतिपादयन्नाह-

मू. (५७९) दइएण वत्थिणा वा पओयणं होज्ज वाउणा मुणिणो।
गेलन्नंमि व होज्जा सचित्तमीसे परिहरेज्जा॥

वृ. सुगमा॥ नवरं दतिणणं तरणं वोत्तरति, गेलन्ने वत्थिणा कज्ज होइ। उक्तो वायुः, इदानीं वनस्पतिकाय उच्यते, असावपि सचित्तादिभेदेन त्रिधा, तत्र निश्चयसचित्तप्रतिपादनायाह-

मू. (५८०) सव्वो वउलंतकाओ सच्चित्तो होइ निच्छयनयस्स।
ववहारस्स उ सरसो मीसो पव्वायरोहाई॥

वृ. सर्व एवानन्तवनस्पतिकायो निश्चयनयेन सचित्तः, आदेः परित्तवनस्पतिव्यवहारनयमतेन सचित्तः, 'मीसोपव्वायरोहाइ' तिमिश्रस्तूत्पन्नानिपत्राणि यानिकुसुमानिफलानिचरोहो-रोहाउत्पन्नाः कथिताः, तत्थतंदुलमच्छंडअच्छंडनिवनकालंतरेण सो मिस्सो भवति। इदानीमचित्तवनस्पतिकायेनतदुपयोगं च दर्शयन्नाह-

मू. (५८१) सत्थोवगयदंडगखोभिअकप्पाड पोढफलगाई।
ओलहणस्स जाणि य एमाइ पओयणं तस्सुं॥

वृ. तत्र संस्तारकः अशुषिरतृणः क्रियते, कल्पट्टयं च कार्पासिकं भवति, ओपथमल्लकमुपयुज्यते, भेषजं बहिः। उक्तो वनस्पतिकायः, इदानीं त्रीन्द्रियादिप्रतिपादनायाह-

मू. (५८२) बिइयंतिअचउरो पोंडोदया य तिप्पभिई जत्थ उ समंति।

सट्ठाणे सट्ठाणं सो पिंडो तेन कज्जमिणं ॥

वृ. द्वीन्द्रियचतुरिन्द्रियपञ्चेन्द्रियाः कार्पासिप्रभृतयो यत्र समवाये गच्छन्ति स द्वीन्द्रियादिपिण्डः, ते चैव समवायं परित्यजन्ति स्वस्थाने व्यवस्थिताः, एतदुक्तं भवति- द्वीन्द्रिया द्वीन्द्रियैरेव मिलिते द्वीन्द्रियपिण्डः, तथा त्रीन्द्रियास्त्रीन्द्रियैरेव विप्रभृतिभिर्मिलितैस्त्रीन्द्रियपिण्ड उच्यते, एवं सजातीयैर्मिलितः पिण्डो वक्तव्यो यावत्पञ्चेन्द्रिया इति स्वस्थाने स्वस्थाने स पिण्डः। अयं तावद् द्वीन्द्रियादिः पञ्चेन्द्रियपर्यन्तः सचित्तादिः पिण्डो भवति, यश्चाचित्तपिण्डो द्वीन्द्रियादिसत्कर्तनेन चैतत्कार्यम्-

मू. (५८३) बेइंदियपरिभोगो अक्खाण सगंख सिप्पमाइण्णं।
तेइंदियाण उद्देहिगाइ जं वा वए विन्नो ॥

वृ. द्वीन्द्रियाणां परिभोगः 'अक्षाणां' चन्दनकानां सशङ्खा याः शुक्तयः तत्प्रदानं, शङ्खेषु शुक्तिषु च औषधानि क्रियन्ते। त्रीन्द्रियाणां मध्ये उद्देहिकया, आदिशब्दादन्येन वा त्रीन्द्रियेण, यद्वा देवो ब्रूयाद्, उद्देहिकायाः सत्कथा मृत्तिकया प्रयोजनं, स च सर्वस्त्रीन्द्रियपरिभोगः। इदानीं चतुरिन्द्रियपरिभोग उच्यते-

मू. (५८४) चउरिंदियाण मक्खियपरिहारो आसमक्खियाए चेव।
पंचिंदिअपिंडेमि उ अव्ववहारी उ नरडया ॥

वृ. चतुरिन्द्रियाणां मध्ये 'मक्षिकापरिहारेण' मक्षिकापूरणेन ऊर्ध्वविरेकः क्रियते शरीरपाटवार्थं, अश्वमक्षिकोपयोगश्च तयाऽक्ष्णोरश्रवः पतिता उच्यन्ते। अयं चतुरिन्द्रियपिण्डः, पञ्चेन्द्रियपिण्डे यदि परं नारकैरव्यवहारः-उपयोगो न कथ्यते क्रियते। शेषास्तु तिर्यञ्चो देवा मनुष्याश्चोपयुज्यन्ते, तत्र तिरश्चां पञ्चेन्द्रियाणां सत्कमुपयोगं दर्शयन्नाह-

मू. (५८५) चम्मट्ठिदंतनहरोमसिंगअमिलाइच्छगणगोमुत्ते।
खीरदहिमाइयाणं पंचिंदिअतिरिअपरिभोगो ॥

वृ. तत्र चर्मणा कुप्पिनः कार्यं भवति, अस्थ्ना-गृध्रनलकेन प्रयोजनं भवति वाद्यवाद्यपहरणार्थं पादे बध्यते, दन्तेन सूकरादेः संबन्धिना प्रयोजनं नखेन वा, रोमभिः प्रयोजनमुरभ्रादीनां सत्कैस्तैः कम्बलिका भवति, शृङ्गेण किञ्चित प्रयोजनं भवेत्, अमिला-उरभ्रा तत्पुरीषं पामादावुपयुज्यते, तेन गोमूत्रेण चोपयोगः। शेषं सुगमम्। इदानीं मनुष्योपयोगो दर्श्यते-

मू. (५८६) सच्चित्तो पव्वावण पंथुवदंसं य भिक्खवुड्ढाणाई।
मीसद्दियअच्चित्ते मीसद्दि नरक्खपहपुच्छा ॥

वृ. प्रथमार्द्धं सुगमं, सचित्तमनुष्यप्रयोजनमुक्तं म. इदानीमचित्तमनुष्यपिण्डदर्शनायाह- 'मीसद्दिग अचित्ते' त्ति अचित्तेन शिरःकपालेन प्रयोजनं भवति, पित्तास्रुग्घर्षिकृष्णं दिज्जइ, वेषपरावर्तनादि क्रियते। इदानीं मिश्रमनुष्यपिण्ड उच्यते- 'मीसद्दिनरक्खपहपुच्छा' मिश्रोऽस्थियुक्तो यः नरजन्मकः-कापालिकस्तस्य मिश्रस्य पथि पृच्छयोपयोगः। इदानीं देवोपयोगप्रतिपादनायाह-

मू. (५८७) सयमाइकालकज्जातिएसु पुच्छेज्ज देवय किंचि।
पंथे सुभासुभं वा पुच्छेज्जा व दिव्वमुवओगो ॥

वृ. स्वप्नकालिः कश्चिद्, आदिशब्दादाचार्यादेर्वा, कालकार्यादिः स्वमन्त्र्युपच्छनादौ-आदिग्रहणात्स्वप्नादिकार्ये उत्पन्ने 'पृच्छेत' अर्थयेत कश्चिद्देवतां, पथि वा गच्छन् शुभाशुभं पृच्छेत्, अथवा शुभाशुभदुर्भिक्षादि पृच्छेत्, तत्रश्चायं दिव्यपिण्डोपयोगः। एवं तावत्सचित्तो नवप्रकारः। पिण्ड उक्तः, तदनन्तरं

मिश्रोऽपि पिण्डो नवप्रकारः प्रतिपादितः, अचित्तोऽपि नवप्रकारः प्रतिपादित एव, इदानीं दशमो भेदोऽचित्तो लेपपिण्ड उच्यते, स चैतेषामेव पृथिव्यादीनां नवानां भेदानां संयोगेन भवति, एतदेव प्रदर्शयन्नाह-

मू. (५८८) अह होइ लेवपिंडो संजोगेणं नवण्ह पिंडाणं।
नायव्वो निप्फन्नो तस्सवणा तस्स कायव्वा॥

वृ. अथ भवति लेपपिण्डः संयोगे नवानां पिण्डानां निष्पन्नो ज्ञातव्यः, कथं ?, दृष्टका गडिआ, तत्थ अक्खेव मक्खिएण पुढविकायस्स रओ लग्गति, आउक्काओ नदीए उत्तरओ लग्गइ, तेउक्काओ तत्थ लोहं पेल्लति, वाऊ तत्थेव, वणस्सइकाओ वाहुणो भोज्जम्, उसस्सइ अक्खो विलिचडइ संपातिमा पाणा पडंति, पंचिंदियाणवि वरत्ता घरम्मति। एवं संजोएण निप्फन्नो लेवो, इदानीं तस्य प्ररूपणा कर्तव्या।

मू. (५८९) अव्वक्कालिअलेवं भणंति लेवेसणा नवि अ दिट्ठा।
ते वत्तव्वा लेवो दिट्ठो तेनुक्कदंसीहिं॥

वृ. पर आह-अव्वाक्कालिकं लेपं केचन प्रतिपादयन्ति, सदोषत्वाल्लेपस्य, तथा लेषणा च समये न क्वचिद् दृष्टा, यतो द्विविधैव एषणा प्रतिपादिता-वस्त्रैषणा पात्रैषणा च, ततश्चायमवाक्कालिको यतो न युक्त्या घटते नापि समये दृष्ट इति। एवमुक्ते आहाचार्यः-'ते वत्तव्वा' त एवं भणनीयाः-इदं वक्तव्यः, यदुत लेपो दृष्टस्त्रैलोक्यदर्शिभिः-जिनैः, एतदुक्तं भवति-पात्रैषणां प्रतिपादयता लेपैषणा उक्ता एव द्रष्टव्या, अन्यथा तद्व्यतिरेकेण पात्रग्रहणानुपपत्तेः, पात्रं हि लेपादिसंस्कृतमेवोपयोगभाग् भवति नान्यथेति।

मू. (५९०) आयापवयणसंजमउवघाओ दीसई जओ तिण्हं।
तम्हा वदंति केई न लेवगहणं जिना बिंति॥ [भा. ११२]

वृ. पर आह-आत्मप्रवचनसंयमोपघातो दृश्यते यतस्त्रिविधस्तस्माद्वदन्ति केचन न लेपग्रहणं जिना ब्रुवते। इदानीं पर एवात्मोपघातादि दर्शयन्नाह-

मू. (५९१) रहपडणाउसिमंगाइभंजणं वहणं च करणाओ।
अह आयविराधनया जक्खुल्लिहणं पवयणंमि॥ [भा. ११३]

वृ. तस्य साधोर्लेपे गृह्णतो दृष्टिस्थितस्य पतनेनोत्तमाङ्गादिभङ्गो भवति, वहनं च-चलनं सति स्थस्य करस्य-हस्तस्य घातो भवति-संपीडनं भवतीत्यर्थः, अथवाऽऽत्मविराधनोक्ता, इदानीं प्रवचनोपघातं प्रदर्शयन्नाह-'जक्खुल्लिहणं पवयणंमि' यक्षः-श्वा स हि यक्षोऽक्षप्रदेशमुल्लिहति ततश्च तस्मिन यक्षोल्लिहने सति 'प्रवचने' प्रवचनविषय उपघातो भवति। इदानीं संयमविराधनाप्रदर्शनायाह-

मू. (५९२) गमनागमने गहणातिट्ठणे संयमे विराधनया।
महिसरिउम्मुगहरिआकुंथु वासं रओ वसिया॥ [भा. ११४]

वृ. लेपार्थं गमने च आगमने च ग्रहणे च लेपस्य संयमविराधना भवति, कथं ?-'महिसरिउम्मुगहरिआकुंथु' इति तत्र गच्छतो मही सचित्ता भवति, तथा सरिदुत्तरणेऽप्कायविराधना भवति, तथा गृह्णतश्चाग्निविराधना भवति, स हि गृह्णन् कदाचिदुल्मुकं चालयति ततश्चाग्निविराधना, यत्राग्निस्तत्र वायुना भाव्यं, तथा कदाचिदसौ गच्छन् हरितकुन्थुकादिमध्ये व्यवस्थितो भवति ततश्चासौ लेपं गृह्णन् तानि विराधयति, अथवाऽनया भङ्ग्या संयमविराधना भवति-'वासं रओ व सिआ' तत्र गतस्य कदाचिद्वर्षं भवति ततश्चाप्कायविराधना अथ रजःसंपातो भवति ततश्च पृथिवीकायविराधना भवति, एतमुक्तं सूत्रेण-

मू. (५९३) लेवाणं परिहारो चोयग ! जयणाइ कीरई तहिं।

पाए उ अलिप्पंते ते दोसा हुंति नेगगुणा ॥ [भा. १२५]

वृ. दोषाणां परिहारस्तेषां चोदकेनेदानीं क्रियत इति संबन्धः, कथं क्रियते ? इत्यत आह-हे चोदक ! यतनया लेपस्य ग्रहणं क्रियते, ततश्च यतनया ग्रहणे सत्यात्मोपघातादयो दोषा न भवन्ति, पात्रे चालिप्यमाने त एव दोषा यत्त्वयोदिता आत्मोपघातादयः अनेकगुणा-अनेकप्रकारा भवन्ति।

अधुनाऽऽचार्य एवात्मोपघातादि दर्शयन्नाह-

मू. (५९४) छड्डाई विरसंमी भुंजमाणस्स हुंति आयाए।
दुग्गंधि भायणंमि य गरहइ लोगो पवयणंमि ॥ [भा. १२६]

वृ. ऊर्ध्ववादि-छर्दनादिदोषो भवति विरसे तत्र पात्रे भुञ्जतः ततश्चात्मविराधनैव भवति। तथा दुर्गंधि तत्र भाजने भिक्षां गृह्णतो लोको गर्हां करोति ततश्च 'प्रवचने' प्रवचनविषये उपघातो भवति। यच्चोक्तं चोदकेन "जक्खुल्लिलहणे पवयणंमि" तत्रेदमुच्यते-

मू. (५९५) पवयणधाया वन्नेवि हुंति जयणा उ कीरई तेसिं।
आयमणभोयणाई लेवे तव मच्छरं कोनु ? ॥ [भा. १२७]

वृ. प्रवचनोपघातोऽन्योऽप्यस्ति किन्तु यतनया क्रियते तेषां, के च ते प्रवचनोपघाताः ? अत्र आह-'आचमनभोजनादयः' आचमनं-निर्लेपनादि भोजनं चैकमण्डल्या, एतानि प्रवचनोपघातानि कुर्वन्ति यदि प्रकटानि क्रियन्ते, किन्तु यतनया करणान्न प्रवचनोपघातो भवतीति, ततश्च लेपे तव को मत्सरः ? इति।

मू. (५९६) खंडंमि मग्गिअंमि अ लोणं दिन्नंमि अक्खयविनासो।
अनुकंपाई पाणंमि होइ उदगस्स उ विनासो ॥

वृ. एगेन साहुणा गिलाणट्ठं खंडं मग्गिअं, तम्मि च विसए लोणंपि खंडं भवइ, ततो तेणं सावएणं लोणं मग्गियंतिकाउं भायणे लोणं दिन्नं, पच्छा पडिस्सए गएण दिट्ठं जाव तं लोणं, ततो तेन पुढविक्काइत्तिकाऊण परिट्ठविअं, ततो परिट्ठावियंमिवि तंमि लोणंमि वत्थ खरफरुसे भायणे लग्गाराईसु य पविट्ठा लोणावयवा, ततो जदि तत्थ अन्नपाणगाइ घेप्पइ ततो ताणं लोणावयवाणं विनासो होइ, अथ न गिण्हइ लोणखरदिए भायणे तत आत्मादिविराधना भवति, अहवा कंजिअपाणे मग्गिअंमि विहत्थीए अनुकंपाए आवक्काओ दिन्नो, आदिग्रहणात्पडिणीयत्तणेण अन्नाभोएण वा, तओ तंमि कडुयभायणंमि जो विनस्सइ-विराध्यते ततो संजमविराधना भवति। अथवा इमो दोसो होइ पायस्स अलेवणे-

मू. (५९७) पूयणिअलग्गअगनीपलीवणं गाममाइणो होज्जा।
गेहपणगा तम्मी भिगुकुंथादी व छड्डंमि ॥

वृ. एगेन साहुणा कणिक्कमंडलिआ लद्धा, तीए हेट्ठा सुहुमो अंगारो लग्गो दिन्नो, सो उ साहुणा न दिट्ठो, ततो भमंतस्स तं पत्तं पडलेहिं समं पलित्तपायं दट्ठूण चत्तियं, तंपि वाडीए पडिअं गामपलीवणं जायं, यत्राग्निस्तत्र वायुः। अहवा गेट्ठो चाउलल्लाट्ठो लग्गो, सो अपरिणओ होइ, 'पणगा तम्मी'ति पणगो उल्लीराइसु होइ, ततो तव्विनासो-तसविनासो, वणस्सइविणासोत्ति जं भणियं, भृगु-राजिर्भण्यते, तत्र कुंथाईया पाणिणो हवंति, एवं छण्हं तसकायाणं विनासिओ होइ, एवं अलेविए पाए छन्नीवनिकायविराधना अवश्यं होइ ॥ यच्चोक्तं "अलोकयदर्शिभिः श्रमणैः लेपैषणा नोक्ता।" तत्रेदमुच्यते-

मू. (५९८) पायग्गहणंमि इमंमि लेवसणावि खलु वुत्ता।
तम्हा आनयना निप्फणा य पायस्स जयणाए ॥

वृ. पात्रग्रहणे दर्शिते-अत्रोपदिष्टे सति लेपेपणाऽपि स्वयमूह्यते व द्रष्टव्या, तस्मात्प्रयत्नेन लेपने पात्रस्य यतनया कर्तव्यम्। अत्राह परः-

मू. (५९९) हत्थोवघाय संतूण लिंपणा सोभणा य हत्थंमि।
सागारिए पभुजिंघणा य छक्कायजयणा य॥

वृ. यदि नाम पात्रं लिप्यते लिप्यतां नाम, किन्तु तत्रैव शकटस्समीपं गत्वा लिप्यतां यतो लेपानयने हस्तस्योपघातो-बाधा भवति, अथवा हस्तेन यदि लेप आनीयते ततः संपातिमसत्त्वानामुपघातो भवति, तस्मादुभत्वा पात्रकलेपनं कार्यं, एवमुक्ते आचार्या भणिष्यन्ति, यथा त्वदीयेऽपि पक्षे आत्मोपघातादि भवत्येव। तथा पुनरपि परः एवं भणति तत्पात्रकं लेपयित्वा पुनश्च शोषणा हस्तव्यवस्थितस्य पात्रकस्य कार्या, येन सार्द्रनिक्षेपदोषः परिहृतो भवति, आचार्योऽप्यत्र प्रत्युत्तरं ददाति, यदुत हस्ते धियमाणेन पात्रकेण आत्मोपघातादयो दोषा भवन्ति तस्मात्पात्रकं हस्ते न शोषणीयं लेपश्च आनयनीयः, तत्र च लेपार्थं गच्छन् स साधुः कदाचिदासन्न एव 'सागारिए'त्ति सागारिकः-शय्यातरस्तच्छकटानि यदि पश्यति ततस्तेष्वेव लेपं गृह्णाति, न तत्र गृह्णतः शय्यातरपिण्डदोषो भवति, 'पभु'त्ति तेन साधुना लेपं गृह्णता यस्तेषां शकटानां प्रभुः स पृच्छनीयः अप्रच्छने दोषा भवन्ति। तथा लेपस्य स्निग्धेन कर्तव्यं, किमयं कटुरकटुको ?, तथा षट्कायप्रयत्नश्च कार्या, इत्येतत्सर्वं वक्ष्यति।

इदानीं एतामेव गाथां भाष्यकारो व्याख्यानयति, तत्राद्यावयवव्याचिख्यासयाऽऽह-

मू. (६००) चोदगवयणं संतूण लिंपणा आनने बहू दोसा।
संपाइमाइघाओ आतेऽच्चारेण य उस्सग्गो॥ [भा. १९८]

वृ. चोदकस्य वचनं, किमत्र ?, गत्वा लेपनं पात्रकस्य कर्तव्यं, यत आनयने लेपस्य बहवो दोषा भवन्ति, कथं ?, यदितावद्धस्तेनानीयते लेपस्ततो हस्तस्य बाधोपजायते, तथा संपातिमसत्त्वघातो भवति, अत्युद्धरितं च तत्र लेपे 'उत्सर्गः' परिष्ठापनं भवति तत्र चासंयमस्तस्मात्तत्रैव गत्वा लिम्पतु। एवमुक्ते सत्याह गुरुः-

मू. (६०१) एवंपि भाणभेओ वियावडे अत्तणो य उवघाओ।
नीयंकियं च पायंमि गिण्हणे डहरहा संका॥ [भा. १९९]

मू. (६०२) जइतहत्थु वयाओ आनिज्जंतंमि होइ लेवलि।
पडिलेहणाइ चिट्ठा तम्हा उन काउ कायव्वा॥ [प्र. २६]

वृ. एवमपि गत्वा भाजनं लिम्पतो भाजनभेदो भवति, व्याप्रियमाणस्य च-आकुलस्य पात्रकलेपने गच्छतः स्खलने सत्यात्मोपघातो भवति, तथा प्रकटं तत्रैव पात्रे लेपग्रहणं कुर्वतो निःशङ्कं लोकस्य भवति तदुतेतेऽशुचयः येनाशुचिना लेपेन पात्रकलेपनं कुर्वन्ति। 'डहरहासंक'त्ति इतरथा यदि सत्पात्रं तत्र प्रकटं न लिप्यते ततो लोकस्य शङ्कैव केवला भवति, यदुत न विद्मः किमप्यनेन लेपनेन करिष्यन्ति ?, ततः प्रतिश्रय एवागत्य लेपना कर्तव्या।

मू. (६०३) चोएइ एणं लेवं आनेउं लिंपिऊण तो हत्थं।
अच्छउ धारेमाणो सद्दवनिक्खेवपरिहारी॥ [भा. २००]

वृ. अत्र परः पुनरपि चोदयति-एवं नामानीय लेपमाश्रित्य लिम्पतु पात्रकं, किंतु लेपयित्वा ततो हस्ते निःसं स धारयंस्तिष्ठतु यावत्तद्धस्तस्थितमेव शोषमुपयाति, किं कारणं ?, यतो यूयं 'सद्दवनिक्खेवपरिहारिणः' सद्दवस्य निक्षेपः सद्दवनिक्षेपस्तं परिहर्तुं शीलं येषां भवतां ते सद्दवनिक्षेपपरिहारिणः, एतदुक्तं भवति-पात्रकं

नोपादेमपि न लिप्यिष्यति किं पुनर्लेपलिप्तमिति। एवमुक्ते सति परेणाचार्य आह-

मू. (६०४) एवं खोउवधाओ आताए संजमे पवयणे य।
मुच्छाईपवडंते तम्हा उ न सोसए हत्थे॥

वृ. एवं पात्रके लिप्ते सङ्घट्टनेन धार्यमाणे भवत्युपघात आत्मनि संयमे प्रवचने च, तत्रात्मविषया संयमविषया च कथं?-'मुच्छाई पवडंते'त्ति कदाचित्तस्य साधोर्निरोधे पात्रके हस्तस्थे धार्यमाणे मूर्च्छा भवेत्ततश्च प्रपतति, पतितस्य चात्मोपघातो भवति अजीर्णविनाशनक्षणः, पात्रकभेदे च संयमविराधना भवति, तथा प्रवचनोपघातस्तथैव भवति, ते तथा पतितं साधुं दृष्ट्वा कश्चित्सागारिक एवं ब्रूयात्, यदुत-एतदीयमर्वाङ्नेन हस्ते पात्रधारणमुपदिशता अयमप्यपायो भावी न दृष्ट इति, तस्मादेतद्दोषभयान्न हस्ते शोषयेत् पात्रमिति।

मू. (६०५) दुविहा य होंति पाया जुत्ता य नवा य जे उ लिप्पंति।
जुत्ते दाणऊणं लिंपइ पुच्छा य इयरेसिं॥ [भा. २०२]

वृ. तानि च लेपयितव्यानि पात्राणि द्विविधानि भवन्ति, 'जुण्णानि' पुराणानि 'नवानि' अधुनैव धान्यानीतानि तानि प्रथमं लिप्यन्ते, तत्र यानि जीर्णानि पात्रकाणि लिम्पनीयानि तानि गुरोः प्रदर्श्य लिम्पति, एवंविधान्येतानि पश्य किं लिप्यन्ते उत न?, इतरेषां-नवानां पात्रकाणां लेपने पृच्छा कर्तव्या, किं एतानि लिप्यन्ते उत तिष्ठन्तु? इति। आह-कः पुनरनापृच्छ्य पात्रकाणि लिम्पति सति दोषः?, उच्यते, यो मायावी भवति स चैवं ज्ञात्वा पात्रकाणि लिम्पति-

मू. (६०६) पाडिच्छगसंघट्टणं नाऊणं कोइ आगमनमाइ।
दड्ढलेवेवि उ पाए लिंपइ मा एसु देज्जेज्जा॥

वृ. पाडिच्छगा-सूत्रार्थग्रहणार्थं ये आचार्यसमीपमागच्छन्ति सेहा-अभिनवप्रव्रजिताः एतेषामागमनं ज्ञात्वा कश्चिन्मायावी दग्धलेपान्यपि तानि पुराणपात्रकाणि लिम्पति, मा भूदाचार्यस्तेभ्यः-प्रतीच्छकसेहेभ्यो दद्यात्॥

मू. (६०७) अहवावि विभूसाए लिंपइ जा संजमाण परिहानी।
अपडिच्छणे य दोसा सेहे काया अओ दाए॥ [भा. २०३]

वृ. अथवा दग्धलेपमपि पात्रं विभूषया लिम्पति, तस्मिंश्च लिप्ते पात्रे या 'संयमानां' ग्लानादीनां परिहानिः सा सर्वा तेन कृता भवति। 'अपडिच्छणे य दोस'त्ति पात्रकाभावे आचार्यो नान प्रतीच्छकान न प्रतीच्छति, अप्रतिच्छने 'दोषाः' निर्जराद्यभावलक्षणाः। 'सेहे'त्ति यः प्रव्रजितमात्रस्तस्मै यदि पात्रकादि न दीयते ततोऽभ्युपकरणरहितस्य चित्तभेदो भवति विपरिणामसंभवश्च कायान् व्यापादयति, अतः-अस्मात्कारणाद्-दर्शयित्वा पात्रं लिप्यते, कदाचिदसावाचार्यः प्रतीच्छकादीनागन्तुकान् श्रुत्वा निवार्येत्तं साधुं लिप्यन्नमिति।

कथं पुनर्लेपग्रहणं दाने च कर्तव्यमित्यत आह-

मू. (६०८) पुव्वण्हे लेवगहणं लेवस्सुवरिं सुसंवरं काउं।
लेवस्स आणणादिसु य जयणाविहिं वोच्छं॥

वृ. पूर्वाह्णे लेपदानं पात्रकस्य कर्तव्यं लेपने लेपनमित्यर्थः येन तत्प्रत्युषसि लिप्तं दिवसेन शुष्यति, तथा 'लेवग्गहणं सुसंवरं काउं'ति गृह्यतेऽस्मिन्निति ग्रहणं-शरावसंपुटं सुसंवरं-सुगुप्तं चीवरेण कृत्वा ते शरावसंपुटम्। इदानीं लेपस्यानयने लिम्पने च पात्रकस्य यो यतनाविधिस्तं वक्ष्ये।

मू. (६०९) पुव्वण्हे लेवगहणं काहंति वसंथगं करेऊणं।

अगहव्वामि अभत्तं अकारणंमि य तिनियरं ॥ [भा. ३०३]

वृ. पूर्वोक्तं लेपदानं करिष्यामीति कृत्वा चतुर्थ-एकमुपवासं कुर्याद् येन निव्यापारः सुखेनैव करोति. अथासौ चतुर्थं कर्तुं न शक्नोति अत्यन्तमसहिष्णुस्ततो वाग्मिकं भक्तं भक्षयित्वा पात्रकाणि लेपयति। 'अकारण'त्ति अथ तद्ग्रासैकभक्तं मकारकं-अपथ्यं तस्यालम्भो वा तथा वेलया स न लभते भक्तं ततः 'तिनितरं'त्ति 'इतरे' अन्ये साधव आनीय ददति लब्धिसंपन्ना ये। ततश्च लेपयित्वा कृतकृत्यो यद्दृश्यमाह-

मू. (६१०) कयकिरिकम्मो छंदन छंदिओ भणइ लेवडं घेत्तुं।
तुब्भंपि अत्थि अट्ठो ? आमं तं कित्तिअं किं वा ? ॥

वृ. स हि लेपार्थं व्रजन् गुरोः कृतिकर्म-द्वादशावर्त्तवन्दनं ददाति, कृतकृतिकर्मा च छन्देनेति-द्वादशावर्त्तवन्दने गुरुणाक्रम्यमाणस्तं छन्दितः-अनुज्ञातः सन् भणति-लेपमहं ग्रहीष्यामि ततश्च तुभ्य-भवतामपि अस्त्यर्थित्वं लेपेन ?, पुनरसौ गुरुर्भणति-आगम-अस्ति कार्यं, पुनः साधुर्भणति-'कियन्तं' तं लेपं कियन्तं ग्रहीष्यामि ? 'किं व'त्ति किं मल्लिकया प्रयोजनं तव उत लेपेन ?, आचार्यस्य च लेपेन प्रयोजनं भवति. तस्य गच्छसाधारणं नन्दीपात्रमस्ति तदर्थं तस्य वाऽऽचार्यश्चिन्तां करोति।

मू. (६११) ससंवि पुच्छिऊणं कयउस्सग्गो गुरुं पणमिऊणं।
मल्लगरूवे गिण्हइ जइ तेसिं कप्पिओ होइ ॥

वृ. न केवलं गुरुमेव पृच्छति शेषानपि साधून् पृष्ट्वा 'कृतोत्सर्गः' कृतोपयोगो गुरुं नमस्कृत्य, किं करोतीत्यत आह- 'मल्लकरूवे गिण्हइ' मल्लकं-शरावं यत्र लेपो गृह्यते रूतं च गृह्णाति तेनासौ लेपो छड्डुज्जइ, मल्लकरूपयोश्च कदा ग्रहणं करोति ?, यदा तयोः कल्पिको भवति, एतदुक्तं भवति-यद्यसौ वस्त्रैषणायां पात्रैषणायां च गीतार्थस्ततो मल्लकं रूतं च मार्गयित्वा गच्छतीति।

मू. (६१२) गोयत्थपरिग्गहिअ अयाणओ रूवमल्लए घेत्तुं।
छारं च तत्थ वच्चइ गहिए तसपाणरक्खट्ठा ॥

वृ. अथासौ मल्लकरूपयोर्मार्गणे न कल्पिकस्ततो गीतार्थपरिगृहीते-स्वीकृते मल्लकरूपे गृहीत्वा क्षारं च-भूतिं गृहीत्वा तत्र मल्लके व्रजति, गृहीते लेपे सति चीरमुपरि दत्त्वा लेपस्य ततो रूतं तत उपरि भूतिं ददाति, किमर्थं ?, त्रसप्राणरक्षार्थमिति। इदानीं यदुक्तं मार्गाच्चोदकेन यदुत सागारिकगन्त्र्यां लेपग्रहणं न कार्यं यतोऽसौ शय्यातरपिण्डो वर्त्तनकृति. तत्प्रतिषेधनायाह-

मू. (६१३) वच्चंतेण य दिट्ठं सागारिउच्चक्कगं तु अब्भासे।
तत्थेव होइ गहणं न होइ सो सागरिअपिंडो ॥

वृ. व्रजता साधुना लेपग्रहणार्थं यदि दृष्टं सागारिकसंबन्धि ढिचक्के-गन्त्रिका अभ्यासे-समीपे ततस्तत्रैव ग्रहणं कर्त्तव्यं. न भवत्यसौ सागारिकपिण्डः-शय्यातरपिण्डोऽसौ न भवति।

इदानीमसौ गत्वा किं कृत्वा लेपं गृह्णातीत्यत्र आह-

मू. (६१४) गंतूं ढुचक्कमूलं अणुन्नवेत्ता पहुंति साहीणं।
एत्थ य पहुत्ति भणिए कोइ गच्छे निवस्सेव ॥

वृ. गत्वा 'ढिचक्कमूलं' गन्त्रीसमीपं. यदि तत्प्रभुः 'स्वाधीनः' सन्निहितो भवति ततस्तमनुज्ञाप्य गृह्यते. अथ तत्र गत्वा आत्मनः प्रभुर्नास्ति ततश्चासौ साधुः पृच्छति-कोऽत्र प्रभुः ? इति. पुनश्चैवं पृष्टे सति कश्चित्पुरुष एवं ब्रूयाद्. यदुत 'एत्थ य पहु'त्ति अत्र शकटे प्रभुः राजा. ततश्चैवं भणिते सति कश्चिद्गीतार्थो

सन्दीणामनुज्ञापनार्थं नृपस्यार्पणमेव गच्छेत्। एत्थ य आवेधिअणुन्नवणाए दिट्ठंतो।

मू. (६१५) किं देमित्ति नरवई तुज्झं खग्गमक्खिआ दुच्चक्कंति।
सा अपसत्थो लेवो य भद्दतरं दोसा॥

वृ. एगो साहू लेवस्स कज्जे निग्गओ जाव पेच्छइ सगडाइं, साहूणा पुच्छिअं-कस्स एते सगडा ? निहत्थेण सिट्ठं-राउलगा, साहू अगीयत्थो चिंतेइ-एए अणुन्नवेयव्वा, वच्चामि रायं पेच्छामि, तेन राया दिट्ठो भणति राया-किं तुह देमि ?, साहू भणति-तुब्भं सगडे तिलमक्खिएण अत्थि तत्थ लेवो पसत्थो हवति तं मे देहि, एत्थ य भद्देयरे दोसा भवंति, तत्थ जइ सो राया भद्दो ताहे सव्वहिं चेव उग्घोसणं करेइ जहा नहु केणइ सगडा घएण मक्खियव्वा जो मक्खेइ सो दंडं पत्तो एवमाई भद्दओ पसंगं कुन्ना, अह सो पंतो राया ताहे सो भणइ-अन्नं किंची न जाइयं इमीए परिसाए मज्झे नो लेवो जाणिओ, अहो असुई समणा एए मा एएसिं कोई भिक्खं देउ। एते अविहिअणुन्नवणाए दोसा।

मू. (६१६) तम्हा दुचक्कवइणा तस्संदिट्ठेण वा अणुन्नाए।
कडुगंधजाणणट्ठा जिंघे नासं तु अफुसंता॥

वृ. तम्हा विहीए अणुन्नवेयव्वो, सा य विही-ना सगडाणं पासे ठिओ अच्छइ जाव दुचक्कवई आगओ तओ दुचक्कवइणागंतिआवइणा अणुन्नाए सति लेवो गहेयव्वो, तेण दुचक्कवतिणा जो संदिट्ठो एत्थ पट्ठविओ जहा तुमे भलेयव्वं, तेन वा अणुन्नाओ संतो गेण्हइ, कडुगंधजाणणट्ठं जिंघियव्वो लेवो-किं सो कडुओ ? कडुअनेल्लेण मक्खिओनवत्ति, जइ कडुतेलेण मक्खिओ ताहे न घेप्पइ, सो अथिरो होइ, जो मिट्ठति लंमल्लमक्खिओ सो घेप्पइ। कथं पुनर्जिघ्रणं करोति ?, नासिकया अस्पृशन्।

जिंघणा इति अवयवो भणिओ। इदानीं 'छक्कायजयण'त्ति व्याख्यानयन्नाह-

मू. (६१७) हरिए बीए चले जुत्ते, वच्छे साणे जलट्ठिए।
पुढवी संपाइमा सामा, महवाते महियाऽमिए॥

वृ. हरिते बीजे वा तच्छकटं प्रतिष्ठितं भवति ततश्च तत्र न ग्राह्यो लेपः, तथा तत्कदाचिच्छकटं 'चल' गमनाभिमुखं व्यवस्थितं भवति ततश्च न ग्राह्यः, तथा युक्तं वा वहति तदाऽपि न ग्राह्यः, कदाचित्तस्मिन् शकटे वत्सको बद्धो भवति तदास्तत्रो वा ततश्च न ग्राह्यः, श्वा वा तत्र बद्धः तथापि न ग्राह्यः, जलमध्ये तत् शकटं व्यवस्थितं भवति ततो न ग्राह्यः, कदाचिच्च सचित्तपृथिवीप्रतिष्ठितं भवति तथापि न ग्राह्यः कदाचित्संपातिमसत्त्वैः स प्रदेशो व्याप्तस्ततश्च न ग्राह्यः, तथा श्यामा-रात्रिस्तस्यां च न ग्राह्यः, महावाते च वाते सति न गृह्यते, 'महिकायां' धूमिकायां निपतन्त्यां न गृह्यते, अमितश्यामो लेपो न गृह्यते किन्तु प्रमाणयुक्तः। द्वारगाथेयम्, इदानीं भाष्यकृदव्याख्यानयति, तत्राद्यावयवव्याचिख्यासयाऽऽह-

मू. (६१८) हरिए बीएसु तहा अनंतरपरंपरे वि य चउक्का।
आया दुपदं च पतिट्ठियंति एत्थंपि चउभंगो॥ [भा. २०५

वृ. हरिते बीजे च द्वौ चतुष्कौ भवतः, कथम् ?, अनन्तरपरम्परकल्पनया, एतदुक्तं भवति हरितबीजयोरनन्तरप्रतिष्ठितत्वमाश्रित्य भङ्गचतुष्टयं निष्पाद्यते, तथा तयोरेवहरितबीजयोः परम्परप्रतिष्ठितत्वमाश्रित्य द्वितीयभङ्गचतुष्टयं निष्पाद्यते। अत्र चेयं भावना-अनंतरं हरिते पतिट्ठिया सक्तू बीए अ अनंतरं पतिट्ठिआ, एगो भंगो ?। तहा अनंतरहरिए पतिट्ठिआ ण बीए तेषामभावात्, बिइओ भंगो २। अन्ना हरिए अनंतरं न पतिट्ठिया तस्याभावात बीए अनंतरं पइट्ठिआ तइओ ३। तहा अन्ना ण हरिए अनंतरं पइट्ठिआ ण बीए

अनंतरपइट्ठिआ तयोरभावात्, चउत्थो ४, एसमुद्धो भंगो। एवं हरित-बीजपदद्वयेऽनानन्तरप्रतिष्ठितत्वकल्पनया भङ्गचतुष्टयं लब्धं। इदानीं हरितबीजयोरेव परम्परप्रतिष्ठित-त्वकल्पनयायथा भङ्गचतुष्कं लभ्यते तथोच्यते, तत्रैवं-हरिते परंपरपइट्ठिआ सकतं बीए परंपरपइट्ठिआ एगो भंगो अन्ना हरिए परंपरइट्ठिया ण बीए परंपरपइट्ठिआ बीजानामभावात्, बिइओ भंगो, तहा अन्ना हरिते ण परंपरपइट्ठिआ तेषामभावात बीजे परंपरपइट्ठिआ तइओ अन्ना ण हरिए परंपरपइट्ठिआ णवीए परंपरपइट्ठिआ चउत्थो भंगो तयोरभावात्, एस सुद्धो भंगो। 'आयादपुयं च पइट्ठिअंति एत्थंपि चउभंगो' तथा तेष्वेव हरितबीजेषु आत्मा-आत्मा प्रतिष्ठितः द्विपदं च प्रतिष्ठितमिति, एतस्मिन्नपि पदद्वये चतुर्भङ्गिका भवति, कथम् ?, आया हरितबीएसु पइट्ठिओ दुपयं च हरितबीएसु पइट्ठिअं एगो भंगो ?। तथा आया हरित-बीएसु पइट्ठिओ न दुपयं हरियबीएसु पइट्ठिअं बितिओ २, तथा आया न हरितबीजेसु पइट्ठिओ दुपयं च हरितबीएसु पइट्ठिअं तइओ ३। तथा आया हरितबीएसु न पइट्ठिओ दुपयं चहरितबीएसु नपतिट्ठिअं चउत्थो भंगो ४, एसो सुद्धो। एवं अन्नेवि परित्तणंताईहिं भंगा सबुद्धिए ऊहेयव्वा। हरित बीएत्ति गयं, चलत्ति व्याख्यानयन्नाह-

मू. (६१९) दव्वे भावे य चलं दव्वंमि दुपइट्ठिअं तु जं दुपयं।
आया य संजमंमि अ दुविहा उ विराधना तत्थ ॥ [भा. २०५]

वृ. चलं द्विविधं-द्रव्यचलं भावचलं च, तत्र द्रव्यचलं 'दुपइट्ठिअं तु जं दुपयं' दुष्प्रतिष्ठितं यद्द्विपदं-शकटं तद्द्रव्यचलमुच्यते, तत्र च द्रव्यचले लेपं गृह्णत आत्मसंयमविराधना भवति द्विविधा।

भावचलप्रति-पादनायाह-

मू. (६२०) भावचलं गंतुमनं गोणाई अंतराइयं तत्थ।
जुत्तेवि अंतरायं वित्तस्स चलणे य आयाए ॥ [भा. २०६]

वृ. भावाचलमुच्यते यच्छकटं गमनाभिमुखं वर्त्तते, तत्र च लेपं गृह्णतः गोणाई अंतराइयंति-गवादीनां अंतरायं भवति, कथं ?, स कयाइ सगडवई भद्दओ भवति ततो सो जाव साहू लेवं गेण्हइ ताव ते बइल्ले न जोएइ पच्छा ऊसूरे जोतेंति ततो ताणं वइल्लाणं पयट्टत्तिकाउं चारिं न देंति, अग्गतो य जा सा चारी ऊसूरे पत्ता, एवं भावचले गेण्हंतस्स अंतरायं हवइ। जुत्तेत्ति व्याख्यायते, तत्राह-'जुत्तेवि अंतरायं' बलीवर्दयुक्तेऽपि शकटे एवमेवान्तरायं भवति। तथाऽयं च दोषः 'वित्तस्स चलणे य आयाए' ते बलीवर्दाः कदाचित्तं साधुं दृष्ट्वा वित्रसन्ति, ततश्च गन्त्र्याश्चलने लेपं गृह्णत आत्मोपघातो भवति।

मू. (६२१) वच्छो भणइ नासइ डिंभक्खोभेण आयवावत्ती।
आया पवयण साणे काया य भणंति नासंति ॥ [भा. २०७]

वृ. यदि च तत्र वत्सकः आसन्नो भवति ततोऽसौ तं साधुं दृष्ट्वा कदाचिद्भयेन नश्यति, ततो नश्यन् कायान् व्यापादयति। अथासौ तस्यामेव गन्त्र्यां बद्धरज्जुतोऽसौ भयेन नश्यन् गन्त्र्याः क्षोभं करोति, तेन च 'डिम्भक्षोभेण' गन्त्र्याक्षोभेण आत्मव्यापत्तिर्भवति। द्वारं। 'साणे'त्ति व्याख्यायते-कदाचित्तत्र श्वा निष्ठति स च तमसं जिह्वया लिखति, ततश्च लेपं गृह्णत आत्मोपघातो भवति प्रवचनोपघातश्च, भयेन नश्यता कायाश्च विनाश्यन्ते। 'जत्तपुढवि'त्ति व्याख्यायते, तत्राह-

मू. (६२२) जो चेव य हरिएसुं सो चेव गमो उ उदगपुढवीसु।
संघाडमा तसगणा सामाए होइ चउभंगा ॥ [भा. २०८]

वृ. य एव हरितबीजेषु गमः-अधिगम उक्तः अगावंवोदकपृथिव्योरपि द्रष्टव्यः, एतदुक्तं भवति-यथा तत्र

पदद्वयेन भङ्गका उपलब्धाः एवमन्यान्यपृथिव्यापदद्वयेन भङ्गकाः कर्तव्याः। दारं। इदानीं 'संपातिम'त्ति व्याख्यायते, तत्राह-'संपाइमा तसगणा' संपातिमशब्देन त्रसगणा उच्यन्ते, ते यदि भवन्ति ततो लेपो न ग्राह्यः, अत्र च भङ्गचतुष्कं भवति, तद्यथासंपातिमेसु अप्पा पडड्ढिओ भंडी य पडड्ढिआ एगो १, तहा अप्पा संपातिमेसु पडड्ढिओ न भंडी पडड्ढिआ बीओ २, अप्पा न पडड्ढिओ भंडी पडड्ढिआ तइओ ३, अप्पा न पडड्ढिओ न भंडी पडड्ढिआ चउत्थो ४, एस सुद्धो। 'सामाए'त्ति व्याख्यायते, तत्र च श्यामायां भङ्गचतुष्कं भवति, कथं ?, लेवो दिवा गहिओ अन्नंमि दिवसे लाइओ एगो भंगो १, दिवा गहिओ राईए लाइओ बिइओ २, राईए गहिओ दिवा लाइओ तइओ ३, राओ गहिओ राओ लाइओ चउत्थो भंगो ४।

'महावाए'त्ति व्याख्यायते-

मू. (६२३) वाउंमि वायमाणेसु संपयमाणेसु वा तसगणेसु।
नाणुन्नायं गहणं अभियस्स य मा विकिंचणया॥ [भा. २०९]

वृ. वायौ वाति संपतत्सु वा त्रसगणेषु नानुज्ञातं लेपस्य ग्रहणं। दारं। इदानीं महिका, सा च 'संपयमाणेसु वा तसगणेसु' इत्यनेन वाशब्देन व्याख्यातैव द्रष्टव्या, एतदुक्तं भवति-वाशब्दान्महिकायां च पतन्त्यां लेपो न ग्राह्यः। 'अभिय'त्ति व्याख्यायते-'अभितस्य च' प्रमाणाभ्यधिकस्य लेपस्य ग्रहणं न कार्यं, यतः 'मा विकिंचणिय'त्ति मा भूत प्रभूतलेपस्य ग्रहणं विकिंचणं-त्यागस्तत्कृतो दोषो भविष्यतीति।

मू. (६२४) एतद्दोसविमुक्कं घेत्तुं छारेण अक्कमित्ताणं।
चरेण बंधिऊण गुरुमूलंडिक्कमालोए॥

वृ. एतद्दोषविमुक्तं लेपं गृहीत्वा वस्त्रेणाच्छाद्य छारेणाक्रम्य ततश्चीवरेण तं शरावसंपुटं बद्ध्वा गुरुमूलमागत्य ईर्यापथिकां प्रतिक्राम्य गुरवे आलोचयति।

मू. (६२५) दंमिअछंदिअगुरुमेसएसु (य) ओमत्थियस्स भाणस्स।
काउं चीरं उवरिं रयं च छुभेज्ज तो लेवं॥

वृ. पुनश्चासौ काव्यापारेण दर्शयति, पुनश्च गुरुं छन्दयति-आमन्त्रयति, यदि भदन्तस्य प्रयोजनं लेपेन ततो गृह्यतामिति, एवं छन्दयति। 'सेसाण य'त्ति शेषांश्च साधून् छन्दयति, यदुत यदि भदतामनेन लेपेन किञ्चित्प्रयोजनं ततो गृह्यतामिति। एवं यदा न कश्चिद् गृह्णाति तदा 'ओमंथियस्स भाणस्स'त्ति ओमन्थितस्य-अधोमुखीकृतस्य भाजनस्य उपरि कृत्वा चीरं, ततश्चीरस्योपरि श्लक्ष्णपटलं करोति, 'छुभेज्ज तो लेवं'ति ततो रजस्योपरि लेपं प्रक्षिपेत्।

मू. (६२६) अंगुट्ठपएसिणिमज्झिमाए घेत्तुं घणं तओ चीरं।
आलिंपिऊण भाणं एक्कं दो तिन्नि वा घट्टे॥

वृ. पुनश्चासौ रजस्योपरि क्षिप्त्वा लेपं पुनरङ्गुष्ठप्रदेशिनीमध्यमाभिरङ्गुलीभिर्गृह्णाति, गृहीत्वा च 'घनम' अत्यर्थं चीरं पुनः पोट्टलिकाविनिर्गतिलेन लेपरसेन पात्रमालिम्पति, तच्च पात्रकं कदाचिदेकं भवति कदाचिद्द्वे कदाचित्त्रीणि, ततश्च तान्यालिप्य पुनः घट्टयति-अङ्गुल्या मसृणानि करोतीत्यर्थः।

तानि च पात्रकाणि एवं लिम्पति-

मू. (६२७) अन्नोऽन्नं अंकंमि उ अन्नं घट्टेइ वामहत्थेणं।
आलेइ तमेव दिनं दवं गहेउं अभत्तट्ठी॥

वृ. अन्यद् अन्यद् अङ्के-उत्सङ्गे स्थापयति, स्थापयित्वा चान्यद् 'घट्टयति' अङ्गुल्या मसृणयति, एवं

वार्या वार्या एव हे वाऽङ्गे स्थापयेत् अन्यच्चैकं मसृणयति एवं तावद्यावन्मसृणानि संजातानि भवंति। यदा पुनरेकमेव लिप्तमुत्कृष्टलेपेन भवति तदा रूढे सति 'आनइ तमेव दिनं'ति तस्मिन्नेव दिवसे द्रव-पानक-मानयति 'गुडं' रङ्गयित्वा पात्रके तदेव 'अभत्तट्ठि'त्ति उपोषित एवं करोति।

अथासौ ग्लानादीनां वैयावृत्त्यकरः स्यात्ततः-

मू. (६२८) अभत्तट्ठियाण दाउं अन्नेसिं वा अहिंडमाणाणं।
हिंडिऊ असंथरणं असहू घेत्तुं अरइयं तु॥

वृ. अथ तत पात्रक न रूढं ग्लानादयश्च सीदन्ति सोऽपि वैयावृत्त्यकरोऽनंतरं ये अभक्तार्थिकाः-उपवासिकाः साधवस्तेभ्यो 'दत्त्वा' समर्प्य भिक्षार्थं व्रजति। 'अन्नेसिं वा अहिंडमाणाणं' अन्ये वा ये भिक्षां नाटन्ति तेषामहिण्डमानानां भक्तार्थिनां समर्प्य हिण्डते। 'असंथरणं'ति ग्लानादीनामसंस्तरणे-असंतरणाए होंताए एवमसौ करोति। 'असहू'ति अथासौ स्वयमेवासहिष्णुरुपवासं कर्तुं ततः 'घेत्तुं अरइयं तु'त्ति गृहीत्वाऽन्यसाधुसत्कं पात्रं 'अरइयं तु'त्ति अरंजितं तस्मिन दिवसे पर्याप्तमित्यर्थः, तद्गृहीत्वा हिण्डेत। यदा पुनर्नवविधः साधुनास्ति कश्चिद्यस्य तत्रवलेपं पात्रकं समर्प्य भिक्षामटति, आत्मना च त्रीणि पात्रकाणि संवाहयितुं न शक्नोति, कानि त्रीणि ?, एकं नवलेपं पात्रकं अन्यो भक्त एतद्गृहस्तृतीयमशुद्धार्थं मात्रकं, तदा को विधिरित्यत आह-

मू. (६२९) न तरेज्जा जइ तिन्नी हिंडावेउं तओ अ छारेणं।
उच्चत्तेउं हिंडइ अन्ने य दवं सि गेण्हंति॥

वृ. 'न तरेत्' न शक्नुयात् यदि त्रीणि पात्रकाणि हिण्डयितुं ततो नवलेपं पात्रकं छारेण-भूतिना अवचूर्ण्य-गुण्डयित्वा एकत्र प्रदेशे स्थापयित्वा हिण्डते। 'अन्ने य दवं सि गि ण्हंति'त्ति अन्ये साधवस्तदर्थं द्रवपानकं गृह्णन्ति। तथा च-

मू. (६३०) लेत्थारियाणि जाणि उ घट्टगमाईणि तत्थ लेवेणं।
संजमफाइनिमित्तं लाई भूमीइ गुंडेत्ता॥

वृ. 'लेत्थारियाणि' लिप्तानि, केन ?, लेपेनेति संबन्धः, यानि घट्टकादीनि, तत्र घट्टको-येन पाषाणकेन पात्रं नवलेपं मसृणं क्रियते, आदिग्रहणाच्छरावं चीरं च लेपलिप्तं, एतानि लेपेन सर्वाण्येव लिप्तानि तत्र पात्रके लिम्पतः, ततश्च तानि घट्टकादीनि भृत्वा गुण्डयति, येन तत्र प्रतिग्रापितानां सत्तां कीटिकाद्युपघातो न भवेत्। किमर्थं पुनरेवं क्रियते ?, अत आह-'संजमफातिनिमित्त'मिति संयमवृद्ध्यर्थमिति।

मू. (६३१) एवं लेवग्गहणं आनयणं लिंपणा य जयणा व।
भणियाणि अतो वोच्छं पत्तिकम्मविहिं तुलवस्स॥

वृ. 'एवम्' उक्तेन न्यायेन लेपग्रहणं तथा तस्यैवानयनं लिम्पना च पात्रकस्य यतना च ग्रहणं लेपस्यैतानि भणितानि, अतः परं वक्ष्ये पत्रिकर्मविधिं लिप्तस्य पात्रकस्य। स चायं पत्रिकर्मविधिः-

मू. (६३२) लित्ते छगणिअछारो धनेन चीरेण बंधिउं उण्हे।
अंछण परियत्तण घट्टणे य धोवे पुणो लेवो॥

वृ. लिप्ते तत्र पात्रके सति 'छगणियछारो'त्ति गोमयछारेण तत्पात्रकं गुण्डयते, पश्चात्च धनेन 'चीरेण' पात्रकबन्धनवेष्टयित्वा रजस्त्राणेन च परिवेष्ट्य 'बंधिउं'ति पात्रकबन्धग्रन्थिमदत्त्वा तत एवंविधं कृत्वा 'उण्हे'त्ति उष्णे स्थापयति, 'अंछण'त्ति ततोऽङ्कयित्वा लिप्तस्य रङ्गितस्य पात्रकस्याकर्षणं-समारणं करोति,

आतपे कृत्वा पुनः परिवर्त्तयति-आतपाभिमुखं करोति, एवं शोषणा तस्य नवलेपस्य पात्रकस्य, धौते च छारगृण्डिते तत्र पात्रके पुनर्लेपो दीयत इति। इदानीं भाष्यकार एतामेव गाथां व्याख्यानयति, तत्र 'लित्ते छगणियछारो'त्ति इदं व्याख्यातमेव द्रष्टव्यं, शेषं व्याख्यानयन्नाह-

मू. (६३३) दाउं सरयत्ताण पत्ताबंधं अबंधनं कुज्जा।
थाणाइरक्खणट्ठा पमज्ज छाउण्हसंकमणा॥ [भा. २१०]

वृ. दत्त्वा तत्र पात्रके सरजस्त्राणं पात्राबन्धं पुनश्चाबन्धकं कुर्वन्ति-तत्र ग्रन्थिं न ददाति, किमर्थम ?, अत आह-'थाणादिरक्खणट्ठा' स्थानादिरक्षणार्थं ग्रन्थिं न ददाति, इदमुक्तं भवति-ग्रन्थिना दत्तेन सता कर्पटकदेशे गृहीतः सन् शुना मार्जारेण वा नीयते, पुनश्च तत्पात्रकं प्रमृज्य भुवं छायातः उष्णे सङ्क्रामयति, एतदुक्तं भवति-अपराह्णच्छायाक्रान्तं सत् पुनरुष्णे स्थापयति।

मू. (६३४) तद्दिवसं पडिलेहा कुंभमुहाईण होइ कायव्वा।
छन्नेय निसंकुज्जा कयकज्जाणं विउस्सग्गो॥ [भा. २११]

वृ. यस्मिन दिवसे पात्रकं लेपयति तस्मिन् दिवसे 'कुम्भमुखादीनां' घटग्रीवादीनां प्रत्युपेक्षणं कृत्वा ततश्च गृह्णाति, येन लिप्तं पात्रकं बहिस्तस्यां ग्रीवायां तस्मिन् दिवसे क्रियते, निशायां तु छन्ने तत्पात्रके कुर्याद्, आत्मसमीपे, कृते च कार्ये व्युत्सर्गः कर्तव्यस्तेषां घटग्रीवादीनां तस्मिन्नेव दिवसे येन परिग्रहकृतो दोषो न भवेत्, अन्यस्मिन दिवसेऽन्यानि भविष्यन्ति। अथ लेपशेषः कश्चिदास्ते ततस्तस्य को विधिरित्यत आह-

मू. (६३५) अद्धगहेउं लेवाहिथं तु सेसं सरूवगं पीसे।
अहवावि नत्थि कज्जं सरूवमुज्झे तओ विहिणा॥

वृ. कदाचित्तत्रान्यत्र वा पात्रकेऽष्टको दातव्यो भवति, ततस्तदर्थं-अष्टकनिमित्तं करेण तं लेपाधिकं शेषं सरूपं पेष्यते, अथ तेन लेपशेषेण न किञ्चित्कार्यमस्ति ततः सरूपमेव विधिना परित्यजेत् छारेण गृण्डयित्वेत्यर्थः। इदानीं तत्पात्रकं कस्यां पौरुष्यां बाह्यतः स्थापनीयं ? कस्यां चाभ्यन्तरे प्रवेशयितव्यमित्येतत्प्रदर्शयन्नाह-

मू. (६३६) पढमचरिमा सिसिरे गिम्हे अद्धं तु तासि वज्जेज्जा।
पायं ठवे सिनेहातिरक्खणट्ठा पवेसो वा॥

वृ. 'शिशिरे' शीतकाले प्रथमपौरुषीं वर्जयित्वा सत्पात्रकं बहिरातपे स्थाप्यते, चरमायां-चतुर्थप्रहरे शिशिरेपौरुष्यां यत्पात्रकमभ्यन्तरे प्रवेशयेत्, 'गिम्हे अद्धं तु तासि वज्जेज्ज'त्ति ग्रीष्मकाले तयोः-प्रथमचरमपौरुष्योरर्द्धं वर्जयेत्, ततः पात्रकं स्थापयेत् प्रवेशयेद्वा, एतदुक्तं भवति-ग्रीष्मे अर्द्धपौरुष्यां गतायां सत्यां पात्रकं बहिः स्थापयेत्, तथा चरमप्रहरार्द्धं गते सति तत्पात्रकं प्रवेशयेत्, किमर्थं ?-'सिनेहाइरक्खणट्ठा' एतदुक्तं भवति-शिशिरे प्रथमप्रहरः चरमप्रहरश्च स्निग्धः कालस्तास्मिंश्च पात्रकं न क्रियते, लेपविनाशभयात्, तथोष्णकाले च प्रथमप्रहारार्द्धे चतुर्थप्रहरार्द्धे च न स्थाप्यते, सोऽपि स्निग्ध एव कालः, अतीवोष्णं स्थापनीयं येन रूक्षयत इति।

मू. (६३७) उवओगं च अभिक्खं करेइ वासाइरक्खणट्ठाए।
बावारेइ व अन्ने गिलाणमाइसु कज्जेसु॥

वृ. तस्मिंश्चातपस्थापिते 'उपयोगं' निरूपणं 'अभीक्ष्णं' पुनः पुनः करोति, किमर्थमित्यत आह-'वासाइरक्खणट्ठा' वर्षादिरक्षणार्थं, आदिग्रहणात् श्वादिरक्षणार्थं च, अन्यान् वा साधून व्यापारयति

पात्रकरक्षणार्थं यद्यात्मना ग्लानादिकार्येषु क्षणिकः। किंपर्यन्तः पुनर्लेपा दीयन्ते इत्यस्य प्रदर्शनायाह-

मू. (६३८) एक्को व जहन्नेणं दुगतिगचत्तारि पंच उक्कोसा।
संजमहेउं लेवो वज्जित्ता गारवविभूसा॥

वृ. एको जघन्येन प्रलेपो दीयते मध्यमेन न्यायेन द्वौ त्रयश्चत्वारो वा उत्कृष्टतः पञ्च लेपा दीयन्ते, स च संयमार्थं दीयते, वर्जयित्वा गौरवविभूषे, तत्र गौरवं येन मां कश्चिद्भणति यथैतदीयमेतच्छोभनं पात्रमिति, विभूषा शृङ्गारः। इदानीं "धोवे पणो लेवो" त्ति. अमुमवयवं व्याख्यानयन्नाह-

मू. (६३९) अनुवट्टंते तह्वि हु सव्वं अवनित्तु तो पुनो लिंपे।
नज्जाय सचोप्पडगं घट्टगरडणं ततो धोवे॥

वृ. अनुवर्तिष्यति-अरुक्ष्यमाणे ऊरुज्झंते, एतस्मिन पात्रके 'तथाऽपि' तेनापि प्रकारेण यदा न रोहति तदा सर्वं लेपमपनीय ततः पुनर्लिम्पति। एष तावत स्वप्रलेपविषयो विधिरुक्तः, इदानीं तज्जातलेपविधिं प्रदर्शयन्नाह-'नज्जायसचोप्पडगं' तस्मिन्नेव ज्ञातस्तज्ज्ञातो-गृहस्थस्तन्मीपस्थस्यैवात्मबुकस्य 'सचोप्पडगस्स' तैलस्निग्धस्य तद्वत्स्निग्धश्लक्ष्णं चिक्कणं लग्नं स तज्जाततेप उच्यते. एवं तज्जाततेप, सचोप्पडं-सस्नेहं यत्पात्रकं तद् 'घट्टगरडणं' घट्टकेन रचितं-मसृणितं घृष्टं सत्ततः काञ्जिकेन क्षालयेत। कतिप्रकार पुनर्लेपः ?

मू. (६४०) तज्जायजुत्तिलेवो खंजणलेवो य होइ बोद्धव्वो।
मुद्दिअनावाबंधो तेनयबंधेन एडिकुट्ठो॥

वृ. तज्जातलेपो युक्ति लेपः-पाषाणादिः स्वप्रलेपश्चेति विज्ञेयः। एवं च यदा तत्पात्रकं पूर्वमेव भग्नं भवेत्तदा किं कर्त्तव्यमित्यत आह-तदाऽन्यद्गृह्यते तत्रकं, यदाऽन्यस्याभावस्तदा किं कर्तव्यमित्यत आह-'मुद्दिअनावाबंधो' त्ति तदा तदेव पात्रकं सीव्यति, केन पुनर्बन्धेन तत्सीवनीयं ?, मुद्रिकाबन्धेन-ग्रन्थिबन्धेन सीव्यति यादृशो नावि बन्धो भवति तत्सदृशेन गोमूत्रिकाबन्धेनेत्यर्थः, अन्यः स्तेनकबन्धो गूढो भवति स वर्जितो यतस्तत्पात्रकं तेन स्तेनकबन्धनाहृतं भवति झुम्मिरं च होतित्ति। इदानीमेतानेव गाथां व्याख्यानयति, तत्र तज्जातस्वप्रलेपौ व्याख्यातावेव, इदानीं युक्ति लेपं प्रतिपादयति-

मू. (६४१) जुत्तीउ पत्थराई पडिकुट्ठो मो उ सन्निही जेणं।
दयकुसुमार असन्निहि खंजणलेवो अओ भणिओ॥

वृ. युक्ति लेपः पुनः प्रस्तरादिरूपः, आदिग्रहणाच्छर्करिकालेपो वा, स च प्रस्तरादिलेपः प्रतिकृष्टः-प्रतिषिद्धो भगवद्भिर्यतः स सन्निधिमन्तरेण न भवति, यतश्चैवमतो जीवदयार्थं सुकुमारत्वादसन्निधिरिति च कृत्वा स्वप्रलेप एभिः कारणैरुक्तो-भणितः। आह-एवं हि सुकुमारं लेपमिच्छतस्तस्य विभूषा भवति ?, उच्यते, नैतदस्ति, यतः-

मू. (६४२) संजमहेउं लेवो न विभूसाए वदंति तित्थयरा।
सड असड य दिट्ठंतो सड्ढाहम्मे उवणओ उ॥

वृ. 'संयमहेतुं' संयमनिमित्तं लेप उक्तो न विभूषार्थं वदन्ति तीर्थंकराः। अत्र च सदृष्टान्तः असदृष्टान्तश्च। एकस्मि न्निविवेके दो इत्थियाओ, ताणं एक्का सड्ढा अन्ना असड्ढा, जा सा सड्ढा सा अन्नाणं विभूसंती अच्छइ, असड्ढावि एवमेव, नओ सड्ढाए भत्तारभत्तिनिमित्तं उव्वप्पवेसो लोगेण गणिज्जइ न य हसिज्जइ, असड्ढाए पुण वेसो उम्मत्तो लोए हसिज्जइ, यतस्तस्या असौ वेषोऽन्यार्थे वर्त्तते। एवमत्र सतीसाधर्म्ये उपनयः कर्तव्यः, यथा सत्या विभूषां प्रकुर्वन्त्या अपि सा विभूषा लोकेनान्यथा न कल्प्यते एवं साधोः संयमार्थं शोभनं

लेपयतोऽपि न विभूषाऽतो । इति ॥ इदानीं पुष्टिकारणाद्यभावे स्थानस्थानगति. तत्संबन्धं प्रतिपादयन्नाह-

मू. (६४३) भिज्जिज्ज लिप्पमाणं लित्तं वा असइए पुणो बंधो ।
मुद्दिअनावाबंधो न तेणएणं तु बंधिज्जा ॥

वृ. भिद्येत्तल्लिप्यमानं पात्रकं वा लिप्तं वा सदिभद्येत ततोऽन्यस्याभावे पुनरपि बध्यते-सीव्यते. तत्र मृद्भिकाबन्धस्त्रयं नावबन्धः पुनर्द्विविधो भवति. स्तेनकबन्धः पुनर्गुप्तो भवति. मध्येनैव पात्रककाष्ठस्य छल्ल्यो यांति नाडयावल्या राजिः सीविता भवति. तेन स्तेनकबन्धेन दुर्बलं पात्रं भवत्यतोऽसौ वर्जनीयः ।

. इदानीं स लेप उत्तममध्यमजघन्यभेदेन त्रिविधो भवत्यत आह-

मू. (६४४) खरअयसिकुसुंभण्णरिसाव कमेण उक्कोसमज्झिमजहन्ना ।
नवनीए सप्पिवसा गुडेन लेपो अलेवो उ ॥

वृ. खर इति-खरसत्रयं तिलतिल्लं तेण कओ उक्कोसो लेवो, अयसि-कुसुंभिआ तेण य मज्झिमो लेवो. सप्पिवसातल्लेण य जहन्नओ होइ, अनेन क्रमेणोत्कृष्टो मध्यमो जघन्य इति । कः पुनर्लेपो न भवतीत्यत्र आह-नवनीतेन सर्पिषा-घृतेन वसया गुडेन त्रवणेन च. एभिः स्नेहलेपः-एभिर्लेपो न भवतीति । उक्तो द्रव्यपिण्डः, इदानीं पिण्डस्यैकार्थिकान्युच्यन्ते-

मू. (६४५) पिंड निकाय समूहे संपिंडण पिंडणा य समवाए ।
समोसरण निचय उवचय चए य जुम्मे य रासी य ॥

वृ. पिण्डो निकायः समूहः संपिण्डनं पिण्डना च समवायः समवसरणं 'सृ गतौ' सम्यग्-एकत्र गमनं समवसरणं, निचय उपचयः चयश्च जुम्मश्च राशिः पिण्डार्थः । प्रतिपादितो द्रव्यपिण्डः, भावपिण्ड-

मू. (६४६) दुविहो य भावपिंडो पसत्थओ होइ अप्पसत्थो य ।
दुग सत्तट्ठचउक्कग जेणं वा बज्झए इयरो ॥

वृ. द्विविधो भावपिण्डः-प्रशस्तभावपिण्डोऽप्रशस्तभावपिण्डश्च, तत्राप्रशस्तं प्रतिपादयन्नाह-'दुयसत्त-अट्ठ'इत्यादि, दुविहो रागो य दोसो य सत्तविहो सत्त भयट्ठाणाणि, एतानि च तानि-इहलोकभयं परलोकभयं आयाणभयं अकस्माभयं आजीविकाभयं मरणभयं अश्लोकभयं, ''इहपरलोयायाणमकम्हाआजीवमरण-मसिलोए''त्ति । अट्ठ कम्मपयडीओ नानावरणाइयाउ. अहवा अट्ठ मयट्ठाणाणि-जाइकुलबलरूवे तवइस्सरिए सुए लाभे । चउव्विहो कोहमाणमायालोहरूवो । रागद्वेषावेव पिण्डः औदयिको भावोऽनन्तकर्मपुद्गलनिर्वृत्तः पिण्डः, एवं सामभिर्भयस्थानैर्यो जन्यते कर्मपिण्डः, एवमन्यत्रापि योज्यं, 'येन वा' बाह्येन वस्तुना इतरः आत्मा बध्यते कर्मणाऽष्टप्रकारेण सोऽप्रशस्तः । इदानीं प्रशस्तं भावपिण्डं प्रतिपादयन्नाह-

मू. (६४७) तिविहो होइ पसत्थो नाणे तह दंसणे चरित्ते य ।
मोत्तूण अप्पसत्थं पसत्थपिंडेण अहिगारो ॥

वृ. त्रिविधः प्रशस्तो भावपिण्डः-ज्ञानविषयः दर्शनविषयः चारित्रविषयश्च, तत्र ज्ञानपिण्डो ज्ञानं श्लाघां नीयते येन, तथा दर्शनं श्लाघां नीयते येन. चारित्रं श्लाघां नीयते येन, स बाह्योऽभ्यन्तरश्च पिण्डः. मुक्त्वाऽप्रशस्तं प्रशस्तपिण्डेनाधिकारः । अयं च भावपिण्डः केन पिण्ड्यते ?-प्रच्यूयतेऽभिधीयते, शुद्धेनाहारोपधिशय्यादिना, अत्र चाहारेण प्रकृतं, स एव प्रशस्तो भावपिण्डः, कारणे कार्योपचारात्, ज्ञानादिपिण्डकारणमयो, स चाहार एषणाशुद्धो ग्राह्यः, अनेन संबन्धेनागता एषणा प्रतिपाद्यते । अथवा पूर्वमिदमुक्तं-'पिंडे च एसणे च वोच्छं' तत्र पिण्ड उक्तः, इदानीमेषणा प्रतिपाद्यते, अथवा स्वयमेवायं

भाष्यकृत्संबन्धं करोति-

मू. (६४८) लित्तमि भायणंमि उ पिंडस्स उवग्गहो उ कायव्वो।
जुत्तस्स एसणाए तमहं वोच्छं समासेणं॥ [भा. २१२]

वृ. लिप्ते भाजने सति ततः पिण्डस्योपग्रहो-ग्रहणं कर्तव्यं, किंविशिष्टस्य पिण्डस्य ?-एषणायुक्तस्य, अतस्तामेवैषणां प्रतिपादयन्नाह-

मू. (६४९) नामं ठवणालिंगे भावंमि य एसणा मुणेयव्वा।
दव्वंमि हिरन्नाई गवेसगाइ भुंजणा भावे॥

वृ. नामस्थापने सुगमे, द्रव्ये-द्रव्यविषया, यथा हिरण्यादेर्गवेषणां करोति कश्चिद् भावे-भावविषया त्रिविधा-गवेषणैषणा-अन्वेषणैषणा ग्रहणैषणैषणा-पिण्डादानैषणा ग्रासैषणा।

सा च गवेषणैषणा एभिर्द्वारैरभिगन्तव्या-

मू. (६५०) पमाणे काले भावस्सऽट्ठ य संघाडए य उवकरणे।
मत्तगकाउस्सग्गो जस्स य जोगो सपडिवक्खो॥

वृ. प्रमाणं कतिवारा भिक्षार्थं प्रवेष्टव्यमिति, एतद्वक्ष्यति, 'काले'त्ति कस्यां वेलायां प्रवेष्टव्यं ?, भिक्षा गवेषणीया इत्यर्थः, 'आवस्सए'त्ति आवश्यके-कायिकादिव्युत्सर्गं कृत्वा भिक्षाटनं कर्तव्यं गवेषणमित्यर्थः, 'संघाडए'त्ति सङ्घाटकयुक्तेन न हिण्डनीयं नैकाकिना, 'उवगरणे'त्ति भिक्षाटता सर्वमुपकरणं ग्राह्यमाहोस्विदन्यत्स्वल्पं, 'मत्तगे'त्ति भिक्षाटता-गवेषयता मात्रकग्रहणं कर्तव्यं, कायोत्सर्गः-भिक्षार्थं गच्छता उपयोगप्रत्ययः कार्यः, तथा च यस्य योगः-भिक्षार्थं गच्छन्निदं वक्ति यस्य योगो-येन वस्तुना सह संबन्धो भविष्यति तद्ग्रहीष्यामीत्यर्थः, 'सपडिवक्खो'त्ति सर्व एवायं द्वारकलापः सप्रतिपक्षोऽपि वक्तव्यः, सापवादोऽपीत्यर्थः। इदानीं भाष्यकारः प्रतिपदमेतां गाथां व्याख्यानयति, तत्र "पमाणे"त्ति व्याख्या-

मू. (६५१) दुविहं होइ पमाणं काले भिक्खा पवेसमाणं च।
सत्ता भिक्खायरिआ भिक्खे दो काल पढमम्मि॥ [भा. २१३]

वृ. द्विविधं प्रमाणं भवति, 'काले'त्ति एकं कालप्रमाणं कालनियमः-वेलानियम इत्यर्थः, तथाऽन्यद्भिक्षार्थं प्रविशमानानां 'प्रमाणं' वाराद्यलक्षणं भवति, तत्र भिक्षाप्रवेशप्रमाणप्रतिपादनायाह-'सत्ता भिक्खायरिया भिक्खे दो' भिक्षार्थं वाराद्वयं प्रविशति, एकमकालसञ्ज्ञायाः पानकनिमित्तं, द्वितीयं भिक्षाचर्याकाले प्रविशतीति। जदि पुन तइयवारं भिक्खायरिअं करेइ ततो खेत्तं चमढिज्जइ उक्तानां च हवइ, जहा नत्थि एत्थिं भिक्खाहिंडणे नियमो, तम्हा दोन्नि वाराउ हिंडियव्वं, एवं च पुव्वभणियमेव-पुणो पुणो पविसणे सहयकुलाणि चमढिज्जंतीति, तेन भामकेण बहुवारं पविसणे दोषा न ढंकिआ। उक्तं भिक्षाप्रवेशवाराप्रमाणं, भिक्षाकालप्रतिपादनायाह-'काले पढमम्मि' काल इति भिक्षाकालस्तस्मिन् प्रविशितव्यं, तथा 'पढमम्मि' इति प्रथमपौरुष्यां वर्तमाने तस्मिंश्च भिक्षार्थं प्रविशितव्यं, उक्तं कालप्रमाणम।

मू. (६५२) आरेण भद्दएसा भद्दग उड्डवण भंडण पओसा।
दोसाणपरूवणया ठवियगदोसा य भद्दंमि॥ [भा. २१४]

वृ. यदि पुनरतीवप्रूष्यां आगत एव-प्रत्यूषसि एव भिक्षार्थं प्रविशति ततो भद्रकेनाऽनेन दोषाः 'उड्डवणं भंडणपओसा' उड्डावणं परगृहमहिलाया करेइ, जहा पव्वतियगा आगया तं उड्डेत्ता देन्ति, अहवा सा आलस्सेण न उट्ठेइ तओ भंडणंकलहो होज्जा, अथवा सा चेव पओसेज्जा, प्रद्वेषं गच्छतीत्यर्थः।

'दोसीणपउग्गकरणं' ति सो चेव गिहवई इमं भणइजहा णं तवस्सिणो रत्तिं अजिमिआ एताहे छुहाईया अहो समतिरेगं रंधिज्जासु जेन एयाणंपसरवेलाए आगयाणं होइत्ति। तथा 'ठविअगदोसा य'त्ति स्थापनाकृतावेव दोषा भवन्ति ॥ साम्प्रतं प्रान्तकृतदोषकथनायाह-

मू. (६५३) अद्दागमंगलं वा उब्भावण खिंसणा हनन पंते।
फिडिउग्गमेय ठविया भद्दगचारीकित्तस्सणया ॥ [भा. २१५]

वृ. गिहवई घरे अत्थि, तओ पसरं गाहं आगओ, तं दट्ठूण य गिहवई इमं भणिज्जा-अहो मे अद्दागमिव अधिट्ठाणं दिट्ठं, अमंगलं चासी गृहपतिर्मन्यते साधुदर्शनं, ततश्चेव ओहावणा-परिभवो हवइ, तथा खिंसणा वा भवति, जहा एते पोट्टपूरणत्थमेव पव्वइया, आहणणा वा पंते-प्रान्तविषये भवति। एवं तावत्प्रत्यूषस्येव प्रविशतां दोषा उक्ताः। 'फिडिए' त्ति अथापगतायां-अतिक्रान्तायामर्द्धपौरुष्यां भिक्षार्थं प्रविशति ततश्च यदि भद्रको भवति तत एवं ब्रवीति-यदुत अद्यदिवसादारभ्य यथा इयती वेला राङ्कस्य भक्तस्य भवति तथा कर्तव्यं, ततश्च 'उद्गमदोषः-आधाकर्मादिदोषः। 'ठविय'त्ति अथवा यद्धरति तत्त्वयाऽद्यदिवसादारभ्य साध्वर्थं स्थापनीयं, ततश्चैवं स्थापनादयो दोषा भद्रकविषया भवन्ति, अथासौ गृहपतिर्भद्रको न भवति ततः 'चारी' इति ततश्चावेलायां भिक्षार्थं प्रविष्टमेवं प्रान्तो ब्रवीतियदुतायं चारीभण्डिकः कश्चिद् अन्यथा कोऽयं भिक्षाकाल इति, नायं प्रत्यूषकालो नापि मध्याह्नकाल इति, 'किंतस्सण'त्ति तथा अवेलायां भिक्षानिमित्तं प्रविष्टस्य क्लेश एव पर्यटनजनितः परं न तु भिक्षाप्राप्तिः, तम्हा दोसीणवेलाए चेव उयरेयव्वं। इदानीं मध्याह्नस्यारत एव यदि भिक्षामटति ततः को दोषः ? इत्यत आह-

मू. (६५४) भिक्खस्सयवि य अवेला ओसक्कहिसक्कणे भवे दोसा।
भद्दगपंतातीया तम्हा पंते चरे काले ॥ [भा. २१६]

वृ. भिक्षाया अवेलायां यदि प्रविशति ततो यदि भद्रकः 'ओसक्कण'त्ति याऽसौ रन्धनवेला तां मध्याह्नादारत एव कारयति येन साधोरपि दीयते, एवं तावद्भिक्षावेलायामप्राप्तायां हिण्डतो दोषाः, अथ पुनर्निवृत्तायां भिक्षावेलायामटति ततः 'अहिसक्कणे'त्ति रन्धनवेलां नामुच्चैर एव करोति येन साधोरपि भक्तं भवति, एवमेते दोषा भद्रके भवन्ति, 'पंतादीय'त्ति प्रान्तकृतास्तु दोषाः पूर्ववद्रष्टव्याः भाण्डिकोऽयमिति ब्रुते प्रान्तः, तस्मात्प्राप्त एव काले चरेद्भिक्षां न न्यूनेऽधिके वा। "काले"त्ति गतं, इदानीं "आवस्सए"त्ति व्याख्यायते-

मू. (६५५) आवस्सग सोहेउं पविसे भिक्खस्स सोहणं दोसा।
उग्गाहिअवोसिरणं दव्वअसइंग य उड्डाहो ॥ [भा. २१७]

वृ. अवश्यं कर्तव्यमावश्यकं-कायिकाव्युत्सर्गरूपं शोधयित्वा कृत्वेत्यर्थः, ततो भिक्षार्थं प्रविशेत्, असाधने आवश्यकस्य दोषा भवन्ति, कथं ? - 'उग्गाहियवोसिरणं'ति यदसौ साधुः उद्ग्राहितेन-गृहीतेनैव पात्रकेण व्युत्सृजति तत उक्तदोषः, अथ तत्प्रायोग्यमन्यस्य साधोः समर्प्य यदि व्युत्सृजति ततश्च द्रव्यस्यासति-अभावे सति 'उड्डाहो' उपघातो भवति।

मू. (६५६) अडदूरगमनाफिडिआ अलहंतो एयाणंपि पेल्लणया।
छड्डावण पंतावण धरणं मरणं च छक्काया ॥ [भा. २१८]

वृ. अथासौ अतिदूरं गमनं करोति स्थण्डिलं ततः 'फिडिआ'त्ति भ्रष्टः सन् भिक्षावेलाया भिक्षावेलाया भिक्षामप्राप्नुवन्नेषणामपि 'प्रत्येत' अतिक्रामयेत्, अथवा तत्रैव क्वचिद्दूरगते व्युत्सृजति ततः 'छड्डावण'त्ति स गृहपतिस्तदशुचि छर्दयति, न्याय्यमयतनात्यर्थः, अथवा पंतावणं-ताडनं कशादिना करोति, अथतद्दोषभया-

क्षरणं करोति पुरीषवेगस्य तता मरणभयं भवेत्, व्युत्सृजतस्तु षटकायविराधनेति, स्थण्डिलाभावात्। 'आवस्सए'त्ति गतं, 'संघाडए'त्ति व्याख्यायते-

मू. (६५७) एक्कागिवस्स दोसा इत्थी साणे तहेव पडिणीए।
भिक्खवियोहि महव्वय तम्हा सविइज्जए गमनं॥

वृ. यदि सङ्घाटकोपेतः सन् भिक्षाटनं न करोति तत एकाकिन एते दोषाःस्त्रीकृतः श्वजनितः प्रत्यनीकजनितः भिक्षाविशुद्धिरेकस्य न भवति तथा व्रतोपघातो भवति तस्मात्सद्वितीयेन गन्तव्यम्। इयं च प्रतिद्वारगाथा. इदानीं भाष्यकारः प्रतिपदं व्याख्यानयति-

मू. (६५८) संघाडएणऽगहणे दोसा एगस्स इत्थियाउ भवे।
साणे भिक्खुवओगं संजमआएसयरदोसा॥ [भा. २१९]

वृ. 'सङ्घाटकस्य' सङ्घाटकसंयोगस्य 'अग्रहणे' अकरणे दोषा एकाकिनः स्त्रीकृता भवन्ति, एकाकिनं दृष्ट्वा साधु कदाचिद्हन्यात्। 'इत्थि'त्ति गतं, 'साणे'त्ति व्याख्यायते-शुन्युपयोगं यदि ददाति ततः संयमविषयो दोषः, अथ भिक्षायामुपयोगं ददाति तत आत्मोपघातदोषः, एवमेकाकिनः प्रविशतः शुनाकृतो दोषो भवतीति, तथाभङ्गस्य चैतद् व्याख्येयं। 'साण'त्ति गतं, इदानीं 'पडिणीए'त्ति व्याख्यायते-

मू. (६५९) दोन्नि उ दुद्धरिसतरा एगोत्ति हणे पदुट्ठपडिणीए।
तिघरगहणे अरोही अग्गहण पदोसपरिहानी॥ [भा. २२०]

वृ. द्वौ साधु भिक्षामटन्तौ प्रत्यनीकस्य दुष्प्रधृष्यतरौ भवतः-दुःखेन परिभूयते दुर्जयतरौ इत्यर्थः। 'एगोत्ति हणे' एकाकिनं पुनर्दृष्ट्वा हन्ति प्रद्विष्टः सन् प्रत्यनीकस्तस्मात्सङ्घाटकेन गन्तव्यं। 'पडिणीए'त्ति गतं, इदानीं 'भिक्खवियोहि'त्ति भन्नइ-यदा स एकाकी क्वचित्पाटके भिक्षार्थं प्रविष्टः समकमेव च गृहत्रयान्निर्गता भिक्षा गृह्णतो भिक्षाया अशुद्धिर्भवति-आहृतदोषो भवति, यत ईर्यापथिकां शोधयितुं न शक्नोति, अथ नैकां भिक्षां गृह्णाति यस्यामुपयोगो दत्तः तत इतरस्य भिक्षाद्वयस्याग्रहणे 'पओस'त्ति ते भिक्षादातारः प्रद्वेषं गच्छेयुः, यदुतास्माकमयं परिभवं करोति येन नास्मदीयं गृह्णाति, 'परिहानि'त्ति अग्रहणे च परिहाणिर्भवति भिक्षाया गच्छस्य वा तेनागृहीतेन 'भिक्खवियोहि'त्ति गतं, इदानीं 'महव्वय'त्ति व्याख्यायते-

मू. (६६०) पाणिवहो तिसु गहणं पउंजणे कोंटलयस्स विनियं तु।
तेनं उच्चुल्लाई परिग्गहोऽनेसणग्गहणे॥ [भा. २२१]

वृ. त्रिषु गृहेषु योगपद्यागतां भिक्षां यदा गृह्णाति तदा प्राणिवधः कृतो भवति, ततश्च प्रथमव्रतभङ्गः, तथा चासौ एकाकी कोंटलं ज्योतिषं निमित्तं वा प्रयुङ्क्ते, ततश्च अनृतस्य नियमेनैव सम्भवो यतस्तदुपघातकरमवश्यमुच्यते, उपघातजनकं चानृतं तदुच्यमाणं द्वितीयव्रतभङ्गः। 'तेणं उच्चुल्लाई' अथ तत्र गृहे एकाकी प्रविष्टः सन् उच्चुल्लं-विक्षिप्तं हिरण्यादि पश्यति ततश्च तद्गृह्णाति, एकाकिनो मोहसंभवात्, 'तेणं'ति ततः स्तेन्यदोषस्तृतीयव्रतभङ्ग इत्यर्थः, तथा कदाचिदेकाकी अनेषणीयमपि गृह्णीयात्, ततस्तस्मिन्नेषणीये गृहीते परिग्रहकृतो दोषः, चतुर्थव्रतमत्र पृथग् नोक्तं, मध्यमतीर्थकराणां परिग्रह एव तस्यान्तर्भावात्, किन्नापरिगृहीता स्त्री भुञ्जन इति, पश्चिमस्य तु तीर्थकृतः पृथक् चतुर्थं व्रतं, तन्मतेन चतुर्थव्रतभङ्गं दर्शयन्नाह-

मू. (६६१) विहवा पउत्थवइया पयारमलभंति दट्ठुमेगागी।
दारपिहाणाय गहणं इच्छमनिच्छे य दोसा उ॥ [भा. २२२]

वृ. विधवा स्त्री, धवो-मनुष्यः स विनष्टो यस्या इति समासः, तथा प्रोषितभर्तृका, तथा या प्रचारं न

लभते निरुद्धा म्रियते, सा एवंविधा विप्रकारं स्त्री एकाकिनं साधुं प्रविष्टं दृष्ट्वा गृहद्वारं दत्त्वा गृह्णीयात्, तत्र यद्यसौ तां स्त्रियमिच्छति ततः सयमभ्रंशः अथ नेच्छति तत उड्डाहः, सर्व स्त्री लोकस्य कथयति, यदनायं मामभिभवतीति, ततश्चोक्तवाहः। प्रतिद्वारगाथा व्याख्याता। कः पुनः कारणैरसौ एकाकी भवति ?, तत्राह-

मू. (६६२) गारविए कारणे पडिस्से अलसे लुद्ध निद्धम्मे।
दुल्लभअत्ताहिट्ठिय अमणुन्ने वा अगीयाउ॥

वृ. 'गारविए' त्ति गर्वेण लब्धिसंपन्नोऽहमिति कृत्वा एकाकीभवति, तथा 'कारणे' त्ति भिक्षार्थं प्रविष्टो धर्मकथां करोति महती वेला निर्गति ततस्तेन सह न कथित्वायाति ततश्चैकाकीभवति, तथा मायावानेकाकीभवति, स हि शोभनं भुक्त्वाऽशोभनमानयति, स च द्वितीयं नेच्छत्यत एकाकीभवति, 'अलसः' अन्येन सह प्रभूतं पर्यटितुमसमर्थस्तेन एकाक्येवार्तीय भक्षयति, गच्छद्वैयावृत्त्येऽलसः स एकाकीभवति, 'लुद्ध' त्ति लुब्धो विकृतीः प्रार्थयति, ताश्च द्वितीये सति न शक्यन्ते प्रार्थयितुमत एकाकीभवति, निर्धर्मः अनेषणीयं गृह्णाति ततो द्वितीयं नेच्छति, 'दुल्लभ' त्ति दुर्लभे दुर्भिक्षे एकाकीभवति, तत्र हि एकैक एव गच्छति येन पृथक् पृथग् भिक्षा लभ्यते, तथा 'अत्ताहिट्ठिय' त्ति आत्माधिष्ठितो यदात्मना लभते नवाहारयति अत्तलद्धिउत्ति जं भणियं, अथवा अमनोज्ञो-न कश्चित्प्रतिभाति रत्नशीलत्वात्ततश्चैकाकी हिण्डते, एवमसङ्घाटको भवति। इदानीं एतामेव गाथां भाष्यकारो व्याख्यानयति-

मू. (६६३) संघाडगरायणिओ अलद्धिओमो य लद्धिसंपन्नो।
जेट्ठज्ज पडिग्गहगं मुह गारवकारणा एगो॥ [भा. २२३]

वृ. कस्यचित्सङ्घाटकस्य योऽसौ रत्नाधिकः-पर्यायज्येष्ठः 'अलद्धिक' त्ति अलब्धिकः-लब्धिरहितः 'ओम' त्ति पर्यायलघुर्द्वितीयः स च लब्धिसंपन्नः, ततो योऽसौ पर्यायेण लघुर्लब्धिमान स भिक्षामटन्नयतो गच्छति रत्नाधिकश्च पृष्ठतो व्रजति, पुनश्च मण्डल्यां भोजनकाले आचार्या एवं भणन्ति, यदुत ज्येष्ठार्यस्याग्रतः पतद्ग्रहं मुञ्च, पुनरस्मा ओमराइणिओ चिन्तयति, यदनास्यां वेलायामयं ज्येष्ठार्यः सञ्जातो न तु भिक्षावेलायां ज्येष्ठार्यः सञ्जातः, अहं तमे यावना ज्येष्ठार्यस्य प्रथम समर्प्यते, ततश्चानेन गर्वकारणेन गर्वकारणेन एकाकी भवति-एकाक्येव हिण्डति। 'गारविए' त्ति गतं, 'कारणे' त्ति व्याख्यायते-

मू. (६६४) कारणउ कहइ कहं बिइओ वारइ अहव गुरुकहणं।
एवं सो एगागी माडल्लो भद्दगं भुंजे॥ [भा. २२४]

वृ. भिक्षार्थं प्रविष्टः कथको धर्मकथां कुर्वन्नास्ते, ततश्च तस्य द्वितीयो वारयति-मा कृथा धर्मकथां ग्लानादयः खेदन्तीति अथवाऽमुष्य गुरुः कथयति यदुतायं धर्मकथां कुर्वन्तिष्ठति, गुरुरपि तं निवारयति, यदि वारितोऽपि कथयति तदा स एवमेकाक्येव संजायते। 'कारणे' त्ति गतं, मायावी भद्रकं भुङ्क्ते अत एव एकाकी गच्छति॥ 'माडल्ले' त्ति गतं, 'अलसे' त्ति व्याख्यायते-

मू. (६६५) अलसो चिरं न हिण्डइ लुद्धो ओहासए विगडओ।
निद्धम्मो नेसणाइं दुल्लहभिक्खे व एगागी॥ [भा. २२५]

वृ. अलसश्चिरं न हिण्डते कतिपयां भिक्षां गृहीत्वाऽऽगच्छति। 'अलसे' त्ति गतं 'लुद्धो' त्ति भण्यते, लुब्धो विकृतीः प्रार्थयते, ततश्चैकाक्येव याति। 'लुद्ध' त्ति गतं 'निद्धम्मे' त्ति भण्यते, निर्धर्मो अनेषणीयादि गृह्णाति, अपरम्त्वाधुपेरितश्चैकाकीभूयैवाटति। 'णिद्धम्मे' त्ति गतं, 'दुल्लभे' त्ति भण्यते, दुर्भिक्षे-दुर्लभभिक्षायां सघाटं नेच्छति एकाक्येव भिक्षयति, ततश्चैकाक्येव भवति, 'दुल्लभे' त्ति गतं, 'अत्ताहिट्ठिय' त्ति व्याख्यायते-

मू. (६६६) अत्ताहिट्ठियजोगी असंखडीओ वऽनिट्ठ सव्वेसिं।
एवं सो एगागी हिंडइ उवएसऽनुवंदत्ता ॥ [भा. २२६]

वृ. आत्माधिष्ठितेन लब्धेन भक्तादिना युक्तयत इति आत्माधिष्ठितयोगी अन्तर्लब्धिक इत्यर्थः, स एककी भवति। 'अत्ताहिट्ठिए'त्ति गतं, 'असंखडिओ वऽनिट्ठ सव्वेसि'ति कलहकारकः सर्वेषामनिष्टः सन् ततश्चैककी क्रियते, एवमभिः कारणैरेककावस्थो हिण्डते, उपदेशेन अनुपदेशेन वा, उपदेशेन गुरुणाऽनुज्ञातः अनुपदेशेन-गुरुणाऽननुज्ञातः। व्याख्यातं सल्लाटकद्वारम्, अधुनोपकरण-

मू. (६६७) सव्वोवगरणमाया असहू आयारभंडगेण सह।
नयनं तु मत्तगस्सा न य परिभोगो विना कज्जे ॥ [भा. २२७]

वृ. तत्रोत्सर्गतः सर्वमुपकरणमादाय भिक्षागवेषणां करोति, अथासौ सर्वेण गृहीतेन भिक्षामटितुमसमर्थस्तत आचारभण्डकेन सह, आचारभण्डकं-पात्रकं पटलानि रजोहरणं दण्डकः कल्पद्वयं-आर्णिकः क्षौमिकश्च मात्रकं च, एतद्गृहीत्वा याति। 'उवगरणं'त्ति गतं, इदानीं मात्रकग्रहणप्रतिपादनायाह-नयनं मात्रकस्य करोति भिक्षामटनं, न च तस्य मात्रकस्य कार्यं विना संयमकृत्यादिना परिभोगः क्रियते।

'मत्तए'त्ति गतं, 'काउस्सग्ग'त्ति व्याख्यायते-

मू. (६६८) आपुच्छणत्ति पढमा बिइया पडिपुच्छणा य कायव्वा।
आवस्सियाए य तइया जस्स य जोगो चउत्थो उ ॥ [भा. २२८]

वृ. पढमं आपुच्छइ, यदुत-संदिसह अवओगं करेमि, एसा पढमा, अवओगकरावणिअं काउस्सग्गं, अट्ठहिं उस्सासेहिं नमोक्कारं चिंतेइ, ततो नमोक्कारेण पारेऊण भणति-संदिसह, आयरिओ भणइ-लाभो, साहू भणइ-कहत्ति, एसा पडिपुच्छा, ततो आयरिओ भणइ-तहत्ति, तओ 'आवस्सियाए जस्स य जोगो'त्ति जं जं संजमस्स उवगारे वट्टइ तं तं गेण्हिस्सामि 'जस्स य जोगो'त्ति व्याख्यातम्। इदानीमेतान्येव प्रमाणादीनि द्वाराणि सप्रतिपक्षाण्यभिधीयन्ते, तत्र यदुक्तं प्रमाणद्वारं-वाराद्वयं प्रवेष्टव्यं, तस्य प्रतिपक्ष उच्यते, वारात्रयमपि प्रविशति, किमर्थमत आह-

मू. (६६९) आयरियाईणट्ठा ओमगिलाणट्ठया य बहुसोऽवि।
मंतनखमगपाहुण अतिप्पएऽतिच्छिए यावि ॥

वृ. आचार्यादीनामर्थाय बहुशोऽपि वाराः प्रविशति, ओमो-बालस्तदर्थं (ग्लानार्थं च) बहुशः प्रविशति। प्रमाणद्वारमुक्तम्। इदानीं यदुक्तं कालद्वयं प्रवेष्टव्यं तत्प्रतिपक्ष उच्यते, ग्लानक्षपकपाघूर्णार्थमनिप्रत्यूषस्यपि प्रविशति तथा 'अतिच्छिए यावि'त्ति अतिक्रान्तायामपि भिक्षावेलायां प्रविशति बहुशः ॥

मू. (६७०) अनुकंपापडिबंधो कयाइ न हिंडिज्ज वा न वा हिंडे।
अनभोगि गिलाणट्ठा आवस्सगऽभोहइत्ताणं ॥

वृ. स च प्रत्यूषस्येव प्रविष्टः कस्मिंश्चिद् गृहे ग्लानार्थं लब्धं च तत्तेन तत्र, ततश्च गृहपतिः पुनर्भणति अनुकम्पया, यदुत पुनरपि त्वया ग्लानार्थमस्यां वेलायामागन्तव्यं, ततश्चासौ साधुः प्रतिषेधं करोति, कथं?, न गृहस्थमेवं भणति, यदुत प्रत्यूषसि यः कदाचिदहं हिंडिज्जा कदाचिन्न हिंडिष्यामि, एवं भणतेणनआगंतुका दोषमदोषा परिहर्तव्या भवंति न च प्रतिषेधः कृतो भवति। 'उवग'त्ति कालद्वयतना, अधुनाऽवश्यकरणतो व्यते-कदाचिदसौ साधुरनाभोगेन 'आवश्यके' कायिकाव्युत्सर्गलक्षणमकृत्वा ग्लानार्थं त्वरितं गतः।

मू. (६७१) आसन्नाउ नियत्ते कालि पाहुप्पंति दप्पत्तोवि।

अपहुप्पंते तत्तो च्चिय एगु धरे वोसिरे एगो ॥

वृ. तत्र आसन्नात्सआतकायिकाद्याशङ्का निवर्त्तते, कालो पहुप्पइ यदि ततो दूरगतोऽपि निवर्त्तते. अथ निवर्त्तमानस्य कालो न पहुप्पइ 'तत्तोच्चिअ' तत एव यतो भिक्षार्थं गतस्तत एव व्युत्सृजति. कथम् ?, एकः साधुर्भाजनं धारयति एकस्तु व्युत्सृजति कायिकादि।

मू. (६७२) भावासन्ने समणुन्न अन्नओसन्नसङ्खडेल्लघरे।
मल्लपरूवणवेज्जो तत्थेव परोहडे वावि ॥

मू. (६७३) एएसिं असइए गयपहे दो धराण वा मज्झे।
हत्थं हत्थं मुत्तुं मुञ्चे एगु धरे वोसिरे एगो ॥ [प्र. २७]

वृ. अथवा 'भावासन्नः' अग्रहिष्णुरित्यन्तं भवति ततः समनोज्ञा यदि तत्र क्षेत्र आसन्ना अन्यस्मिन् प्रतिश्रये ततस्तत्र प्रविश्य व्युत्सृजति। 'अन्न'त्ति अथासमनोज्ञास्तत्रासन्नास्ततस्तद्गतो प्रविश्य व्युत्सृजति. तदभावेऽवसन्नानां वसतौ व्युत्सृजति तदभावे श्राद्धगृहे. तदभावे वैद्यगृहे व्युत्सृजति. तत्र च वैद्यगृहे प्ररूपयति यदुत 'तित्ति मल्ला महागय' इत्येवमादि. ततश्चासौ वैद्यः स्मारिते ग्रन्थे एवं भणति 'एत्थेव'त्ति अत्र पश्चादगृहे व्युत्सृज, 'परोहडे वा' गृहस्य पश्चाद्भागे व्युत्सृजति, यतोऽसौ मध्यप्रदेशः, स च नरपतेः परिग्रहः ततः कलहादिर्न भवति।

मू. (६७४) उग्गहकाईयवज्जं छंडण ववहारु लब्भए वत्थ।
गारविए पन्नवणा तत्र चेव अनुग्गहो एस ॥

वृ. तदभावे गृहस्थसत्केऽवग्रहे परिगृहीते तस्मिन्नपि व्युत्सृजति, कथं ?, कायिकावर्जं पुरीषमुत्सृजन्नपि कायिकीं न व्युत्सृजति। किं कारणं ?, जओ छड्डणे ववहारो लब्भइ, जदि गिहत्था भणेज्जा-छड्डेहि. तो न छड्डेहि, ववहारं राउले करेइ। जहा चाणक्कएऽवि भणिअं-'जइ काइयं न वोसिरइ ततो अवोसो'। अयमित्थंभूतस्तत्र व्यवहारो लभ्यते, ततः कायिकां न व्युत्सृजति। उक्तं तऽऽवश्यकयतना, अधुना सङ्घाटकयतनोच्यते, तत्र चेयं प्रतिद्वारगाथोपन्यस्ताऽऽसीत् ''गारविएकाही'' त्येवमादिका, तस्या यतनोच्यते, तत्र ''गारविए'' त्यस्य पदस्य यतनामाह-'गारविए पन्नवणा' योऽसौ ओमरायणिको लब्ध्या गर्वितः सन्नेकाकी भवति तमाचार्यो धर्मकथया प्रज्ञापयति, यदुत तवैवायमनुग्रहो यत्त्वदीयलब्ध्युपष्टम्भेन स्वाध्यादि कुर्वन्तीति। गारवियजयणा गया. एवमिदमुपलक्षणं वर्त्तते, अन्येषामपि कथिकमायाविअलसलुब्धनिर्द्धर्माणां प्रज्ञापना कर्त्तव्या। इदानीं दुर्लभपदव्याख्यां कुर्वन्निदमाह-

मू. (६७५) जइ दोण्ह एग भिक्खा न य वेल पहुप्पए तओ एगो।
सव्वेवि अत्तलद्धी पडिसेहमणुन्नपियधम्मे ॥

वृ. यदि तत्र क्षेत्रे पर्यटनामेकैव भिक्षा द्वयोरपि लभ्यते न च कालः पर्याप्यते-न य पहुप्पइ तदा एकाकिन एव हिण्डन्ते। दुर्लभयतनोक्ता। इदानीं अत्तालद्धियतनोच्यते-यदि ते सर्व एव खग्गूडा अत्तलब्धिका होऽहमिच्छंति तदाऽऽचार्यः प्रतिषेधं करोति, अथ कश्चित्प्रियधर्मा आत्मलब्धिको भवति तत आचार्योऽनुज्ञां करोति, ततश्चैवमेकाकी भवति, अत्तालद्धिअजयणा भणिया, अमणुन्नयतनां प्रतिपादयन्नाह-

मू. (६७६) अमणुन्न अन्नसंजोइया उ सव्वेवि नेच्छए विवगे।
बहुगुणतेइकदोसे एसणबलवं नउ विगिंचे ॥

वृ. यस्मा 'अमनोज्ञः' स्टनशीलस्तनोऽन्यस्य संयोज्यते तेन सह हिण्डते, अथ सर्व एव नेच्छन्ति

ततस्तस्यामनोज्ञस्य विवेकः-परित्यागः क्रियते, अथासौ बहुगुणसंपन्नः किन्तु स एकको दोषः रत्नशोल इति एषणायां च बलवांस्ततो नासौ परित्यज्यते। भणिया अमणुन्नजयणा, अधुना यदुक्तम-"एगानियस्स" इत्येवमादि तेषां यतनोच्यते, आह-किं पुनः कारणमुत्क्रमेण स्त्र्यादीनां पदानां यतनोच्यते ?, उच्यते, गर्वितकथिकादयः प्रज्ञापिताः सन्तः कारणवशादेकाकिनोऽपि भिक्षामटन्ति, ततश्चैकाकिनामटतां यद्यपि स्त्रीकृता दोषा भवन्ति तथाऽपि तत्रेयं यतना, इदानीं या गाथांपन्यस्ताऽऽसीत् यदुत "एगानियस्स दोसा" इत्यादिका, तत्र यतनां प्रतिपादयन्नाह-

मू. (६७७) इत्थीगहणे धम्मं कहेइ वयछवण गुरुसमीवंमि।
इह चेवावर रज्जू भएण मोहोवसम तीए॥

वृ. एवं तस्यैकाकिनो गतस्य सतः स्त्रीग्रहणं सति-स्त्रिया गृहीतः सन् धर्मकथां करोति, यदुत नरकगमनाय मैथुनासेवित्येवमादिकां, अथ कथितेऽपि धर्मे न मुञ्चति ततो भणति यदुत व्रतानि गुरुसमीपे स्थापयित्वाऽऽगच्छामीति, एतदभिधाय नश्यति, अथ तथाऽपि न लभ्यते गन्तुं ततो भणति इहैवापवरके व्रतमोक्षणं करोमीति तत्र च प्रविशति, उल्लम्बनार्थं रज्जुं च गृह्णाति, ततस्तेन भयेन कदाचिन्मोहोपशमो भवति, मोहनरसो भयेन ह्रियते, अथैवमपि न मुञ्चति ततो म्रियत एवेति। उक्ता स्त्रीयतना, इदानीं श्वादियतनोच्यते-

मू. (६७८) साणा गोणा इयरे परिहरऽणाभोगकुक्कुसकडीसा।
वारइ य दंडएणं वारावे वा अगारेहिं॥

वृ. श्वानो गवादयश्च येषु गृहेषु तानि परिहरति, अथानाभोगेन कथमपि प्रविष्टः प्रत्यनीकैश्च गृहीतुमारब्धस्ततः कुड्यकटनिश्रया तिष्ठति, कुड्यं कटं वा पृष्ठे करोति अग्रतो दण्डकेन वारयति अगारैर्वा वारयति। उक्ता श्वयतना, इदानीं पडिनीययतनोच्यते-

मू. (६७९) पडिनीयगेहवज्जण अनभोगपविट्ठ बोलनिक्खमणं।
मज्झे तिण्ह घराणं उवओग करेउ गेण्हेज्जा॥

वृ. एकाकिना प्रत्यनीकगृहं न प्रवेष्टव्यं, अथानाभोगेन प्रविष्टः प्रत्यनीकैश्च गृहीतुमारब्धस्ततो बोलं करोति-उच्छब्दयति येन लोको मिलति, तत आकुले निष्क्रामति। उक्ता प्रत्यनीकयतना, अधुना भिक्षाविशोधियतनोच्यते-मध्ये स्थितस्त्रयाणामपि गृहाणामुपयोगं दत्त्वा षडत्वा स्थितानां भिक्षां गृह्णाति, उक्ता भिक्षाविशोधियतना, अधुना पञ्चमहाव्रतयतनोच्यते, तत्र भिक्षायामुपयोगं दद्ता प्राणातिपातसंरक्षणं कृतमेव, इदानीं द्वितीयमहाव्रतयतनां प्रतिपादनायाह-

मू. (६८०) वेंटल पुट्ठो न याणे आयन्नातीणि वज्जए ठाणे।
सुद्धं गवेस्स उंछं पंचऽइयारे परिहरंतो॥

वृ. वेण्टलं-निमित्तादि पृष्टः सन्नेवं भणति-न जाने, एवं भणता द्वितीयमहाव्रतयतना कृता भवति। इदानीं तृतीयमहाव्रतयतनां दर्शयन्नाह-"आयन्नाईणि वज्जए ठाणे" तत्र भिक्षार्थं प्रविष्ट आकीर्णादिस्थानं परिवर्जयेत्, यत्र हरिण्यादि विक्षिप्तमास्ते तदाकीर्णंस्थानं तच्च साधुना वर्जनीयं, एवं तृतीयमहाव्रतयतना कृता भवति। इदानीं पञ्चममहाव्रतयतनां प्रतिपादयन्नाह-"शुद्धम्" उद्गमादिदोषरहितं "गवेषयति" अन्वेषयति "उञ्छं" भक्तं पञ्चाप्यतीचारान् रक्षन्। उक्ता पञ्चममहाव्रतयतना, चतुर्थमहाव्रतयतना तूक्तैव, "इत्थिग्गहणे धम्मं" इत्येवमादिना, उक्ता गल्लाटकयतना, इदानीमुपकरणयतनाप्रतिपादनायाह-

मू. (६८१) जहन्नेण चोलपट्टो वीयरणातु गहाय गच्छेज्जा।

उस्सग्ग काउ गमने मत्तयगहणं इमे दोसा ॥

वृ. उत्सर्गस्त्वावश्यिभक्षार्थं गच्छता सर्वमुपकरणं गृहीत्वा गन्तव्यं, यस्तु विस्मरणालुः स जघन्येन चोलपट्टकमादाय गच्छति, उपलक्षणं चात्र चोलपट्टकोऽन्यथा पात्रकं पटलानि रजोहरणं दण्डकं कल्पद्वयं च गृहीत्वा गच्छति। उक्तोपकरणयतना, इदानीं मात्रकयतनां प्रतिपाद्यन्नाह-मात्रकं गृहीत्वा गन्तव्यं, अगृहीत्वा चोत्सर्गमिति-उपयोगं कृत्वा व्रजति, अथ मात्रकं न गृह्णाति गच्छंस्ततश्च मात्रकाग्रहणे एते च दोषाः वक्ष्यमाणाः, अत्र च यदुत्सर्गग्रहणं कृतं तद्विधिप्रदर्शनार्थं न तु पुनः स्वस्थानमिति।

इदानीं मात्रका-ग्रहणे दोषान् प्रदर्शयन्नाह-

मू. (६८२) आयरिए य गिलाणे पाहुणए दुल्लहे सहसलाभे।
संसत्तभत्तपाने मत्तगगहणं अणुन्नायं ॥

वृ. आचार्यं ग्लानार्थं प्राघूर्णकार्थं वा दुर्लभं वा किञ्चिल्लभ्यते तदर्थं, 'सहसा' अकस्मात्किञ्चित्कदाचिल्लभ्यते तदर्थं, तथा संसक्त भक्त पानग्रहणार्थं मात्रकग्रहणमनुज्ञातम।

मू. (६८३) पाउग्गायरिपाई कह गिण्हउ मत्तए अगहियंमि।
जा एसि विराधनाया दवंभाणे जं दवेण विना ॥ [भा. २२९]

वृ. प्रायोग्यमाचार्यादीनां कथं गृह्णातु मात्रके अगृहीते सति ?, अग्रहणाच्च या तेषामाचार्यादीनां विराधना सा तेनाङ्गीकृता भवति, तथैवं मन्यसे द्रवभाजने गृह्णातु ततश्चैवं द्रवेऽगृहीते तेन विना या विराधना सा तदवस्थैव, आदिग्रहणाद ग्लानप्राघूर्णका अपि व्याख्याता एव।

मू. (६८४) दुल्लहदव्वं य सिया घयाइ गिण्हे उवग्गहकरं तु।
पउरऽन्नपाणलंभो असंथरे कत्थ य सिया उ ॥ [भा. २३०]

वृ. दुर्लभं वा द्रव्यं घृतादि 'स्यात्' भवेत ततस्तत्र घृतादि गृह्यते यत उपग्रहं करोति-अवष्टम्भं करोति तत, सहसा-आकस्मिकप्रचुरान्नपानलम्भः स्यात्ततः अगंस्तरतां प्रव्रजितानामात्मानं कृच्छ्रेण यापयतां कुत्रचित् स्यादग्रहणमिति। तथा च-

मू. (६८५) संसत्तभत्तपाने मत्तग मोहेउ पक्खिवे उवरिं।
संसत्तगं च नाउं परिट्ठवे संसरक्खट्ठा ॥ [भा. २६१]

वृ. संसक्त भक्त पानग्रहणे सति मात्रके 'शोधयित्वा' प्रत्युपेक्ष्य सक्तु काञ्जिकादि पात्रकस्योपरि प्रक्षिपेत्। अथ तत्पानकादि गृहीतं मात्रके किन्तु अशुद्धसंसक्तं जातं, ततश्चैव ज्ञात्वा विधिना तस्मिन्नेव क्षणे परिष्ठापयति, किमर्थं ?, शेषभक्त रक्षणार्थं, मा भूत्तद्बन्धेन शेषस्यापि संसक्तिः स्यात्, तस्मान्मात्रके ग्रहीतव्यं, पुनश्च कारणतो गृह्णाति-

मू. (६८६) गेलन्नकज्जतुरिओ अनभोगेण व लित्त अग्गहणं।
अनभोगगिलाणट्ठा उस्सग्गादीणि नवि कुज्जा ॥

वृ. ग्लानकार्येण त्वरितो गतः ततश्चैवं न गृह्णाति, अनाभोगेन वा निर्गतो यदि, लिप्तं वा लेपेन तत् मात्रकं यदि, ततश्चैवाग्रहणं मात्रकस्य संभवतीति। उक्ता मात्रकयतना, इदानीं उत्सर्गयतनाप्रतिपादनायाह-अनाभोगेन उत्सर्गं-उपयोगं न कुर्यात, ग्लानार्थं वा त्वरित उत्सर्गं न कुर्यात, आदिग्रहणादावश्यकं च न कुर्यादिति। उत्सर्गं-उपयोगं न कुर्यात, ग्लानार्थं वा त्वरित उत्सर्गं न कुर्यात, आदिग्रहणादावश्यकं न कुर्यादिति। उत्सर्गयतनोक्ता, इदानीं ''जस्स जोगो'' अस्य विधिरुच्यते-

मू. (६८७) जस्स य जोगमकाऊण निग्गमो न लभई तु सच्चित्तं।
न य वत्थपायमाई तत्तं गहणं कुणसु तम्हा ॥

वृ. 'जस्स य जोगं' इत्येवं 'अकृत्वा' अभणित्वा निर्गतः सन् एवं 'न लभते' न भवत्याभाव्यं 'सचित्तं' प्रव्रज्यार्थमुपस्थितं गृहस्थं, नाप्यचित्तं वस्त्रपात्रकादि, अथ यस्य योग इत्येवमकृत्वा गृह्णाति ततः स्तैन्यं भवति, तस्मात्कृत्यस्य योग इत्येवम्।

मू. (६८८) सो आपुच्छि अणुन्नाओ सग्गामे हिंड अहव परगामं।
सग्गामे सइ काले पत्ते परगामि वोच्छामि ॥

वृ. आपृच्छणा नाम 'संदिसह उपओगं करेमि' त्ति, विनिया पडिपुच्छणा-कह गिण्हामिति, गुरुभणइ-तहत्ति, यथा पूर्वसाधवो गृह्णन्तीत्यर्थः, एवमसौ अनेन क्रमेण प्रच्छने कृते सत्यनुज्ञान आवश्यकीं कृत्वा यस्य च योग इत्येवमभिधाय निर्गत्य स्वग्रामे हिण्डते, अथवा 'परग्रामे' सर्वोपरग्रामे, तत्र स्वग्रामे यदि हिण्डते ततः 'सति काले' प्राप्तायां भिक्षावेलायामित्यर्थः, इदानीं परग्रामे वक्ष्यामि हिण्डनो विधिम-

मू. (६८९) पुरतो जुगमायाए संतुणं अन्नगामवाहिओ।
तरुणं मज्झिमथेरं नव पुच्छाओ तहा हट्ठा ॥

वृ. पुरतो युगमात्रं निरीक्षमाणो 'गत्वा' अन्यग्रामं संप्राप्य बहिर्व्यवस्थितः पृच्छति-किं विद्यते भिक्षावेलाऽत्र ग्रामे उत न ?, कान् पृच्छतीत्यत आह-तरुणं मध्यमं स्थविरं, एकैकस्य त्रैविध्यात्रय पृच्छाः कर्त्तव्याः, यथाऽधस्तात्प्रतिपादितस्तथैवात्रापि न्यायः, तत्र तरुणं स्त्रीपुंनपुंसकं मध्यमं स्त्रीपुंनपुंसकं स्थविरं स्त्रीपुंनपुंसकमिति। एवं पृष्ट्वा यदि तत्र भिक्षावेला तत्क्षण एव ततः को विधिरित्यत आह-

मू. (६९०) पायपमज्जणपडिलेहणा उ भाणदुगं दंसकालंमि।
अप्पंतऽविय पाए पमज्ज पत्ते य पायदुगं ॥

वृ. तत्र हि ग्रामासन्ने उपविश्य पादप्रमार्जनं करोति, किं कारणं ?, तत्पादरजः कदाचित्सचित्तं भवति कदाचिन्मिश्रं लग्नं भवेत्, यासे च नियमादचित्त रजोऽतः प्रमार्जयति, पुनश्च प्रत्युपेक्षणां करोति पात्रद्वितयस्य-पतद्ग्रहस्य मात्रकस्य च, एवं 'दंशकाले' भिक्षावेलायां प्राप्तायां करोति, अथाद्यापि न भवति भिक्षाकालस्तत्तस्तस्मिन्नप्राप्ते भिक्षाकाले पादौ प्रमार्ष्टि, ततस्तावदास्ते यावद्भिक्षाकालः प्राप्तः, ततस्तस्मिन् प्राप्ते सति तस्यां वेलायां पात्रद्वितयं प्रत्युपेक्षत इति। एवमसौ पात्रद्वितयं प्रत्युपेक्ष्य ग्रामे प्रविशन कदाचिच्छ्रमणादीनि पश्यति ततस्तान् पृच्छति, एतदेवाह-

मू. (६९१) समणं समणिं सावगसाविगगिहि अन्नतित्थि बहि पुच्छे।
अत्थिह समण ? सुविहिया सिद्धं तेसालयं गच्छे ॥

वृ. श्रमणं श्रमणीं श्रावकं श्राविकां गृहस्थमन्यतीर्थिकान् वा बहिर्दृष्ट्वा पृच्छति, एतानन्तरेणासन्नान् सर्वान् दृष्ट्वा पृच्छति, अत्र सन्ति श्रमणाः ?, किंविशिष्टाः ?-शोभनं विहितमेषामिति सुविहिताः-शोभनानुष्ठानाः, ततश्चैतेषामन्यतमेन कथिते सति ततस्तेषामेव-श्रमणादीनां 'आलयं' आवासं गच्छेत्। ततस्तेषां आलयं प्राप्य किं करोति ? इत्याह-

मू. (६९२) समणुन्नेसु पवेगो बाहिं ठवि‌ऊण अन्न किइकम्मं।
खग्गूडे गच्छस्स ठवणा अच्छोभवंदनयं ॥

वृ. यदि हि ते श्रमणोज्ञाः-एकसामाचारीप्रतिबद्धास्ततस्तेषां मध्ये प्रविशति अन्ये-अश्रमणोज्ञा भवन्ति

यदि ततो बाह्यत उपकरणं स्थापयित्वा प्रविश्य 'कृतिकर्म' द्वादशावर्तवन्दनं ददाति, अथ ते संविग्नपाक्षिका अवसन्ना भवन्ति ततो बहिरव्यवस्थित एव वन्दनं कृत्वाऽऽर्यां पृच्छति. अथ ते 'अवसन्नाः' स्वगृहप्रायास्ततो बहिरेवोपकरणं स्थापयित्वा पुनश्च प्रविश्य तेषामुच्छोभवन्दनं करोति।

मू. (६९३) गेलन्नाइ अबाहा पुच्छिय सयकारणं च दीवेत्ता।
जयणाए ठवणकुलं पुच्छइ दोसा अजयणाइ ॥

वृ. एवं सर्वेष्वेतेष्वनन्तरोद्दिष्टेषु गमनोद्यतादिषु प्रविश्य ग्लानाद्यबाधां पृष्ट्वा स्वकीयमागमनकारणं 'दीपयित्वा' निवेद्य 'यतनया' मधुरवाग्लक्षणया, यदिवा वक्ष्यमाणलक्षणया स्थापनाकुलानि पृच्छति। अयतनया पृच्छतो दोषः वक्ष्यमाणलक्षणा यतोऽतो यतनया पृच्छति। एतानि तानि स्थापनाकुलानि-

मू. (६९४) दाने अभिगमसड्ढे संमते खलु तहेव मिच्छत्ते।
मामाए अचियत्ते कुलाइ जयणाइ दायंति ॥

वृ. दानश्राद्धकोऽभिगमश्राद्धको यत्र कारणे आपत्ते प्रविश्यते सम्यक्त्वधरकुलं मिथ्यात्वकुलं मामाकः-मा मम समणा धरमइंत तत्कुलं 'अचियत्तं' अदानशीलं कुलं. एतानि कुलानि ते वास्तव्यास्तस्य साधोर्यतनया दर्शयन्ति।

मू. (६९५) सागारि वणिम सुणए गोणे पुत्ते दुगुंछियकुलाइं।
हिंसागं मामागं सव्वपयत्तेण वज्जेज्जा ॥

सागारिकाः-शय्यातरस्तद्गृहं दर्शयन्ति, तथा वणीमओ-दरिद्रस्तद्गृहं दर्शयन्ति, तत्रैतदर्थं न गम्यते, स हि दरिद्रोऽसति भक्ते लज्जां करोति. यद्वा यत्किञ्चिदस्ति तदत्त्वा पुनरात्मार्थं रन्धनं करोति, तथा श्वा यत्र दुष्टो गृहे तच्च, गौर्वा यत्र दुष्टो गृहे तच्च, 'पुत्ते'त्ति पुण्यार्थं यत्र बहु रन्धयित्वा श्रमणानां दीयते, अथवा पूर्णं यद्गृहमर्थैर्बहुभिस्तच्च दर्शयन्ति, जुगुप्सितं-छिम्पकादि तच्च, हिंसागं-सौकरिकादिगृहं तच्च मामाकं चोक्तं, एतानि दर्शितानि सन्ति सर्वयत्नेन परिहर्त्तव्यानीति। इदानीं यदुक्तं 'यतनया स्थापनाकुलानि पृच्छनीयानि कथनीयानि च' तत्प्रतिपादनायाह-

मू. (६९६) बाहाए अंगुलीय व लट्ठीइ व उज्जुओ ठिओ संतो।
न पुच्छेज्ज न दाएज्जा पच्चावाया भवे दोसा ॥

वृ. बाहुं प्रसार्य गृहाभिमुखं न दर्शयन्ति नापि पृच्छति. तथाऽङ्गुल्या यष्ट्या न पृच्छति नापि कथयति. ऋजुर्गृहाभिमुखः स्थितो न पृच्छेत साधुनापि दर्शयेद्, यतस्तत्र दोषाः, किंविशिष्टा ?-प्रत्यपायजनिता भवन्ति। के च ते प्रत्यपायाः ? इत्याह-

मू. (६९७) अगणीन व तेणेहि व जीवियववरोवणं तु पडिणीए।
खरओ खरिया सुणहा नट्ठे वट्टक्खुरे संका ॥

वृ. यया दिशा साधुना बाहुं प्रसार्य गृहं दृष्टं तेन बाह्यादि प्रसार्य तत्कथितं गृहं कदाचिदग्निना दग्धं भवति ततश्च गृहपतिस्तं साधुमाशङ्कते. यदुत तेन साधुनाऽन्यस्य साधोर्ह्यस्तनेऽह्नि दर्शितमासीत्तद्यदि तत्कृतोऽयं घातः, स्यात्, नान्यः, स्तेनकैर्वा मुषितं भवति जीवितव्यपरोपणं वा गृहस्थस्य प्रत्यनीकेन कृतं भवति ततं आशङ्का साधोरुपरि भवति. कदाचिद्वा 'खरिय'त्ति द्रव्यक्षरिका-कर्मकरी नष्टा भवति, 'खरओ' द्रव्यक्षरो वा-कर्मकरः प्रायो नश्यति. सुणहा वा-श्वपा केनचित्सह गता, एतेषु नष्टेषु सत्सु साधोरुपरि शङ्का भवति, यदुत तत्कृतोऽयं घात इति, 'वट्टखुरः' अश्वप्रधानः केनचिदपहृतो भवेत्ततश्च साधोरुपरि बाह्यादिना

दर्शयतः शङ्का भवति ॥ इदानीं यानि प्रतिक्रुष्टकुलानि कथितानि तान्येभिरभिज्ञानैर्वर्जयति -

मू. (६९८) पडिकुट्ठकुलाणं पुन पंचविहा थूभिआ अभिन्नाणं।
भग्गघरगोपुराई रुक्खा नानाविहा चेव ॥

वृ. तेषां प्रतिकुष्टकुलानां पञ्चविधा स्तूपिकाऽभिज्ञानं भवति, भग्नगृहसमीपादौ वा तथा गोपुरसमीपे बहिरन्तर्वा वृक्षा नानाविधा अभिज्ञानं प्रतिषिद्धकुलानाम्। एतच्च स्थापनाकुलेषु न प्रवेष्टव्यं, यतः-

मू. (६९९) ठवणा मिलक्खुनेहं अचियत्तघरं तहेव पडिकुट्ठं।
एयं गणधरमेरं अइक्कमंतो विराहेज्जा ॥

वृ. स्थापनाकुलानि तथा 'मिलक्खू' म्लेच्छगृहं तथा अचियत्तगृहं तथा 'प्रतिकुष्टं' छिम्पकादिगृहं सूतकोपेतगृहं वा, एतेषु न प्रवेष्टव्यं, इयं 'गणधरमेरा' गणधरस्थितिर्मन्तर्ध्यतां मर्यादां प्रवेशेनातिक्रामन् विराधयति दर्शनादि। आहप्रतिकुष्टकुलेषु प्रविशतो न कश्चित् षड्जीववधो भवति किमर्थं परिहार इति ?, उच्यते-

मू. (७००) छक्कायदयावंतोऽवि संजओ दुल्लहं कुणइ बोहिं।
आहारे नीहारे दुगुंछिए पिंडगहणे य ॥

वृ. सुगमा॥ नवरम्-आहारनीहारौ यद्यगुप्तः सन् करोति, 'जुगुप्सितेषु' छिम्पकादिषु यदि पिण्डग्रहणं करोति ततो दुर्लभां बोधिं करोतीति। ननु च ये इह जुगुप्सितास्ते चैवान्यत्राजुगुप्सितास्ततः कथं परिहरणं कर्त्तव्यं ?, उच्यते-

मू. (७०१) जे जहि दुगुंछिया खलु पव्वावणवसहिभत्तपानेसु।
जिनवयणे पडिकुट्ठा वज्जेयव्वा पयत्तेणं ॥

वृ. ये 'यस्मिन्' विषयादौ जुगुप्सिताः प्रव्रज्यामङ्गीकृत्य वसतिमङ्गीकृत्य तथा भक्तं पानं चाङ्गीकृत्य ते तत्र वर्जनीयाः, तत्थ पव्वावणं प्रतीत्थ अवरुन्धिका ण पव्वावणजोग्गा वसहिभत्तपाणेसु जोग्गा, वसहिमङ्गीकृत्य जुगुप्सितो भंडाण वाडओ वत्थ वसई न कीरइ, जतो तत्थ गाइयव्वनच्चियव्वएण असज्झायादि होइ, पव्वावणभत्तपाणेसु पुन जुग्गो, तथा भक्त पानग्रहणेषु जुगुप्सितानि सूतकगृहाणि पव्वावणेसु य, तानि पुन वसहिं अन्नत्थ दवावेंति, अन्नाणि पुन तिहिवि दोसेहिं दुट्ठाणि कम्मकराईणि, एते जिनवचनप्रतिकुष्टा वर्जनीयाः प्रयत्नेन। अथवा पश्चार्द्धमन्यथा व्याख्यायते, पव्वावणे दुगुंछिया एते-

मू. (७०२) अट्ठारस पुरिसेसुं वीसं इत्थीसु दस नपुंसेसुं।
पव्वावणाए एए दुगुंछिया जिनवरमयंमि ॥

वृ. पव्वावणे जिनवयणे पडिसिद्धा, वसहिदुगुंछिया ओमत्ता अमणुन्ना वा, भत्तपानेवि एते चेव, एते जिनवचनप्रतिकुष्टाः। दोसेण जस्स अयसो आयासो अवयणं य अग्गहणं। विप्परिणामो अप्पच्चओ य कुच्छा य उप्पज्जे ॥

मू. (७०३) दोसेन जस्स अयसो आयासो पवयणे य अग्गहणं।
विप्परिणामो अप्पच्चओ य कुच्छा च उप्पज्जे ॥

वृ. सर्वथा येन केनचित 'दोषेण' निमित्तेन तस्य संबन्धिना 'अयशः' अश्लाघा 'आयासः' पीडा प्रवचने भवति, अग्रहणं वा विपरिणामो वा श्रावकस्य शैक्षकस्य वा तत्र कर्त्तव्ये, तथाऽप्रत्ययो वा शासने येन भवति तदुतेतेऽन्यथा वदन्ति अन्यथा कुर्वन्ति एवंविधोऽप्रत्ययो येन भवति, तत्र कर्त्तव्ये, तथा जुगुप्सा च येनोत्पद्यते तदुत वराकका एते दयामनकास्तदेवंविधं न किञ्चिन्कार्यम्। यत्तु पुनरेवं करोति तस्यैतदुक्तं भगवता-

मू. (७०४) पवयणमनवेक्खंतस्स तस्स निद्धंधसस्स लुद्धस्स ।
बहुमोहस्स भगवया संसारोऽनंतओ भणिओ ॥

वृ. प्रवचनमनपेक्षमाणस्य तस्य 'निद्धन्धसस्य' निःशूकस्य लुब्धस्य बहुमोहस्य भगवता संसारोऽनन्त उक्त इति। तथा न केवलं बहुमोहस्यैतद्भवति योऽप्यन्यस्तस्याप्येवं कुर्वतोऽनन्त एव संसारः, एतदेवाह-

मू. (७०५) जो जह व तह व लद्धं गिण्हइ आहारउवहिमाईयं ।
समणगणमुक्कजोगी संसारपवड्ढओ भणिओ ॥

वृ. सुगमा ॥ एवं तावज्ज्ञानवतामपि दोषः, ये तु पुनराचार्येण मुण्डितमात्रा अगीतार्था एव मुक्ता। से सुतरामज्ञानादेव एषणादि न कुर्वन्ति, एतदेवाह-

मू. (७०६) एसणमनेसणं वा कह ते नाहिंति जिनवरमयं वा ।
कुरिणमिव पोयाला जे मुक्का पव्वईमत्ता ॥

वृ. सुगमा ॥ नवरं 'कुरिणमि' महति अरण्ये 'पोयाला' मृगादिपोतलकान्त इह वृषभपतिना मुक्ताः सन्तो विनश्यन्ति एवं नेऽपीति। एवं तावदाचार्यदोषेणैवंविधा भवन्ति, एते तु स्वदोषेण भवन्ति, के च ते ?, अत आह-

मू. (७०७) गच्छंमि केइ पुरिसा सउणी जह पंजरंतरनिरुद्धा ।
सारणवारणचइया पासत्थगया पविहरंति ॥

वृ. गच्छे केचित् पुरुषा निरुद्धाः सन्तः शकुनीव पञ्जरान्तरनिरुद्धा, ते 'सारणवारणचइया' सारणं-प्रसर्पणं संयमे तेन, 'सृ गतौ' इत्यस्येदं रूपं अथवा सारणं-स्मारणं बा संयमविषयं, वारणं-दोषेभ्यो निवारणमिति एवं निरुद्धाः सन्तः 'चइता' त्याजिताः सन्तः पार्श्वस्थादिषु प्रविहरन्ति।

मू. (७०८) तिविहोवघायमयं परिहरमाणो गवेसए पिंडं ।
दुविहा गवेसणा पुन दव्वे भावे इमा दव्वे ॥

वृ. एवं त्रिविधस्य ज्ञानदर्शनचारित्रस्योपघातभूतंपिण्डं 'परिहरन्' परित्यजन्, किं कुर्वीत ? अत आह 'गवेसए' गवेषयेदन्वेषयेत्, कं ? -तमेव 'पिण्डं' संयमोपकारिणं। इदानीं सा गवेषणा द्विविधा-द्रव्यतो भावतश्च, द्रव्यतस्तावद् 'इमा' वक्ष्यमाणलक्षणा। का चासौ वक्ष्यमाणा ?, सोच्यते-वसंतपुरं नाम नयरं जियसत्तू राया धारिणी देवी, सा य अप्पणो चित्तसभं अइगया कणगपिट्ठिमिगे पासइ, सा य गुव्विणी, तेसु कणगपिट्ठमिगेसु दोहलो समुप्पन्नो चिंतेइ य-धन्नाओ ताओ जाओ एएसिं चम्मेसु सुवंति मंसाणि य खायंति, सा तेणं डोहलेणं अनवणिज्जंतेण दुब्बला जाया, रन्ना य पुच्छिया, कहियं च तीए, ताहे रन्ना पुरिसा आनत्ता, वच्चह कणगपिट्ठे मिगे गेण्हह, तेसिं पुन मिगाणं सीवन्निफलाणि आहारो, तथा य सीवन्नीणं अकालो फलस्स, ताहे किंतिमाणि कणिक्कफलाणि काउं गया अडवीए, वत्थ य पुंजयपुंजया सीवन्नीणं हेट्ठा ठवंति, ताहे कुरंगेहिं दिट्ठं, गया य जूहवइस्स साहेंति, ताहे ते मिगा आगया, जो तेसिं अहिवई सो भणइ-अच्छह तुब्भे पेच्छामि ताव अप्पणा गंतुं, दिट्ठं च तेणं कहियं च ताणं जहा केणइ धुत्तिमा कया अम्ह गहणत्थं, जेण अकालो सीवन्निफलाणं, अह भणइ-अकालेवि हवंति चेव फलाणि, तं सच्चं, किं तु न पुंजया होंता, अह भणइ वातेण तहा कया तत्त जओ पुरावि एवमेव दाया वायंता न उण पुंजयपुंजएहिं फलाइं कयाइ ठियाणि ता न गच्छामो तत्थ, एवं भणिए केइ तत्थ ठिया, अन्ने पुन अल्लहंता गया, वत्थ य बंधनमरणाइं पाविया, जे उण ठिया ते सच्छंदं वनेसु सुहं मोदंति। एस एगो दिट्ठंतो, बितिओ भन्नइ-एक्को राया, तेन य

हत्थिगहणत्थं पुरिसा भणिया, जहा गेण्हह हत्थी, ते भणंति-जत्थ हत्थी चरंति तं नलवणं सुक्कं गिम्हकालेणु, तो तत्थ अग्गे अग्गट्ठो कीरइ, राइणा तहत्ति पडिवन्नं तहिंपि तत्थ गंतूण तहत्तिकयं उल्लूहं च नलवणं हरियं जायं, ताहे जूहनाहेण दिट्ठं, निग्गओ सिक्कलइगो, जहा विद्दियमेयं गयकुलाणं जया रोहंति नलवणा, एत्थ पुण अकालेण, अह भणिअ पाणियं पभूयं निज्झरेसु वट्टइ तेण नीला, तं न, अन्नयावि जेण कारणेन बहुयं पाणियं हुंतं न उण नीला नलवणा, ता अच्छह मा एत्थ पविसह, एवं भणिया जे तत्थ ठिया ते पउरन्नपाणियएसु सुहं विहरंति, जे पुण न ठिया ते वारीसु बद्धा हम्मंति अंकुसपहारेहिं। एस बिनिओ दिट्ठंतो। एसा दव्वगवेसणा, इमा य भावगवेसणा-लोगुत्तमण्हवणाईसु मिलियाणं साहूणं कोणइ भावेणं भद्दएणं वा आहाकम्माणि भक्खाणि रइल्लयाणि, भोयणं वा केणइ साहुणा दट्ठुं भद्दएण कयं, तत्थ य अणेगे निमंतिया, अन्नाणय पभूयं दिज्जइ, सो य भद्दओ चिंतइ-एयं दट्ठूण साहूणा आगमिस्संति, आयरिएण तं नायं, ततो साहू निवारेइ, मा तेसु अल्लियह, ताहे केइ सुणंति केइ न सुणंति, जेहिं सुयं ते परिहरंति, ते य अंतपंतकुलेसु हिंडंति, अरिहंताणं च आणा आराहिआ परलोगे महंतसुहाणं आभागिणो जाया, जेहिं पुन य सुयं ते तहिं भोयणे गया अरहंताणं च आणाभंगो कओ अनेगाणं च जम्मणमरणाणं आभागिणो जाया।

मू. (७०९) जियसत्तुदेविचित्तसभपविसणं कणगपिट्ठपासणया।
डोहल दुब्बल कहणं आणा य पुरिसाणं॥

मू. (७१०) सीवन्निसरिसमोदगकरणं सीवन्निरुक्खहेट्ठेसु।
आगमन कुरंगाणं पसत्थअपसत्थउवमा उ॥

मू. (७११) विइयमेयं कुरंगाणं, जया सीवन्नि सीयई।
पुराणि वाया वायंति, न उणं पुंजगपुंजगा॥

वृ. सुगमाः॥ नवरं प्रशस्तोपमा यैर्यूथपतेर्मतं कृतं, अप्रशस्ता च यैर्न कृतं, नवरं जया सीवन्नि सीयई फलतीत्यर्थः॥

मू. (७१२) हत्थिगहणंमि गिम्हे अरहंतेहिं भरणं तु सरसीणं।
अच्चुदएण नलवणा अभिरूढा गयकुलागमनं॥

मू. (७१३) विइयमेयं गयकुलाणं, जहा रोहंति नलवणा।
अन्नयावि झरंति सरा, न एवं बहुओदगा॥

वृ. सुगमे, नवरं 'भरणं च सरसीणं' ति महंति सरांसि सरस्य उच्यन्ते तासां भरणम्॥

मू. (७१४) ण्हाणाईसु विरइयं आरंभकडं तु दानमाईसु।
आयरियनिवारणया उपसत्थिनरे उवणओ उ॥

वृ. स्नानादिषु विरचितं कथिदभक्तं, आरम्भे वा भोजने दानादि किंचित्प्रवर्तितं, तत्राचार्यो निवारणां करोति। अयं चाप्रशस्तस्यैतरस्य चोपनय उक्तः। अहवा इमा भवागवेसणा-धम्मरुई नाम अणगारो सो जेट्ठामूले जेट्ठमासइत्यर्थः तिहिं आयावेइ अट्ठमं च करेइ, सो य पारणए सम्मंमि न हिंडइ अन्नं गामं वच्चइ, तत्थ य वच्चंतं साहुं दट्ठूण एक्का देवया आउट्टा, कोंकणगरूववादि तो विउव्वइ, ताहे रुक्खहेट्ठा अणुकंपाए लाउएणं कंजियस्स भरिएणं अच्छइ, ताहे तं साहुं अब्भासगं दट्ठूण एसो भणति तुमं पिब कंजियं, ताहे सो भणइअन्नाहि मम पीएणं ताहे सो भणइ-को उण एयं वहिही तम्हा गाहुरस्स दिज्जउ, ताहे बीओ भणइ-देहि वा छड्डेहि वा, तओ तेनं सो अनगारो निमंतिओ भणिओ य-तुब्भे इमं गेण्हह, ताहे सो भगवं दव्वओ खेत्तओ

कालओ भावओ य गवेसइ, दव्वओ इमं कंजियं सीयलं सुरहिं च, खेत्ततो इमाए अडवीए को देइ ?, कालतो जेट्ठामासो, एत्थवि दुक्खं ताउ, भावओ हट्ठतुट्ठचित्तेण निमंतेति, तं एत्थ कारणेन भवियव्वं, ताहे सो उवउत्तो हेट्ठा पेच्छइ जाव भूमीए पाया न लग्गंति, उवरि पेच्छइ अच्छीणि अणिमिसाणि, ताहे देवत्ति नाऊण वंदियं अहवा वयरसामी दिट्ठंतो, वयरस्सामी आयरिएहिं समं वासारत्तं एगंमि नगरे ठिओ, तत्थ य सत्ताहवद्दले न कोइ साहू नीइ, सोवि भगवं डहरओ ण णीति, तस्स पुव्वसंगइया देवा आगया, ते हि तत्थ वणियवेसं काऊण मरुएहिं आगंतूण अब्भासे ठिआ, तेहिं तत्थ अण्णगम्मं उवक्खडियं, उज्जुत्ता अकिलिम्मंता य गता निमंतेंति साहुणो, ते भणंति-एस खुक्कलओ गेण्हउ, ताहे सो आयरियसंदिट्ठो पयट्टो जाव अज्जवि वरिसइ, ताहे तेहिं देवेहिं सव्वं वद्दलं उवसंहरियं आगओ नं पएसं, देवेहि य वीहिक्करो वाउमारुहो पूसफलं माहुरयं च, सो भगवं उवउत्तो-को कालो वाणियगाणं एत्थ आगमणे, एअं वा अकाले वासं न उवसमेइ तो किह आगया ?, इमो य पढमपाउसो कतो वीहिणो पूसफलं वा ?, एवं चिंतेंतो हेट्ठा उवरिं च निरूवेइ जाव भूमीए पाया न लग्गंति अनिमिसाणि अच्छीणि तओ गुज्झगत्ति वज्जेइ, ताहे देवा सत्थं साहरित्ता वंदंति नमंसंति, पसंसंति धन्नोऽसि भयवं !, वत्थ य से वेउव्वियलद्धिं नभोगमणलद्धिं च देंति, ताहे गया देवा।

एसा भावगवेसणा। अमुमेवार्थं गाथाभिरुपसंहरति-

मू. (७१५) [illegible] अल्लवरे तंमी वेउव्विगलद्धि नहगमणं।
जेट्ठामूले अद्धम उवरिं हेट्ठा व देवाणं॥

धर्मरुचिस्तनगारस्तथाऽऽर्यवयरस्वामी लब्धो वैकुर्विकलब्धेर्नभोगमनलब्धेश्च तस्यैव, तथा ज्येष्ठामूले ज्येष्ठमास इत्यर्थः, धर्मरुचिरष्टमभक्ते न स्थितोऽन्यस्मिन् ग्रामे गच्छन् देवेन दृष्टः, स च भगवानधस्तादुपरि चोपयोगं दत्त्वा पुनश्च न गृहीतवानकल्प्यमिति। इदानीं भाष्यकारो धर्मरुचिकथानकमुपसंहरन्नाह-

मू. (७१६) आयावणऽट्ठमेणं जेट्ठामूलंमि धम्मरुइणो उ।
गमनऽन्नगामभिक्खट्ठया य देवस्स अनुकंपा॥ [भा. २३२]

मू. (७१७) कोंकणरूववियुव्वण अंबिल छक्तेमऽहं पियसु पानं।
छड्डेहित्तिय बिइओनंगिण्ह मुनित्ति उवओगो॥ [भा. २३३]

मू. (७१८) तण्हाछुहाकिलंतं दट्ठूणं कुंकणो भणइ साहुं।
उज्झामि अंबकंजियअज्जो ! गिण्हाहि णं तिण्णिओ॥ [भा. २३४]

मू. (७१९) सोऊण कोंकणस्स य साहू वयणं इमं विचिंतेइ।
गविसणविहिए निउणंजह भणिअं सव्वदंसीहिं॥ [भा. २३५]

मू. (७२०) गविसणगहणकुडंगनाऊणमुणी उ मुणियपरमत्थो।
आहडरक्खणहे उं उवउंजइ भावओ निउणं॥ [भा. २३६]

मू. (७२१) अक्कोसदव्वखेत्तं च अरन्नं कालओ निदाहो उ।
भावे हट्ठपहट्ठो हिट्ठा उवरिं च उवओगो॥ [भा. २३७]

मू. (७२२) दट्ठूण तस्स रूवं अच्छिनिवेसं च पायनिक्खेवं।
उवओंजिऊण पुव्विं गुज्झिगमिणमो त्ति वज्जेइ॥ [भा. २३८]

वृ. गवेषणा ग्रहनमेव गह्वरमित्यर्थः तज्ज्ञात्वा मुनिः॥ उत्कृष्टमेतद्द्रव्यं-काञ्जिकं सुरभि क्षेत्रतोऽरण्ये कुतोऽस्य सम्भवः ?, शेषं सुगमं॥ दृष्ट्वा च 'तस्य' देवस्य रूपं वर्जयतीति संबन्धः।

मू. (७२३) सत्ताहवद्दले पुव्वसंगई वणियविरूवुवक्खडणं।
आमंतण खुल्लस्स [illegible] ॥ [भा. २३९]

वृ. सप्ताहवर्दले पूर्वसङ्गतिकदेवो विरूपरूपं-अनेकप्रकारं उवक्खडित्ता आमन्त्रणं क्षुल्लस्य कृतवान्, गुरुणा चानुज्ञातः प्रवृत्तश्च, पुनश्च बिन्दुपतनात्स्थितो, देवेन चोपसंहरितं, पुनश्च वयरस्वामिना उपयोगो दत्तः।

मू. (७२४) एसा गवेसणविही कहिया मे धीरपुरिसपन्नत्ता।
गहणेसणंपि एत्तो वोच्छं अप्पक्खरमहत्थं॥

वृ. सुगमा॥ तत्र यदुक्तं 'इत ऊर्ध्वं ग्रहणैषणां वक्ष्ये' इति, तत्प्रतिपादयन्नाह-

मू. (७२५) नामं ठवणादविए भावे गहणेसणा मुणेयव्वा।
दव्वे वानरजूहं भावंमि य ठाणमाईणि॥

वृ. याऽसौ ग्रहणैषणा सा चतुर्विधा-नामग्रहणैषणा स्थापनाग्रहणैषणा द्रव्यग्रहणैषणा भावग्रहणैषणा च ज्ञेया, नामग्रहणैषणा सुगमा, तत्र स्थापनाग्रहणैषणा द्विविधा-सद्भावस्थापनाग्रहणैषणा चित्रकर्मणि साधुर्ग्रहणैषणां कुर्वन् दृश्यते, असद्भावस्थापनाग्रहणैषणाऽक्षादिषु, तत्र द्रव्यग्रहणैषणा आगमतो नो आगमतश्च, गमतो ग्रहणैषणापदार्थज्ञः तत्र चानुपयुक्तः, नोआगमतो ज्ञशरीरभव्यशरीरे तथा ज्ञशरीर-भव्यशरीरव्यतिरिक्ता द्रव्यग्रहणैषणायां वानरयूथं, भावग्रहणैषणायां तु स्थानादीनि भवन्ति, एवमुक्तं भवति-भावग्रहणैषणां कुर्वन् विवक्षिते स्थाने तिष्ठति, दातृप्रभृतीनि च पर्यालोचयते भावग्रहणैषणायां, तत्र द्रव्य-ग्रहणैषणायामिदमाख्यानकम्-एकं वनं तत्थ वानरजूहं परिवसइ, कालेण य तं परिसडियपंडुपत्तं जायं उण्हकाले ताहे जूहवई भणइ-अन्नं वनं गच्छामो, तत्थ तेसिं जूहवई अन्नवणपरिक्खणत्थं दुन्नि व तिन्नि व पंच व सत्तव पयट्टइ, वच्च ह वलंतरे जाणह, ताहे गया एगं वनसंडं पासंति पउरफलपुप्फं, तस्स वणस्स मज्झे एगो महद्दहो, तं दट्ठूण हट्ठतुट्ठा गया जूहवइणो साहंति ताहे जूहवई सव्वेसिं समं आगओ, ताहे तं वणं रुक्खेण रुक्खं पलोएइ, ताहे तं वणं सुद्धं, तेन भणिया-खायह वनफलाइं, जाहे ते तत्थ धाया ताहे पानियं गया, ताहे सो जूहवई दहस्स परिपेरंतेहिं पलोएइ जाव ओयरंताणि पयाणि दीसंति नीसरंताणि न दीसंति, ताहे भणई एस दहो सावाओ ता मा एत्थ तीरट्ठिया मज्झे वा उपरयि पाणियं पियह किं तु नालेण पियह, तत्थ जेहिं सुयं तस्स वयणं ते पुप्फफलाणं आभागिणो जाया, एवं चेव यरिओ नाणं साहूणं आहाकम्मुद्देसियाणि समोसरणण्हवणाइसु परिहरावेइ उवाएण फासुयं गिण्हावेइ जहा न छलिज्जंति आहाकम्माइणा तहा करेइ, तत्थ पुव्वकयाणि खीरदहिधयाईणि तारिसेसि गिण्हावेइ अकयाकारियासंकप्पियाणि, तत्थ जे यरियाणं वयणं सुणंति ते परिहरंति ते अचिरेणं कालेण कम्मक्खयं करेहिंति, जे न सुणंति ते भणंति एते तुम्हारिया असद्दहिकल्पाः, किं कारणं एयं न धिप्पंतिचि ?, एवं असुणंता अनेगाणं जाइयव्वमरियव्वयाणं आभागिणो जाया॥ इदानीममुमेवार्थं गाथाभिः प्रदर्शयन्नाह-

मू. (७२६) परिसडियपंडुपत्तं वणसंडं दट्ठु अन्नहिं पेसे।
जूहवई पडियरिए जूहेण समं तहिं गच्छे॥

मू. (७२७) सयमेकालोएउं जूहवई तं वनं समं तेहिं।
वियरइ तेसिं पयारं चरिऊण य ते दहं गच्छे॥

मू. (७२८) ओयरंतं पयं दट्ठुं, उत्तरंतं न दीसइ।

नालेण पियइ पानीयं, एस निक्कारणो दंडो ॥

वृ. सुगमाः, नवरं. 'पडियरिए' निस्विए ॥ नवरं 'वियरइ'' ददाति 'तेषां' वानराणां 'प्रचार' भटन-मुत्सङ्गलयति ॥ एवं तावद्द्रव्यग्रहणैषणा, भावग्रहणैषणा एभिर्द्वारैरनुगन्तव्या·

मू. (७२९) ठाणे य दायए चेव, गमने गहणागमे ।
पत्ते परियत्ते पाडिए य गुरुयं निहा भवे ॥

वृ. तत्र पिण्डग्रहणं कुर्वता वक्ष्यमाणं स्थानत्रितयं परिहरणीयं. तद्यथा-आत्मोपघातिकं प्रवचनोपघातिकं संयमोपघातिकं चेति । तथा पिण्डग्रहणं कुर्वता दाता परीक्षणीयः- योऽव्यक्त इत्यर्थो न भवति. तथा दातुर्गमनं निरूपणीयं भिक्षार्थमभ्यन्तरं प्रदर्शितो भिक्षां च दत्त्वा गच्छतो गमनं निरूपणीयं, 'गहणं'ति स भिक्षादाता यस्माद् इण्डिकादिस्थानाद्भहणं भिक्षायाः करोति तन्निरीक्षणीयं. स दाता नो भिक्षां गृहीत्वाऽभ्यागच्छन्निरूपणीयः, 'पत्ते'त्ति प्राप्तस्य दातुरुत्तम्य हस्तउदकार्द्रो न वेति निरूपणीयः. अथवा 'पत्ते'त्ति पात्रं- स्थानं यस्मिन भिक्षा आदाय गृहस्थ आगतः कडुच्छुकादि तन्निरीक्षणीयं. अथवा पत्तंत्ति प्राप्तं द्रव्यमोदनादि निरूपयति 'परियत्ते'त्ति परावृत्तमधोमुखं स्थितं भिक्षां ददतो दातुः कडुच्छुकादिकं तत निरूपयति कदाचिदुदकार्द्रं भवति, 'पाडिए'त्ति पातितश्च पात्रके पिण्डो निरूपणीयः. 'गुरुयं'ति गृहस्थभाजनं स्थाल्यादि गुरुर्भवति, कदाचित्तद्रव्यं गुडादि गुरुर्भवति, पाषाणादिर्वा भण्डकस्योपरि यो दत्तः, तथा 'निहा'त्ति त्रिविधः कालो वक्तव्यः, भावश्च-प्रशस्ताप्रशस्तरूपो वक्तव्यः ।

इदानीं भाष्यकारः प्रतिपदं व्याख्यानयति, तत्राद्यावयव्याख्यानायाह·

मू. (७३०) आया पवयण संजम तिविहं ठाणं तु होइ नायव्वं ।
गोणाइ पुढविमाई निद्धमणाई पवयणंमि ॥ [भा. २४०]

वृ. त्रिविधमुपघातस्थानं भवति, तद्यथा-आत्मोपघातिकं प्रवचनोपघातिकं संयमोपघातिकं चेति, तत्र यथायोगं गवादिभिरात्मोपघातिकं भवति पृथिवीकायादिभिः संयमोपघातिकं भवति निद्धमणादि-नगरोदकोपधसरादि उपघातस्थानं प्रवचनविषयं भवति । तत्र गवादिभिः कथमात्मोपघातो भवतीति दर्शयन्नाह-

मू. (७३१) गोणे महिसे आसे पल्लण आहनन भारणं भवइ ।
दरगहिय भाणभेदो छड्डणि भिक्खस्स छक्काया ॥

मू. (७३२) चलकुक्कुपडणकंटगविलस्स व पासि होइ आयाए ।
निक्खमपवेसवज्जम गोणे महिसे य आसे य ॥

वृ. यदा गोमहिष्यादिस्थाने स्थितो भिक्षां गृह्णाति ततो महिष्यश्वादिप्रेरणं-विक्षेपणं आघातो वा मारणं तत्कृतं भवति आत्मविराधना, अर्द्धगृहीतायां भिक्षायां 'भाजनभेदः' पात्रकभेदो भवति. ततश्च भिक्षायाः 'छड्डने' प्रक्षेपणे षडपि काया विराध्यन्ते, इयं संयमविराधना । अथवाऽनेन प्रकारेणात्मविराधना भवत-तत्र भिक्षाग्रहणस्थाने कदाचिच्चलनं कुड्यमासन्ने भवति ततस्तत्पतनजनित आत्मोपघातो भवति । कण्टका वा तत्र भवन्ति बिलस्य वा 'पार्श्वे' आसन्ने तत्स्थानं भवति ततश्चात्मविराधना । तथा निष्क्रमणप्रवेशस्थानं गोमहिषाश्वादीनां वर्जयित्वा तिष्ठति भिक्षाग्रहणार्थं । तथा प्रकारान्तरेण संयमोपघातं दर्शयन्नाह-

मू. (७३३) पुढविदगअगनिमारुयवनस्सतसवजंमि ठाणि ठाइज्जा ।
दिंती व हेट्ठ उवरिं जहा न घट्टइ फलमाई ॥

वृ. पृथिव्युदकाग्निमारुतवनस्पतिसर्वजीवैर्वर्जिते स्थाने स्थातव्यं, यथा वा भिक्षां प्रयच्छन्ती गृहस्थी, 'अधो'

भूमौ 'उपरि' च नीत्वादौ न सङ्कट्टयति फलादि तत्र प्रवेशे स्थिति गृह्णाति। इदानीं प्रवचनोपघातप्रदर्शनायाह-

मू. (७३४) उच्चारे पासवणे सिणाण आयमणठाण उक्कुरुडे।
निद्धमणमगुज्झमाई पवयणहानी विवज्जेज्जा॥

वृ. प्रश्रवणस्य उच्चारस्य स्नानस्य आचमनस्य च यत्स्थानं तथा कन्दत्थोकुरटिकास्थानं ततो निर्द्धमनस्थानं-उपधसरस्थानं यत्र वाऽशुचि प्रक्षिप्यते स्थाने. एतेषुस्थानेषु भिक्षां गृह्णतः प्रवचनोपघातो भवति, ततःसर्वप्रकारैःप्रवचनहानि-हीलनां वर्जयेत्। उक्तं स्थानद्वारम्, अधुना दातृद्वारमुच्यते, तत्रचेनानिद्वाराणि-

मू. (७३५) अवत्तमपहू थेरे पंडे मत्ते य खित्तचित्ते य।
दित्ते जक्खाइट्ठे करचरछिन्नेऽन्ध नियले य॥

मू. (७३६) तहोरागुव्विणीबालवच्छकंडंतपीसभज्जंती।
कसंती पिंजंती भइया दगमाइणी दोग्गा॥

वृ. 'अव्यक्त:' अष्टानां वर्षाणामधो बालः. स यद्यपि भिक्षां ददाति तथापि न गृह्यते. तथा अप्रभुर्यस्तस्य हस्तान्न गृह्यते, तथा स्थविरहस्तात् 'पण्डकात्' नपुंसकहस्तात्. मत्तो यः सुरया पीतया तस्य हस्तान्न गृह्यते, क्षिप्तं चित्तं यस्य दयितादिविप्रयोगादिभिर्भवति स क्षिप्तचित्तः, तथा दीप्तं चित्तं यस्यासत्कच्छत्रुपराजयात्कर्षणानिविस्मयाभिभूतस्य चित्तहासो जातः यथा मत्तुल्यो नास्तीतितिथा 'यक्षाविष्टः' पिशाचगृहीतः करच्छिन्न- चरणच्छिन्नः अन्धश्च निगडितश्च यः, त्वग्दोषः-कुष्ठी यः तथा गुर्विण्या हस्तात् तथा बालवत्सा-शिशुपालिका या, कण्डन्ती. व्रीह्यादि, तथा पिषन्ती गोधूमादि. तथा भर्जयन्ती यवधान्यादि, तथा केषाञ्चित्पाठो मृजन्ती, तथा कर्त्तयन्ती सूत्रं, पिञ्जयन्ती रुतं, एतेभ्यो गाथाद्वयोपन्यस्तेभ्यो दातृभ्योऽव्यक्तादिभ्यः पिञ्जयन्तीपर्यन्तेभ्यो हस्तान्न ग्राह्या भिक्षा, 'भइय'त्ति भजना विकल्पनाऽत्र कर्त्तव्या, एतदुक्तं भवति-कदाचिदेतेभ्योऽव्यक्तादिभ्यः पिञ्जयन्तीपर्यन्तेभ्यो दातृभ्यो हस्ताद् गृह्णाति कदाचित् न गृह्णात्यपि, 'दगमाइणी दोग्गा' एतेषु भुञ्जानादिदातृषु आचमनोदकप्रोज्झनदोषः. अव्यक्तादिष्वनेके उपघातादयः। प्रतिद्वारगाथाद्वयमेतत्. इदानीं भाष्यकारः प्रतिपदं व्याख्यानयति, तत्राद्यावयवप्रतिपादनायाह-

मू. (७३७) कप्पट्ठिगअप्पाहणदित्ते अत्तोऽन्नगहणपज्जंते।
खंतियमग्गणदित्ते उक्तारुहपदोसचारभडा॥ [भा. २४१]

वृ. तत्थ अव्वत्तो भन्नइ जाव अट्ठवरिसो जाओ तस्स इत्थाउ न गिण्हियव्वं, को दोसो ?, इमो-एगा भद्दिगा सा छेसं गया तए डहरगा चेडी संदिसिज्जइ, जहा जदि एज्ज पव्वइयगो तस्स भिक्खं देज्जाहि, तओ ताए गयाए आगओ भिक्खा वेलाए पव्वइयगो, ताहे तेन सा चेडी भन्नइ-कहिं तुव अंबा गया ?, सा भणइ-छत्तं, सो भणइ-आनेहि भिक्खं. ताहे ताए कूरो दिन्नो, ताहे सो अन्नाणिवि जेमणाणि मग्गइ, ताहे सव्वं दिन्नं खीरं दहिं तक्कं. तओ चेव चउत्थरसिओ, तेनवि सव्वं गहेऊण पज्जत्तं काऊण निग्गओ, सा भद्दिगा आगया अवरण्हे ताहे खंतिया जेमणं मग्गइ, सा चेडी भणइ-पव्वइयगस्स मए दिन्नं, सा भणइ-सुट्ठु कयं, कूरं आनेहि जेमेमि, सा भणति-दिन्नो पव्वइयस्स. सा भणइ सुट्ठु कयं, आनेहि कुसिणं दधिदुद्धादि, सा भणइ-दिन्नं, सुट्ठु कयं, केनिअं आनेहि, चेडी भणइ-तंपि दिन्नं, एत्थ सा भद्दिगा रुट्ठा भनति-कीस सव्वं देहि ?, चेडी भणइ-नो मग्गइ, सा भणइ-चेडरूवं परिभविऊण सव्वं घेत्तूण गओ, गया आयरियस्स पासं. तत्थ खिंसति-एस चारभडे इव सव्वं सव्वं घेत्तूण आगओ, तत्थवि आयरिएण नीए पुरओ चेव तस्स सव्वं उवकरणं अदक्खेयव्वं, एते दोग्गा अव्वत्तगहणंथओ गहणं।

मू. (७३८) अप्पभु भयगाईया उभाण्गतरे पदोस पहु कुज्जा।
थेरे चलंत पडणं अप्पभुदोसा य ते चेव॥ [भा. २४२]

वृ.अप्रभवो-भृतकादयस्तेषां हस्तादिभिक्षा न ग्राह्या, यत-'उभयोः' प्रव्रजितकभृतकयोः प्रद्वेषं कुर्यात्, एकतरस्य वाप्रव्रजितस्य भृतकस्य वोपरि पद्वेषं कुर्यात् प्रभु-इदानीं स्थविरद्वारमुच्यते-स्थविरस्यापि हस्तादिभक्षा न ग्राह्या, यतस्तस्य चलतः-कम्पमानस्य पतनं भवति, अप्रभुदोषश्च त एव भवन्ति, एतदुक्तं भवति-स्थविरः प्रायेणाप्रभुर्भवति परिभूतत्वादिति। इदानीं पण्डकद्वारमुच्यते-

मू. (७३९) [illegible] तुप्पे।
लोगदुगुंछा संका एरिगसा नूनमेतेऽवि॥ [भा. २४३]

वृ. नपुंसकान्न गृह्यते यत आत्मनः परत उभयतश्च दोषाः संभवन्ति, आत्मशब्देन साधुर्गृह्यते, ततः को दोषः ?, क्षोभणं स्यात् बहुमोहनपुंसकदर्शनेऽभीक्ष्णं, तत्र भिक्षाग्रहणं चतद्वा क्षुभ्यते अभीक्ष्णं साधुदर्शनादिना, उभयकृतो या दोषः, लोकश्च जुगुप्सते शंकते च, नूनमेतेऽपि नपुंसकानीति मत्तद्वारमाह-

मू. (७४०) अवयास भाणभेदो वमनं असुइत्ति लोगउक्ताहो।
खेत्ते य दित्तचित्ते जक्खाइट्ठे य दोसा उ॥ [भा. २४४]

वृ. सुरोपानेन यो मत्तस्तस्य हस्तादिभक्षा न गृह्यते, किं कारणं ?, यतो मत्तो भिक्षां प्रयच्छन् कदाचिदवयासं करोति आलिङ्गतीत्यर्थः कदाचिद्भाजनं-पात्रकं भिनत्ति वमन वा-छर्दनं करोति, तथाऽशुचिरितिकृत्वा लोक उक्ताहो भवतिप्रवचनोपघात-। इदानीं तृतीयद्वारमुच्यते-व्याक्षिप्तचित्ते दीप्तचित्ते यक्षाविष्टे एत एव दोषा आलिङ्गनभाजनभेदवमनाशुच्यिप्रभृतयो भवन्तीति।

मू. (७४१) करच्छिन्न असुइ चरणे पडणं अंधिल्लए य छक्काया।
निलयाऽसुइ पडणं वा तहोसी संकमो असुइ॥ [भा. २४५]

वृ. छिन्नकरो यदि भिक्षां ददाति ततो न गृह्यते यतोऽशुचिदोषो लोके भवति। द्वारं। तथा यस्यापि चरणश्छिन्नस्ततोऽपि न गृह्यते यतः तस्य प्रयच्छतः पतनं भवति। अन्धेऽपि न गृह्यते यतोऽसौ प्रयच्छन् षट् कायान् व्यापादयति। द्वारं। निगडितोऽपि न गृह्यते भिक्षा, यतोऽसावशुचिर्भवति, पतनं च तस्य निगडबद्धस्य स्यात्। त्वग्दोषदूषितस्यापि हस्तान्न गृह्यते यतः कदाचित्कुष्ठसङ्क्रम- स्यात् अशुच्यिचासौ वर्त्तते।

मू. (७४२) गुव्विणि गब्भे संघट्टणा उ उट्ठंति निवेसमाण य।
बालाई मंसखंडग मज्जाराई विराहेज्ज॥ [भा. २४६]

वृ. गुर्विणीहस्तान्न गृह्यते यतस्तस्या गर्भे संघट्टनं भवति कथम् ?, उत्तिष्ठन्त्याश्चोपविशन्त्याश्च। द्वारं। बालवत्साया अपि हस्तान्न गृह्यते भिक्षा, यतो बालं मुक्त्वा यदि भिक्षां ददाति ततस्तं बालं 'मंसपिण्डकादिबुद्ध्या' मांसपिण्डादिबुद्ध्या, आदिग्रहणान्नवनीतबुद्ध्या वा मार्जारादिर्विराधयेत्।

मू. (७४३) बीओदगसंघट्टण कंडणपीसंत भज्जणे डहणे।
कत्तंती पिंजंती इत्थं लित्तंमि उदगवहो॥ [भा. २४७]

वृ.कण्डयन्त्याः पिंषन्त्याश्च हस्तान्न गृह्यते यतस्तत्र यथासङ्ख्येन एकस्या बीजसंघट्टनकृतो दोषः अपरस्या उदकसंघट्टनकृतो दोषः, इति द्वारद्वयम्। याऽपि यवादीनां भर्जनं करोति तस्या अपि हस्तान्न गृह्यते यतस्तत्र यवा दिदहनकृतो दोषो भवति। तथा कर्त्तन्त्याः पिञ्जन्त्याश्च हस्तान्न गृह्यते यतस्तयोर्निष्ठी-वनलिप्तौ हस्तौ भवतस्तत्प्रक्षालने उदकवधः, द्वारद्वयं॥ इदानीं यदुक्तं मासीद् भज्जनया-विकल्पेनैषाम-व्यक्तादीनां

हस्ताद्गृह्यते न त्वेकान्तेनेवागृहणं किन्तु ग्रहणमपि तत्प्रदर्शयति, तत्राद्यावयवभञ्जना-

मू. (७४४) भिक्खामेत्ते अवियालणं तु बालेण दिज्जमाणंमि।
संदिट्ठे वा गहणं अहबहुयवियालणुत्ताओ॥

वृ. बालो यदि भिक्षामात्रं परोक्षेऽपि ददाति ततो भिक्षामात्रे दीयमानेऽविचारणया, गृह्यति, अथासौ बालो गृहपतिना प्रत्यक्षमेव 'संदिष्टः' उक्तो यथा प्रयच्छास्मै साध्वेव भिक्षां, ततोऽसौ साधुर्गृह्णाति. अथासावतिबहु प्रयच्छति ततः, साधुर्विचारयति, यदुत किमित्यद्यातिबहु दीयते ?. एवमुक्ते सति यद्यसौ गृहस्थ एवं भणति-यदुताद्य प्राघूर्णकादिवशाद्बहु संस्कृतं, ततोऽसौ साधु गृह्णाति। उक्त ऽव्यक्त यतना,

मू. (७४५) अप्पहुसंदिट्ठे वा भिक्खामित्ते व गहणऽसंदिट्ठे।
थेरपहु थरथरंते धरणं अहवा दढसरीरे॥

वृ. अप्रभुः-भृतकादिर्यदि सन्दिष्टः-उक्तं। भवति प्रभुणा ततस्तस्य हस्ताद्गृह्यते, यदा पुनर्न संदिष्टः-नोक्तः स प्रभुणा यथा दातव्यं त्वया, तत्रासन्दिष्टे सति भिक्षामात्रस्यैव ग्रहणं करोति। अप्रभुयतनोक्ता. स्थविरयतनोच्यते-स्थविर- मन् प्रभुर्यदि ददाति, किंविशिष्टः ?-कम्पमानः परेण धृतः सन् ततो गृह्यते, अथासौ स्थविरः प्रभुर्यदि दृढशरीरो ददाति तथाऽपि गृह्यते। इदानीं पण्डकादीनां यतनादर्शनायाह-

मू. (७४६) पंडगअप्पडिसेवी मत्तो सड्ढो व अप्पसागरिए।
खेत्ताइ भद्दगाणं करचरबिइप्पसागरिए॥

वृ. पण्डकस्य ददतो गृह्यते यद्यसावप्रतिसेवी भवति-न कुत्सितं कर्म आचरति। दारं। श्राद्धकस्य च मत्तस्य हस्ताद्गृह्यते, यद्यसावल्पसागारिकः स भवेत्, वाशब्दादल्पमदश्च यदि स्यात्। तथा क्षिप्तचित्त-दीप्तचित्तयक्षाविष्टानां हस्ताद्गृह्यते यदि प्रकृत्या भद्रका भवन्ति-सादुवासनावन्त इत्यर्थः। द्वारत्रितयं। तथा करचरणरहितानां हस्ताद्गृह्यते, कथं ?, चरणरहितो यद्युपविष्टो ददाति अल्पसागारिकं च यदि भवति, करचरणरहितोऽपि यद्यल्पसागारिकं ददाति ततो गृह्यते नान्यथा। द्वारद्वितयं। इदानीमन्धादियतनाप्रदर्शनायाह-

मू. (७४७) सड्ढो व अन्नरूंभण अंधे सवियारणा व बद्धंमि।
तद्दोसिए अभिन्ने वेला थणजीविए थेरा॥

वृ. अन्धस्य च हस्तादृह्यते यदि श्रद्धावानन्येनाकृष्यमाणो ददाति। बद्धस्य च हस्ताद् गृह्यते यदि स सविचारो भवति-परिष्वष्वितुं शक्नोति। 'त्वक्दोषदुष्टस्यापि' कुष्ठिनोऽपि हस्ताद गृह्यते यद्यसावभिन्नकुष्ठी भवति-गलत्कुष्ठो न भवतीति। वेलेति- गुर्विण्या यदि वेलामासस्तत्तस्तस्या हस्तान्न गृह्यन्ति स्थविर-कल्पिका इतरत्र गृह्यन्ति, जिनकल्पिकादयस्तु यः प्रभुत्यापन्नासत्त्वा भवति तत एवारभ्य न गृह्यन्ति। तथा स्थविराः स्थविरकल्पिकाः स्तनोपजीवी यो बालस्तद्युक्त। या बालवत्सा तस्या हस्तान्न गृह्यन्ति, जिनकल्पिकादयस्तु यावदपि बालस्तावदपि तां बालवत्सां परिहरन्ति-न तस्य हस्ताद् गृह्यन्ति। द्वारद्वयं।

इदानीं कण्डयन्त्यादियतनोच्यते-

मू. (७४८) उक्खित्तऽपच्चवाए कंडे पीसे वछूढ भज्जन्ती।
सुक्के व पीसमाणी बुड्डीय विभावए सम्मं॥

वृ. तत्र कण्डयन्त्या हस्तात् गृह्यते यद्युत्क्षिप्तं मुशलमास्ते साधुश्च प्राप्तस्तत्तोऽप्रत्यपाये स्थाने मुशलं स्थापयित्वा यदि ददाति। पीसे वसि-पेषयन्त्या हस्ताद् गृह्यते यदि तत्पेषणीयमचेतनं-धानादि तथा यत् सचित्तं पूर्वं यदि प्रक्षिप्तं तत्पिष्टं अन्यद्दत्तापि न प्रक्षिप्यते साधुश्च तत्राग्रवर उपस्थितो भिक्षार्थं ततस्तस्या

हस्ताद्गृह्यते, तत्र पेषणं शिलायां घर्षणं वा। 'अच्छूढभज्जन्ती'ति भर्जयन्त्या अपि हस्तात् गृह्यते यदि पूर्वप्रक्षिप्तं भृष्टं अन्यदद्यापि न प्रक्षिप्यते साधुश्च प्राप्त इत्यस्मिन्नवसर इति, शुष्कं वाऽचेतनं तद्गृह्णतः यदि विनश्यति ततश्च बुद्ध्या 'विभाव्य' निरूप्योत्तरकालं गृह्णाति।

मू. (७४९) मुसले उक्खिवंतंमि य अपच्चवाए य पीस अच्चिते।
भज्जंती अच्छूढं भुंजंती जा अनारुद्धा॥ [भा. २४८]

वृ. मुशले उत्क्षिप्ते भवति अप्रत्यपाये प्रदेशे स्थापयित्वा यदि भिक्षां ददाति, 'पीस्य अर्चित्ते'ति अचेतने वा यदि घर्षद्वारो विनष्टि ततो ददाति भिक्षां, भर्जनेतीति जवघाणे भर्जयति अन्तरे अप्यग्निते सति एवमपि अवसरेपि साधुणा भिक्षार्थं दंडं मुञ्चानायाऽपि हस्ताद्गृह्यते यद्यद्यापि न विद्वलयति भवति यत्तद्भाजनगृहीतं तदुत्थाय ददाति॥

मू. (७५०) कत्तणीए थूलं विक्किरिवण लोढ्ढण जति य निट्ठविअं।
पिंजण असोयवाई भयणागहणं तु एएसिं॥

वृ. तथा कर्तयन्त्या अपि हस्ताद्गृह्यते यदि स्थूरमसौ कर्तयति, किं कारणं ?, यतः स्थूरमसौ कर्तयन्ती शङ्खचूर्णं न हस्ताङ्गुलौ करोति, नापि निर्घावनेन, विक्किरिवणंति क्वथं विक्किरिवणाए हत्थाउ धेप्पइ, तथा उरिएणं लोढणं यदि निट्ठविअं लोढियव्वयं तीए हत्थाउ भिक्खा धेप्पइ, एतदुक्तं भवति-जो सो अकप्पासो घाणो लोढणीए दिन्नो सो लोढि अन्नो न अज्जवि दिज्जइ घाणो, एयाए वेलाए धेप्पइ भिक्खा देंतीए तीए, पिञ्जयन्त्या अपि हस्ताद्गृह्यति यद्यसौ महेलाऽशौचवादिनी भवति-न हस्तौ प्रक्षालयति। एवमेषां दातृणां हस्ताद्भजनया ग्रहणं करोति। उक्ता प्रतिद्वारगाथा, तत्प्रतिपादनाच्चोक्तं दातृद्वारं, इदानीं गमनद्वार-

मू. (७५१) गमनं च दायगस्सा हेट्ठा उवरिं च होइ नायव्वं।
संजमआयविराहण तस्स सरीरं व मिच्छत्तं॥

वृ. 'गमनं च' भिक्षादानार्थमभ्यन्तरप्रवेशस्तस्य दातुः 'अधस्तात्' भुवि विज्ञेयम् 'उपरि च' उपरिविभागश्च विज्ञेयः यदि न निरूपयति ततस्तस्य गच्छतः पृथिव्यादिमर्दने सति साधोः संयमविराधना भवति, आत्मविराधना च तस्य दातुः शरीरे सर्पादिदंशनजनिता भवति, अत एव च निमित्तात्क्षुब्धः सन् मिथ्यात्वं यायात् यदुतैवंविधस्य दत्तं येन तत्क्षण एव स दाता सर्पेण दष्ट इति।

मू. (७५२) वच्चंती छक्कायाऽ पमद्दणं हिट्ठतो उवरिं तिरियं च।
फलवल्लिरुक्खसाला तिरिया मनुया य तिरियं तु॥

वृ. व्रजन्ती सा स्त्री भिक्षायै दात्री षडपि कायान् प्रमर्दयेत्, कथं ?-'अधस्तात्' भुवि पृथिव्यप्तेजोवनस्पतित्रसान् क्वथा पादयेत्, वायुकायं हस्तौ स्थितं स्पृशन्ती व्यापादयेत्, तथोपरि तिर्यग्व्यवस्थिता फलवल्लीवृक्षशालाः-शाखा विराधयति, तथा तिर्यग्मनुजान्-जातमात्रबालाकान् तिरश्चः-अश्वबस्तकादीन् सङ्घट्टयेत्। अथ चैते दोषाः-

मू. (७५३) कंटगभाई य अंधे अप्पिं अहिमाइलंबणे आया।
तस्स सरीरविनासो मिच्छत्तुक्कनाह वोच्छेओ॥ [भा. २५०]

वृ. कण्टकादयो बाधो भवन्ति, परि अहयादि-सर्पादिलम्बने आत्मविराधना दातुः, तस्य च-दातुः शरीर-विनाशे मिथ्यात्वं तस्यान्यस्य वा भवति, 'उड्डाहश्च' प्रवचनोपघाश्च भवति यदुत एतेषामेतावानपि प्रभावो नास्ति येन दातारं रक्षन्ति। व्याख्यातं गमनद्वारम्, इदानीं ग्रहणद्वारप्रतिपादनायाह-

मू. (७५४) नीयदुवारमंधारुणकवाडठियं देह दारमइंतं ।
इक्कितरपत्थियलिंदं गहणं पत्तस्सऽपडिलेहा ॥

वृ. 'नीयदुवार' गाहा, नीचद्वारं यदि भवति तत्र चक्षुषा निरूपणं कर्तुं न शक्नोति अतो न गृह्णंति भिक्षां. तथोद्घाटकपाटं-अनर्गलितकपाटं न किन्तु पिहितकपाटं, तत्रापि न गृह्णाति. तथा दातुः संबन्धिना स्वदेहेन द्वारे रुद्धे सति न गृह्यते. आकीर्णं चान्यपुरुषैर्गमागमं कुर्वद्भिः तथा इङ्गर-गन्व्याः संबन्धि तेन तिरोहितं पत्थिका-बृहती पिट्टिका तया वा पिहितं द्वारं अलिन्दं-कुण्डकं तेन वा तिरोहितं एवमेतेषु दोषेषु सत्सु 'ग्रहणं प्राप्तस्य' गृहस्थस्य गृह्यते ऽस्मिन्निति ग्रहणं, यस्मान्प्रदेशाद्भाण्डकं गृह्यानि तं प्रदेशं प्राप्तस्य 'अपडिलेह'त्ति यतः प्रत्युपेक्षणा न शुद्ध्यति अनन्तरोदितैर्दोषैरतो न गृह्यते. यद्येभिरनन्तरोदितैर्दोषैर्भक्तादिभर्नं ग्रहणं ततो ग्रहणप्रदेशं प्राप्तस्य प्रत्युपेक्षणा कर्तव्या-श्रोत्रादिभिरुपयोगं करोति यदि श्रोत्राद्युपयोगेन शुद्धा ततो ग्रहीष्यति, अथ न शुद्धा श्रोत्राद्युपयोगेन ततो न ग्रहीष्यति ॥ इदानीं भाष्यकारः प्रतिपदमेनामेव गाथां व्याख्यानयति. तत्र कथं जिनकल्पिकादयो गृह्यन्ति कथं वा स्थविराः ? इत्येतत्प्रदर्शयन्नाह-

मू. (७५५) नियमा उ दिट्ठगाही जिनमाई गच्छनिग्गया होंति ।
थेराति दिट्ठगाही अदिट्ठि करेंति उवओगं ॥ [भा. २५१]

वृ. "नियमात्' अवश्यन्तयैव दृष्टग्राहिणः जिना-जिनकल्पिकादयो 'गच्छनिर्गताः' परित्यक्त गच्छा भवन्ति, 'स्थविराः' स्थविरकल्पिकाः अपि 'दृष्टग्राहिण एव' अतिरोहितद्वार एव गृहे गृह्णन्ति, कियमेव नियमः ?, नेत्याह- 'अदृष्टे' तिरोहिते गृहद्वारे कपाटादिना उपयोगं श्रोत्रादिभिरिन्द्रियैर्दत्त्वा ततः परिशुद्धे गृह्णन्ति। इदानीं 'नीयदुवारकवाडे'त्ति व्याख्यानयन्नाह-

मू. (७५६) नीयदुवारुवओगे उड्डाह अवाउडा पदोसो य ।
इहयनट्ठंमि अ संका एमेव कवाडउग्घाडे ॥ [भा. २५२]

वृ. नीचद्वारे गृहं न ग्राह्यं यतस्तत्र नीचद्वारे निष्कुटनं कुर्वोपयोगनिरीक्षणं कुर्वंत उड्डाहः पश्चाद्भागदर्शने पैशाचिदर्शने गरातिं कदाचित्तत्राप्रावृताः स्त्रियस्तिष्ठंति ततश्च निरूपयतः प्रद्वेषमुपरि कुर्वन्ति, तथा ह्यंते चौरादिना नष्टे-स्वयमेवदृश्यमाने क्वचिद्भस्तुनि शङ्कोपजायते गृहस्थानां जड्डा तेण पव्वइयएणं निऊडिऊण निग्गइअं आसी जदि तेन न हियं भवं ?, 'एवमेव' एत एव दोषाः पिहितकपाटे निरर्गलमुद्घाटयतोऽप्रावृतिकादयः ॥

मू. (७५७) देहत्तमगरेण व दारं पहिअं जनाउलं वावि ।
इङ्गरपत्थियलिंदेण वावि पिहियं तहिं वावि ॥ [भा. २५३]

वृ. स्वदेहेन द्वारं पिहितं स्थूलत्वादेहस्य अन्यस्य वा पार्श्वस्थस्य शरीरेण पिहितं। द्वारम। आकीर्णं व्याख्यानयति-जना कुलं वा द्वारं निर्गच्छता प्रविशता वा लोकेन, तथा 'इङ्गरेण' गोत्रीसंबन्धिना 'पत्थिकया' बृहत्पिट्टिकया 'अलिन्देन' कुण्डकेन वा स्थगितं द्वारं भवेत् 'तहिं वावि'त्ति तत्र वा इङ्गरादौ स्थगितं तत्तद्द्रव्यं भवत्ततश्च न गृह्यते ॥

मू. (७५८) एतेहऽदोसमाणे अग्गहणं अह व कुज्ज उवओगं ।
सोतेण चक्खुणा घाणओ य जीहाए फासेण ॥ [भा. २५४]

वृ. 'एभिः' अनन्तरोदितैः 'अदृश्यमान' अचक्षुर्दर्शनि सत्यग्रहणं भवति. अथवाऽदृश्यमानेऽप्युपयोगं कुर्यात्. केनित्याह- श्रोत्रेण चक्षुषा घ्राणेन जिह्वया स्पर्शेन चेति ॥ कथं श्रोत्राद्युपयोगं करोति ?-

मू. (७५९) इत्थं मत्तं च धुवे सद्दो उदगस्स अहव मत्तस्स।
गंधे व कुलिंगाई तत्थेव रसो फरिसबिंदु ॥

वृ. हस्तं मात्रं कुण्डलिकादि सा गृहस्था प्रक्षालयेत्ततश्चोदकस्य झलज्झलाशब्दो भवति. अथवा मात्रकस्य-कुण्डलिकादेः प्रक्षाल्यमानस्य खसखसाशब्दो भवति, तथा घ्राणेनोपयोगं करोति, कदाचित्कुलिङ्गः-त्रीन्द्रियादिमर्दितो भवेदागच्छन्त्या, एतश्च गन्धेन जानाति अशोभनेन, ततश्च न गृह्णाति, यत्र गन्धस्तत्र रसोऽपीति, तथा स्पर्शेन चोपयोगं ददाति, कदाचिदुदकबिन्दुर्लगति शीतलः, चक्षुषा तूपयोगं ददाति गमनागमने प्राप्तस्य च द्रव्यस्य भाजनस्य वा हस्तस्य वा, मा भूदुदकसंस्पृष्टं स्यात्।

मू.(७६०) सो होइ दिट्ठगाही जो एते जुंजई पदे सव्वे।
निस्संकिय निग्गमनं आगंकपयंभि गंचिक्खे ॥ [भा. २५६]

वृ. स एवंविधो दृष्टग्राही भवति य एतानि पदानि स्थानान्तराणि पूर्वोक्तानि प्रयुङ्क्ते उपयोगपूर्वकं सर्वाणि. निःशङ्कितमेव भवति यदनेन गृहस्थेन परःकर्मादि कृतं तत्र वारयित्वा निर्गच्छति, अथाशङ्कितं भवति किमनेन कृतं परः कर्मादि न वेतीत्थमाशङ्कायां निरूपयति प्राप्तां सतीं गृहस्थाम्। उक्तं ग्रहणद्वारम्-

मू. (७६१) आगमनदायगस्सा हेट्ठा उवरिं च होइ जह पुव्विं।
संजमआयविराधन दिट्ठंतो होइ वच्छेण ॥

वृ. भिक्षां गृहीत्वा साध्वभिमुखमागच्छन्त्या अधस्तादुपरि च निरूपणीयमागमनं यथा पूर्वं गमने संयमात्मविराधने निरूपिते एवमत्रापि संयमात्मविराधने निरूपणीये। उक्तं मागमनद्वारं, 'पत्ते'त्ति द्वारप्रतिपादनायाह-'दिट्ठंतो होइ वत्थंमि' अत्र प्राप्तायां भिक्षायां दात्र्यां वत्सकेन दृष्टान्तो वोदितव्यः। जहा एगस्स वाणियस्स वच्छओ तद्दिवसं तस्स संखडी न कोई तस्स भत्तपानियं देइ, मज्झण्हे वच्छएण रडियं, सुक्काए से आलंकियविभूसियाए दिन्नं भत्तपाणं, जहा तस्स वच्छस्स चारीए दिट्ठी न महिलाए, एवं साहुणावि कायव्वं। अहवा-

मू. (७६२) पत्तस्स उ पडिलेहा इत्थे मत्ते तहेव दव्वे य।
उदउल्ले ससिणिद्धे संसत्ते चेव परियत्ते ॥

वृ. प्राप्तस्य गृहस्थस्य प्रत्युपेक्षणा कार्या हस्ते. किमयं हस्तोऽस्य उदकाद्यार्द्रो न वेति. तथा मात्रं च-कुण्डलिकादि गृहस्थसत्कं निरूपयति यत्र गृहस्था भिक्षामानाय निर्गता. द्रव्यं च-मण्डकादि निरूपयति संसक्तं न वेति। एवं पत्तहारं निर्युक्तिकारेण वक्तव्यमिदं, इदानीं निर्युक्तिकार एव परिवर्त्तेत्तिद्वारं व्याख्यानयन्नाह-'परिवर्तिते' अधोमुखे कृते सति गृहस्थेन मात्रके कुण्डिकादौ यद्यूकादि दृश्यते सस्निग्धं वोदकेनैव संसक्तं च-त्रसयुक्तं ततस्तस्मिन्नेवंविधे मात्रके परिवृत्ते सति दृष्ट्वा न गृह्णाति।

मू. (७६३) तिरियं उड्ढमहेवि य भायणपडिलेहणं तु कायव्वं।
इत्थं मत्त दव्वं तिन्नि उ पत्तस्स पडिलेहा ॥

वृ. गृहस्थभाजनस्या आगच्छत एवं तिर्यक्-पार्श्वतो भाजनस्य ऊर्द्धं कर्णकेषु भाजनस्य अधो-बुध्ने प्रत्युपेक्षणा कर्तव्या. तथा 'प्राप्तस्य' आसन्नीभूतस्य गृहस्थस्य हस्तं मात्रं द्रव्यं त्रीण्यप्येतानि गृहस्थसत्कानि प्रत्युपेक्षेयत-निरूपयेत ? किम् ?-

मू. (७६४) मास सिणिद्धो दउल्ले तसाउले गिण्ह एगतर दट्ठुं।
परियत्तियं चमत्तं ससणिद्धेऽसंपडिलेहाण ॥ [भा. २५७]

वृ. यस्मिन्गर्ते तोयेन उदकार्द्रमुदके वस्त्राकुलं हस्तं मात्रं द्रव्यं वा दृष्ट्वा एकतरमपि तन्मा गृहाण। 'पत्ति'त्ति द्वारमुक्तं, भाष्यकार एव 'परियत्तिय'त्ति व्याख्यानयन्नाह- 'परियत्तियं च मत्तं' तत गृहस्थमात्रकं कदाचित्सस्निग्धादिद्रव्यमन्वितं भवति ततश्च सस्निग्धादिषु सत्सु प्रत्युपेक्षणा कार्येति। उक्तं परावर्तितद्वारं,

मू. (७६५) पडिओ रत्थु दट्ठव्वो किमियसरिसो व जो पिंडो।
संजमआयविराधन दिट्ठंतो सिद्धि कब्बड्डो॥

वृ. पतितः पात्रके पिण्डो द्रष्टव्यः किमयं कृत्रिमः ?- योगेन निष्पन्नः सक्तु मुद्गपिण्ड इव सिन्द्रपिण्डो वा स्वाभाविककूरस्योद्वृत्त इव, तत्र यदि कृत्रिमः पिण्डः स्फोटयित्वा तं न निरूपयति ततः संयमात्मविराधना भवति, यथा सिद्धिकब्बड्डस्य हृताकाण्डेन कन्थिका इत्येतत्कथानकमनुसरणीयं, तेन हि संयोगपिण्डो न निरूपितस्तत्र च संकलिकाऽऽसीत्, तत्र राजकुले व्यवहारस्तेन च काष्ठर्षिणा भगवान निर्यूढम्, अन्यश्च कदाचिन्नाहशो न भवति ततश्च निरूपणीय इति॥ तत्रात्मविराधनादिप्रदर्शनायाह-

मू. (७६६) गरविस अट्ठिय कंटय विरुद्धदव्वंभि होइ आयाए।
संजमओ छक्काया तम्हा पडियं विगिंचिज्जा॥

वृ. स गर उच्यते य हारं स्तम्भयति कार्मणं वा गरः, स कदाचित्तत्र पिण्डे भवति, तता विषमस्थीनि कण्टकाश्च कदाचिद्भवन्ति, विरुद्धं वा किंचिदव्यं तत्र भवति, ततश्चानिरूपणे एभिरात्मविराधना भवति, तथा संयमतश्च षट्काया विराध्यन्ते, कथं ?, कदाचित्तत्र पृथिवी उदकं वनस्पतिरग्निर्वा लग्नो भवति, यत्राग्निस्तत्र वायुरपि, द्वीन्द्रियादयश्च कदाचिद्भवन्ति, ततश्च 'पडियं विगिंचेज्जा' विभागेन विभजेत-निरूपयेदित्यर्थः। अथवाऽनाभोगेन कदाचित्तत्र सुवर्णादि स्थापयित्वा ददाति, एतदेवाह-

मू. (७६७) अनभोगेण भएण य पडिनी उम्मीस भत्तपाणंमि।
दिज्जा हिरन्नमाई आवज्जणसंकणादिट्ठे॥

वृ. अनाभोगेन ददाति-तन्दुलादिमध्ये व्यवस्थितं सुवर्णादि पुनश्च रन्धयित्वा तद्वदत्यनाभोगेन प्रदानं भवति, भयेन वा ददाति, कथं ?, कयाचित्परसत्कं सुवर्णमपहृतं पुनश्च प्रत्याकलिता सती कलिकलङ्कभयात्साधोर्विष्टयित्वा ओदनादिना ददाति, प्रत्यनीकत्वेन वा 'उन्मिश्य' एकीकृत्य भक्तपानादिना सह हिरण्यादि ददाति, ततश्च तस्य साधोरेतद्दोषं विनाऽपि यदि न निरूपयति ततः 'आवज्जणं'ति आवर्जनं पूर्वोक्तं संयमविराधनादिदोषाणां भवति, प्रमादपरत्वात्तस्य, तथा शङ्कना-दृष्टे तत्र सुवर्णादौ राजप्रभृतीनां शङ्का भवति, यदुत न विद्मः किं तावदयं साधुरेवंविधः आहोस्विदिभिक्षादातेति, तस्मात्पतितः सन पिण्डो निरूपणीयः इत्युक्तं पतितद्वारं, गुरुकद्वारप्रतिपादनायाह-

मू. (७६८) उक्खेवे निक्खेवे महल्लया लुद्धया वहो दाहो।
अचियत्ते वोच्छेओ छक्कायवहो य गुरुमत्ते॥

वृ. धनत्वाषाणादिघट्टनं दत्तं तस्योत्पेक्षे सति निक्षेपे वा-मोक्षणे सति गृहस्थस्य कटिभङ्गो वा पादस्योपरि पतनं वा भवति, 'महल्लया' इति महत्प्रमाणं वा तद्गृहस्थस्य भाजनं तस्योत्पेक्षे सति दोषा भवन्ति, अथवा 'महल्लया' इति महत्ता भण्डकेन दीयमानमित्येवं कदाचिदसौ साधुर्भणति, ततश्च लुब्धता साधोरुपजायते, तथ वधश्च-तस्यैव साधोः पादस्योपरि भण्डकेन पतितेन वधो भवति तथा 'दाह'त्ति दाहो वा भवति यदि तदुष्णं भण्डकं भवति, अचियत्तं वा भवति तस्यैव गृहस्थस्य तद्भहपतेर्वा अचियत्तं वा अप्रीतिर्वा भवति, महाप्रमाणकेन भण्डकेन दीयमाने सति व्यवच्छेदो वा तद्व्यस्यान्यद्व्यस्य वा भवति,

षट्कायवधश्च भण्डकपतने सति भवति, एवं गुरुके भण्डके एते दोषा भवन्ति। एतामेव गाथां भाष्यकृदाह-

मू. (७६९) गुरुदव्वे व पिहिअं सयं व गुरुयं हवेज्ज जं दव्वं।
उक्खेवे निक्खेवे कडिभज्जणं यह परिहा॥ [भा. २५९]

वृ. गुरुद्रव्येण वा 'पिहितं' घट्टितं तद्द्रव्यं भवेत्, स्वयं वा तद्द्रव्यं गुडपिण्डादि गुरुकं भवेत् ततश्च तस्य 'उत्क्षेपे' उत्पाटने निक्षेपे च पुनर्मोचने सति कटिभङ्गो भवति, पादस्योपरि पतेत्ततश्चात्मविराधना भवति। 'महल्लया' इति व्याख्यानयन्नाह-

मू. (७७०) महल्लेण देहि मा डहरएण भिन्ने अहो इमो लुद्धो।
उभए एगतरवहो दाहो अच्चुण्ह एमेव॥ [भा. २६०]

वृ. कश्चित्साधुः कदुच्छिकया ददतीं स्त्रियं एवं ब्रूते-यदुत 'महल्लेण' बृहता भाजनेन स्थाल्यादिना देहि, मा 'डहरएण' लघुना प्रयच्छ कडुच्छुकादिना, ततः सा तथैव करोति, अशक्नुवत्याश्च कदाचित्तद्भाजनं भज्यते ततो भिन्ने सति तस्मिन् भाजने गृहस्थ एवं भणति-यदुताहो। अयं साधुर्महालुब्धः येन बृहता भाजनेन दीयमानं गृह्णाति, तत 'उभयस्य' साधु गृहस्थयोः पादस्योपरि पतितेन भण्डकेन वधो भवति, एकतरस्य वा वधो भवति, तथा दाहश्च अत्युष्णे तस्मिन् द्रव्ये पतिते सति भवति 'एमेव'त्ति उभयोरन्यतरस्य वा॥ इदानीं 'अचियत्ते'ति व्याख्यानयन्नाह-

मू. (७७१) बहुगहणे अचियतं वोच्छेओ तद्दव्व तस्स वावि।
छक्कायाण य वहणं अइमत्ते तंमि मत्तंमि॥ [भा. २६१]

वृ. बहुग्रहणं तस्य घृतादिद्रव्यस्य 'अचियत्तं' अप्रीतिर्भवति तस्य तद्गृहपतेर्वा, व्यवच्छेदो वा तदन्यस्य द्रव्यस्य भवतितस्माद्-घृतादेः अन्वद्-क्षीरगुडादि तस्य व्यवच्छेदो भवति, तस्य वा-घृतादेर्द्रव्यस्य वा व्यवच्छेदो भवतीति, तथा षट्कायानां वा हननं भवति 'अतिमात्रे' बृहत्प्रमाणे 'मात्रके' स्थाल्यादौ गृहीते सति। उक्तं गुरुकद्वारं, त्रिविधेतिद्वारंप्रतिपादयन्नाह-

मू. (७७२) तिविहो य होइ कालो गिम्हो हेमंत तह य वासासु।
तिविहो य दायगो खलु थी पुरिस नपुंसओ चेव॥

मू. (७७३) एक्किक्कोवि अ तिविहो तरुणो तह मज्झिमो य थेरो य।
सीयतणुओ नपुंसो सोम्हित्थी मज्झिमो पुरिसो॥

वृ. कालस्त्रिविधो भवति, तद्यथा-ग्रीष्मो हेमन्तो वर्षा च, तत्र त्रिविधेऽपि काले दाता त्रिविध एव भवति, स्त्री पुमान्नपुंसकं चेति॥ पुनः स एकैकस्त्रिविधो भवति-तरुणो मध्यमः स्थविरश्च। इदानीं नपुंसकस्यैव स्वरूपप्रतिपादनायाह-शीतस्पर्शतनपुंसको भवति, 'सोम्हित्थि'त्ति सोष्मा स्त्री भवति, मध्यमश्च पुरुषो भवति-नात्युष्णो 'निशीतल इति॥

मू. (७७४) पुरकम्मं उदउल्लं समणिद्धं तंपि होइतिविहं तु।
इक्किक्कंपि य तिविहं सच्चित्ताचित्तमीसं तु॥

वृ. न केवलं कालत्रयस्त्रिविधः यदपि तत्पुरःकर्मादि तदपि त्रिविधं, तद्यथा-पुरःकर्म उदकार्द्रं सस्निग्धं चेति, तत्पुनरेकैकं त्रिविधं-सचित्ताचित्तमिश्रभेदभिन्नं भवति, एतदुक्तं भवति-यत्पुरःकर्म तत्सचित्तमचित्तं मिश्रं चेति, यदपि उदकार्द्रं तदपि सचित्तमचित्तं मिश्रं चेति, यदपि सस्निग्धं तदपि सचित्तमचित्तं मिश्रं चेति। इदानीं यत्तदुक्तं पुरःकर्मादित्रितयं तत्राद्यद्वयस्य प्रतिषेधं कुर्वन्नाह-

मू. (७७५) आइद्धंवे पडिसेहो पुरओ कय जं तु तं पुरेकम्मं।
उदउल्लबिंदुसहिअं सभायणेढं मग्गणा हाइ॥

वृ. आद्यद्वितयस्य पुरतः कर्मण उदकार्द्रस्य च प्रतिषेधो द्रष्टव्यः, यतस्ताभ्यां सदोषत्वान्नैव व्यवहार इति। इदानीं पुरःकर्मादीनां लक्षणप्रतिपादनायाह-'पुरओ कय जं तु तं पुरेकम्मं' भिक्षायाः पुरतः प्रथममेव यत्कृतं कर्म-कडुच्छुकादिप्रक्षालनादि तत्पुरःकर्माभिधीयते, उदकार्द्रं पुनरुच्यते यद्बिन्दुसहितं भाजनादि गलद्बिन्दुरित्यर्थः सस्निग्धं पुनरुच्यतेयदबिन्दुरहितमात्रं, तत्रेह सस्निग्धे 'मार्गणा' अन्वेषणा कर्त्तव्या यतः सस्निग्धे हस्तादौ ग्रहणं भविष्यत्यपि।

मू. (७७६) सस्सिणिद्धंपि य तिविहं सच्चित्ताचित्तमीसगं चेव।
अच्चित्तं पुण दुप्पं अहिगारो मीससच्चित्ते॥

वृ. यत्तत्सस्निग्धं तत्त्रिविधं-सचित्तमचित्तं मिश्रं चेति, तत्रचित्तं स्थाप्यं यतस्तत्राचित्तसस्निग्धे ग्रहणं क्रियते एव न तत्र निरूपणा, अधिकारः पुनः-निरूपणं मिश्रसचित्तयोः कर्त्तव्यं।

इदानीं मिश्रसचित्तसस्निग्धे हस्ते सति ग्रहणविधिं प्रतिपादयन्नाह-

मू. (७७७) पव्वाणं किंचि अव्वाणमेव किंचिच्च होअनुव्वाणं।
पाणए हि यं (तं) सव्वं एक्कक्कहाणी य वुड्ढी य॥

वृ. अत्र हस्ते सस्निग्धं किञ्चित् प्रम्लान-मनाक् शुष्कं तथा 'अव्वाणं'ति आव्यानमुद्वानं किञ्चित्सस्निग्धं 'किञ्चिच्चहोअनुव्वाणं'ति किञ्चिच्च स्निग्धमनाव्यानमनुद्वानम्, एवं त्रिविधमप्येतत्सर्वं प्रायेण सस्निग्धमुच्यते, एवमेतद्विभाव्य तत एकैकशुष्कभागवृद्धया, ग्रहणं कर्त्तव्यं पूर्वानुपूर्व्या, तथा एकैकशुष्कभागहान्या वा पश्चानुपूर्व्या गृह्यति भिक्षां। सा एकैकभागवृद्धिः कथं कर्त्तव्येत्यत आह-

मू. (७७८) सत्तविभागेन करं विब्भाइत्ताण इत्थिमाईणं।
निच्चुन्नयइयरेवि य रेहा पव्वं करतलं च॥

वृ. 'सप्त विभागान्' सप्तवा 'करं' हस्तं 'विभज्य' विभागीकृत्य, केषां ?-स्त्र्यादीनां, न च विभागा एतानङ्गीकृत्य कर्त्तव्याः, के च ते ?-'निम्नोन्नततेरे' तत्र निम्नं त्वङ्गुलिपर्वरेखा उन्नतमङ्गुलिपर्वाणि इतरत्-करतलं नोन्नतं नापि निम्नं। इदानीं केन शुष्केन प्रदेशेन कः प्रदेशः प्रम्लानो भवति ? केन वा प्रम्लानेन देन कः सार्द्रः प्रदेशो भवतीत्यस्यार्थस्य ज्ञापनार्थमाह-

मू. (७७९) जाहे य उन्नाइ उव्वाणाइ हवंति हत्थस्स।
ताहे तलपव्वाणा रेहा पुन होंतअनुव्वाणा॥

वृ. यदा उन्नतानि हस्तस्थानानि उद्वानानि भवन्ति तदा हस्ततलं प्रम्लानं-मनाक शुष्कं भवति रेखास्तु भवन्त्यनुद्वानाः। इदानीं शुष्कहस्तस्थानामेवैकवृद्धया यथा यस्मिन् काले ग्रहणं भवति तथा प्रदर्शयन्नाह-

मू. (७८०) तरुणित्थि एक्कभागे पव्वाणं होइ गहण गिम्हासु।
हेमंते दोसु भवे तिसु पव्वाणेसु वासासु॥

वृ. तरुण्याः स्त्रिया उन्नतस्यामेकाभागे प्रम्लाने शुष्के सति उष्णकाले गृह्यते भिक्षा यतः सोष्मतया कालस्य चोष्णतया यावता कालेन असावुन्नतप्रदेशः शोषमुपगतस्तावता कालेन इतरे निम्नप्रदेशाः सार्द्रा अपि अचिताः संजाताः अतः कालेन भिक्षाग्रहणं, हेमन्तकाले तस्या एव तरुण्या द्वयोः सप्तमभागयोः शुष्कयोः सतिभिक्षाग्रहणं भवतीति, तस्या एव तरुण्या वर्षाकाले त्रिषु सप्तभागेषु शुष्केषु सत्सु भिक्षाग्रहणं

भवति।

मू. (७८१) एमेव मज्झिमाए आढत्तं दोसु ठायए चउसु।
तिसु आढत्तं थेरी नवरि दोण्हेसु पंचसु उ॥

वृ. एवमेव मध्यमायाः स्त्रिया उष्णकाले द्वयोर्भागयोः प्रारब्धं चतुर्षु भागेषु संतिष्ठते, एतदुक्तं भवति-मध्यमायाः स्त्रिया उष्णकाले द्वयोः सप्तभागयोः शुष्कयोः सतोर्ग्रहणं भवति, तथा तस्या एव मध्यमायाः स्त्रिया हेमन्ते काले त्रिषु सप्तभागेषु स्थविरायाः अपि उष्णकाले त्रिषु भागेषु प्रारब्धं पञ्चसु भागेषु संतिष्ठते, एतदुक्तं भवति-उष्णकाले स्थविर्यास्त्रिषु सप्तभागेषु शुष्केषु सत्सु ग्रहणं भवति, तथा तस्या एव स्थविर्यां हेमन्तकाले चतुर्षु सप्तभागेषु शुष्केषु सत्सु भिक्षाग्रहणं कर्त्तव्यं, तस्या एव वर्षाकाले पञ्चसु सप्तभागेषु शुष्केषु सत्सु भिक्षाग्रहणं कर्तव्यम।

मू. (७८१) एमेव होइ पुरिसो दुगाइछद्धाणं पज्जवसिएसुं।
अपुमं तु तिभागाइं सत्तमभागे अवसिते उ॥

वृ. एवमेव पुरुषस्य द्वयोर्भागयोः प्रारब्धं षट्स्थानपर्यवसितेषु भागेषु संतिष्ठते, एतदुक्तं भवति-तरुणपुरुषस्योष्णकाले भागद्वये शुष्के सति गृह्यते, तथा सत्येव तरुणस्य शीतकाले त्रिषु भागेषु शुष्केषु सत्सु भिक्षा गृह्यते, तथा तस्यैव तरुणस्य वर्षाकाले चतुर्षु भागेषु शुष्केषु सत्सु ग्रहणं, तथा मध्यमपुरुषस्योष्णकाले त्रिषु भागेषु शुष्केषु सत्सु ग्रहणं, तस्यैव मध्यमस्य हेमन्ते चतुर्षु भागेषु शुष्केषु सत्सु ग्रहणं, तथा तस्यैव मध्यमस्य वर्षाकाले पञ्चसु भागेषु शुष्केषु सत्सु भिक्षाग्रहणं कर्त्तव्यं, तथा वृद्धपुरुषस्योष्णकाले चतुर्षु भागेषु शुष्केषु भिक्षाग्रहणं कर्त्तव्यं। नपुंसकस्य पुनस्त्रिभागेष्वारब्धं सप्तमभागेषु संतिष्ठते, एतदुक्तं भवति-सर्वस्मिन् हस्ते शुष्के सति ग३हणं कर्त्तव्यं भवति, तत्र चेयं भावना-तरुणनपुंसकस्योष्णकाले त्रिष भागेषु शुष्केषु भिक्षाग्रहणं कल्पते, तस्यैव तरुणनपुंसकस्य हेमन्तकाले चतुर्षु भागेषु शुक्षेषु ग्रहणं, तस्यैव च हेमन्तकाले पञ्चसु भागेषु शुष्केषु ग३हणं, तस्यैव च वर्षाकाले षट्सु भागेषु शुष्केषु ग्रहणं, वृद्धनपुंसकस्योष्णकाले पञ्चसु भागेषु शुष्केषु ग्रहणं, तस्यैव, तस्यैव हेमन्तकाले षट्सु भागेषु शुष्केषु भिक्षाग्रहणं, तस्यैव, वृद्धनपुंसकस्य वर्षाकाले सप्तस्वपि सप्तभागेषु शुष्कषु भिक्षाग्रहणं कर्त्तव्यमिति। एवमेकैकवृद्धा ग्रहणमुक्तं, पश्चानुपूर्व्या तु एकैकभागहान्या भिक्षाग्रहणं वेदितव्यं, तच्चैवं-स्थविरनपुंसकस्य वर्षाकाले सप्तभिरपि हस्तभागैः शुष्कैर्गृह्यते भिक्षा, तस्यैव शीतकाले षड्भिर्भागैः शुष्कैर्गृह्यते, तस्यैवोष्णकाले पञ्चभिर्भागैः शुष्कैगृह्यते, एवमनया हान्या तावन्नेतव्यं यावत्तरुणी स्त्रीति।

उक्तं त्रिविधद्वारं, भावद्वारप्रतिपादनायाह-

मू. (७८३) दुविहो य होइ भावो लोइयलोउत्तरो समासेणं।
एक्किक्कोवि य दुविहो पसत्थओ अप्पसत्थो य॥

वृ. द्विविधो भवति भावः-लौकिको लोकोत्तरश्चेति, समासत- पुनरेकैको द्विविधः-प्रशस्तोऽप्रशस्तश्च, लौकिकः प्रशस्तोऽप्रशस्तश्च, एवं लोकोत्तरेऽपि। तत्रोदाहरणमुच्यते-एगंमि सन्निवेसे दो भाउया वणिया, तेसिं य परोप्परं विरिक्का, तत्थ एगो गामे गंतूण करिसणं करेइ, अन्नोवि तहेव, तत्थ एक्कस्स सुमहिला अन्नस्स दुम्महिला, जा सा दुम्महिला सा गोसे उट्ठिया मुहोदगदंतपक्खालणअद्दागफलिहमाईहिं मंडंती चिट्ठइ, कम्मारगाईणं न किंचि जोगक्खेमं वहइ, कल्लेउयं च करेइ, अन्नस्स य जा सा महिला कम्मारमाईणं जोगक्खेमं वहइ अप्पणो य सयाकालं मंडणादि करेइ, तत्थ जा सा अप्पणो चेय मंडणे लग्गा अच्छइ तीए

अचिरेण कालेन परिक्षीणं घरं, इयरीए धणधन्नेहिं घरं संमिलं जायं। एवं च जो साहू वन्नहेउं रूवहेउं वा आहारं आहारेइ, नवि आयरिए णवि बालवुड्ढगिलाणदुब्बले पडियग्गति अप्पणा य गहाय पज्जत्तं नियत्तइ, एवं सो अप्पपोसओ, जहा सा चक्का हिरन्नाईणं एवं सोवि निज्जरालाभो तस्स चुक्किहिइ, पसत्थो इमो जो नो वन्नहेउं रूवहेउं वा आहारं आहारेइ, बालाईणं दाउं पच्छा आहारेइ, सो नाणदंसणचरित्ताणं आभागी। भवति। एवं पसत्थेण। भावेणं आहारेयव्वो सो पिंडो। इदानीमेनमेवार्थं गाथाभिरुपसंहरन्नाह-

मू. (७८४) भुञ्जिअलगा दो वणिया गामं गंतूम कस्सिणारंभो।
एगस्स देहमंडणबाउसिआ भारिया अलसा॥

मू. (७८५) मुहधोवणं दंतवणं अट्ठागाईण कल्ल आवासं।
पुव्वण्हऽपरण्हणमप्पणा उक्कोसयरं च मज्झण्हे॥

मू. (७८६) तणकट्ठहारगाणं न देइ न य दासगंपरसवग्गस्स।
न य पेसणे नियुंजइ पलाणि हिय हानि गेहस्स॥

मू. (७८७) बिइयस्स पेसवग्गं यावारं अन्नपसणे कम्भे।
काले देहाहारं सयं च उवजीवई इड्ढी॥

वृ. सुगमाः नवरं 'बाउसिआ' विभूसावासीला॥ मुखधावनं करोति, तथा 'कल्ल'त्ति कल्यमुपक्रम आवश्यकं पूर्वाह्णे करोत्यात्मना चोत्कृष्टतरं च घृतपूर्णादि मध्याह्ने भक्षयत्येकाकिनी॥ तृणकाष्ठहारकाणां न किञ्चिद्ददाति दासवर्गस्य तथा प्रेष्यो यः कश्चित्प्रेष्यते तद्वर्गस्य च न किञ्चिद्ददाति, न च 'प्रेषणे' कार्ये नियुङ्क्ते कर्मकरान् ततश्च भोजनादिना विना 'पलाणा' नष्टाः हृतं च यत्किञ्चिद्गृहे रिक्थमासीत्, एवं हानिर्जाता गेहस्य, तत्रायं लौकिकोऽप्रशस्तो भावः। इदानीं लौकिकप्रशस्तभावप्रतिपादनायाह-द्वितीयस्य या भार्या सा प्रेष्यवर्गं व्यापारयित्वा प्रेषणा कार्ये कर्मणि च विविधे काले च तेषामाहारं ददाति स्वयं च काले आहारमुपर्जीवति। अयं लौकिकोऽत्र प्रशस्तो भाव उक्तः, इदं लोकोत्तरप्रशस्तप्रतिपादनायाह-

मू. (७८८) वन्नबलरूवहेउं आहारं जो तु लाभि लब्भंते।
अतिरेगं न उ गिण्हइ पाउग्गगिलाणमाईणं॥

मू. (७८९) जह सा हिरन्नमाईसु परिहीणा होइ दुक्खआभागी।
एवं तिगपरिहीणो साहू दुक्खस्स आभागी॥

मू. (७९०) आयरियगिलाणपट्ठा गिण्ह न महंतवि जो साहू।
नो वन्नरूवहेउं आहारं एस उ पसत्थो॥

वृ. वर्णबलरूपहेतुमाहारयति यश्च लाभे क्षीरादौ लभ्यमाने सति प्रायोग्यं ग्लानादीनामतिरिक्तं न गृह्णाति॥ यथा सा गृहस्था हिरण्यादिपरिहीना संजाता दुःखभागिनी च जाता एवं साधुरपि त्रिकेण-ज्ञानदर्शनचारित्रलक्षणेन हीनो दुःखस्य भागी भवति। उक्तो लोकोत्तरेऽप्रशस्तः, इदानीं लोकोत्तर-प्रशस्तभावदर्शनायाह-आचार्यादिनामर्थाय गृह्णाति न ममेदं योग्यं किन्त्वाचार्यादेः, एवं यः साधुर्गृह्णाति, शेषं सुगमं। उक्तो लोकोत्तरः प्रशस्तो भावः, उक्तं भावद्वारम्॥

मू. (७९१) उग्गमउप्पायणसएसणाए बायाल होंति अवराहा।
सोहेउं समुयाणं पडुप्पन्ने वज्जए वज्जेहिं॥

मू. (७९२) सुत्तत्थरएणं वा अरई य वसंसयस्स वा दोरे।

संसत्तकंटगाई सोहेऊमुवस्सगं पविसे ॥

वृ. एवं साधुरुद्गमोत्पादनैषणाभिर्द्विचत्वारिंशदपराधा भवन्ति तैः समुदानं भक्तं शोधयित्वा विवेच्य ततः 'पडुपन्ने' लब्धे सति भक्तादौ वसतिं प्रयाति। इदानीं तद्भक्तं गृहीतं सच्छोधयित्वा वसतिं प्रविशति, केषु स्थानेषु ?. अत आह-गृहीत्वा भक्तं मुपाश्रयाभिमुखो व्रजेत्, शून्यगृहे तद्भक्तं प्रत्युपेक्ष्य ततो वसतिं प्रविशति, तदभावे देवकुलं वा, 'अमडं य' गृहादीनामभावे उपाश्रयद्वारे संसक्तं त्रसैः कण्टकैर्वा यद्व्याप्तं तत् शोधयित्वा-प्रोज्झ्य संसक्तादिभक्तं ततः उपाश्रयं प्रविशति ॥ एवं तस्य प्रत्युपेक्ष्यमाणस्य कदाचित्संसक्तं भवति तत्र किं करोतीत्यत आह-

मू. (७९३) संसत्तं तत्तोच्चिअ परिट्ठवेत्ता पुनो दवं गिण्हे।
काएण भत्तय गहिअं पडिग्गहे छोडु पविसणया ॥

वृ. यदि तत्र संसक्तं भक्तं पानकं वा भवेत्ततस्तस्मादेव स्थानात्प्रतिस्थाप्य पुनरप्यन्यद्द्रवं गृह्णाति, तथा ग्लानादिप्रयोजनं च मात्रके गृहीत्वाऽऽत्मीयपात्रकेषु प्रक्षिप्य पुनिशति, यतस्तस्य साधुभिरुक्तानं यदुत ग्लानस्यान्यल्लब्धेतो निष्कारण-मात्रकोपयोगं परिहरन् पतद्भक्तं प्रक्षिप्य प्रविशति, निष्कारणमात्रकोपयोगे च प्रमादो भवति। एवमसौ परिशुद्धे सति भक्ते प्रविशति उपाश्रयं।

अथाशुद्धं भवति ततः परिष्ठाप्य किं करोतीत्यत आह-

मू. (७९४) गामे य कालभाणे पहुच्चमाणे हवंति भंगट्ठा।
काले अपहुप्पंते नियत्तई सेसए भयणा ॥

वृ. भङ्गा भवन्ति, तेषां च भङ्गकानां मध्ये यस्मिन् भङ्गके कालो न पर्याप्ते तस्मिन्निवर्त्तत एव, शेषेषु चतुर्षु भङ्गेषु 'भजनां' विकल्पनां करोति सेवनां वा करोति। इदानीं भजनां दर्शयन्नाह-

मू. (७९५) अन्नं च वए गामं अन्नं भाणं व गेण्ह सइ काले।
पढमे बितिए छप्पंचमे य भय सेस य नियत्ते ॥

वृ. अन्यं ग्राम्यं वा व्रजति काले पर्याप्यमाणे, अन्यं च भाजनं गृह्णाति पर्याप्यमाणे काले सति, एवं प्रथमे भङ्गे द्वितीये च षष्ठे पञ्चमभङ्गके च 'भजनां' सेवनां करोति काले सति, शेषभङ्गेषु येषु कालो न पर्याप्यते तेषु 'निवर्त्तनं' मन्तव्यं भिक्षाया इत्यर्थः। स च पर्याप्यमाणः कालो द्विविधः-जघन्य उत्कृष्टश्च, तत्र जघन्य-प्रतिपादनायाह-

मू. (७९६) वोसिट्ठमागयाणं उव्वासिअ मत्तए य भूमिनिअं।
पडिलेहियमत्थमणं सेसत्थमिए जहन्नो उ ॥

वृ. सञ्ज्ञां व्युत्सृज्यागतानां मात्रकं च यस्मिन् तोयं गृहीत्वा गत आत्मीयनिलेपनार्थं तस्मिन्नुद्वासिते-ऽवक्षिप्ते सति भूमित्रिके च-कायिकीभूमौ द्वादश स्थण्डिलानि संज्ञाभूमौ द्वादश स्थण्डिल्लानि कालभूमौ त्रीणि स्थण्डिलानि, एवमस्मिन् भूमित्रितये प्रत्युपेक्षिते सति यदाऽस्तमनं भवति तस्मिन् प्रदेशे 'अत्थमिए'त्ति शेषार्धं अस्तमिते आदित्ये प्रत्युपेक्षते यदा अयमित्थंभूतो जघन्यः काल इति।

मू. (७९७) भुत्ते विचारभूमी गयागयाणं तु जह य ओगाहे।
चरमाए पोरिसीए उक्कोसो सेस भज्जिमओ ॥

वृ. भुक्ते सति विचारभूमिं गत्वाऽऽगतानां यथा 'ओगाहे' आगच्छति चरमा पौरुषी-चतुर्थः प्रहरः अथवा चरमायां रात्रौ-पादोनश्चतुर्थप्रहरो यथाऽऽगच्छति। अस्यां वेलायामयमुत्कृष्टः कालः, शेषस्त्वन्यो

मध्यमः काल इति। तेन च भिक्षामटित्वा विनिवृत्त्य प्रविशता वसतौ किं कर्तव्यमत आह-

मू. (७९८) पायमज्जणनिसीहिआ य तिन्नि उ करे पवेसंमि।
अंजलि ठाणविसोही दंडग उवहिस्स निक्खेवो॥

वृ. बहिरेव वसतेः- पादौ प्रमार्जयति निषीधिकात्रितयं करोति, प्रविशन पुनश्च गुरोः पुरस्तादञ्जलिना नमस्कारं करोति 'नमो खमासमणाणं' इति, तथा प्रविष्टश्च स्थानं विशोधयति तत्र दण्डकस्योपधेश्च निक्षेपं करोति। इदानीमेतामेव गाथां भाष्यकारो व्याख्यानयन्नाह-

मू. (७९९) एवं पडुप्पन्ने पंचिसओ उ तिन्नि व निसीहिया होंति।
अग्गदुवारे मज्झे पवेस पाए य सागरिए॥ [भा. २६२]

वृ. एवं प्रत्युत्पन्न-लब्धौ सति भक्तेन प्रविशतस्तिस्रो निषीधिका भवन्ति. क्व ?-अग्रद्वारे प्रथमा तथा द्वितीया मध्यप्रदेशे वसतेः प्रवेशे च मूलद्वारस्य तृतीया निषीदिकां करोति पादौ च प्रमार्जयति यदि कश्चित् सागारिको न भवति. अथ तत्र सागारिको भवति ततो वरण्डकाभ्यन्तरे प्रमार्जनं करोति. अथ मध्येऽपि भवतिद्वितीयनिषीधिकास्थानेऽपि भवति ततो मध्ये प्रविश्य प्रमार्जयति पादौ, तेन च कारणेन पश्चाद्-भाष्यकारेण पादप्रमार्जनं व्याख्यातं येन तदनियतं वर्त्तते, निषीधिकास्ववकृतास्वपि कारणवशात्संभवतीति।

इदानीमअन्यवयवं व्याख्यानयन्नाह-

मू. (८००) हत्थुस्सेहो सीसप्पणामणं वाइओ नमोक्कारो।
गुरुभायणे पणामो वायाए नमो न उस्सेहो॥ [भा. २६३]

वृ. हस्तस्योत्सेधं नमस्कारार्थं करोति, शीर्षप्रणमनं करोति, वाचा च "नमो खमासमणाणं"ति, इत्येवं नमस्कारं करोति अथ तद्गुरु भिक्षाभाजनं भवति मात्रकं च गुरु गृहीतमङ्गुलीभिः, ततश्चैवं गुरुणि भाजने सति शिरसा प्रणामं करोति वाचा च नम इत्येवं ब्रूते. न हस्तोच्छ्रयं करोति. यतोऽसौ गुरोर्मात्रकस्याधो हस्तो दत्तः साधारणार्थमतोऽक्षणिकस्ततश्च नोच्छ्रयं करोति। इदानीं स्थानविशोधिं व्याख्यानयन्नाह-

मू. (८०१) उवरिं हेट्ठा य पमज्जिऊण लट्ठिं ठवेज्ज सट्ठाणे।
पट्टं उवहिस्सुवरिं भायणवत्थाणि भाणेसु॥ [भा. २६४]

वृ. उपरि-कुड्यस्थाने अधस्ताच्च-भुवं प्रमृज्य पुनश्च स्वस्थाने यष्टिं स्थापयेत्, पुनश्च 'पट्टकं' चोलपट्टकमुपधेरुपरि स्थापयेत्-मूत्रयति 'भाजनवस्त्राणि च' पटलानि 'भाजनेषु' पात्रोपरि स्थापयति॥

मू. (८०२) जइ पुण पासवणं से हवेज्ज तो उग्गहं सपच्छागं।
दाउं अन्नस्स सचोलपट्टओ काइयं निरिरे॥ [भा. २६५]

वृ. यदि पुनरस्यस्य साधोः 'प्रश्रवणं' कायिकादिर्भवति ततश्च 'अवग्रहं' पतद्ग्रहं 'सपच्छागं' सपटलं 'दानं' अर्पयित्वा अन्यस्य साधोः पुनश्च सह चोलपट्टकेन-चोलपट्टकद्वितीयः कायिकां व्युत्सृजति। कायिकां व्युत्सृज्य कायोत्सर्गं करोति, तत्र च को विधिरित्यत आह-

मू. (८०३) चउरंगुलमुहपत्ती उज्जुयए वामहत्थि रयहरणं।
वोसट्ठचत्तदेहो काउस्सग्गं करेज्जाहि॥

वृ. चतुर्भिरङ्गुलैर्जानुनोरुपरि चोलपट्टकं करोति नाभेरधश्चतुर्भिरङ्गुलैः पादयोश्चान्तरं चतुरङ्गुलं कर्त्तव्यं, ततो मुखवस्त्रिकामुज्जुगे-दक्षिणहस्तेन गृह्णाति वामहस्तेन च रजोहरणं गृह्णाति. पुनरसौ व्युत्सृष्टदेहः-प्रलम्बितबाहुरन्यक्तदेहः सर्पाद्युपद्रवेऽपि नोत्सारयति कायोत्सर्गं, अथवा व्युत्सृष्टदेहो

दिव्योपसर्गेष्वपि न कायोत्सर्गभङ्गं करोति, त्यक्तदेहोऽक्षिमलदूषिकामपि नापनयति, स एवं विधः कायोत्सर्गं कुर्यात् इदानीमेनामेव गाथां भाष्यकारो व्याख्यानयन्नाह-

मू. (८०४) पुव्वुद्दिट्ठे ठाणे ठाउं चउरंगुलंतरं कालं।
मुहपोत्ति उज्जुहत्थे वामंमि य पायपुंछणयं।

मू. (८०६) काउस्सग्गंमि ठिओ चिंते समुयाणिए अईआरे।
उस्सिक्खाणुक्कमसो तत्थ दोसे ठवे कुज्जा॥

वृ. चतुर्भिरङ्गुलैरधो जानुनी अप्राप्तश्चोलपट्टको यथा भवति तथा नाभिं चोपरि चतुर्भिरङ्गुलैर्यथा न स्पृश्यति, उभयतोबाहुकूर्पराभ्यां धृतं करोति 'पट्टकं' चोलपट्टकं पटलं वा उभयकूर्परधृतं करोति, यदा चोलपट्टकः सच्छिद्रो भवति तदा पटलं गृह्णाति। पूर्वोद्दिष्टमेव कायोत्सर्गस्थानं तत्र स्थित्वा, तथा पादस्य चान्तरं चतुरङ्गुलं कृत्वा मुखवस्त्रिकां च दक्षिणदानिकानतिचारान् भिक्षातिचारानित्यर्थः, कस्मादारभ्य चिन्तयत्यनिचारान ?-निर्गमादारभ्य यावत्प्रवेशो वसतौ जातः, अस्मिंश्चान्तराले तत्र दोषा ये जातास्तान् 'मनसि करोति' स्थापयति चेतसि॥

मू. (८०७) ते पडिसेवणाए अनुलोभा होंति वियडणाए य।
पडिसेवविअडमाए एत्थ उ चउरो भवे भंगा॥

वृ. तांश्चातिचारा प्रतिसेवनानुलोम्येन-यथैव प्रतिसेवितास्तेनैवानुक्रमेण कदाचिच्चिन्तयति, तथा 'वियडणाए'त्ति विकटना-आलोचना तस्यां चानुलोमानेव चिन्तयति, एतदुक्तं भवति-पढमं लहुओ दोसो पडिसेविओ पुणो वक्तो वक्तुयरो, चिंतेइ एवमेव, ततश्च प्रतिसेवनाया अनुकूलम् आलोचनायामप्यनुकूलमेव, यतः प्रथमं लघुको दोष आलोच्यते पुनर्बृहत्तरः पुनर्बृहत्तम इत्येष प्रथमभङ्गः, अन्नो पडिसेवणाए अनुकूलो न उण विअडणाए, एतदुक्तं भवति-आसेविअं पढमं वक्तं पुणो लहुअं पुणो वक्तं पुणो बहुयरं, चिंतेइ एवमेव, ततश्च प्रतिसेवनाया अनुकूलं न त्वालोचनायाः, यतस्तत्र प्रथमं लघुतर आलोच्यते पुनर्बृहत्तमःइत्येष द्वितीयः, अन्नो पडिसेवणाए नानुकूलो आलोयणाए पुन अनुकूलो, एतदुक्तं भवतिअहवियडा पडिसेविआ चिंतेइ पुन आलोयणानुकूलेणं, एत तइओ भंगो, अन्ने उण पडिसेवणाएइव अननुकूलो आलोणएवि अननुकूलो, एतदुक्तं भवति-पढमं वक्तो पडिसेविओ पुणो लहुओ पुणो वक्तो वहयरो, चिंतेइ पुन जं जहा संभरइ, पढमं बहो पुणो लहुणो पुणो बहो पुणो वहयरो, एवं अहवियक्तं चिंतंतस्स न पडिसेवणानुकूलो नालोयणानुकूलो, एस चउत्थो, एसो य वज्जेयव्वो। इदानीममुमेवार्थं गाथार्द्धेनोपसंहरन्नाह-'पडिसेवविअडणाए होंति एत्थंपि चउभंगा' इदं व्याख्यातमेवेति। इदानीं सामुदानिकानतिचारानालोचयति यदि व्याक्षेपादिरहितो गुरुर्भवति, अथ व्याक्षिप्तो गुरुर्भवति तदा नालोचयति, एतदेवाह-

मू. (८०८) वक्खित्तपराहुत्ते पमत्ते मा कयाइ आलोए।
आहारं च करेंते नीहारं वा जइ करेइ॥

मू. (८०९) कहणाईवक्खित्ते पमत्त अन्नंमि व मुहे।
अंतरमकारए वा नीहारे संक मरणं वा॥ [भा. २६७]

वृ. व्याक्षिप्तो धर्मकथनादिना स्वाध्यायेन, 'पराहुत्तो'त्ति पराङ्मुखः पराभिमुख इत्यर्थः, प्रमत्त इति विकथयति, एवंविधगुरौ न कदाचिदालोचयेत्, तथाऽऽहारं कुर्वति सति, तथा नीहारं वा यदि करोति ततो

नालोचयति। इदानीमेतामेव गाथां भाष्यकारो व्याख्यानयन्नाह-धर्मकथादिना वा व्याक्षिप्तः कदाचिद् गुरुर्भवति, विकथादिना वा प्रमत्तोऽन्यतोऽभिमुखो वा भवति, भुञ्जतोऽपि नालोचनीयं, किं कारणं ?-'अंतर'ति अन्तरायं वा भवति यावदालोचनां शृणोति, अकारकं वा-शीतलं भवति यावदालोचनां शृणोति। तथा नीहारमपि कुर्वतो नालोचनीयं, किं कारणं ?, यत आशङ्कया साधुजनितया न कायिकादिनिर्गच्छंति, अथ धारयति ततो मरणं वा भवति। यस्मादेते दोषास्तस्मात-

मू. (८१०) [illegible] उवउत्तमुवट्ठियं च नाऊणं।
अणुन्नवेत्तु मेहावी आलोएज्जा सुसंजए॥

मू. (८११) कहणाइ अवक्खित्ते कोहाइ अणाउले तदुवउत्ते।
संदिसहत्ति अणुन्नं काऊणं विदिन्नमालोए॥ [भा. २६८]

वृ. धर्मकथादिनाऽव्याक्षिप्ते गुरौ आलोचयेत्, आयुक्तं -उपयोगतत्परं, 'उपशान्ते' अनाकुलं गुरुं -दृष्ट्वा 'उपस्थित' उद्यतं च ज्ञात्वा, एवंविधं गुरुमनुज्ञाप्य मेधावी आलोचयेत 'सुसंयतः' साधुः। इदानीमेतामेव गाथां व्याख्यानयन् भाष्यकृदाह-धर्मकथादिनाऽव्याप्ति क्रोधादिभिरनाकुले तदुपयुक्तभिक्षालोचनापयुक्ते च 'संदिसहत्ति अणुन्नं काऊणं' संदिशत आलोचयामीत्येवमनुज्ञां कृत्वा-मार्गयित्वेत्यर्थः, 'विदिन्ने'ति आचार्येण विदिन्नायामनुज्ञायां भणत इत्येवं लक्षणायां तत आलोचयेत्। तेन च साधुनाऽऽलोचयता एतानि वर्जनीयानि -

मू. (८१२) नट्ठं वलं चलं भासं सूयं तह ढड्ढरं च वज्जेज्जा।
आलोएज्ज सुविहिओ इत्थं भत्तं च वावारं॥

मू. (८१३) करपाय भमुहसीसऽच्छिउट्ठिमाईहि नट्ठिअं नाम।
वलणं हत्थसरीरे चलनं य भावे य॥ [भा. २६९]

मू. (८१४) गारत्थियभासाओ य वज्जए भूय ढड्ढरं च सरं।
आलोए वावारं संसट्ठियरे व करमत्ते॥ [भा. २७०]

वृ. नृत्यन्नालोचयति वलन्नालोचयति अंगानि चलयन्नालोचयति, तथा भाषमाणो गृहस्थभाषया नालोचयति, किं तर्हि ?-संयतभाषयाऽऽलोचयति, तद्यथा-सुयारियाउ इत्येमवादि, तथा चालोचयन मुकेन स्वरेण नालोचयति मिणिमिणंतं, तथा ढड्ढरेण च स्वरेण-उच्चैर्नालोचयति, एवंविधं स्वरं वर्जयेत। किं पुनरस्मादालोचयतीत्यत्र आह-आलोचयेत्सुविहितो हस्तमृदकस्निग्धं, तथा 'मात्रकं' गृहस्थसत्कं कटुच्छुकादि-उदकार्द्रादि, तथा गृहस्थया कृतमं व्यापारं कुर्वत्या, भिक्षा दत्तेत्यतआलोचयति। इदानीमेतामेव गाथां व्याख्यानयन्नाह-करस्य तथा पादस्य भ्रुवः शिरसः अक्ष्णः ओष्ठस्य च, एवमादीनामङ्गानां सविकारं चलनं नर्त्तनं नाम, एतत कुर्वन्नालचयति, वलनं हस्तस्य शरीरस्य कुर्वन्नालोचयति, तथा चलनं कायस्य करोति मोटनं तत्कुर्वन्नालोचयति, तथा भावतश्चलनमन्यथा गृहीतमन्यथाऽऽलोचयति अयत्नवियक्तं॥ आलोचयन् गृहस्थभाषया नालोचयति, यथा "सुग्गीओ (लंगणीओ) लद्धाओ मंडया लद्धा" इत्येमवादि, किन्तु संयतभाषयाऽऽ' लोचनीयं "सुयारियाउ" इत्येमवादि, मूकस्वरं मूकस्वरं मनाक ढड्ढरं च महान्तं स्वरं वर्जयन्नालोचयति, किमालोचयति ?-"व्यापारंगृहस्थयोः संबन्धिनं, तथा 'संसृष्टम' उदकार्द्रादि, 'इतरं' असंसृष्टं, किं तत ?-करं संसृष्टमसंसृष्टं च उदकेन, तथा 'मात्रकं' गृहस्थसत्कं कुण्डलिकादि उदकसंसृष्टमसंसृष्टं चेति, एतदालोचयेत।

मू. (८१५) एयद्दोसविमुक्कं गुरुणा गुरुसम्मयस्स वाऽऽलोए।
जं जह गहियं तु भवे पढमाओ जा भवे चरिमा॥

वृ. एभिर्दोषैर्विमुक्तं मनन्तरोक्तं सप्तमालोचयतेद्गुरोः समीपे वा यो गुरोः सम्मतो-बहुमतस्तस्य समीपे आलोचयेत्, कथमा लोचनीयं ?, यद्यथा गृहीतं भवेत्-येन क्रमेण यद्गृहीतं प्रथमभिक्षाया आरभ्य यावच्चरमा-पश्चिमा भिक्षा तावदालोचयेदिति। एव तावदुत्सर्गेणालोचनविधिः। यदा पुनरेतानि कारणानि भवन्ति तदा ओघत आलोचयतीत्येतदेवाह-

मू. (८१६) काले य पहुप्पंते उच्चाओ वावि ओहमालोए।
वेला मिलाणगस्स व अड्ढच्छड्ड गुरू व उच्चाओ॥

वृ. यदा तु पुनः काल एव न पर्याप्तं यावत्तेन क्रमेणालोचयति तावत्स्तं गच्छत्यादित्यः तदा तस्मिन् काले ओघत आलोचयति, यदिवा श्रान्तः कदाचिदभवति तदाऽप्योघत एवालोचयति, वेला वा ग्लानस्यातिक्रामति यावत्क्रमेणालोचयति अत ओघत आलोचयति, अथवा गुरुः उच्चातो-श्रान्तः कुलादिकार्येण केनचित् ततो ओघत आलोचयत्येव कारणवशेन। का पुनरोघालोचना ?,

मू. (८१७) पुरकम्मपच्छकम्मे अप्पेऽसुद्धे य ओहमालोए।
तुरियकरणंमि जं से सुज्झइ तत्तिअं कप्पे॥

वृ. आकुलत्वे आपन्ने सत्येवमोघालोचनयाऽऽलोचयति-पुरःकर्म पश्चात्कर्म च अल्पं-नास्ति किञ्चिदित्यर्थः, 'असुद्धे य'त्ति अशुद्धं चाल्पं, अशुद्धमाधाकर्मादिभिर्धार्यते तदल्पं-नास्तीति, एवमोघतः-सङ्गोपेणालोचयेत्। 'तुरियकरणंमि'त्ति त्वरिते कार्ये जाते सति यत्र शुद्ध्यति उक्तेन प्रकारेण तावन्मात्रमेव कथयति, एषा। ओघालोचनेति॥

मू. (८१८) आलोइत्ता सव्वं सीसं सपडिग्गहं पमज्जित्ता।
उड्ढमहो तिरियंमी पडिलेहे सव्वओ सव्वं॥

वृ. एवमेषा मानसी आलोचना वाचिकी वाऽऽलोचनोक्ता, इदानीं कायिकी आलोचना भण्यते-आचार्यस्य भिक्षा दर्शयति, एवं मनसा वाचा वाऽऽलोचयित्वा 'सर्वं' निरवशेषं, तथा मुखवस्त्रिकया शिरः प्रमृज्य पतद्ग्रहं च सपटलं प्रमृज्य 'ऊर्ध्वं' पौरुषीः 'अधो' भुवि 'तिर्यक्' तिरश्चीनं 'प्रत्युपेक्षेत' निरूपयेत् 'सर्वतः' समन्ताच्चसृष्वपि दिक्षु सर्वेनिरन्तर्येण. ततः पतद्ग्रहं हस्ते कृत्वा भक्तादि गुरोर्दर्शयतीति वक्ष्यति भाष्यकृत्। इदानीमेतामेव गाथां भाष्यकृदाह, तत्र गुरुरोघत्वात्प्रथममूर्ध्वादीनि त्रीणि पदानि व्याख्यानयन्नाह-

मू. (८१९) उड्ढं पुप्फफलाइं तिरियं मज्जारिसाभडिंभाइं।
सीतलगडाऊगआवडणरक्खणट्ठा अहो पेहे॥ [भा. २७१]

वृ. उद्यानादौ आवासितानां सतां पुष्पफलादिपानमूर्ध्वं निरूप्य ततो गुरोर्दर्शयति, तिर्यङ् मार्जारस्याडिम्भानालोक्यालोचयति, मा भूत्ते आगच्छन्तस्तत्पात्रमुत्प्रेर्य पातयिष्यन्ति, आदिशब्दात्काण्डं वा केनचिद्विक्षिप्तमायाति. अतस्तिर्यग् निरूप्यते, तथाऽधो निरूपयति, किमर्थं ?, कदाचित्कीलको भवति. तत्रापतनम्-आस्खलनं मा भूदिति. अतोऽधो निरूप्यतनो भक्तादि दर्शयति। इदानीं 'सीसं सपडिग्गहं पमज्जेत्त'त्ति व्याख्यानयति-

मू. (८२०) ओणमणे पवडेज्जा सिरेऽहो पाणा सिरं पमज्जेज्जा।

एमेव उग्गहोमवि मा संकुडणे तग्गविनासो ॥ [भा. २७२]

वृ. हस्तस्थं पतद्गृहेऽवनमतः शिरसः प्रपतेयुः प्राणिनः कदाचिदतः शिरः प्रथममेव प्रमार्जयेत्, एवमेव पतद्गृहं प्रमार्जनं कृत्वा प्रदर्शयेद्भक्तमिति, किं कारणं ?-'मा संकुडणे तग्गविणासो'त्ति मा भूत्सङ्कोचने सति पतनानां तद्गतविनाशो भविष्यत्यतः प्रमृज्य पतद्ग्रहं भक्तं पदर्शयतीति ॥

मू. (८२१) काउं पडिग्गहं करयलंमि इक्कं च ओणमित्ताणं ।
भत्तं वा पानं वा पडिदंसिज्जा गुरुसगासे ॥ [भा. २७३]

वृ. कृत्वा पतद्ग्रहं करतले अर्धं च शरीरस्यावनम्य पुनर्भक्तं वा पानं वा प्रदर्शयेत् गुरुसगासे इति ॥

मू. (८२२) ताहे य दुलारोइय भत्तपान एसणमनेसणाए उ ।
अट्ठरुसासे अहवा अनुग्गहादाउ जाएज्जा ॥ [भा. २७४]

वृ. ततः कदाचिदुरालोचितं भक्तं पानं भवति, 'नहं वलं चलं' इत्येवमादिना प्रकारेण, तथैषणादोषः कदाचित् सूक्ष्मः कृतो भवति, अनेषणादोषो वा कथमिदमनाभोगतः, ततश्चैतयोर्विशुद्ध्यर्थमष्टोच्छ्वासं-नमस्कारं ध्यायेत्, अथवा 'अनुग्रहादी'-ति अथवाऽनुग्रहादि ध्यायेत्, "जइ मे अनुग्गहं कुज्जा साहू हुज्जामि तारिओ" इत्येवमादि गाथाद्वयं कायोत्सर्गस्थो विशुद्ध्यर्थं ध्यायेत्, उत्सार्य च कायोत्सर्गं ततः स्वाध्यायं प्रस्थापयेत्। एतदेवाह-

मू. (८२३) विनएण पट्ठवित्ता सज्झायं कुणइ तो महुत्तागं ।
पुव्वभणिया य दोसा परिस्समाई जढा एवं ॥

वृ. विनयेन प्रस्थाप्य स्वाध्यायं योगविधाविव ततः स्वाध्यायं मुहूर्तमात्रं करोति, जघन्यतो गाथात्रयं पठति, उत्कृष्टतश्चानुद्दिशापि सूक्ष्मप्राणलब्धिसंपन्नोऽन्तर्मुहूर्तेन परावर्तयति, एवं कुर्वता पूर्वभणिता दोषा 'धातुक्षोभ भरणं' मित्येवमादयः तथा परिश्रमादयश्च दोषा 'जढा'स्त्यक्ता भवन्तीति ॥

मू. (८२४) दुविहो य होइ साहू मंडलिउवजीवओ य इयरो य ।
मंडलिमुवजीवंतो अच्छइ जा पिंडिया सव्वे ॥

वृ. स च साधुर्द्विप्रकारो-मण्डल्युपजीवकः इतरश्च-अमण्डल्युपजीवकः, तत्र यो मण्डल्युपजीवकः साधुः सोऽटित्वा भिक्षां तावत्प्रतिपालयति यावत् 'पिण्डिताः' एकीभूताः सर्वेऽपि साधवो भवन्ति, पुनश्च सर्वैः सह भुङ्क्ते।

मू. (८२५) इयरोवि गुरुसगासं गंतूण भणइ संदिसह भंते ।
पाहुणगखवगअनरंतबालवुड्ढाणसेहाणं ॥

वृ. 'इतरोऽपि' अमण्डल्युपजीवकः, तत्र यो मण्डल्युपजीवकः स साधुर्गुरुसगासं गत्वा तमेव गुरुं भणति-यथा हे आचार्याः ! संदिशत-दत्त यूयमिदं भोजनं प्राघूर्णकक्षपकअनरन्तरबालवृद्धशिक्षकेभ्यः साधुभ्य इति । पुनश्च-

मू. (८२६) दिन्ने गुरुहिं तंमि सेसं भुंजेज्ज गुरुअणुन्नाए ।
गुरुणा संदिट्ठो वा दाउं सेसं तओ भुंजे ॥

वृ. एवमुक्तेन सता गुरुणा दत्ते सति तेभ्यः-प्राघूर्णकादिभ्यो यच्छेषं तद् भुञ्जीत गुरुणाऽनुज्ञाते सति, यदिवा गुरुणा 'संदिष्टः' उक्तः यदुतत्वमेव प्राघूर्णकादिभ्यः प्रयच्छ, एवमसौ साधुर्भणितः सन् दत्त्वा प्राघूर्णकादिभ्यस्ततः शेषं यद् भक्तं तद्भुङ्क्ते। एवं नैकवचनमसौ प्राघूर्णकादिभ्यो ददाति अन्यानपि साधून्नियन्त्रयति,

तत्र यदि ते गृह्णन्ति ततो निर्जरा, अथ न गृह्णन्ति तथाऽपि विशुद्धपरिणामस्य निर्जरैवेति ॥ एतदेवाह-

मू. (८२७) इच्छिज्ज न इच्छज्ज व तहविय पयओ निमंतए साहू।
परिणामविसुद्धीए अ निज्जरा होअगहिएवि ॥

वृ. इच्छेत कश्चित्साधुर्नेच्छेद्वा तथापि प्रयत्नेन-सद्भावेन निमन्त्रयेत्साधून, एवं सद्भावेन निमन्त्रयमाणस्य 'परिणाम विशुद्धया' चित्तनैर्मल्यान्निर्जरा भवति- कर्मक्षयलक्षणाऽगृहीतेऽपि भक्ते । अथावज्ञया निमन्त्रयति ततोऽयं दोषः-

मू. (८२८) भरहेरवयविदेहे पन्नरसवि कम्मभूमिगा साहू।
एक्केमि हीलियंमी सव्वे ते हीलिया हुंति ॥

मू. (८२९) भरहेरवयविदेहे पन्नरसवि कम्मभूमिगा साहू।
एक्केमि पूइयंमी सव्व ते पूइया हुंते ॥

मू. (८३०) अह को पुणाइ नियमो एक्केमिवि हीलियंमि ते सव्वे।
होंति अवमानिया पूइए य संपूइया सव्वे ॥

मू. (८३१) नाणं दसणं वा तवो य तह संजमो य साहुगुणा।
एक्के सव्वेसुवि हीलिएसु ते हीलिया हुंति ॥

मू. (८३२) एमेव पूइयंमिवि एक्केमिवि पूइया जइगुणा उ।
थोवं बहूनिवेसं इइ नच्चा पूयए महमं ॥

मू. (८३३) तम्हा जइ इमं गुणं एक्केमिवि पूइयंमि ते सव्वे।
भत्तं वा पानं वा सव्वपयत्तेण दायव्वं ॥

वृ. सुगमा ॥ यदा पुनरादरेण निमन्त्रयते तदायं महान् गुणः- सुगमा ॥ अत्राह परः अथ कः पुनरयं नियमः ? यदेकस्मिन्नवमानिते सति सर्व एवापमानिता भवन्ति, तथैकस्मिन् संपूजिते सति सर्व एव संपूजिता भवन्ति, न चैकस्मिन् संपूजिते सर्वे संपूजिता भवन्ति, न हि यज्ञदत्ते भुक्ते देवदत्तो भुक्तो भवतीति। आचार्य आह-ज्ञानं दर्शनं च तपस्तथा संयमश्च एते साधुगुणा वर्त्तन्ते, एते च गुणा यथैकस्मिन साधौ व्यवस्थिता एवं सर्वेष्वपि, एकरूपत्वात्तेषां, यतश्चैवमत एकस्मिन् साधौ हीलिते-अपमानिते सर्वेषु वा साधुषु हीलितेषु 'ते' ज्ञानाद्या गुणा 'हीलिताः' अपमानिता भवन्ति ॥ एवमेकस्मिन पूजिते पूजिता यतिगुणाः सर्वे भवन्ति, यस्मादेवं तस्मान्नैकमेवदभक्त पानादि 'बहुनिवेसं' बहुनायमित्यर्थः निर्जराहेतुरिति, तस्मादेवं ज्ञात्वा पूजयेत्साधून मतिमानिति, यतश्चैवमत एवमेव कर्त्तव्यम् । एतदेवाह- 'तम्हे'त्यादि, सुगमा ॥

मू. (८३४) वेयावच्चं निययं करेह उत्तमगुणे धरिंताणं।
सव्वं किल पडिवाई वेयावच्चं अपडिवाई ॥

मू. (८३५) पडिभग्गम्मि भयस्स व नासइ चरणं सुयं अगुणणाए।
न हु वेयावच्चचिअं सुहोदयं नासए कम्मं ॥

मू. (८३६) लाभेण जोजयंतो जइणो लाभंतरायं हणइ।
कुणमाणो य समाहिं सव्वसमाहिं लहइ साहू ॥

मू. (८३७) भरहो बाहुबलीवि य दसारकुलनंदनो य वसुदेवो।
वेयावच्चाहरणा तम्हा पडिवज्जह जईणं ॥

मू. (८३८) होज्ज न व होज्ज लंभो फासुअआहार उवहिमाईणं।
लंभो य निज्जराए नियमेन अओ उ कायव्वं॥

मू. (८३९) वेयावच्चे अब्भुट्ठियस्स सद्धाए कारगस्स,
लाभो चेव तवस्सिस्स्स होइ अहीनमनसस्स॥

वृ. वेयावृत्त्यं 'नियतं' कुरुत, केषाम् ?-उत्तमगुणान् धारयतां साधूनां कुरुत। शेषं सुगमम्। किञ्च-'प्रतिभग्नस्य' उन्निष्क्रान्तस्य मृतस्य वा नश्यति चरणं श्रुतमगुणनया नतु वेयावृत्त्यचिंतं-बद्धं शुभोदयं नश्यति कर्म। किञ्च 'लाभेन' प्राप्त्या घृतादेः 'योजयन्' घृतादिलाभेन योजयन्। कान् ?-यतीन् लाभान्तरायं कर्म हन्ति। तथा पादप्रक्षालनादिना कुर्वन् समाधिं 'सर्वसमाधिं' मनसः स्वस्थतां वाचो माधुर्यादिकं कायस्य निरुपद्रवतां, एवं कुर्वन्निरुपमपि सर्वसमाधिं लभते॥ सुगमा, नवरं 'पंडितप्पह'त्ति वेयावृत्त्यं कुरुत। किञ्च-भवद्वा न वा लाभः, केषां ?-प्रासुकानां आहारौषध्यादीनां तथापि तस्य वेयावृत्त्यार्थमभ्युद्यतस्य साधोर्विशुद्धपरिणामस्य लाभ एव निर्जरायाः अवश्यं, अलाभेऽपि सति निर्जरा भवति, यस्मादेवं तस्मात्कर्त्तव्यं वेयावृत्त्यम्॥

सुगमा, नवरं वेयावृत्त्ये 'अभ्युत्थितस्य' उद्यतस्य श्रद्धया कर्तुकामस्य लाभ एव॥

मू. (८४०) एसा गहणेसणविही कहिया भे धीरपुरिसपन्नत्ता।
धासेसणंपि इत्तो वुच्छं अप्पक्खरमहत्थं॥

वृ. सुगमा॥ उक्ता ग्रहणैषणा, अधुना ग्रासैषणोच्यते, तथा चाह-

मू. (८४१) दव्वे भावे धासेसणा उ दव्वंमि मच्छआहारणं।
गलमंसुंडगभक्खण गलस्स पुच्छेण घट्टणया॥

वृ. सा च ग्रासैषणा द्विविधा-द्रव्यतो भावतश्च, तत्र द्रव्यमङ्गीकृत्याह-द्रव्यतो मत्स्योदाहरणं, तंजहा-एगो किर मच्छबन्धो गलं मंसपिंडं दाऊण दहे छुहइ, तं च एगो मच्छो जाणइ, जहा एस गलोत्ति, सो परिपेरंतेण मंसं खाइऊण ताहे

पराहुत्तो छप्पाए गलमाहणइ, मच्छबंधो जाणइ-एस गहिओत्ति, एवं तेणं सव्वं खइयं मंसं, तो सो मच्छबंधो खइएण मंसेण अद्धिईए तल्लो अच्छइ, एत्थ य आहरणं दुविहं-चरिअं कप्पिअं च, तं एयं मच्छबंधं ओहयमणसंकप्पं जाणेत्ता दंडू मच्छो भणइ-अहं पमत्तो चरन्तो गहिओ बलागाए, ताहे सा खिवित्ता पच्छा गिलइ, ताहे अहं बंको तीसे मुहं पडामि, एवं बितिअं तइयं च उच्चलिओ ताहे मुक्को, अन्नया समुद्दं अहं गओ तत्थ मच्छबंधा वलयामुहाणि करेंति कडएहिं, ताहे समुद्दवेलापाणिएणं सह अहं तत्थ वंकीकंडएविट्ठो, ताहे तस्स कंडगस्स अनुसारेण अतिगओ, एवं तिन्नि वारा वलयामुहाओ मुक्को, जालाओ एक्कवीसं वारा पविट्ठो, किह पुन ?, अहं जालं छुहं भवति ताहे अहं भूमीं घेत्तूण अच्छामि, तहा एक्कंमि छिन्नोदए दहे ठिओ, अम्हेहिं कहवि न नायं जहा इमो दहो सुक्किहिइ, ताहे सो दहो सुक्को, मच्छाणंपि थक्के गई णत्थि, ते सव्वे सुक्केत पाणिए मया, कइवि जीवंति, तत्थ कोइ मच्छबंधो आगओ, सो हत्थेण गहाय सूलाए पोएति, ताहे मए नायं, अहंपि अचिरा विज्झाहामि, जाव न विज्झामि ताव उपायं चिंतेमि, ताहे तेसिं मच्छाणं भंतगलं सूलं डसिउं मुहेण ठिओ, सो जाणइ-एते सव्वे पोइयल्लया, ततो सो गंतूण अन्नहिं दहे धावइ, तत्थ अहं मच्छुव्वत्तं करेंतो चेवुत्तीमो पाणिए पविट्ठो, तं एयारिसं ममत्तं, तहविइच्छाएवि गलेण धेनुं ?, ते निल्लज्जत्तणेति॥ अमुमेवार्थं गाथाभिरुपसंहरन्नाह-'गलमंसुंडग' गलामांसपिंडभक्षणं, शेषं सुगमं॥

मू. (८४२) अहं मरंमि पहीणे जायंते मच्छिया भणइ मच्छो।
किं जायसि तं एवं ? सुण ताव जहा अहिरिओऽसि ॥

मू. (८४३) चरियं व कप्पियं वा आहरणं दुविहमेव नायव्वं।
अत्थस्स साहणट्ठा इंधनमिव ओयणट्ठाए ॥

मू. (८४४) सिबलागमुहा मुक्को. त्तिक्खुत्तो वलयामुहे।
निम्मत्तस्खुत्तो जालेणं, सयं छिन्नोदए दहे ॥

मू. (८४५) एयारिसं मम सत्तं, सढं घट्टिअघट्टणं।
इच्छसि गलेण धेत्तुं, अहो ते अहिरीयया ॥

मू. (८४६) अह होइ भावधारेसणा उ अप्पाणमप्पणा चेव।
गाहू लुंजिउकामो अनुसासइ निज्जरट्ठाए ॥

मू. (८४७) बायालीसेसणसंकडंमि गहणंमि जीव।
नहु छलिओ। एण्हिं ह न छलिज्जसि भुंजंतो रागदोसेहिं ॥

मू. (८४८) जह अब्भंगणलेवा सगडक्खवणाण जुत्तिओ होंति।
इय संजमभरवहणट्ठयाएँ साहूण आहारो ॥

वृ. सुगमाः, तिसो वारा बलकाया मुखेनोमुक्तः-ऊर्ध्ववंशिप्तः- त्रिकृत्वो 'वलयामुखे' कटात्मके आवर्त्ते इव चिते, तथा त्रयः सप्तका जालाप्रच्युतः 'सकृद्' एकवारंरिछन्नोदके ह्रदे छुटितः ॥ एवंविधं मम सत्त्वं शठं मो तथा 'घट्टितघट्टनं' घट्टितानि-सम्बद्धानि घट्टनानि-जालादीनि चलानानि यस्य सोऽहं घट्टितघट्टनः, तंदृशंविधं इच्छसि गलेन ग्रहीतुं ?, अहो ते निर्लज्जता ॥ उक्ता द्रव्यग्रासैषणा यतोऽसौ ग्रासं कुर्वन् न क्वचिच्छलित इति । इदानीं भावग्रासैषणां प्रतिपादयन्नाह-अथ भवति भावग्रासैषणा, कथं ?, यदाऽऽत्मानमात्मनैव साधुरनुशास्ति, कदा पुनः- ?-'भोक्तु कामः' भोक्तुमभिलषन्, निजरार्थं न तु वर्णाद्यर्थम् । किं पुनरसौ चिन्तयन्नात्मानमनुशास्तीत्याह-द्विचत्वारिंशदेषणादोषैः संकटे-दुष्प्रवेशे यद्गहनं तस्मिन् हे जीव । न त्वं छलितः, शेषं सुगमं. यथा न व्यंस्यसे तथा कर्तव्यं । यथाऽभ्यङ्गनलेपा यथासंख्येन शकटाक्षस्य व्रणानां च युक्तितो भवंति, यथाऽभ्यङ्गः शकटाक्षे युक्त्या दीयते न चातिबहुनं चातिस्तोको भारवहनार्थं. तथा व्रणानां च लेपो युक्त्या दीयते नातिबहुनातिस्तोकः, एवं संयमभरवहनार्थं साधूनामाहारः ॥

मू. (८४९) नवजीवि अनुवजीवी मंडलिं पुववन्निओ साहू।
मंडलिअसमुद्दिसगाण ताण इणमो विहिं वुच्छं ॥

वृ. तत्र मण्डल्युपजीवी साधुरनुपजीवी च पूर्ववदिविधो व्यावर्णितः साधुरुक्तः, इदानीं बहूनां मण्डल्यामसमुद्दिशकानां यो विधिर्भवति तं वक्ष्ये ॥ ते च कथं मण्डल्यामसमुद्दिशका भवन्ति ?, अत आह-

मू. (८५०) आयाढजोगवाही निज्जूढट्ठिआ व पाहुणगा।
सेहा सपायछित्ता बाला वुड्ढसमाईया ॥

वृ. आयाढयोगो-गणिवोगः तत्स्था ये ते मण्डलीं नोपजीवन्ति. 'निज्जूढ' त्ति अमनोज्ञाः कारणान्तरेण तिष्ठन्ति ते पृथग् भुञ्जते. तथाऽऽत्मार्थिकाश्च पृथग् भुञ्जते प्राघूर्णकाश्च. यतस्तेषां प्रथममेव पार्याग्यं पर्याप्त्या दीयते. ततस्तेऽप्येकाकिनो भवन्ति. शिक्षका अपि सागारिकत्वात् पृथग् भोज्यन्ते. सप्रायश्चित्ताश्च पृथग्

भोज्यन्ते, यतस्तेषां शबलं चारित्रं, शबलचरित्रैः सह न भुज्यते, बालवृद्धा अप्यसहिष्णुत्वात्प्रथममेव भुञ्जतेऽतस्तेऽप्येकाकिन इति, एवमाद्या मण्डल्यामसमुद्दिशका भवन्ति. आदिग्रहणात्कृप्रव्याध्याद्युपद्रुता इति ॥ ते च भुञ्जानाः सन्त आलोके भुञ्जते. स चालोको द्विविधो भवतीत्येतदेवाह-

मू. (८५१) दुविहो खलु आलोको दव्वे भावे य दव्वि दीवाई।
सत्तविहो पुन भाव आलोगं तं परिकहेऽहं ॥

वृ. द्विविध आलोको-द्रव्यालोको भावालोकश्च, तत्र द्रव्यालोकः प्रदीपादिः. भावविषयः पुनरालोकः सप्तविधः, तं च कथयाम्यहं, तत्र भावालोकस्येयं व्युत्पत्तिः-आलोक्यत इत्यालोक-स्थानदिगादिनिरूपणमित्यर्थः। तं च सप्तविधमपि प्रतिपादयन्नाह-

मू. (८५२) ठाणदिसिपगासणया भायणधकरंडणे य गुरुभावे।
सत्तविहो आलोको सपडिदुवारणा सुविहियाणं।

वृ. तत्रामण्डलिस्थमुद्दिशकनिष्क्रमप्रवेशवर्जिते स्थाने भोक्तव्यं, तथा करस्यां दिशि आचार्यस्योपवेष्टव्यमित्येतद्वक्ष्यति, तथा सप्रकाशे स्थाने भोक्तव्यं, भाजने च विस्तीर्णमुखे भोक्तव्यं, प्रक्षेपणं च कवलानां कुर्कुट्यण्डकमात्राणां कर्तव्यं, तथा गुरुचक्षुःपथे भोक्तव्यं, तथा भावो ज्ञानादितत्र-संबन्धार्थं भोक्तव्यमित्येतद्वक्ष्यति। एवमयं सप्तविध आलोकः सदाऽपि च यतनातस्मिन् सप्तविधेऽप्यालोके यतना सुविहितानाम्। इदानीं भाष्यकारो व्याचष्टे प्रतिपदं, तत्राद्यावयवव्याचिख्यासयाऽऽह-

मू. (८५३) निक्खमपवेसमंडलि सागारियठाणपरिहियद्वाइ।
मा एक्कासणभंगो अहिगरणं अंतरायं वा ॥ [भा. २७५]

वृ. निष्क्रमप्रवेशौ वर्जयित्वा भोजनार्थमुपविशंति, तथा मण्डलीप्रवेशं च वर्जयन्ति, ततः सागारिकस्थानं च परिहृत्य भुञ्जते, मा भूत् सागारिके प्राप्ते सति एकाशनभङ्गः स्यादिति. 'अधिकरणं' राटिर्वा भवति अन्येनापि प्रव्रजितेन सह अस्थाने उपविष्टस्य भुञ्जतोऽन्तरायं च भवति, कथं ?, स साधुरन्यस्य सत्के स्थाने भुङ्क्ते उपविष्टः, सोऽपि साधुरागतः प्रतीक्षमाण आस्ते, एवं चान्तरायं कर्म बध्यते।

इदानीं दिशाद्वारप्रतिपादनायाह-

मू. (८५४) पच्चुरसिपरंमुहपडिपक्ख एया दिसा विवज्जेत्ता।
ईसाणग्गेईय व ठाएज्ज गुरुस्स गुणकलिओ ॥ [भा. २७६]

वृ. उरसोऽभिमुखं प्रत्युरसं-गुरोरभिमुखं वर्जयित्वेत्यर्थः, पराङ्मुखश्च नोपविशति गुरोः, तथा पृष्ठतश्च गुरोर्नोपविशति, पक्षके च नोपविशति, एवमेता दिशो वर्जयित्वा ईशान्यां दिशि गुरोरग्नेय्यां वा दिशि 'निष्ठेत' उपविशेदभोजनार्थं गुणकलितः साधुर्यः इदानीं 'पगासणय'त्ति व्याख्यायते-

मू. (८५५) भक्खियकंटगहाईण जाणणट्ठा पगासभुंजणया।
अट्ठियलग्गणदोसा वग्गुलिदोसा जहा एवं ॥ [भा. २७७]

वृ. कथं नु नाम मक्षिका जायते-दृश्यते तथा कण्टको वा कथं नु नाम दृश्यते अस्थि वा उपलभ्यते ?, एवमर्थं 'प्रकाशे' सोद्द्योतस्थाने भुज्यते, आदिग्रहणाद्दात्रादिपरिग्रहस्तच्च दृश्यते, एवं च प्रकाशे भुञ्जानेन योऽस्यां गलकादौ अस्थिलगनदोषस्तथा कण्टकलगनदोषश्च गलकादौ स परिहृतो भवति, तथाऽन्धकारे मक्षिकाभिक्षणजनितो यो वल्गुलिव्याधिदोषः स परिहृतो भवति। इदानीं 'भायण'त्ति द्वारमुच्यते-

मू. (८५६) जे चेव अंधयारे दोसा ते चेव संकडमुहंमि ॥

परिसाडी बहुलेवाडणं च तम्हा पगासमुहं ॥ [भा. २७८]

वृ. य एवान्धकारे भुञ्जानस्य 'दोषाः' मक्षिकादिजनिता भवन्ति त एव दोषाः 'सङ्कटमुखे' भाजने कमठादौ भुञ्जानः, अयमपरोऽधिकदोषः- 'परिसाडी' परिशाटी भवति पार्श्वे निपतति, तथा 'बहुलेवाडणं च' वक्तुं विच्चं खरडिजइ हत्थस्स उवरिंपि भुंजंतस्स संकडे तस्मात् 'प्रकाशमुखे' विपुलमुखे भाजनं भुज्यत इति। पकस्येवमविधिं भणइ-

मू. (८५७) कक्कडअंडगमित्तं अविगियवयणो उ पक्खिवे कवलं।
अइखद्धकारगं वा जं च अनालोइयं हुज्जा ॥ [भा. २७९]

वृ. कुक्कुट्या अण्डकं कुक्कुटाण्डकं तत्प्रमाणं कवलं प्रक्षिपेद्भदन्तं. किंविशिष्टः, सन् ?- 'अविकृतवदनः' नात्यन्तनिर्घाटितमुखः प्रक्षिप्तकवलम। गुरुरिति व्याख्यायते- 'अतिखद्धं' ति गुरोरालोके भोक्तव्यं, यदि पुनर्गुरोर्दर्शनपथे न भुङ्क्ते ततः कदाचित्साधुः 'अतिखद्धम्' अतिप्रचुरं भक्षयेन्निःशङ्कः सन्, स च सव्याजशरीरकदाचिद्गुरोरगोचरदर्शनपथेऽकारकः- अपथ्यमपि भुञ्जीत निःशङ्कः सन्, कदाचिद्वा। भिक्षामटताऽनेन स्निग्धद्रव्यं लब्धं भवेत् तत्रानालोच्यैव भक्षयेद् एकांते, मा मूत्रामाचार्यो निवारयिष्यिति। अतः -

मू. (८५८) एएसि जाणणट्ठा गुरु आलोए तओ उ भुंजेज्जा।
नाणाइसंधणट्ठा न बत्तबलरूववित्तियट्ठा ॥ [भा. २८०]

वृ. 'एतेषां' प्रचुरभक्षितादीनां दोषाणां ज्ञाथार्थं गुरोः 'आलोके' चक्षुर्दर्शनपथे भुञ्जीत येनगुरु- समीपस्थं भुञ्जानं दृष्ट्वा प्रचुरं भक्षयन्तं निवारयंति, तथाऽकारकं भक्षयन्तंनिवारयंति, तथा अनालोइय- चोरिअं खायंते निवारयति, मा भूदवारणेऽपाटवजनिता दोषाः स्युः। इदानीं भावेत्ति व्याख्यायते- 'नाणाइ' ति ज्ञानादिभावः ज्ञानं दर्शनं चारित्रं च, एतज्ज्ञानादिभावत्रयमभुज्यमाने त्रुट्यति- व्युच्छिद्यते, अत एतेषां ज्ञानादीनां त्रुट्यतां 'सन्धानार्थम्' अविच्छिन्नप्रवाहार्थं भुज्यते, न वर्णार्थं भुज्यते, न वर्णो मम गौरवं स्यादि- त्येवमर्थं, तथा बलं ममभूयादित्यमर्थमपिनभुज्यते, रूपंममभूयाद्बुभुक्षयाक्षीणेक्षणगण्डपार्श्वः सन्मांसोपचयेनपूरितगण्डपार्श्वो रूपवान् भविष्यामीति नैवमर्थं भुङ्क्ते, नापि 'विषयार्थं' मैथुनाद्यासेवनार्थं भुङ्क्ते।

मू. (८५९) गोआ लोइयभोई जो एए जुंजए पए सव्वे।
गविसणगहणग्धासेसणाइ तिविहाइवि विसुद्धं ॥

वृ. 'यः' साधुर्गुरोरालोचितं भुङ्क्ते य एतानि पदान्यनन्तरोदितानि 'युनक्ति' प्रयुङ्क्ते करोति स्थाना-दीनि, स च गवेषणैषणया ग्रहणैषणया ग्रासैषणया, अनया त्रिविधयाऽप्येषणया शुद्धं भुङ्क्ते य एतानि पदानि प्रयुङ्क्त इति।

मू. (८६०) एवं एगस्स विही भोत्तव्वे वन्निओ समासेणं।
एमेव अनेयाणवि जं नाणत्तं तयं वोच्छं ॥

वृ. एवमेकस्य साधोर्भोक्तव्ये विधिर्वर्णितः 'समासेन' सङ्क्षेपेण, एवमेवानेकेषामपि साधूनां भोजने विधिः, यत्तु पुनर्नानात्वं भवति- यो भेदो यदतिरिक्तं तदहं वक्ष्ये। आह- किंपुनः कारणं मण्डली क्रियते। उच्यते-

मू. (८६१) अंतरंतबालवुड्ढा सेहाएगा गुरु अगहवग्गो।
साहारणोग्गहाउलखित्तकारणा मंडली होइ ॥

वृ. अन्तरन्तः अतिग्लानस्तत्कारणात्- तन्निमित्तं मण्डली भवति, यतस्तस्याग्लानस्य यद्येकः साधुर्वैयावृत्यं करोति ततस्तस्य तत्रैवाक्षणिकस्य सूत्रार्थहानिर्भवति, मण्डलीबन्धे तु कश्चित्किञ्चित्करोति,

एतदर्थं मण्डली क्रियते येन बहवः प्रतिजागरका भवन्तीति। बालोऽपि भिक्षामटितुमसमर्थः, स च बहूनां मध्ये सुखेनैव कथनं तु नाम वर्तेत ?, अतो मण्डली भवति। वृद्धोऽप्येवमेव. ग्लानः-शैक्षकः, स चैकः सन् भिक्षादिशुद्धिं न जानाति ततस्तस्यानीय दीयते. आगन्तुः-प्राघूर्णकस्तस्य चागतस्य सर्व एवोपकुर्वन्ति. स चोपकारः सर्वैरेव मिलितैः कर्तुं शक्यते न त्वेकेन. गुरोश्च सर्वैरेवोपकर्तुं शक्यते न त्वेकेन सूत्रार्थपरिहानेः, तथा 'असहुवग्गो'त्ति असमर्थो-राजपुत्रादिः स च भिक्षामटितुं सुकुमालत्वान्न शक्नोति ततश्च सर्व एव मिलिता उपकुर्वन्ति, तस्मात् 'साधारणोग्गहा' साधारणश्चासावुपग्रहश्च साधारणोपग्रहस्तस्मात् साधारणोपग्रहत्वकारणान्मण्डली कर्त्तव्या, अथवा मण्डलीविशेषणमेतत्, उपगृह्यातीत्युपग्रहा-भक्तादिः स साधारणः-तुल्यो यस्यां सा साधारणोपग्रहा मण्डली भवित। 'अलद्धिकारणा मंडली होइ' इति कदाचित्कश्चित्साधुरलब्धिको भवति ततश्च तेऽन्ये साधवस्तस्मै आनीय प्रयच्छन्ति अत एतत्कारणान्मण्डली भवति। इदानीं भिक्षागतानां साधूनां यो वसतिरक्षपालस्तेन किं कर्तव्यमित्यत आह-

मू. (८६२) नाउ नियट्टणकालं वसहीपालो य भायणुग्गाहं।
परिसंठियच्छद्दवेगणहणट्ठया गच्छमासज्ज॥

वृ. ज्ञात्वा भिक्षागतानां निवर्त्तनकालं वसतिपालो 'भाजनं' नन्दीपात्रं तत्प्रत्युपेक्ष्योद्ग्राहयति-सङ्घट्टितनास्ते इत्यर्थः, किमर्थः ?, परिसंस्थिताच्छद्रवग्रहणार्थम्, एतदुक्तं भवति-तत्रानीय साधवः पानकं प्रक्षिपन्ति, पुनश्च तत्र परिस्थितं-स्वच्छीभूतं सत् ततोऽन्यत्र पात्रके क्रियते येन तत्स्वच्छमार्यादीनां योग्यं भवति, पात्रकादिप्रक्षालनं च क्रियते। 'गच्छमासज्ज'त्ति 'गच्छमाश्रित्य' गच्छस्य प्रमाणं ज्ञात्वा पात्रकमुद्ग्राहयन्ति, एतदुक्तं भवति-यदि महान् गच्छस्ततः पानकगलनार्थं महाप्रमाणं पात्रकमुद्ग्राहयति, तथा द्वे त्रीणि चत्वारि पञ्चादीनि यावत्।

मू. (८६३) असई य नियत्तेसुं एक्के चउरंगुलूणभाणेसु।
पक्खिवियं पडिग्गहगं तत्थऽच्छदवं तु गालेज्जा॥

वृ. अथ तत्र रक्षपालः समर्थो नास्ति यः पात्रकमुद्ग्राहयति, अथवा 'असई य'त्ति यदि नन्दीपात्रं नास्ति यत्रोदकमानीतं स्वच्छीकरणार्थं क्रियते ततोऽसति तस्मिन् नन्दीपात्रे तदेकं पतद्ग्रहं प्रक्षिप्य. क्व ?. अत आह-'चउरंगुलूणभाणेसु' चतुर्भिरङ्गुलैरूनानि यानि भाजनानि तेषु प्रक्षिप्य पतद्ग्रहं पुनस्तस्मिन् क्षणीभूते स्वच्छं द्रवं गालयेत्, अत्र यच्चं नियमो द्रष्टव्यः यदुत-भिक्षां तावत्साधवः पर्यटन्ति यावत्पात्रकं चतुर्भिरङ्गुलैरूनमास्त इति। आह-किं पुनः कारणं तद्द्रवगलनं क्रियते ?

मू. (८६४) आयरियअभावियपाणगट्ठया पायपोसणट्ठा।
होइ य गुरुं विवेगो सुद्ध द्रायमणं च सागरिए॥

वृ. आचार्यपानार्थं अभावितसेहादिपानार्थं च गलनं क्रियते। तथा पादधावनार्थं 'पोस'त्ति अधिष्ठानं तस्य प्रक्षालनार्थं तथा भवति च सुखेन विवेकः-त्यागोऽतिरिक्तस्य तस्यानकस्य. तथा सुखेन वाऽऽचमनं सागारिकस्याग्रतः क्रियते, एवमर्थं गलनं क्रियते इति। कियन्ति पुनः पात्रकाणि गलितद्रवस्य भ्रियन्ते ?

मू. (८६५) एक्के य दो व तिन्नि व पाए गच्छप्पमाणमासज्ज।
अच्छदवस्स भरेज्जा कम्मद्धणिए विगिंचेज्जा॥

वृ. एकं द्वे त्रीणि वा पात्रकाणि भ्रियन्ते, गच्छप्रमाणं ज्ञात्वा चतुष्प्रभृतीन्यपि भ्रियन्ते स्वच्छद्रवस्य, तत्र च गलिते सति कर्मार्द्र-कच्चरं बीजानि च-गोधूमादीनि 'विगिंचेत' परित्यजेत्, एवं तावत् पात्रकर्णनापि

उपक्रमपवृत्त्य पात्रकालनं क्रियते। अथ पुनस्तत्र कीटिकामकोटिकादयः प्लवमाना दृश्यन्ते ततस्तत्र गलिते को विधिः ? इत्यत आह-

मू. (८६६) मुइंगाईमक्कोडएहिं संसत्तगं च नाऊणं।
गालेज्ज छव्वएणं सउणीघरएण व दवं तु ॥

वृ. मुइंगा-कीटिका मकोटकाश्च तैः संसक्तं ज्ञात्वा गालयेत् 'छव्वएणं' वंशपिटकेन शुकनिमृहकेन वा गालयेत् तद् द्रवं।

मू. (८६७) इय आलोइयपडिविअगालिए मंडलीइ सट्ठाणं।
सज्झायमंगलं कुणइ जाव सव्वे पडिनियत्ता ॥

वृ. 'इय'त्ति पूर्वोक्त विधिना आलोचिते सति प्रस्थापिते स्वाध्याये गलिते च पानके पुनश्च मण्डल्यां स्वस्वस्थाने उपविश्य स्वाध्यायमण्डलं करोति-स्वाध्याय एव मण्डलं स्वाध्यायमङ्गलं तत्करोति यावत् सर्वे साधवः प्रतिनिवृत्ता भवन्तीति। एवं यदि सहिष्णवस्ततो योगपद्येन भुञ्जते, अथासहिष्णवस्तत्र केचिद्भवन्ति ततः को विधिरित्याह-

मू. (८६८) कालपुरिसे व आसज्ज मत्तए पक्खिवित्तु तो पढमा।
अहवावि पडिग्गहगं मुयंति गच्छं समासज्ज ॥

वृ. स चासहिष्णुर्ग्रीष्मकालाद्यङ्गीकृत्य भवति, तत एव वा पुरुषः कदाचित् क्षुधार्त्तो भवति, तमाश्रित्य मात्रके प्रक्षिप्य भक्तं प्रथमालिका तावद्दीयते अथ बहवः क्षुधालवस्ततः पतद्ग्रहके मुच्यते तेभ्यो रक्षणार्थं गच्छं 'समासज्ज'त्ति गच्छमल्पं बहुं वा ज्ञात्वा तदनुरूपं पतद्ग्रहं भुञ्जति। पुनश्च मिलितेषु साधुषु मण्डलीस्थविरः प्रविशति, किं कृत्येत्यत आह-

मू. (८६९) चित्तं बालाईणं गहाय आपुच्छिऊण आयरिअं।
जमलजननीसरिच्छो निवेसई मंडलीथेरो ॥

वृ. चित्तं बालादीनां गृहीत्वा पृष्ट्वाऽऽचार्यं मण्डलीस्थविरः प्रविशति, किंविशिष्टः ? इत्यत आह- जमल-जननीसरिच्छो 'निवेसई' उपविशति मण्डलीस्थविर इति, स च मण्डलीस्थविरो गीतार्थो रत्नाधिकोऽलुब्धश्च भवति। अनेन च पदत्रयेणाष्टौ भङ्गा सूचिता भवन्ति, तत्र तेषां मध्ये ये शुद्धाऽशुद्धाश्च तान् प्रदर्शयन्नाह-

मू. (८७०) जइ लुद्धो राइनि होइ अलुद्धोवि जोवि गीयत्थो।
ओमोवि हु गीयत्थो मंडलिराइणि अलुद्धो ॥

वृ. यद्यसौ मण्डलीस्थविरो लुब्धो रत्नाधिकश्च ततस्तिष्ठति-न प्रविशति, अनेन च लुब्धपदेन द्वितीयचतुर्थषष्ठाष्टमा भङ्गा अशुद्धाः प्रदर्शिता भवन्ति। 'अलुद्धोवि जोवि गीयत्थो ओमोवि हु'त्ति अलुब्धोऽपि यदि गीतार्थ ओमः-लघुपर्यायः स मण्डल्यां परिविशति, अनेन च ग्रन्थेन तृतीयो भङ्गकः कथितो भवति, अयंच प्रथमभङ्गकाभावे भवति, अत्र च भङ्गके गीतार्थपदग्रहणेन यत्र यत्र भङ्गकेऽगीतार्थपदं स सर्वो दुष्टो ज्ञातव्यः। 'गीयत्थो मंडलिराइणिउत्ति अलुद्धो'त्ति यस्तु पुनर्गीतार्थो रत्नाधिकोऽलुब्धश्च स मंडल्यामुपविशति, अनेन च ग्रन्थेन प्रथमो भङ्गकः शुद्धः प्रदर्शितो भवति, सर्वथा यत्र यत्र लुब्धपदमगीतार्थ-पदं च स परिहार्यः, ओमराइनियपदं च यद्यगीतार्थः लुब्धपदं च न भवति ततोऽपवादे शुद्धं भवति, प्रथमं तु शुद्धमेव ॥ इदानीं ते मिलिताः सन्त आलोके भुञ्जते, स चालोको द्विविधोद्रव्यतो भावतश्च, तत्र द्रव्यतः प्रदीपादिः, भावतः सम्प्रकारमन्तं दर्शयन्नाह-

मू. (८७१) ठाणदिसिपगासणया भायणपक्खवणा य भावगुरु ।
सो चेव य आलोगो नाणत्तं तद्दिसा ठाणं ॥

वृ. स्थानं वक्तव्यं उपविशनं दिग् वक्तव्या प्रकाशमुखं भाजनं भोक्तव्यं, भाजनक्रमो वक्ष्यमाणः प्रक्षेपणं वदने वक्तव्यं, भावालोको वक्तव्यः, गुरुर्वक्तव्यः, स एवालोकः पूर्वोक्तः, नानात्वं त्वत्र यदि परं दिशः स्थानस्य च, अत्र निकृष्टमन्यथावक्ष्यति स्थानं च ॥ इदानीं भाष्यकारः स्थाननानात्वं दर्शयति-

मू. (८७२) निक्खमपवेस मोत्तुं पढमसमुद्दिस्सगाण ठायंति ।
सज्झाए परिहानी भावासन्नत्वमाईया ॥ [भा. २८१]

वृ. प्रथमसमुद्दिष्टानां ग्लानादीनां निर्गमप्रवेशौ मुक्त्वा उपविशन्ति, किमर्थं ? तत्र यदि ते मार्गं रुद्ध्वा मण्डल्यां निषीदन्ति ततः पूर्वोक्तानां स्वाध्यायपरिहानिर्भवति तथा 'भावासन्नस्थ' भक्तादिवेगधारणा सहिष्णोः पीडा भवति ? एवमादयोऽन्येपि दोषाः ।

मू. (८७३) पुव्वमुहो गाइनिओ एक्को य गुरुस्स अभिमुहो ठाइ ।
गिण्हइ व पणामेइ व अभिमुहो इहरहाऽपत्ता ॥ [भा. २८२]

वृ. पूर्वाभिमुखो रत्नाधिक उपविशति मण्डल्यां, तस्यां च मण्डल्यामेकः साधुर्गुरोरभिमुख उपविशति, किमर्थं ?, कदाचित्किञ्चिद्गुरोरतिरिक्तं भवति तद् गृह्णाति दातव्यं वा किञ्चिद्भवति तद्ददाति मण्डलीस्थविरेणार्पितं, एवमर्थमभिमुख उपविशति, इतरथा-यद्यभिमुखो नोपविशति ततोऽवज्ञा-परिभवः कृतो भवति, पृष्ट्यादि दत्त्वोपविशति ततोऽप्यवज्ञादिकृता दोषा भवन्ति ॥

मू. (८७४) जो पुन हव्वेज्ज खमओ अतिउच्चाओ व सो बहिं ठाइ ।
पढमसमुद्दिट्ठो वा सागारियरक्खणट्ठाए ॥

वृ. यस्तु पुनः क्षपकोऽर्द्धमासादिना भवेद् अतिश्रान्तो वा प्राघुर्णकादिः स बहिर्मण्डल्यास्तिष्ठति, प्रथमसमुद्दिष्टो वा साधुः शीघ्रतरेण येन भुक्तं स सागारिकरक्षणार्थं बहिस्तावन्मण्डल्यास्तिष्ठति ॥

मू. (८७५) एक्केक्कस्स य पासंमि मल्लयं तत्थ खेलमुग्गाले ।
कट्ठट्ठिए व छुब्भइ मा लेवकडा भवे वुग्गही ॥

वृ. तत्र च साधूनां भुञ्जानानामेकैकस्य साधोः पार्श्वे मल्लकं भवति, तत्र खेलश्लेष्म उद्गालयंतत्तस्मिन् मल्लके श्लेष्मनिष्ठीवनं कुर्वन्ति, तथा तत्र भुञ्जत- कदाचित्कण्टोऽस्थिरखण्डं वा भवति स तत्र क्षिप्यते, अथ तु भुवि क्षिप्यतेऽस्थिकण्टकादि ततो वसतिर्लेपकृता-अनायुक्ता भवति, अतस्तत्परिहारार्थं मल्लकेषु क्षिप्यते । तथाऽमुमपरं भुञ्जानानां विधिं प्रतिपादयन्नाह-

मू. (८७६) मंडलिभायण मायण गहणं मोत्तूण कारणुव्वरिते ।
भोयणविही उ एसो भणिओ तेलुक्क दंसीहि ॥

वृ. मंडलिभायणभोयण गहणं कर्त्तव्या, भाजनानि च पूर्वं आद्राकडाइ भुञ्जन्ति, भोजनं च स्निग्धमधुरं पूर्वं भोक्तव्यं, ग्रहणं च पात्रकात् बुक्कणखण्डकमात्रं कवलं गृह्णाति, तथा ग्रहणस्यैव शुद्धिर्वक्तव्या, अथवा शुद्धिर्भुञ्जानस्य यथा भवति तथा वक्तव्यं, कारणे भोक्तव्यं, तथा 'उव्वरिए'त्ति अतिरिक्तं विधिर्वक्तव्यः । अयं भोजनविधिः सुगमः इदानीं भाष्यकारः प्रतिपदं व्याख्यानयति, तत्राद्यावयवव्याचिख्यासयाऽऽह-

मू. (८७७) मंडलि अहराइनिआ सामायारीय एस जा भणिआ ।
पुव्वं तु अद्दाकडगा मुच्चंति तओ कमेनियरे ॥ [भा. २८३]

वृ. मण्डली कथमुपविशति ।, अत आह-यथारत्नाधिकतया सामाचारी चात्र कार्या, एषा 'योक्ता' भणिता, कतमा ?, "ठाणादिसिंगपगासणया" इत्येवमादिका साऽत्रापि तथैव द्रष्टव्या। उक्तं मण्डलीद्वारम्, इदानीं भाजनद्वारप्रतिपादनायाह-'पुव्वं तु अहाकडगा' 'पूर्वं प्रथमं' 'यथाकृतानि' प्रतिकर्मरहितानि लब्धानि यानि तानि समुद्देशनार्थं मुच्यंते, एतदुक्तं भवति-प्रथमप्रतिकर्मा प्रतिग्रहो भाज्यते, ततः क्रमेण 'इतरे' अल्पपरिकर्मबहुपरिकर्माणि च मुच्यन्ते । 'भायण'त्ति गयं, इदानीं 'भोयणं'ति व्याख्यायते-

मू. (८७८) निद्धमहुराणि पुव्वं पित्ताईपसमणट्ठया भुंजे ।
बुड्ढिबलवड्ढणट्ठा दुक्खं खु विकिंचिउं निद्धं ॥ [भा. २८४]

वृ. प्रथमार्द्धं सुगमं। किमर्थं स्निग्धमधुराणि पूर्वं भक्ष्यन्ते ?, यतो बुद्धेर्बलस्य च, वर्द्धनं भवति, तथा चाह-"धृतेन वर्द्धते मेधा" इत्यादि, बलवर्द्धनं च प्रसिद्धमेव, बलेन च वृद्धेन वैयावृत्त्यादि शक्यते कर्तुं, दुःख परित्यापयितुं स्निग्धं-घृतादि भवति यतोऽसंयमो भवतीति ॥

मू. (८७९) अह होज्ज निद्धमहुराणि अप्पपरिकम्मसपरिकम्मेहिं ।
भोत्तूण निद्धमहुरे फुसिअ करे मुचंऽहाकडए ॥ [भा. २८५]

वृ. अथ भवेत् स्निग्धानि मधुराणि च द्रव्याणि अल्पपरिकर्मसु बहुपरिकर्मवतिषु च पात्रकेषु ततः को विधिरित्यत आह-तान्येव भुक्त्वा स्निग्धमधुराणि ततः करान् प्रोञ्छयति प्रोञ्छयित्वा च करान् 'मुंचऽहाकडए'त्ति यथाकृतानि-अपरिकर्माणि पात्रकाणि समुद्दिशनार्थं मुच्यन्ते। 'भायण'त्ति गयं-

मू. (८८०) कुक्कुडिअंडगमित्तं अहवा खुड्डागलंबणासिस्स ।
लंबणतुल्ले गिण्हइ अविगियवयणो य राइनिओ ॥ [भा. २८६]

वृ. ततः पतद्ग्रहकान्कवलं गृह्णान् कुक्कुट्यण्डकमात्रं गृह्णाति, अथवा 'खुड्डागलंबनासिस्स' क्षुल्लकेन लम्बनकेन-हस्तेन अशितुं शीलं यस्य स क्षुल्लकलम्बनाशी तत्तुल्यान् कवलान् गृह्णाति-स्वभावेनैव लघुकवलाशिनस्तुल्यान् कवला गृह्णाति 'अविकियवयणो य राइनिओ' अविकृतवदनो रत्नाधिकः, न भावदोषेण मुखमन्यथा बृहत्कवलप्रक्षेपार्थं निर्वादयति, किं तर्हि ?, स्वभावस्थेनैव मुखेनेति। अथवाऽयं ग्रहणविधिः-

मू. (८८१) गहणे पक्खेवंमि अ सामायारी पुणो भवे दुविहा ।
गहणं पायंमि भवे वयणे पक्खेवणा होइ ॥ [भा. २८७]

वृ. 'गहणे' कवलदाने प्रक्षेपे च सामाचारी पुनरियं भवति द्विविधा, तत्र ग्रहणं पात्रकविषये भवेत् पात्रकात्कवलोत्पादः, वदनविषये च प्रक्षेपणं कवलस्य भवति। तत्र पात्रकात्कथं भक्षयद्भिर्गृह्यते ?

मू. (८८२) कडयरच्छेएणं भोत्तव्वं अह व सीहरवडणं ।
एगेहि अनेगेहिवि वज्जेत्ता घूमइंगालं ॥ [भा. २८८]

वृ. तत्र कटकरच्छेदेन भोक्तव्यं यथा कलिभस्य खण्डलकं छित्वाऽपनीयते, एवमसावपि भुङ्क्ते, तथा प्रस्तरच्छेदेन वा भोक्तव्यं तरिकाच्छेदेनेत्यर्थः, अथवा सिंहभक्षितेन, सिंहो हि किल एकदेशादारभ्य तावद्भक्षयति यावत्सर्वं भोजनं निष्ठितं तत्रैकेन बहुभिर्वा भोक्तव्यं, वर्जयित्वा धूमाङ्गारकं, द्वेषरागौ वर्जयित्वेत्यर्थः। इदानीं वदनप्रक्षेपणशोधिं दर्शयन्नाह-

मू. (८८३) असुरसुरं अचवचवं अदुयमविलंबिअं अपरिसाडिं ।
मनवयणकायगुत्तो भुंजइ अह पक्खिवणसोहिं ॥ [भा. २८९]

वृ. अगुरुमुरं भुङ्क्ते -मरडमरडं अकुर्वितो 'अचवचवं' बल्कमिव चर्वयन् न चबचबावेइ, तथा 'अद्रुतम्' अत्वरितं, तथा 'अविलम्बितम्' अमन्थरं अपरिशाटि मनोवाक्कायगुप्तो भुञ्जान. न मनसा विरूपमिति चिन्तयति. वाचा नैवं वक्ति . यदुत को इमं भक्खेइ ? जो अम्हारिसो न होइ. काएण उल्लोसए मुहेण न देइ, एवं त्रिगुप्तस्य भुञ्जानस्य प्रक्षेपणशोधिर्भवति ॥

मू. (८८४) उग्गमउप्पायणासुद्धं, एसणादोसवज्जिअं ।
साहारणं अयाणंतो, साहू हवइ असारओ ॥

मू. (८८५) उग्गमउप्पायणासुद्धं एसणादोसवज्जिअं ।
साहारणं वियाणंतो साहू हवइ ससारओ ॥

मू. (८८६) उग्गमउप्पायणासुद्धं, एसणादोसवज्जिअं ।
साहारणं अयाणंतो, साहू कुणति तेणिअं ॥

मू. (८८७) उग्गमउप्पायणासुद्धं, एसणादोसवज्जिअं ।
साहारणं वियाणंतो, साहू पावइ निज्जरं ॥

मू. (८८८) अंतंतं भोक्खामित्ति बेसए भुंजए य तह चेच ।
एस ससारनिविट्ठो संसारओ उड्ढिओ साहू ॥

वृ. उद्गमशुद्धं उत्पादनाशुद्धं एषणादोषवर्जितं 'साधारणं' सामान्यं गुडादि अजानानः-अतिमात्रं दुष्टेन भावेन आदनानःयोऽसौ पतद्ग्रहो भ्रमति तस्मात् साधुः 'असारक-' अप्रधानज्ञानदर्शनचारित्रा-ण्यङ्गीकृत्यासारःस भवति । तथा उद्गमोत्पादनाशुद्धमेषणादोषवर्जितं साधारणमेतद्द्रव्यमित्येवं जानानोऽदुष्टेनान्तरात्मना कवलं गुडादेराददानः साधुर्भवति 'ससारः' ज्ञानदर्शनचारित्रसारवान् भवति। कथं पुनरसारः साधुर्भवति ? अत आह-उद्गमोत्पादनाशुद्धमेषणादोषवर्जितं साधारणमेतद्गुडादीत्येव जाना-नानो दुष्टेन भावेनाददानः साधुः स्तेयं करोति ततोऽसारोऽसौ । स कथं पुनः ससारो भवति ?-उद्गमोत्पादनाशुद्धमेषणादोषवर्जितं 'साधारणं' तुल्यमेतत्सर्वेषां गुडादीत्येवं जानानोऽदुष्टान्तरात्मा स्वल्पमाददानः साधुर्निर्जरां करोति अतः ससारो ज्ञानदर्शनचारित्रैरिति । इदानीं ससारः कदाचिद्-भोजनार्थमुपविशन् भवति कदाचिदुपविष्टः कदाचिदुत्थितः, एतत्प्रदर्शनायाह-अन्त्यं-प्रत्यवरं वल्लचणकादि तदप्यन्त्यं-पर्युषितं चणकादि अन्त्यमप्यन्त्यमन्त्यान्त्यं भक्षयिष्यामि एवंविधेन परिणामेनोपविष्टो मण्डल्यां भुङ्क्ते यस्तथैव एष साधुः शुभपरिणामत्वात्ससार उपविष्टः ससारश्चोत्थितः, तस्य शुभपरिणामस्याप्रति-पतितत्वात्, एवमेव भङ्गत्रितयं योजनीयं, तत्र प्रथमो भङ्गः ससारो निविट्ठो ससारो उट्ठिओ १, ससारो निविट्ठो असारो उट्ठिओ विइओ भंगो २, असारो निविट्ठो ससारो उट्ठिओ तइओ ३, असारो निविट्ठो असारो उट्ठिओ एस चुत्थो ४, सारश्चात्र ज्ञानादि. आदिग्रहणादर्शनं चारित्रं चेति, तेन ज्ञानादिना सहितो यः साधुः स ससारो भण्यते । अत्र च समुद्रवणिजा दृष्टान्तः ॥ एगो समुद्दवणिओ बोहित्थं भंडस्स भरित्तुं ससारो गओ, ससारो य पउरं हिरन्नाइ विढवेऊणं आगओ । अन्नो पुण सारो भंडं गेहऊणं गओ निस्सारो आगओ कवडियाएवि रहिओ, तंपि पुव्वेल्लयं हारेऊण आगओ । अन्नो असारो भंगविनिओ निहिरन्नो गओ ससारो आगओ पभूयं विढवेऊण । अन्नो पुन असारो हिरन्नरहिओ गओ असारो चेव आगओ कवडियाएवि रहिओ ॥ एवं साधोरपि सारासारयोजना कर्तव्या वणिगुन्यायेन ॥ एवं तेषां भुञ्जानानां यदि पतद्ग्रहको भ्रमत्येवार्द्धपथे निष्ठां याति तदा को विधिरित्यत आह-

मू. (८९०) जत्थ पुन पडिग्गहगो होज्ज कडो तत्थ छुब्भए अन्नं।
मत्तगगहिउव्वरिअं पडिग्गहे जं असंसट्ठं॥

मू. (८९१) जं पुन गुरुस्स सेसं तं छुब्भइ मंडलीपडिग्गहंके।
बालादीण व दिज्जइ न छुब्भई संसगाणऽहिअं॥

मू. (८९२) सुक्कोल्लपडिग्गहगे विआणिआ पक्खिवे दवं सुक्के।
अभत्तट्ठिआण अट्ठा बहुलंभे जं असंसट्ठं॥

वृ. यत्रपुनर्भुञ्जानानां पतद्ग्रहो 'भवेत्' कडो'त्ति निष्ठितभक्तं। जातः साधुपर्यन्तमप्राप्त एव, तत्र किं कर्तव्यमित्यत आह- 'तत्र' तस्मिन्निष्ठितभक्ते पतद्भक्तकेऽन्यद्भक्तं प्रक्षिप्यते, ततश्च यस्मिन् साधौ स निष्ठितः पतद्भक्तस्तत आरभ्य तेनैवक्रमेण पर्यभ्यते, मात्रके वा यद्यालादीनां प्रायोग्यं गृहीतमासीत् तदिदानीं उद्धरितं तदसंसृष्टं पतद्ग्रहे क्षिप्त्वा पतद्भक्तो यस्मिन साधौ निष्ठितस्तस्मादारभ्य पर्यभ्यते। यत्पुनर्गुरोः शेषं भुञ्जानस्य जातं तत्संसृष्टमपि प्रक्षिप्यते मण्डलीपतद्भक्तके, बालादीनां वा दीयते तदाचार्योद्धरितं, यत् पुनराचार्यव्यतिरिक्तानामुद्धरितम्-अधिकं जातं तत्र प्रक्षिप्यते मण्डलीपतद्ग्रहके संसृष्टं सत्। किञ्च, 'सुक्क'त्ति एकः शुष्केण भक्तेन पतद्ग्रहः अपरः 'उल्ल'त्ति आर्द्रेण भक्तेन पतद्ग्रहः, एवं विज्ञाय ततः प्रक्षिपेद् द्रवं शुष्कभक्तपतद्ग्रहे, येन तोयप्रक्षेपेण संजातबन्धं तद्भक्तं सुखेनैव कवलं-गृह्यते, अथ बहुलाभः संजातः-प्रचुरं लब्धं गुडादि ततोऽसंसृष्टमेव धियते, किमर्थम्?, अभक्तार्थिकानामर्थे येन मनोज्ञं भवेत् उक्तं। ग्रहणशुद्धिः, अधुना भुञ्जानस्य शोधिरुच्यते, सा चतुर्धा, एतदेवाह-

मू. (८९३) सोही चउक्कभावे विगइंगालं च विगयधूमं च।
रागेण सयंगालं दोसेण सधूमगं होइ॥

मू. (८९४) जत्तासाहणहेउं आहारेंति जवणट्ठया जइणो।
छायालीसं दोसेहिं सुपरिसुद्धं विगयरागा॥

मू. (८९५) हियाहारा मियाहारा, अप्पाहारा य जे नरा।
न ते विज्जा तिगिच्छंति, अप्पाणं ते तिगिच्छगा॥

वृ. शुद्धौ चतुष्कके भवति नामस्थापनाद्रव्यभावरूपं, तत्र नामस्थापने सुगमे, द्रव्यशोधिः, पूर्ववत, भावविषया पुनः शोधिः विनगाङ्गारं विगतधूमं च भुञ्जानस्य भावशोधिर्भवति, कथं साङ्गारं कथं सा सधूमं भवतीति?, एतदेवाह-'रागेन' इत्यादि सुगमं॥ 'चारित्रयात्रासाधनार्थं' धर्मसाधननिमित्तमाहारयन्ति यापनार्थं-शरीरसंधारणार्थं मुनयः षट्चत्वारिंशद्दोषैः सुपरिशुद्धमाहारयन्ति, के च ते?, के च ने?, षोडशो-द्गमदोषाः षोडशोत्पादनादोषाः दशैषणा दोषाः संयोजना प्रमाणं साङ्गारं सधूमकं चेत्येते षट्चत्वारिंशत्, एभिर्विशुद्धं सद् विगतरागा आहारयन्ति॥ निगमो सुगमः॥ उक्तो भुञ्जनविधिः-

मू. (८९६) छण्हमन्नयरे ठाणे, कारणंमि उ आगए।
आहारेज्ज(उ) मेहावी, संजए सुसमाहिए॥

मू. (८९७) वेयणवेयावच्चे इरियट्ठाए य संजमट्ठाए।
तह पाणवत्तियाए छट्ठं पुन धम्मचिंताए॥

मू. (८९८) निग्गंथ छट्ठाए सग्गिया वेयण भुंजेज्ज तप्पसमणट्ठा।
छाओ वेयावच्चं न तरइ काउं अओ भुंजे॥ [भा. २९०]

मू. (८९९) इरियं नवि सोहेइ पेहाईयं स संजमं काउं।
थामो वा परिहायइ गुणणुप्पेहासु य असत्तो॥ [भा. २९१]

वृ. षण्णांस्थानानामन्यतरस्मिन्स्थाने-कारणे आगते सति आहारयेन्मेधावी संयतः सुसमाहितः। कानि च तानि षट् स्थानानि ? इत्यत आह-वेदना-क्षुद्वेदना तत्प्रशमनार्थं भुङ्क्ते, तथा वैयावृत्त्यार्थं तथा ईर्यापथिकाशोधनार्थं तथा संयमार्थं स च पेहोपेक्षप्रमज्जणादिलक्षणः, तथा 'पाणवत्तियाए' प्राणसंधारणार्थं, षष्ठं पनुर्धर्मचिन्तार्थं भुङ्क्ते। अधुनैतां गाथां भाष्यकृत्प्रतिपदं व्याख्यानयति, आद्यावयवं तावदाह-नास्ति क्षुत्सरिसी वेदनाऽतो भुञ्जीत तत्प्रशमनार्थं। 'छाओ'त्ति बुभुक्षितो वैयावृत्त्यं कर्तुं न शक्नोति अतो भुङ्क्ते। ईर्यापथिकां बुभुक्षितोन शोधयति यतोऽतस्तच्छोधनार्थंभुङ्क्ते। तथा 'पेहाईयंव'त्ति 'पेहोपेक्षमज्जण' इत्यादिकं संयमं बुभुक्षितः कर्तुं न शक्नोति यतोऽतो भुङ्क्ते। 'थामोवा' प्राणस्तस्य परिहानिर्भवति यदि न भुङ्क्ते अतस्तदर्थंभुञ्जीत। दारं तथा गुणनंपूर्वपठितस्य अनुप्रेक्षाचिन्तनंग्रन्थार्थयोः एतदसौ कर्तुमसमर्थः सन्भुङ्क्ते।

मू. (९००) अहवा न कुज्ज आहारं, चहिं ठाणेहिं संजए।
पच्छा पच्छिमकालंमि, काउं अप्पक्खमं खमं॥

मू. (९०१) आयंके उवसग्गे तितिक्खया बंभचेरगुत्तीए।
पाणदयातवहेउं सरीरवोच्छेयणट्ठाए॥

मू. (९०२) आयंको जरमाई गया सन्नायगा व उवसग्गा।
बंभवयपालणट्ठा पाणदयावासमहियाई॥

मू. (९०३) तवहेउ चउत्थाई जाव छउम्मासिओ तवो होइ।
छट्ठं सरीरवोच्छेयणट्ठया होयणाहारो॥

मू. (९०४) एएहिं छहिं ठाणेहिं अणाहारो य जो भवे।
धम्मं नाइक्कमे भिक्खू, झाणजोगरओ भवे॥

वृ. अथवा न कुर्यादिवाहारमेभिः षड्भिः स्थानैर्वक्ष्यमाणलक्षणैः। तत्र निर्युक्तिकार एव षष्ठं पदं व्याख्यानयन्नाह-'पच्छा पच्छिमकालंमि' पश्चिमकाले-संलेखनाकाले 'आत्मक्षमाम्' आत्महितां क्षमां-क्षान्तिमुपशमं कृत्वा ततः पश्चात्-सुखेन शरीरपरिकर्मानन्तरं सर्वाहारं मुञ्चतीति॥ इदानीं भाष्यकार एव एतानि षट् स्थानानि प्रदर्शयन्नाह-'आतङ्क' ज्वरादिर्वक्ष्यते, तथा 'उपसर्गः' राजादिजनितः, एतेषां 'तितिक्षार्थं' सहनार्थं न भोक्तव्यं, तथा ब्रह्मचर्यगुप्त्यर्थं च न भोक्तव्यं, तथा तपोऽर्थं शरीरव्यवच्छेदार्थं च न भोक्तव्यमिति। इदानीं भाष्यकारः प्रतिपदं व्याख्यानयति, तत्राद्यावयवव्याचिख्यासयाऽऽह-आतङ्को-ज्वरादिः, आदिग्रहणादन्यो व्याधिर्यत्र भोजनं न पथ्यं तदर्थं न भुङ्क्ते। दारं। राजा राजकुलधारणादिरूपो यद्युपसर्गः कृतः स्वजनो वा-स्वजनः यदि उन्निष्क्रमणार्थमुपसर्गं करोति ततो न भुङ्क्ते। ब्रह्मव्रतपालनार्थं न भुङ्क्ते, यतो बुभुक्षितस्योन्मादो न भवति। तथा प्राणदयार्थं न भुङ्क्ते, यदि वर्षति महिका वा निपतति तपोऽर्थं न भुङ्क्ते तच्च चतुर्थादि यावत्षण्मासान्तावत्तपो भवति तदर्थं न भुङ्क्ते। षष्ठं शरीरस्य व्यवच्छेदार्थमनाहारः साधुर्भवतीति॥ एभिः पूर्वोक्तैः षड्भिः कारणैरनाहार आहारयितव्यः षड्भिः कारणैराहारयितव्यस्ततः किमेतद्भोजनमपवादपं ?, उच्यते ?, अपवादपदमेवैतद्, यतः-

मू. (९०५) भुंजंतो आहारं गुणोवयारं सरीरस्साहारं।
विहिणा जहोवइट्ठं संजमजोगाण वहणट्ठा॥

वृ. भुञ्जानाहारं. किंविशिष्टं ?-'गुणोपकारं' ज्ञानदर्शनचारित्रगुणानामुपकारकं, तथा शरीरस्य साधारकमाहारं भुञ्जन विधिना-ग्रासैषणाविशुद्धं 'यथोपदिष्टम्' आधाकर्मादिरहितं 'संयमयोगानां' संयमव्यापाराणां वहनार्थं भुञ्जानपवादयदस्य एव भुङ्क्ते, नान्यथा। इदानीं समुद्दिष्टे सति संलिहनकल्पः कर्तव्यः-भिक्षाभक्तं विलिप्तानां पात्रकाणां संलिहनं कर्तव्यमित्यर्थः. स च-

मू. (९०६) भत्तट्ठियावसेसो तिलंबणा होइ संलिहणकप्पो।
अप्पहुप्पंते अन्ने छोढुं ता लंबणे ठवए॥

मू. (९०७) संदिट्ठा संलिहिउं पढमं कप्पं करेइ कलुसेणं।
तं पाउं मुहमासे बितियच्छदवस्स गिण्हंति॥

मू. (९०८) दाऊण बितियकप्पं बहिआ मज्झट्ठिओ उ दवहारी।
तो देंति तइयकप्पं दोण्हं दोण्हं तु आयमणं॥

वृ. भुक्तानामवशेषो यः स संलेखनकल्पः कर्त्तव्यः, स चावशेषो न ज्ञायते क्रियत्प्रमाणः ? अत आह-'तिलम्बनः' त्रिकवलः कवलत्रयप्रमाणो भुक्त विशेषः संलेखनकल्पः कर्त्तव्यः, यदा तु त्रिकवलप्रममाणः संलेखनकल्पो न भवति तदाऽपर्याप्यमाणेऽन्यदपि तस्मिन् पात्रके भक्तं प्रक्षिप्य ततस्त्रीन् कवलान् स्थापयति। 'सन्दिष्टाः' भुक्ता। सन्तः संलिह्य पात्रप्यमाणेऽन्यदपि तस्मिन् पात्रके भक्तं प्रक्षिप्य ततस्त्रीन् कवलान् स्थापयति। 'सन्दिष्टाः' भुक्ता। सन्तः संलिह्य पात्रकाणि पुनश्च प्रथमं कल्पं ददति कुलषोदकेन, पुनश्च तत्पीत्वा 'मुहमासो'त्ति मुखस्य परामर्शः-प्रमार्जनं कुर्वन्तीति, पुनश्च द्वितीयकल्पार्थमच्छस्य दवस्य ग्रहणं कुर्वन्तीति, गृहीत्वाऽथ कल्पार्थमच्छद्रवं मण्डल्या उत्थाय बहिः पात्रकप्रक्षालनार्थं गच्छन्ति। तत्र दत्त्वा द्वितीयकल्पं 'बाह्यतः' पात्रकप्रक्षालनभूमौ, ते धर्मण्डल्याकारेण तत्रोपविशन्ति, तेषां मध्ये स्थितो द्रवधारी भवति, स च पात्रकप्रक्षलानं सर्वेषामेव प्रयच्छतीति, ततो ददति ते साधवः, पात्रकाणां तृतीयं कल्पं, पुनश्च पात्रकप्रक्षालनानन्तरं 'दोण्हं दोण्हं व आयमणं'ति द्वयोर्द्वयोः साध्वोर्मात्रिकेषु 'आचमनार्थं' निर्लेपनार्थमुदकं प्रयच्छतीति। एत तावदनुद्धरिते भक्ते विधिरुक्तः, यदा तु पुनरुद्धरितं भक्तं भवति तदा को विधिरित्यत आह-

मू. (९०९) होज्ज सिआ उद्धरियं तत्थ य आयंबिलाइणा हुज्जा।
पडिदंसि अ संदिट्ठो वाहरइ तओ चउत्थाई॥

मू. (९१०) मोहचिगिच्छविगिट्ठं लिगाण अन्नट्ठियं च मोत्तूणं।
सेसे गंतुं भणई आयरिआ वाहरंति तुमं॥

मू. (९११) अपडिहणंतो आगंतु वंदिउं भणइ सो उ आयरिए।
संदिसए भुंज जं सरति तत्तियं सेस तस्सेव॥

मू. (९१२) अभणंतस्स उ तस्सेव सेसओ होइ सो विवेगो उ।
भणिओ तस्स उ गुरुणा एसुवएसो पवयणस्स॥

मू. (९१३) भुत्तंमि पढमकप्पे करेमि तस्सेव देंति तं पायं।
जावतिअंनिअ भणिए तस्सेव विगिंचणं सेसं॥

वृ. 'भवेत' स्यात् कदाचिदुद्धरितं 'तत्र' साधूनां मध्ये कदाचित्केचिदाचाम्लादयो भवन्ति आदिग्रहणादभक्तार्थिका वा कश्चिदभवेत्तस्तदुद्धरितं भक्तं रत्नाधिक आचार्याय दर्शयति, पुनश्च प्रदर्शिते

भक्ते गुरुणा च 'सन्दिष्टः' उक्तः यदुत आहृत्याचाम्लादीन् साधून् येन तेभ्यो दीयते, पुनश्चासौ रत्नाधिकः सन्दिष्टः सन् चतुर्थादीन् साधून् व्याहरति। स च व्याहरन्नेतान्न व्याहरति, मोहचिकित्सार्थं य उपवासिकः स्थितस्तं न व्याहरति, तथा विकृष्टतपसं साधुं न व्याहरति, विकृष्टतपश्चाष्टमादारभ्य भवति, तस्य कदाचिद्देवता प्रातिहार्यं करोति अतस्तस्य न दीयते, ग्लानश्च ज्वरादिना तं च न व्याहरति, आत्मलब्धिकं च न व्याहरति, एताननन्तरोदितान् साधून् मुक्त्वा शेषान् गत्वा भणति, यदुत आचार्या व्याहरन्ति युष्यमान्, तेषां च मध्ये यश्चतुर्थादिक आकारितः स आकर्ण्य किं करोति ? इत्याह-अनतिलङ्घयन् गुरोराज्ञामागत्य वन्दित्वा भणति तमाचार्यं यदुत-संदिशत यूयं, आचार्योऽपि भणति-भुञ्जीत, सोऽपि भणति-जं सरति तत्तिअं भुआमि. शेषं यदुद्धरितं तत्तस्यैव यस्य सत्कः प्रतिग्राहकः, पुनश्च स एव परिष्ठापयतीति अथासौ साधुरेवं न भणति यदुत 'जं सरइ तत्तिअं' ततस्तस्य एवमभणतस्तस्यैव यच्छेषं भक्ते मुद्धरितं तद्भवति, स एव 'विवेचकः' परिष्ठापक इत्यर्थः, भणितं तु एवं "जावइयं सरइ तावइयं सरामी"ति, ततस्तस्यैव साधोर्यस्य सत्कः पतद्ग्राहकः समर्पणीयः पुनः स एक कल्पं ददाति। अयं प्रवचनस्य पूर्वोक्त उपदेशः। अथ यदुद्धरितं तत्सर्वं भुञ्जते, ततस्तस्मिन् भुक्ते सति तस्य पात्रकस्य प्रथमकल्पं ददाति, कृते च तस्मिन् प्रथमकल्पे तस्यैव साधोर्यस्य सत्कः पतद्ग्रहकस्तस्यैव तत्पात्रकं 'ददाति' समर्पयतीत्यर्थः, अथैतन्न ब्रूते यदुत जावइयं सरइ तावइयं सारेमित्ति, ततः जावतिअंति अभणिते सति तस्यैव साधोर्यः परिस्थापनिकभोक्ता। तस्यैव यदुद्धरितं शेषं तत्परित्याज्यं भवति। इदं च पूर्वोक्तस्यैव व्याख्यानं द्रष्टव्यं न तु पुनरुक्त मिति। कीदृशं पुनश्चतुर्थोपवासिकादेः पारिष्ठापनिकं कल्पते ?, अत आह-

मू. (९१४) विहिगहिअं विहिभुत्तं अइरेगं भत्तपानं भोत्तव्वं।
विहिगहिए विहिभूत्ते एत्थ य चउरो भवे भंगा॥

मू. (९१५) उग्गमदोसाइजढं अहवा बीअं जहिं जहापडिअं।
इय एसो गहणविही असुद्धपच्छायणे अविही॥ [भा. २९५]

मू. (९१६) कागसियालक्खइयं दविअरसं सव्वओ परामट्ठं।
एसो उ भवे अविही जहगहिअं भोयणंमि (भुंजओ य) विही॥

मू. (९१७) उच्चिणइ च विद्राओ कागो अहवावि विक्खिरइ सव्वं।
विप्पेक्खइ य दिसाओ सियालो अन्नोन्नहिं गिण्हे॥ [भा. २९६]

मू. (९१८) सुरहीदोच्चंगद्धा छोढूणं दवं तु पियइ दवियरसं।
हेट्ठोवरि आमट्ठं इय एसो भुंजणे अविही॥ [भा. २९७]

मू. (९१९) जह गहिअं तह नीयं गहणविही भोयणे विही इणमो।
उक्कोसमनुक्कोसं समकयरसं तु भुंजेज्जा॥ [भा. २९८]

मू. (९२०) तइएवि अविहिगहिअं विहभित्तं तं गुरूहिऽणुन्नायं।
सेसा णाणुन्नाया गहणे दत्ते य निज्जुहणा॥ [भा. २९९]

मू. (९२१) अहवावि अकरणाए उवट्ठियं जाणिऊण कल्लाणं।
घट्टेउं दिंति गुरू परसेनविनिवारणट्ठाए॥ [भा. ३००]

वृ. विधिनोद्गमदोषादिरहितं सारासारविभागेन च यत्र कृतं पात्रके तद्विधिगृहीतं, तथा 'विधिभुक्तं' कटकच्छेदेन प्रतरच्छेदादिना वा यद्भुक्तं तद्विधिभुक्तं मुच्यते, तदेवंविधं विधिगृहीतं विधिभुक्तं च

यद्यदतिरिक्तं संजातं भक्तं पानकं वा तद्भोक्तव्यं-परिष्ठापनकं कल्पते, अत आह प्रकारान्तरेण-अत्र च विधिगृहीते विधिभुक्ते चास्मिन् परद्वये चत्वारो भङ्गका भवन्ति. तद्यथा-विहिगहअं विहिभुत्तं एगो भंगो, विहिगहिअं अविहिभुत्तं बिइओ, अविहिगहअं विहिभुत्तं तइओ, अविहिगहिअं अविहिभुत्तं चउत्थो ॥ इदानीं भाष्यकारो विधिगृहीताविधिगृहीतयोः स्वरूपं प्रतिपादयन्नाह-उद्गमदोषादिभिर्जर्जरं-त्यक्तं यत्तद्विधिगृहीतं, अथवा यद्वस्तु मण्डकादि यथैव यस्मिन् स्थाने पतितं भवति तत्तथैवास्ते नतु समारयति इत्येष ग्रहणविधिः । 'असुद्धपच्छायणं अविही' अशुद्धस्य-उद्गमादिदोषान्वितस्य यद्ग्रहणं इत्यविधिग्रहणं, अथवा गृहादेर्द्रव्यस्य मण्डकादिना प्रच्छाद्य यदेकत्र पात्रकदेशे स्थापनं तदविधिग्रहणमुच्यते । इदानीमविधिविधिभोजनयोः स्वरूपं प्रतिपादयन्नाह-काकभुक्तं शृगालभुक्तं द्राक्षितरसमित्यर्थः 'सर्वतः परामृष्टम्' उत्थल्लपत्थल्लतणेण भुक्तं 'एसो उ भवे अविही' इदं पूर्वोक्तमविधिना भुक्तं मन्यते, यथैव गृहीतं पात्रके तथैव भुञ्जतो विधिभुक्तमुच्यते । अधुना भाष्यकृद् व्याख्यानयति, तत्राद्यावयवप्रतिपादनायाह-यथा काक उच्चित्योच्चित्य विप्रादेर्मध्याद्वल्लादि भक्षयति एवमसावपि, अथवा विकिरति काकवदेव सर्वं, तथा काकवदेव कवलं प्रक्षिप्य मुखे दिशो विप्रेक्षते, तथा शृगाल इवान्यत्रान्यत्र प्रदेशे भक्षयति । सुरभि यद् 'दोच्चंगं'तीमनं ओदनादिना सह यन्मिश्रीभूतं तत्र द्रवं प्रक्षिप्य यो निर्यासः संजातस्तत्पिबनं यत्तद् द्राक्षितरसमुच्यते । तथाऽधस्तादुपरि च यद् 'आमद्दं' विपर्यासीकृतं भुङ्क्ते तदेतत्परामटठं, अयमेष भोजनेऽविधिः । कः पुनर्ग्रहणभोजनयोर्विधिः ? इत्यत आह-यथैव गृहीतं-गृहस्थेन दत्तं सत्तत्तथैवानीतं यदयं ग्रहणविधिः, भोजने पुनरयं विधिः-यदुत्कृष्टद्रव्यमनुत्कृष्टद्रव्यं च समीकृतरसं भुञ्जीतेत्ययं प्रथमो भङ्गकः शुद्ध इति । तृतीयेऽपि भङ्गकेऽविधिना असामाचार्या गृहीतं विधिना भुक्तं-समीकृतरसं सद् भुक्तं तच्च गुरुणाऽनुज्ञातं, शेषौ तु द्वौ भङ्गकौ नानुज्ञातौ. यस्तु विधिगृहीतमविधिभुक्तं काकशृगालादिरूपं भक्तं ददाति योऽपि गृह्णाति तयोर्द्वयोरपि 'निज्जुहणा' निर्द्धारणं क्रियते, तथाऽविधिगृहीतमविधिभुक्तं च यो ददाति गृह्णाति वा यतोर्द्वयोरपि निर्द्धारणं क्रियत इति । अथवा एतद्दोषाकरणतया-अनासेवनया उपस्थितं दातारं ग्रहीतारं च ज्ञात्वा संगोपायनं क्रियते, कल्याणकं च गुरवो ददति, तच्च ददति 'धट्टयित्वा' तिरस्कृत्य, यदुत त्वया पुनरेवं न कर्त्तव्यं, स चैवं गुरुः किंनिमित्तं करोतीत्यत आह-'पसंगविनिवारणट्ठाए' प्रसङ्गस्य-पुनरासेवनस्य निवारणार्थमेवं करोतीति ।

मू. (९२२) बासेरणा य एसा कहिया भे ! धीरपुरिसपन्नत्ता ।
संजमतवड्ढगाणं निग्गंथाणं महरिसीणं ॥ [भा. ३०१]

मू. (९२३) एयं वासंसणविहिं जुंजंता चरणकरणमाउत्ता ।
साहू खवंति कम्मं च अनेगभवसंचियमनंतं ॥ [भा. ३०२]

मू. (९२४) अत्तो परिट्ठवणविहिं वोच्छामि धीरपुरिसपन्नत्तं ।
जं नाऊण सुविहिया करेंति दुक्खक्खयं धीरा ॥ [भा. ३०३]

वृ. सुगमाः ॥ इदानीं उव्वरिएत्ति द्वारं भण्यते, अथवा स्वयमेव भाष्यकारः संबन्धं प्रतिपादयन्नाह-

मू. (९२५) भत्तट्ठिअ उव्वरिअं अहव अभत्तट्ठियाण जं सेसं ।
संबंधणाणेण उ परिठावणिआ मुणेयव्वा ॥ [भा. ३०४]

वृ. भक्तार्थिकानां च भुक्त्वा नामुद्धरितं यद् अथवा अभक्तार्थिकानां भुक्त्वेत्यं पारिष्ठापनिकमावर्तृणां यदुद्धरितं-यच्छेषं तत्परिष्ठापनीयमितिकृत्वा अनेन सम्बन्धेन परिष्ठापनिका विज्ञेया भवतीत्यर्थः ।

मू. (९२६) सा पुण जायमजाया जाया मूलोत्तरेहि उ असुद्धा।
लोभातिरेगगहिया अभिओगकया विसकया वा॥

वृ. सा पुनः परिष्ठापनिका जाताऽजाता भवति, तत्र जाता ग्रहणकाल एव प्राणातिपातादिदोषेण युक्ता। अथवा आधाकर्मादिदोषेण 'जाता' उत्पन्ना, अजाता पुनः-आधाकर्मादिदोषेण न दूषिता या साऽजातेत्युच्यते, तत्र जातास्वरूपप्रतिपादनायाह-मूलगुणैः-प्राणातिपातादिभिरशुद्धा, तथोत्तरगुणैश्च आधाकर्मादिभिरशुद्धा, तथा लोभातिरेकेण-लोभाभिप्रायेण साधुना गृहीता साऽप्यशुद्धा लोभदोषदूषिता सती जातेत्युच्यते, तथा अभियोगकृता, अभियोगो द्विविधः-वशीकरणचूर्णो मन्त्रश्च, तत्र सा भिक्षा कदाचित् सयोगैता भवति मन्त्राभिमन्त्रिता वा साऽप्यशुद्धा, अतो जाता सा परिष्ठापनिकेत्युच्यते, विषेण वा व्यामिश्रं भक्तं केनचिद् द्विष्टेन दत्तं भवति तस्य यत् परिष्ठापनिका सा जातापरिष्ठापनिकेति। इदानीं भाष्यकृदेनामेव गाथां व्याख्यानयति, तत्र जातापरिष्ठापनिकास्वरूपाभिधानायाह-

मू. (९२७) मूलगुणेहिं असुद्धं जं गहिअं भत्तपान साहहिं।
एसा उ होइ जाता वुच्छं सि विहीए वोसिरणं॥ [भा. ३०५]

मू. (९२८) एगंतमनावाए अच्चित्ते थंडिले गुरुवइट्ठे।
आलोए एगपुंजं तिण्हाणं सावणं कुज्जा॥

मू. (९२९) लोभातिरेगगहिअं अहव असुद्धं तु उत्तरगुणेहिं।
एसावि होति जाया वोच्छं सि विहीए वोसिरणं॥ [भा. ३०६]

मू. (९३०) एगंतमनावाए अच्चित्ते थंडिले गुरुवइट्ठे।
आलोए दुन्नि पुंजा तिण्हाणं सावणं कुज्जा॥

वृ. मूलगुणैः प्राणातिपातादिभिरशुद्धं यद्गृहीतं भक्तं पानकं वा साधुभिरियं जाताऽभिधीयते, वक्ष्ये 'अस्याः' जाताया विधिना व्युत्सर्जनं' परित्यागं। सा च जाता एवंविधे स्थण्डिले परिष्ठापनीया-एकान्ते 'अनापाते' लोकापातरहिते अचित्ते स्थण्डिले गुरुप्रदिष्टे "अनावायमसंलोए" इत्यवादिके 'आलोके' सम्यग् भूभागे न गत्वादौ यत्र प्राघूर्णकादयः सुखेन पश्यन्ति, तत्र च तस्य भक्तस्य एकः 'पुंजः' राशिः क्रियते, पुनश्च 'त्रिस्थानं' त्रिषु वाराः स्थापनं करोति-व्युत्सृष्टं व्युत्सृष्टं व्युत्सृष्टमिति, तच्च त्रिस्थानं स्थापनं करोति त्रिविधेन मनसा वाचा कायेन व्युत्सृष्टमित्यस्य ज्ञापनार्थमिति। यत्पुनः साधुना लोभातिरेकेण गृहीतं द्रव्यं मूर्च्छया गृहीतं अथवा यदशुद्धमुत्तरगुणैः-आधाकर्मादिभिः, इयमपि भिक्षा जातेत्युच्यते वक्ष्ये अस्य विधिना व्युत्सर्जनं-परित्यागम। पूर्वार्द्धं सुगमं, केवलमत्र द्वौ पुञ्जौ क्रियेते-द्वौ राशी क्रियेते आलोके साधूनाम। इदानीम "अभिओगे" त्ति व्याख्यानयन्नाह-

मू. (९३१) दुविहो खलु अभिओगो दव्वे भावे य होइ नायव्वो।
दव्वंमि होइ जोगो विज्जा मंता य भावंमि॥

द्विविधोऽभियोगो-द्रव्याभियोगो भावाभियोगश्च ज्ञातव्यः, तत्र द्रव्याभियोगो द्रव्यसंयोगजश्चूर्ण-मन्त्रमिश्रः पिण्डोऽभियोगपिण्डः स च परित्यजनीयः, भावाभियोगश्च विद्यया मन्त्रेणाभिमन्त्र्य पिण्डं ददाति स ताहशो भावाभियोगपिण्डः, स च परिष्ठापनीय इति। अत्र चागार्या दृष्टान्तः, एगा अविरइया सा अनिट्ठा पतिणो, ताए परिच्चाडया अलब्भंथिया जहा किंचि मंतेण अहिमंतऊण मे देहि जेण पई मे वसे होइ, ताहे ताए अभिमंतऊण कूरो दिन्नो, अविरइयाए चिंतियं, मा एसो दिन्नो मरिज्जा ततो ताए अनुकंपाए उक्कुरुडियाए

छक्तिओ, सो गहेण खइओ, सो रत्तिं घरदारं खोडेउमारद्धो, ताणि णिमयाणि जाव पेच्छंति गहेण खोट्टिज्जंतं, सा अविरओ भणइ-किं एयंति ?, ताए सब्भावो कहिओ, तेनवि सा परिच्चाइया दंडाविओ, एस दोसो। एवं जदि तिरियाण एरिसा अवत्था होइ मानुसस्स पुन सुट्ठुयरं होइ, अओ, एरिसो पिंडो न घेत्तव्वो।

अमुमेवार्थं गाथाभिरुपसंहरन्नाह-

मू. (९३२) विज्जाएहे अगारी अचियत्ता सा य पुच्छए चरिअं।
अभिमंतणोदनस्स उ अनुकंपणमुज्झणं च खरे॥

मू. (९३३) बारस्स धिणंमि अ पुच्छण कहणं च होअगारीए।
सिद्धे चरियादंडो एवं दोसा इहंपि सिया॥

वृ. विद्यास्मिन्नस्ते पिण्डेऽगारी दृष्टान्तः, सा च भर्तुरुच्चयत्ता-न रोचते, सा च चरिकां-परिव्राजिकां पृच्छति पत्युर्वशीकरणार्थं तयाऽप्यभिमन्त्रणमोदनस्य कृत्वा दत्तं, तयाऽपि अगार्यां पत्युर्मरणानुकम्पया न दत्तं, 'उज्झनं' परित्यागः कृतः, स चोज्झितः खरेण भक्षित इति। स च गर्दभ आगत्य द्वारं पिट्टयति मन्त्र-वशीकृतः सन्, शेषं सुगमम्। एवं भावाभियोगदृष्टान्त उक्तः, इदानीं द्रव्याभियोगचूर्ण वशीकरणपिण्ड उच्यते-एगा अविरइया, [illegible] पेच्छति अणिच्छंतस्स चुन्नाभिओगेण संजोएउं भिक्खं पाडिवेसिअघरे काऊण ठवाविअं, ताहे जत्थेव तस्स साहुस्स पडिग्गहगे पडिअं तत्थेव तस्सेव साहुस्स तओ मणो हीरइ, तेण य नायं ताहे नियत्तइ, आयरियाणं पडिग्गहगं दाउं काइयभूमिं वच्चइ जाव आयरियाणंपि तत्तोहुत्तो भावो हीरइ, ताहे सो सीसो आगंतुं आलोएइ, आयरिया भणंति-ममवि अत्थि भावो, तं एत्थं संजोगचुन्नेण कुओ पिंडो अत्थि, ताहे परिठविज्जइ, जो विही परिट्ठावणे सो उवरिं भणिहिति। एवमेव विसकयंपि, एगा अगारी साहुणो अज्झोववन्ना, सो य नेच्छइ, ताहे रुट्ठाए विसेण मिस्सा भिक्खा दिन्ना, तस्स य दिन्नमेत्तेणं चेव सिरो-वेयणा जाया, पडिनियत्तो य गुरुणो समप्पेऊण काइयं वोसिरइ जाव गुरुणोवि सीसवेयणा जाया, तं च गुरुणा गंधेण नायं जहा इमं विसमिस्सं, अहवा तत्थ लवणकया भिक्खा पडिया ताहे तं विसं उप्पिसंति, एवं नाए विहीए परिट्ठविज्जति सा य भणीहामि॥

इदानीममुमेवार्थं गाथाभिरुपसंहरन्नाह-

मू. (९३४) जोगंमि उ अविरइया अज्झोववन्ना सरूवभिक्खुंमि।
कडजोगमणिच्छंतस्स देइ भिक्खं असुभभावे॥

मू. (९३५) संकाए स नियट्टो दाऊण गुरुस्स काइयं निसिरे।
तेसिंपि असुभभावो पच्छा उ ममापि उज्झणया॥

मू. (९३६) एमेव विसकयंमिवि दाऊण गुरुस्स काइयं निसिरे।
गंधाई विन्नाए उज्झणमविही सियालवहे॥

मू. (९३७) एवं विज्जाजोए विससंजुत्तस्स वावि गहियस्स।
पाणच्चएवि नियमुज्झणा उ वोच्छं परिट्ठवणं॥

मू. (९३८) एगंतमनावाए अच्चित्ते थंडिले गुरुवइट्ठे।
छारेण अक्कमित्ता तिट्ठाणं सावणं कुज्जा॥

वृ. जोगे अविरइया-गृहस्थी दृष्टान्तः, अज्झोववन्ना सरूपे भिक्षौ, अनिच्छतस्तत्तौकर्म कर्तुं कृतयोगो भिक्षापिण्डो दत्तः, पुनश्च तस्य साधोर्ग्रहणानन्तरमेवाशुभभावो जातः-तदभिमुखं चित्तमिति। तया च 'शङ्कया'

योगकृतभिक्षाशङ्कया य निवृत्ता भिक्षापरिभ्रमणात्। शीघ्रं सुगमम्॥ एवमेव विषकृतेऽपि दृष्टान्तः, गुरोः 'दत्त्वा' समर्पयित्वा कायिकां व्युत्सृजति. तेन च गुरुणा गन्धादिना विज्ञाते, आदिग्रहणाद् भक्तस्य उष्णतरणेण वा. 'उज्झनं' परित्यागः क्रियते तत्र विधिना. अविधिपरिष्ठापने सति शृगालादिवधो भवति। एवं विद्याभिमन्त्रितस्य योगचूर्णकृतस्य तथा विषसंयुक्त स्य गृहीतस्य सतः 'प्राणात्ययेऽपि' अत्यर्थ क्षुत्पीडायामपि सत्यां नियमेन-अवश्यन्तयोज्झनीयं (ना कार्या) तस्य च परिष्ठापनविधिं वक्ष्ये। पूर्वार्द्धं पूर्ववत्, तद्विषादिकृतं भोजनं 'छारेण' भृत्या 'आक्रम्य' मिश्रीकृत्य चैव परिष्ठापनीयं, सुगमम्।

मू. (९३९) दोसेण जेन दुट्ठं तु भोयणं तस्स सावणं कुज्जा।
एवंऽवहवोसट्ठे वेराओ मुच्चई साहू॥

वृ. दोषेन येन-मूलकर्मादिना आधाकर्मादिना वा दुष्टं भोजनं भवति तस्य तिस्रो वाराः श्रावणं कर्त्तव्यं, यदुत मूलकर्मादिदोषैर्दुष्टमिति, एवमुत्तरगुणयोगमन्त्रविषकृतदुष्टानामपि तिस्रो वाराः श्रावणं करोति, एवं विधिना व्युत्सृष्टे सति 'वेरात' कर्मणो मुच्यते साधुः. अथवा 'वेरात' जीववधजनितान्मुच्यते साधुरिति॥

आह-इदमुक्तं शुद्धाया भिक्षाया यत्परिष्ठापनं साऽजातापरिष्ठापनिकेत्युच्यते, तत्र-

मू. (९४०) जावइयं उवउज्जइ तत्तिअमित्तं विगिंचणा नत्थि।
तम्हा पमाणगहणं अइरेगं होज्ज उ इमेहिं॥

वृ. यावन्मात्रकमेवोपयुज्यते तावन्मात्रमेव भिक्षाग्रहणं कर्त्तव्यं, यदा चैवं तदा तावन्मात्रकग्रहणे 'विगिंचनं' परिष्ठापनं 'नास्ति' न भवति तस्मात्प्रमाणग्रहणमेव कर्त्तव्यं, ततश्च कुतोऽजातायाः संभवति परिष्ठापनम्?, अतिरेकग्रहणाभावादिति. एवमुक्ते परेण आह सूरिः-'अइरेगं होज्ज उ इमेहिं' 'अतिरिक्तं' शुद्धमपि भक्तं 'एभिः' वक्ष्यमाणकारणैर्भवेत्, कानि च तानि वक्ष्यमाणकारणानीत्यत आह-

मू. (९४१) आयरिए य गिलाणे पाहुणए दुल्लभे सहसदाने।
एवं होइ अजाया इमा उ गहणे विही होइ॥

वृ. कदाचित्कस्मिंश्चित्क्षेत्रे आचार्यप्रायोग्यं दुर्लभं भवति ततश्च सर्व एव सङ्घाटका आचार्यप्रायोग्यस्य ग्रहणं कुर्वन्ति ततश्च तद् घृतादि कदाचित्सर्व एव लभन्ते ततस्तदुद्धरन्ति, ततोऽन्येषां च साधूनां पर्याप्तं, एवमाचार्यार्थं गृहीतस्य शुद्धस्यापि परिष्ठापना भवति। तथा ग्लानार्थमप्येवमेव गृहीतं सदुद्धरति. प्राघूर्णकानामप्येवमेव. तथा दुर्लभलाभे सति सर्वैरेव सङ्घाटकैर्गृहीतमुद्धरति. तथा 'सहसदाणे' अप्रतर्कितदाने सति प्रचुरमुद्धरति, तत एवं भवति अजातापरिष्ठापनिका। तत्र चाचार्यादीनां ग्रहणेऽयं विधिः-वक्ष्यमाणः, कश्चासावित्यत आह-

मू. (९४२) जइ तरुणो निरुवहओ भुंजइ तो मंडलीइ आयरिओ।
असहुस्स वीसुगहणं एमेव य होइ पाहुणए॥

वृ. केचनैवं भणन्ति-यद्याचार्यस्तरुणो निरुपहतपञ्चेन्द्रियश्च ततोऽसौ मण्डल्यामेव भुङ्क्ते सामान्ये, अथ असहुः-असमर्थस्ततस्तस्य विष्वक्-पृथग् ग्रहणं प्रायोग्यस्य कर्त्तव्यं, एवमेव प्राघूर्णकेऽपि विधिर्द्रष्टव्यः, यदि प्राघूर्णकः समर्थस्ततो नैव तत्प्रायोग्यग्रहणं क्रियते, अथासमर्थस्ततः क्रियत इति. केचित्पुनरेवं भणन्ति-यदुत समर्थस्याप्याचार्यस्य प्रायोग्यग्रहणं कर्त्तव्यं, यत एते गुणा भवन्ति-

मू. (९४३) सुत्तत्थथिरीकरणं विनओ गुरुपूय सेहबहुमाणो।
दानवतिसद्धवुड्ढी बुद्धिबलवड्ढणं चेव॥

वृ. आचार्यस्य प्रायोग्यग्रहणे क्रियमाणे सूत्रार्थयोः स्थिरीकरणं कृतं भवति, यतो मनोज्ञाहारेण सूत्रार्थौ सुखेनैव चिन्तयति, अतः आचार्यस्य प्रायोग्यग्रहणं कर्तव्यं, तथा विनयश्चानेन प्रकारेण प्रदर्शितो भवति, गुरुपूजा च कृता भवति, सहस्य चाचार्यं प्रति बहुमानः प्रदर्शितो भवति, अन्यथा सेहः इदं चिन्तयति, यदुत न कश्चिदत्र गुरूनपि लघूरिति, अतो विपरिणामो भवति, तथा प्रायोग्यदानपतेश्च श्रद्धावृद्धिः कृता भवति, तथा बृंहणबलस्य चाचार्यसत्कस्य वर्द्धनं भवति, तत्र च महती निर्जरा भवति।

मू. (९४४) एएहिं कारणेहिं उ केइ सहुस्सग्गवि वयंति अनुकंपा।
गुरुअनुकंपाए पुणे गच्छे तित्थे य अनुकंपा॥

वृ. 'एभिः' पूर्वोक्तैः कारणैः कश्चित्समर्थस्याप्याचार्यस्यानुकम्पा कर्तव्येत्येवं वदन्ति, यतो गुरोरनुकम्पया गच्छे तीर्थे चानुकम्पा कृता भवति। यत्रैवमतः प्रायोग्यग्रहणं ग्राह्यमिति॥ अत आह-

मू. (९४५) सति लाभे पुन दव्वे खेत्ते काले य भावओ चेव।
गहणं तिसु उक्कोसं भावे जं जस्स अनुकंपं॥

वृ. 'सति' विद्यमाने लाभे द्रव्यतः क्षेत्रतः कालतो भावतश्चोत्कृष्टं ग्राह्यं। इदानीं निर्युक्तिकारो व्याख्यानयन्नाह-'गहणं तिसु उक्कोसं' ग्रहणं त्रिषु द्रव्यक्षेत्रकालेषु उत्कृष्टं कर्तव्यं, भावे तु यद्यस्तु यस्याचार्यस्यानुकूलं यद्गृह्यते। इदानीं भाष्यकृद्व्याख्यानयति, तत्र द्रव्ये उत्कृष्टतां प्रदर्शयन्नाह-

मू. (९४६) कलमातणो उ पयसा उक्कोसो हानि कोद्दवुब्भज्जी।
तत्थवि मिउतुप्पतरयं जत्थ व जं अच्चियं देसु॥ [भा. ३०७]

वृ. कलमशाल्योदनः पयसा सह द्रव्यमुत्कृष्टं ग्राह्यं, तदलाभे हान्या तावत् गृह्यते यावत् 'कोद्दवोभज्जी' कोद्रवजाउलयं, तत्राप्ययं विशेषः क्रियते यदुत तदेव जाउलयं मृदु गृह्यते, तथा 'तुप्पतरयं'ति स्निग्धतरं तदेव जाउलयं गृह्यते, उक्तं द्रव्योत्कृष्टं, इदानीं क्षेत्रकालोत्कृष्टप्रतिपादनायाह-'जत्थ व जं अच्चियं देसु' इयमत्रभावना-क्षेत्रकालयोर्यद्वस्तु यत्र पूजितं तत्तत्र गृह्यते, एतदुक्तं भवति-यद्यत्र क्षेत्रे बहुमतं द्रव्यं तत्तस्मिन् क्षेत्रे उत्कृष्टमुच्यते, तच्च ग्राह्यं, तथा यद्वस्तु यस्मिन् काले बहुमतं तत्तस्मिन् काले उत्कृष्टमुच्यते, भावोत्कृष्टं पुनर्निर्युक्तिकारेणैव व्याख्यातं। उक्तं प्रसङ्गागतम्, इदानीं यदुक्तं आचार्यादीनां गृहीतं सद्यथोद्धरति तथा प्रतिपादयन्नाह-

मू. (९४७) लाभे सति संघाडो गेण्हइ एगो उ इहरहा सव्वे।
तस्सप्पणो य पज्जत्त गेण्हणा होइ अनिरेगं॥

वृ. यदि तत्र क्षेत्रे घृतादीनां स्वभावेनैव लाभोऽस्ति ततस्तत्र लाभे सति आचार्यस्यैक एव सङ्घाटकः प्रायोग्यं गृह्णाति, 'इहरह'त्ति यदा तत्र क्षेत्रे न प्रायोवृत्त्या प्रायोग्यस्य लाभः तदा सर्व एव सङ्घाटकास्तस्याचार्यस्य प्रायोग्यं पर्याप्त्या गृह्णन्ति, ततश्च तस्याचार्यस्यात्मनश्चार्थाय पर्याप्तग्रहणं सत्यतिरिक्तं भवति, ततश्च तत्परिष्ठाप्यत इति। इदानीं 'गिलाणे'त्यिव्याख्यानयन्नाह-

मू. (९४८) गेलन्ननियमगहणं नाणत्तोभासियंपि तत्थ भवे।
ओभासियमव्वरिअं विगिंचए सेसगं भुंजे॥

वृ. ग्लानस्य नियमेन प्रायोग्यग्रहणं कर्तव्यं, यदि परं नानात्वं 'ओभासियंपि' प्रार्थितमपि तत्र ग्लाने भवति, ग्लानार्थं प्रायोग्यस्य च प्रार्थनमपि क्रियते, ततश्च ओभासितं-प्रार्थितं सद् ग्लानार्थं पुनश्च यदुद्धरति ततस्तद् 'विगिच्यते' परित्यज्यते, 'सेसयं भुंजे'त्ति शेषं यदनवभाषितं-अप्रार्थितमुद्धरितं तदभुञ्जानः कथित-

साधुरिति। [illegible] एव द्रष्टव्यः। इदानीं तु [illegible] व्याख्यानयन्नाह-

मू. (९४९) दुल्लभदव्वं व सिआ घयाइ घेत्तूण सेस भुञ्जंति।
थोवं दमि व गेण्हामि यत्ति सहसा भवे भरियं॥

वृ. दुर्लभद्रव्यं वा स्याद्-भवेत् घृतादि तदगृहीत्वा उपभुज्य च यत् शेषं तद् उज्झन्ति, एवं वा पारिष्ठापनिकं भवति। इदानीं सहसेत्यादि व्याख्यानयन्नाह-'थोवं दमी'त्यादि, श्लोकं व्याख्यामीत्येवं चिन्तयन्त्या गृहस्थया सहसा-अतर्कितमेव तत् साधुभाजनं भृतं, साधुवां चिन्तयति श्लोकं ग्रहीष्यामीति. पुनश्चातर्कितमेव भाजनं भृतं, ततश्चैवमतिरिक्तं भवति, पुनश्च परिष्ठाप्यत इति।

मू. (९५०) एएहिं कारणेहिं गहियमजाया उ सा विगिंचणया।
आलोगंमि तिपुंजी अद्धाणे निग्गयाईणं॥

वृ. एभिः पूर्वोक्त कारणैर्यद्गृहीतं भवति सा 'अजातविगिंचणय'त्ति अजाता परिष्ठापनीच्यते, तस्या-श्चाजातायाः साध्वालोके त्रयः पुञ्जाः क्रियन्ते, किमर्थमित्याह'अद्धाणे निग्गयाईणं' अध्वानं निर्गतास्तदर्थं त्रयः पुञ्जाः क्रियन्ते. आदिग्रहणात्कदाचित्त एव कारणे उत्पन्ने गृह्णन्तीति। आह-

मू. (९५१) एक्को व दो व तिन्नि व पुंजा कीरंति किं पुन निमित्तं?।
विहमाइनिग्गयाणं सुद्धेयरजाणणट्ठाए॥

वृ. एको वा द्वौ वा त्रयो वा पुञ्जाः किं पुनर्निमित्तं क्रियन्ते?, उच्यते, 'विहमादि' विहः-पन्थास्तदर्थं निर्गतानां साधूनां शुद्धेतरभक्त परिज्ञानार्थं त्रयः पुञ्जकाः क्रियन्ते, आदिग्रहणाद्वास्तव्यानामेव कदाचि-दुपयुज्यते इतिकृत्वा परिज्ञानार्थं त्रयः पुञ्जकाः क्रियन्त इति। इयं च गाथाऽनन्तरातीतगाथाया व्याख्यानभूता द्रष्टव्येति।

मू. (९५२) एवं विगिंचिउं निग्गयस्स सन्ना हवेज्ज तं तु कहं?।
निसिरेज्जा अहव धुवं आहारो होइ नीहारो॥

वृ. 'एवं' उक्तेन प्रक्रमेण परिष्ठापनार्थं विनिर्गतस्य यदि 'सञ्ज्ञा' पुरीषोत्सर्जन बुद्धिर्भवेत् 'तत्कथं?' किं तत्र कर्त्तव्यमिति, अत आह-'निसिरेज्ज' व्युत्सृजेत्, अथवा किमत्र प्रष्टव्यं?, ध्रुवमाहारो नीहारो भवति. ततश्च स्थण्डिले व्युत्सृजनं कर्त्तव्यं, तत्र स्थण्डिलं पूर्वभणितमेव, तथाऽऽह-

मू. (९५३) थंडिल्लं पुव्वभणियं पढमं निद्दोस दोस जयणाए।
नवरं पुण नाणत्तं भावासन्नाए वोसिरणं॥

वृ. स्थण्डिलं पूर्वभणितमेव, यदुत अनापातं असंलोकं १ अनापातं ससंलोकं २ आपातमसंकलोकं ३ आपातं ससंलोकं ४ अत्र प्रथमो भङ्गको निर्दोषः, द्वयोश्च द्वितीयतृतीयभङ्गकयोर्यतनया व्युत्सृजति, एतत्पूर्वोक्त स्थण्डिलस्य सामान्यमेव, 'नवरं पुण णाणत्तं'ति नवरं-केवलमिदं नानात्वं, यदुतात्र भावासन्न-अतिपीडायां व्युत्सृजनमनुज्ञातं, तत्र चानुज्ञा नैव कृताऽऽर्यादिह च कृताऽतो नानात्वं, ततश्चतुर्थभङ्ग-कासेवनमप्यनुज्ञातमेव द्रष्टव्यमिति। इदानीं भाष्यकारः पूर्वोक्त स्थण्डिलानि प्रदर्शयन्नाह-

मू. (९५४) अनावायमसंलोयं अनावायालोय ततिय विवरीयं।
आवायं संलोगं पुव्वुत्त थंडिला चउरो॥ |भा. ३०८|

वृ. अनापातमसंलोकं च प्रथमो भङ्ग उक्त स्तथाऽन्यदनापातमालोकं च द्वितीयं तृतीयं पुनर्विपरीतं स्थण्डिलं- आपातमसंलोकमित्यर्थः, तथाऽन्यदापातं संलोकं च चतुर्थो भङ्गकः, एतानि पूर्वोक्त स्थण्डिलानि

चत्वारि।

मू. (९५५) अनावायमसंलोगं निद्दोसं बितियचरिम जयणाए।
पउरदवकुरुकुयादी पत्तेयं मत्तगा चेव॥

मू. (९५६) तइएवि य जयणाए नाणत्तं नवरि सद्दकरणंमि।
भावासन्नाए पुण नाणत्तमिणं सुणसु वोच्छं॥

वृ. अत्रानापातमसंलोकं च स्थण्डिलं निर्दोषं, द्वितीयतृतीयचरमेषु भङ्गकेषु यतनया व्युत्सृजनं कर्त्तव्यं, का चासौ यतना ?, प्रचुरद्रवेण कुरुकुचादिकं कर्त्तव्यं प्रत्येकं प्रत्येकं च मात्रकाणि सपानकानि भवन्तीति। किं सर्वेष्वेव स्थण्डिलेषु कुरुकुचेव यतना कर्त्तव्या उत कश्चिद्विशेषः ?, उच्यते, अस्ति विशेषः, तृतीयेऽपि स्थण्डिले यतनाधा नानात्वमेतावद्यदि परं यदुत शब्दकरणं, एतदुक्तं भवति-तृतीये स्थण्डिले आपातासंलोकं शब्द कृर्वदिभर्गन्तव्यं, भावासन्ने, पुनर्यतनायां यन्नानात्वं तच्छृणुत वक्ष्ये। तत्र प्रथमस्थण्डिले गन्तव्यं, अथ तन्नास्ति,

मू. (९५७) जदि पढमं न तरेज्जा तो बितियं तस्स असइए तइयं।
तस्स असई चउत्थे गामे दारे य रत्थाए॥

वृ. यदि प्रथमे स्थण्डिले गन्तुं न शक्नुयात्ततो द्वितीयं व्रजेत्, 'तस्य' द्वितीयस्यासति तृतीयं व्रजेत, 'तस्य' तृतीयस्य स्थण्डिलस्यासति चतुर्थं स्थण्डिलं व्रजेत्, यदा चतुर्थमपि स्थण्डिलं गन्तुं न शक्नोति तदा ग्रामद्वारे गत्वा व्युत्सृजति, यदा ग्रामद्वारमपि गन्तुं न शक्नोति तदा रथ्यायामेव व्युत्सृजति॥

मू. (९५८) साही पुरोहडे वा उवस्सए मत्तगंमि वा निसिरे।
अच्चुक्कडंमि वेगे मंडलिपासंमि वोसिरइ॥

वृ. यदा रथ्यायामपि गन्तुं न शक्नोति तदा 'साहीए' खडक्किकायां गत्वा व्युत्सृजति, यदा खडक्किकायां गन्तुं न समर्थस्तदा 'पुरोहडे' अग्रद्वारे व्युत्सृजेत, यदा पुरोहडमपि गन्तुं नालं तदोपाश्रये मात्रके वा व्युत्सृजेत, सर्वथा 'अच्चुक्कडंमि वेगे मंडलीपासंमि वोसिरिति' सुगमम्। इदं च लोकेऽपि प्रसिद्धं, यदुत ग्रामपुरीषादेर्वेगो न धार्यते। अत्र च कथानकम्-एगो राया तस्स य वेज्जो पहाणो सो मतो, तंमि मए राइणा गवेसावियं एयस्स पुत्तो अत्थि वा न वा ?, तस्स य कहियं-अत्थि एगा सुया, ताए य सयलं वेज्जयं अहीयं, हक्कारिया आयाया, भणिया य-किं ते भणियं ?, सा भणइ अहियं विज्जयं, ततो एयस्संतरे ताए वायकम्मं कयं, ततो डयरेहिं विज्जेहिं हसियं, ततो तीए ताणं विज्जाणं राइणो य परिकहणा कया, जहा-

मू. (९५९) तिन्नि सल्ला महाराय, अस्सिं देहे पइट्ठिया।
वायमुत्तपुरीसाणं पत्तवेगं न धारए॥

वृ. सिलोगो सुगमो। एवं साहुणावि वेज्जवइणं परिकहणा कायव्वा। एतदेव गाथयोपसंहरन्नाह-

मू. (९६०) राया विज्जंमि मए विज्जसुयं भणइ किं च ते अहियं ?।
अहियंति वायकम्मे विज्जे हसणा य परिकहणा॥

मू. (९६१) एसा पइट्ठवणविही कहिया मे धीरपुरिसपन्नत्ता।
सामायारी एत्तो वुच्छं अप्पक्खरमहत्थं॥

वृ. सुगमा॥ उव्वरिएत्ति दारं गयं, इदानीं सामाचारीं व्याख्यायते-

मू. (९६२) सन्नातो आगतो चरमपोरिसिं जाणिऊण आगाढं।

पडिलेहणमप्पत्तं नाऊण करेइ सज्झायं ॥

वृ. एवं च साधुः सञ्ज्ञां व्युत्सृज्यागतः पुनः 'चरमपौरुषी' चतुर्थप्रहरं ज्ञात्वा 'अवगाढा' अवतीर्णा, ततः किं करोतीत्यत आह-प्रत्युपेक्षणां करोति, अथासौ चरमपौरुषी नाद्यापि भवति ततोऽप्राप्तां चरमपौरुषीं मत्वा स्वाध्यायं तावत्करोति यावच्चरमपौरुषी प्राप्ता।

मू. (९६३) सुव्वइट्ठो य विही इहंऽप्प पडिलेहणाइ सो चेव।
जं एत्थं नाणत्तं तमहं वुच्छं समासेणं ॥

मू. (९६४) पडिलेहगा उ दुविहा भत्तट्ठियएयरा य नायव्वा।
दोण्हवि य आइपडिलेहणा उ मुहनंतगसकायं ॥

मू. (९६५) तत्तो गुरू परिन्ना गिलाणसेहाति जे अभत्तट्ठी ॥
संडदसह पायमत्ते य अप्पणो पट्टगं चरिमं ॥

मू. (९६६) पट्टग मत्तय गच्छोवग्गहे य उग्गहणंतए भणुन्नवणा।
तो सेस पयवत्थे पाउंछणगं च भत्तट्ठी ॥

वृ. अत्र च प्रत्युपेक्षणायां पूर्वोद्दिष्ट एव विधिः, 'मुखवस्त्रिकादिका प्रत्युप्रेक्षणा' एवमादिः, तथा पात्रस्यापि "सोत्ताइओवउत्तो तल्लेसो" इत्येवमादिः इहापि स एव प्रत्युपेक्षणायां विधिर्द्रष्टव्यः, यदत्र नानात्वं-योऽतिरिक्तो विधिर्भवति तं विधिमहं वक्ष्ये 'समासेन' सङ्क्षेपेण, तत्र ये ते प्रत्युपेक्षकास्ते द्विविधाः-भक्तार्थिका-भुक्ताः 'इयरा य' इतरे च उपवासिकाश्च ज्ञातव्याः, 'द्वयोरपि' भक्तार्थिकाभक्तार्थिकयोः 'आदौ' प्रथमं प्रत्युपेक्षणा तुल्या इयं वेदितव्या, 'मुहनंतगसपकायं' प्रथमं मुखवस्त्रिकां प्रत्युपेक्षन्ते ततः 'स्वकायं' निजदेहं प्रत्युपेक्षन्ते मुखवस्त्रिकया, इयं तावदभक्तभक्तार्थिकयोस्तुल्या प्रत्युपेक्षणा, इदानीमभक्तार्थिकानां प्रत्युपेक्षणायां विधिं प्रदर्शयति, तत्र 'ततः' मुखवस्त्रिकाकायप्रत्युपेक्षणानन्तरं 'गुरु'त्ति गुरोः संबन्धिनीमुपधिं प्रत्युपेक्षन्ते, 'परिन्न'त्ति परिज्ञा-प्रत्याख्यानम्, एतदुक्तं भवति-अनशनस्थस्य संबन्धिनीमुपधिं प्रत्युपेक्षन्ते तथा शैक्षकः-अभिनवप्रव्रजितः शिक्षणार्थं अर्पितः तदीयामुपधिं तस्यैवाग्रतः प्रत्युपेक्षते, आदिग्रहणात् वृद्धादिसंबन्धिनीमुपधिं प्रत्युपेक्षते, येऽभक्तार्थिनस्ते एवमनेन क्रमेण कुर्वन्ति प्रत्युपेक्षणां, ततो गुरुं संदिशापयित्वा 'संदिसह इच्छाकारेण ओहियं पडलिहेमि' एवं भणित्वा 'पात्रं' पतद्ग्रहंप्रत्युपेक्षन्ते, मात्रकं चात्मीयं प्रत्युपेक्षन्ते, ततश्च सकलमुपधिं प्रत्युपेक्षन्ते तावद्यावच्चोलपट्टकश्चरममपि प्रत्युपेक्षन्ते। एसो ताव अभत्तट्ठियाण पडिलेहणविही। इदानीं भुक्तानां विधिं प्रतिपादयन्नाह-मुखवस्त्रिकां प्रत्युपेक्ष्य तथैव कायं प्रत्युपेक्ष्य ततः 'पट्टगं'ति चोलपट्टगं प्रत्युपेक्षन्ते, पुनश्च गोच्छकः यः पात्रकस्योपरि दीयते पच्छा पडिलेहणीयं पत्ताबंधो पडलाइं रयत्ताणं पत्तयं चेव, यदि मत्तओ अरिक्को तो एवं, अह रिक्को सो चेव पढमं निक्खिवप्पइ, पुनश्च मात्रके निक्षिप्य स्वकीयमवग्रह-पतद्ग्रहं प्रत्युपेक्षते, ततो गुरुप्रभृतीनां सत्का उपधयः प्रत्युपेक्ष्यन्ते भक्तार्थिकैः, 'अणुन्नवण'त्ति ततो गुरुमनुज्ञापयति, यदुत 'संदिसह ओहियं पडिलेहेमो'त्ति ततः शेषाणि-गच्छप्रत्याधारणानि पात्राणि वस्त्राणि च अपरिभोग्यानि यानि तानि प्रत्युपेक्षन्ते, ततः स्वकीयं पायपुंछणगं-रजोहरणं च प्रत्युपेक्षन्ते, भक्तार्थिन एवमनेन क्रमेण प्रत्युपेक्षणं कुर्वन्ति ॥

मू. (९६७) जस्स जहा पडिलेहा होइ कया सो तहा पढइ साहू।
परियट्टेइ व पयओ करेइ वा अन्नवावारं ॥

वृ. पुनश्च यस्य स्वाध्यायेनैव प्रत्युपेक्षणा भवति 'कृता' परिनिष्ठिता स तथैव पठति परिवर्त्तयति वा-गृणयति वा पूर्वपठितं प्रयतः-प्रयत्नेन करोति चान्यसाधुना समभ्यर्थितः सन् व्यापारं-क्रियाविशेषकर्मयोगं, यद्विाऽन्यं व्यापारं तृणनादि करोति।

मू. (९६८) चउभागवसेसाए चरिमाए पडिक्कमित्तु कालस्स।
उच्चारे पासवणे ठाणे चउवीसइं पेहे॥

मू. (९६९) भद्दियासिया उ अंतो आसन्ने मज्झि तह य दूरे य।
तिन्नेव अनहियासी अंतो छच्छच्च बाहिरओ॥

मू. (९७०) एवेम य पासवणे बारस चउवीसइं तु पेहित्ता।
कालस्सवि तिन्नि भवे अह सूरो अत्थमुवयाई॥

वृ. एवं स्वाध्यायादि कृत्वा पुनश्चतुर्भागावशेषायां चरमपौरुष्यां प्रतिक्रम्य कालस्य ततः स्थण्डिलानि प्रत्युपेक्ष्यन्ते, किमर्थम ?. उच्चारार्थं तथा प्रश्रवणार्थं च स्थानानि चतुर्विंशतिपरिमाणानि प्रत्युपेक्षन्ते। इदानीं ता: स्थण्डिलभूमयः प्रत्युपेक्षणीयाः ? इत्यह आह- अधिकासिका भूमयो या: सञ्ज्ञावेगेनापीडितः सुखेनैव गन्तुं शक्नोति ता एवंविधाः 'अन्तः' मध्ये गणस्य तिस्रः प्रत्युपेक्षणीयाः, कथम् ?. एका स्थण्डिलभूमिर्विस-तेरासन्ना मध्येऽन्या अन्या दूरे, एवमतास्तिस्रः स्थण्डिलभूमयो भवन्ति, तथाऽन्यास्तिस्र एव तस्मिन्नेवा-ङ्गणे आसन्नतरे भवन्ति अनधिकासिकाः-सञ्ज्ञावेगोत्पीडितः सन् या याति ताः तिस्र एव भवन्ति, एका वसतेरासन्नतरे प्रदेशेऽन्या मध्येऽन्या दूरे एवमेता अन्तः-मध्येऽङ्गणस्य षड् भवन्ति, तथा षट् च बाह्यत इति-अङ्गणस्य बहिः षडेवमेव भवन्ति। एवमेव 'प्रश्रवणे' कायिकायां द्वादश भूमयः प्रत्युपेक्ष्यन्ते, षडङ्गणमध्ये षट् चाङ्गणबाह्यत एव, एताः सर्वा एव उच्चारकायिकाभूमीश्चतुर्विंशतिं प्रत्युपेक्ष्य पुनश्च कालस्यापि ग्रहणे तिस्र एव भूमयः प्रत्युपेक्षणीया भवन्ति, ताश्च कालभूमयो जघन्येन हस्तान्तरिताः प्रत्युपेक्ष्यन्ते, एवमनेन प्रकारेण कृतेन अथ सूर्यो यथाऽस्तमुपयाति तथा कर्त्तव्यं।

मू. (९७१) जइ पुन निव्वाघाओ आवासं तो करेंति सव्वेवि।
सज्झाइकहणवाघायताए पच्छा गुरू ठंति॥

वृ. एवं सूर्यास्तमयानन्तरं यदि निर्व्याघातो गुरुः-क्षणिक आस्ते ततः सर्व एवाऽऽवश्यं-प्रतिक्रमणं कुर्वन्ति, अथ श्राद्धधर्मकथादिना व्याघातो गुरोर्जातः-अक्षणिकत्वं ततः पश्चाद्गुरवश्यकभूमौ संतिष्ठन्ते।

मू. (९७२) सेसा उ जहासत्ती आपुच्छित्ताण ठंति सज्झाए।
सुत्तत्थझरणहेउं आयरिएं ठियंमि देवसियं॥

वृ. शेषास्तु साधवो यथाशक्त्याऽऽपृच्छ्य गुरुं स्वस्थाने यथारत्नाधिकतयाऽऽवश्यकभूमौ तिष्ठन्ति, किमर्थं ?, 'सूत्रार्थक्षरणहेतोः' सूत्रार्थक्षरणनिमित्तं तस्यामावश्यकभूमौ कायोत्सर्गेण तिष्ठन्ति, तत्र केचिदेवं भणन्त्याचार्याः-यदुत ये साधवः सामायिकसूत्रं पठित्वा कायोत्सर्गेण तिष्ठन्ति, कायोत्सर्गस्थिताश्च ग्रन्थार्थान चिन्तयन्तस्तिष्ठन्ति तावद्यावद्गुरुरागतः, ततो गुरुः सामायिकसूत्रमाकृष्य दैवसिकमतिचारं चिन्तयति, तेऽपि गुरौ तथास्थिते तूष्णींभावेन कायोत्सर्गस्था एव दैवसिकमतिचारं चिन्तयन्ति। अन्ये त्वाचार्या एवं ब्रुवते, यदुत ते साधवः सूत्रार्थं क्षरन्तस्तावत तिष्ठन्ति यावद्गुरुरागतः, ततो गुरुः सामायिकसूत्रं पठति, तेऽपि कायोत्सर्गस्था एव सामायिकसूत्रं समकं मनसा पठन्ति, ततः सामायिकं पठित्वाऽतिचारं चिन्तयति, आयरिओ अप्पणो अतियारं तिगुणं चिंतइ, किंनिमित्तं ?, ते साहुणो बहुगं हिंडिया तेनो तत्तिएण

कालेण चिंतिउं न सक्कंति।

मू. (९७३) जो होज्ज उ असमत्थो बालो वुड्ढो गिलाणपरितंतो।
सो आवस्सगजुत्तो अच्छेज्जा निज्जरापेही॥

वृ. यस्तु साधुरनागतकायोत्सर्गकरणेऽसमर्थो भवेद्ग्लानो वृद्धो रोगार्त्तो ज्वरादिना स आवश्यकयुक्त स्तस्यामेव प्रतिक्रमणभूमौ उपविष्टः कायोत्सर्गं करोति, एवं निर्जरापेक्षी तिष्ठेत्।

मू. (९७४) आवासगं तु काउं जिनोवदिट्ठं गुरूवएसेणं।
तिन्निथुई पडिलेहा [illegible] इमो तत्थ॥

वृ. एवमनेन क्रमेणावश्यकं 'कृत्वा' परिसमाप्य जिनोपदिष्टं गुरूपदेशेन पुनश्चैत्य स्तुतित्रयं पठन्ति स्वरेण प्रवर्द्धमानमक्षरैर्वा, प्रथमा श्लोकेन स्तुतिर्द्वितीया बृहच्छन्दोजात्या बृहत्तरा तृतीया बृहत्तमा एवं प्रवर्द्धमानाः स्तुतीः पठन्ति मङ्गलार्थमिति ततः कालस्य प्रत्युपेक्षणार्थं निर्गच्छन्ति, किं कालस्य ग्रहणवेला वर्त्तते न वा ? इति, तत्र च-कालवेलानिरूपणे एष विधिरिति वक्ष्यमाणः।

मू. (९७५) दुविहो य होइ को वाघातिम एयरो य नायव्वो।
वाघाओ घंघसालाएं घट्टणं सड्ढकहणं वा॥

वृ. द्विविधो भवति कालो-व्याघातकाल इतरश्च-अव्याघातकालः, तत्र व्याघातकालं प्रतिपादयन्नाह-व्याघातः 'घङ्घशालायाम्' अनार्यमण्डपे दीर्घे 'घट्टना' परस्परेण वैदेशिकैर्वा स्वभैर्वा सह निर्गच्छतः प्रविशतो वा तादृशो व्याघातकालः, तथा श्राद्धकादीनां यत्राचार्यो धर्मकथां करोति सोऽपि व्याघातकालः, न तत्र कालग्रहणं भवति नापि कालवेलानिरूपणार्थं प्रच्छनं भवति।

मू. (९७६) वाघाते तइओ सिं दिज्जइ तस्सेव ते निवेयंति।
निव्वाघाते दुन्नि उ पुच्छंती काल घेच्छामो॥

वृ. एवं घङ्घशालायां व्याघाते सति तृतीयस्तयोः-कालग्राहिणोः उपाध्यायदिर्दीयते येन तस्यैवाग्रतो बाह्यात एव निवेदयन्ति सन्दिशापयन्ति च। अथ निर्व्याघातं भवति-न कथिद् घङ्घशालायां धर्मकथादिर्वा कालव्याघातः वैदेशिकादिव्याघातो वा, ततश्च निर्व्याघाते सति द्वावेव निर्गच्छतः एक कालग्राहकः अपरो दण्डधारी, पुनश्च तौ पृच्छतः, यदुत 'कालं गृह्णावः' वेलां निरूपयाव इत्यर्थः, तयोश्च निर्गच्छतां यद्येते व्याघाता भवन्ति ततश्च निवर्त्तन्तेऽग्रत गृह्णाति कालं॥ के च ते व्याघाताः ?.

मू. (९७७) आपुच्छणा किइकम्मं आवस्सियखलियपडियवाघाओ।
इंदिय टिया य तारा वासमवज्झाइयं चेव॥

मू. (९७८) जइ पुन वच्चंताणं छीयं जोइं च तो नियत्तंति।
निव्वाघाते दोन्नि उ अच्छंति दिसा निरिक्खंता॥

मू. (९७९) गोणादि कालभूमीए होज्ज संजयगा व उड्डुज्जा।
कविहसियवासविज्जुक्कगज्जिए वावि उवघाता॥

वृ. आपृच्छनानाम आपृच्छिता गच्छन्ति वंदगं गृहीत्वा मन्थरेण वंदामि खमासमणो कालस्य वेलां निरूपयेमो, एवं च यदि न पृच्छन्ति ततो व्याघातो भवति-न ग्राह्यः कालः, अथाविनयेन वा पृच्छन्ति तथाऽपि व्याघात एव, कृतिकर्म च-वन्दनं यदि न कुर्वन्ति अविनयेन वा कुर्वन्ति आवश्यिकां च यदि न करोति अविनयेन वा करोति स्खलनं वा गच्छतां यदि स्तम्भादौ भवति पतनं वा तेषामन्यतमस्य यदि भवति,

एवमेभिर्व्याघातो भवति। तथा 'इंदिय'त्ति श्रवणेन्द्रियादीनामिन्द्रियाणां ये विषयास्ते अननुकूला भवन्ति ततो न गृह्यते, एतदुक्तं भवति-यदि छिन्धि भिन्धीत्येवमादि शृण्वन्ति शब्दं ततो निवर्त्तति, एवं गन्धश्चाशुभो यदि भवति, यत्र गन्धस्तत्र रस इति, विरूपं पश्यन्ति रूपं किञ्चिद्, एवं सर्वत्र योजनीयं ततो निर्गच्छन्ति। तथा दिग्मोहश्च यदि भवति ततो न गृह्यते, तारकाश्च यदि पतन्ति वर्षणं वा यदि भवति तत एभिरनन्तरोक्तैर्व्याघातैः कालो न गृह्यते, अस्वाध्यायिकं च यदि भवति, तथा यदि पुनर्व्रजतां क्षुतं ज्योतिर्वाग्निः उच्चैर्नीचो वा भवति ततो निवर्त्तनं, यदा तु पुनरशुभनिमित्तलक्षणो व्याघातो न भवति तदा निर्व्याघाते सति द्वावेव निष्ठतो दिशो निरूपयन्तो क्षणमात्रं। तथा एभिश्च कालभूमौ गतानामुपघातो भवति-यदि तत्र कालमण्डलके गौरुपविष्टः, आदिग्रहणान्महिषादिर्वा उपविष्टो भवति ततो व्याघातः, कदाचिद्वा तस्यां कालभूमौ 'संसर्पगाः' पिपीलिकादय उत्तिष्ठेयुस्ततश्च व्याघातः, कदाचिद्वा कपिहसितं-विद्युल्लतानरमुखहसितं भवति, अथवा कपिहसितं-ग्रहदीप्तयं वा दीप्तदृ जलं वा विद्युत् वा भवति, उल्कापातो वा भवति, गर्जितध्वनिर्वा श्रूयते, एभिः सर्वैर्व्याघातः कालस्य, न गृह्यत इत्यर्थः।

मू. (९८०) सज्झायमचिंतंता कणगं दट्ठूण तो नियत्तंति।
वेलाए दंडधारी मा बोलं गंडए उवमा॥

वृ. एवं ते कालवेलानिरूपणार्थं निर्गताः स्वाध्यायमकुर्वाणा एकाग्राः कालवेलां निरूपयन्ति, अथ तत्र कनकं पश्यन्ति ततः प्रतिनिवर्त्तन्ते, कनकपरिमाणं च वक्ष्यति "तिपंचरत्तेव चिंसिसिरवास" इत्येवमादिना, अथ तत्र वर्त्तते तदा कालग्रहणवेलायां जातायां दण्डधारी प्रविश्य गुरुसमीपे कथयति, यदुत कालग्रहणवेला वर्त्तते मा बोलं कुरुत अल्पशब्दैरवहितैश्च भवितव्यं, अत्र च गण्डकदृष्टान्तः, यथा हि गण्डकः कस्मिंश्चित्कारणे आपन्ने उत्कुरुटिकायामारुह्य घोषयति यामे-इदं प्रत्यूषसि कर्त्तव्यं, एवमसावपि दण्डधारी भणति यदुत कालग्रहणवेला वर्त्तते ततश्च भवद्भिरपि गर्जितादिषूपयुक्तैर्भवितव्यमिति।

मू. (९८१) आघोसिए बहूहिं सुयंमि सेसेसु निवडइ दंडो।
अह तं बहूहिं न सुयं दंडिज्जइ गंडओ ताहे॥

वृ. एवमाघोषिते सति दण्डधारिणा बहुभिश्च श्रुतं, शेषाश्च स्तोकास्तैर्न श्रुतं ततश्च तेषामुपरि दण्डो निपतति-सूत्रार्थकरणं नानुज्ञायते, अथैवं तदा घोषितं यद्बहुभिर्न श्रुतं स्तोकैः श्रुतं ततश्च तस्यैव दण्डधारिणो निपतति-तस्यैव स्वाध्यायजनरोधः क्रियते, कथं गण्डकस्यैव ?, यथा गण्डकेनाघोषिते बहुभिर्ग्रामणीकैः श्रुते सति यैः स्तोकैर्न श्रुतं ते दण्डयन्ते, अथाघोषिते स्तोकैः श्रुतं बहुभिर्न श्रुतं ततो गण्डकस्यैव दण्डो निपततीति।

मू. (९८२) कालो सज्झा य तहा दोवि समप्पंति जह समं चेव।
तह तं तुलंति कालं चरिमादिसं वा असज्झायं॥

वृ. नो च प्रत्युपेक्षको कालः सन्ध्या च यथा द्वे अपि समकमेव समाप्तिं व्रजतस्तथा तं कालं तुलयतः, एतदुक्तं भवति-यथा कालसमाप्तिर्भवति सन्ध्या च समाप्तिं याति तथा तुलयतः प्रत्युपेक्षकौ, 'चरिमदिसं वा असज्झायं'ति चरिमा-पश्चिमा दिग् 'असन्ध्या' विगतसन्ध्या भवति तथा कालश्च समाप्यते तथा गृह्णन्ति। इदानीं किंविशिष्टेन पुनः कालः प्रतिजागरणीयः ? इत्यत आह-

मू. (९८३) पियधम्मो दढधम्मो संविग्गो चेवऽवज्जभीरू य।
खेयन्नो य अभीरू कालं पडिलेहए साहू॥

वृ. प्रियः-इष्टो धर्मोऽस्येति प्रियधर्मा, तथा दृढः-स्थिरो निश्चलो धर्मो यस्य स तथा, 'संविग्गो' मोक्षसुखाभिलाषी, 'अवद्यभीरुः' पापभीरुः, 'खेदज्ञः' गीतार्थः तथा 'अभीरुः' सत्त्वसंपन्नः एवंविधः 'कालं' कालग्रहवेलां प्रत्युपेक्षते साधुः, एवंविधः कालवेलायाः प्रतिजागरणं करोति। इदानीं दण्डधारिणि घोषयित्वा निर्गते पुनश्च स द्वितीयः कालग्राही कालसंदिशनार्थं गुरोः समीपं प्रविशति. कथम ?-

मू. (९८४) आउत्तपुव्वभणिए अनपुच्छा खलियपडिय वाघाते।
घोसंतमूढसंकियइंदियविसएवि भमणुन्ने॥

वृ. स च प्रविशन् 'आयुक्तः' उपयुक्तः सन् प्रविशति, एतस्मिंश्च प्रवेशने पूर्वोक्तमेव द्रष्टव्यं यतो निर्गच्छतो यो विधिः प्रतिशतोऽपि स एव विधिरित्यत आह-पूर्वभणितमेतत्, अथ त्वनापृच्छयैव गुरुं कालं गृह्णाति ततश्चानापृच्छ्य गृहीतस्य कालस्य एतदुक्तं भवति-गृहीतोऽप्यसौ न भवति, तथा स्खलितस्य सतः कालव्याघातः, पतितस्य व्याघातः कालस्य, एवं संजाते सति कालो न गृह्यते, तथा प्रविष्टस्य गुरुवन्दनकाले केनचित्सह जल्पतः कालो व्याहन्यते, तथा मूढो यदि भवति आवर्तान विधिविपर्यासेन ददाति तथाऽपि व्याहन्यते कालः, तथा शङ्कया न जानाति किमावर्त्ता दत्ता न वेत्यस्यामवस्थायां व्याहन्यते कालः, इन्द्रियाविषयाश्च यद्यमनोज्ञा भवन्ति तथाऽपि कालो व्याहन्यते, छिन्धि भिन्ध्यित्येवंविधान शब्दान् शृणोति, गन्धोऽनिष्टो यदि भवति यत्र गन्धस्तत्र रसोऽपि, विकरालं रूपं पश्यति, स्पर्शेन लोष्ट्वभिघातोऽकस्माद्भवति, एवंविधे सत्यामपि वेलायां न गृह्णाति कालं। प्रविष्टश्चासौ किं करोतीत्यत आह-

मू. (९८५) निसीहिया नमोक्कारे काउस्सग्गे य पंचमंगलए।
पुव्वाउत्ता सव्वे पट्ठवणचउक्कनाणत्तं॥

वृ. प्रविशंश्च गुरुसमीपे कालसन्दिशनार्थं यदि निषेधिकां न करोति ततः कालो व्याहन्यते, नमस्कारं करोति नमो खमासमणाणं, अथैवं न भणति ततः कालव्याघातो भवति, प्रागप्यैर्यापथिकाप्रत्ययं 'कायोत्सर्गम्' अष्टोच्छ्वासं करोति, नमस्कारं च चिन्यतति, ईरियावहियं च अवस्सं पडिक्कमति जइ दूराओ जदि आसन्नाओ वा आगतो, पुनरपि नमस्कारेणोत्सारयति-पञ्चमङ्गलकेनेत्यर्थः, पुनश्च संदिशापयित्वा कालग्रहणार्थं निर्गच्छति, निर्गच्छंश्च जदि आवस्सियं न करेइ खलन्त पडति वा जीवो वा अंतरे हवेज्जा एवमादीहिं उवहम्मइ। इदानीं कालग्रहणवेलायां किं कर्त्तव्यं साधुभिः ? इत्याह-'पुव्वाउत्ता' पूर्वमेव दण्डधारिघोषणानन्तरमुपयुक्ताः सर्वे गर्जिताद्यो भवन्ति, उपयुक्ताश्च सन्तः कालग्रहोत्तरकालं सर्वे स्वाध्यायप्रस्थापनं कुर्वन्ति। 'चउक्कनाणत्तं'ति कालचतुष्कस्य यथा नानात्वं भवति तथा वक्ष्यामः, कालचतुष्के एकः प्रादोषिकः अपरोऽर्द्धरात्रिकः अपरो वैरात्रिकः अपरः प्राभातिकः, एतच्च भाष्यकारो वक्ष्यति।

मू. (९८६) थोवावसेसियाए सज्झाए ठाइ उत्तराहुत्तो।
चउवीसगदुमपुप्फियपुव्वग एक्केक्कदंडिसाए॥

वृ. श्लोकावशेषायां सन्ध्यायां पुणो कालमंडलयं पमज्जित्ता निषीधिकां कृत्वा कालमण्डलके प्रविशति, ततश्चोत्तराभिमुखः कायोत्सर्गं करोति, तस्मिंश्च पञ्चनमस्कारमष्टोच्छ्वासं चिन्तयति, पुनश्च नमस्कारेणोत्सार्य मूक एव चतुर्विंशतिस्तवं लोगस्सुज्जोयकरं पठति मुखमध्ये, तथा 'दुमपुप्फियपुव्वगं'ति द्रुमपुष्पिकाधम्मो मंगलं पुव्वगंति-श्रामण्यपूर्वके 'कहं नु कुज्जा सामन्नमित्यर्थः, एतच्च एकैकस्यां दिशि चतुर्विंशतिस्तवादि सामन्नपुव्वगपज्जंतं कड्ढइ. दंडधारीवि दंडधारीवि उत्तराभिमुहस्स संठियस्स वामपासे पुव्वदिसाहुत्तो अग्गओ तेरिच्छं दंडगं धरेइ उद्धट्ठियओ, पुणो तस्स पुव्वाईसु दिसासु चत्तारस्स दंडधारीवि

तहेव भणति। इदानीं स गृह्णन् कालं यद्यवं गृह्णाति ततो व्याहन्यते, कथमित्यत आह-

मू. (९८७) भासंतमुद्धसंकियइइदयविस्सए य होइ अमणुन्ने।
बिंदू य छीयऽपरिणय सगणे वा संकियं तिण्हं॥

वृ. भाषमाणः-ओष्ठसञ्चारेण पठन यदि कालं गृह्णाति ततो व्याहन्यते कालः. मूढो दिशि अध्ययने वा यदि भवति ततो व्याहन्यते कालः. शङ्कितो वा-न जानाति किं मया द्रुमपुष्पिका पठिता न वेत्येवंविधायां शङ्कायां व्याहन्यते कालः, इन्द्रियविषयाश्च 'अमनोज्ञाः' अशोभनाः शब्दादयो यदि भवन्ति ततो व्याहन्यते कालः, सोइंदिए छिंद भिंद मारेह विस्सरं बालाइणं रोवणं वा रूवं वा पेच्छति पिसायाइणं बीहावणयं, गंधे य दुरभिगंधे, रसेवि तत्थेव, जत्थ गंधो तत्थ रसो, फासो बिंदुलिट्ठुपहाराई, एवमेतेष्वमनोज्ञेषु विषयेषु गत्सु व्याघातो भवति, तथा बिन्दुर्यद्युपरि पतति शरीरस्योपधेर्वा कालमण्डलके वा ततो व्याहन्यते, तथा क्षुतं यदि भवति ततो व्याहन्यते, 'अपरिणत' इति कालग्रहणभावोऽपगतोऽन्यचित्तो वा जानन्ततश्च व्याहन्यते कालः. तथा शङ्कितेनापि गर्जितादिना व्याहन्यते कालः. कथं ?, यद्येकस्य सार्धमगर्जितादिशङ्का भवति ततो न व्याहन्यते कालः, द्वयोरपि शङ्कितं न भज्यते कालः, त्रयाणां तु यदि शङ्का गर्जितादिजनिता भवति ततो व्याहन्यते, तच्च 'स्वगणे' स्वकीयच्छे त्रयाणां यदि शङ्कितं भवति, न परगणे, ततो व्याहन्यते। इदानीमस्या एव गाथाया भाष्यकारः किञ्चिद्व्याख्यानयन्नाह-

मू. (९८८) मूढो व दिसऽज्झयणे भासंतो वावि गिण्हइ न सुज्झे।
अन्नं च दिसऽज्झयणं सदंकंतोऽनिट्ठविसयं वा॥ [भा. ३०९]

वृ. मूढो यदा दिशि भवति अध्ययने वा तदा व्याहन्यते, भाषमाणो वा ओष्ठसञ्चारेण यदि गृह्णाति कालं ततो न शुद्ध्यति, अन्यां वा दिशं संक्रान्तो मोहात्, अध्ययनं वाऽन्यत् सङ्क्रांतं द्रुमपुष्पिकां मुक्त्वा सामन्नपुव्वए गओ उत्तराए वा दिसाए दिक्खिण्णं गतो. यद्वाऽन्यां दिशं शङ्कमानः अन्यद्वाऽध्ययनं शङ्कमानो यदा भवति तदा न शुद्ध्यति, 'अनिष्टे' अशोभने वा शब्दादिविषयसन्निधाने व्याहन्यते कालः, ततो आवस्सियं काऊण नीसरति कालमंडलाओ, एवं गृहीतेऽपि काले यदि कालमण्डलकान्निर्गच्छन्नावश्यकादि न करोति ततो व्याहन्यत एव काल इति। किञ्च-

मू. (९८९) जो वच्चंतंमि विही आगच्छंतंमि होइ सो चेव।
जं एत्थं नाणत्तं तमहं वुच्छं समासेणं॥

वृ. य एव प्रथमं वसतेर्व्रजतो विधिरुक्तस्तथा-यदि कविहसियं वा उक्का वा पडति गज्जति वा, एवमाईहिं उवघाओ महियरम्मवि कालस्स होइ आगच्छंतस्स वसहिं, ततश्च यो विधिर्व्रजतः कालभूमावुक्तः आगच्छतोऽपि पुनर्वसतौ स एव विधिर्भवति, यत्पुनरत्र वसतौ प्रविशतो नानात्वं-भवत्यनयोर्नानात्वं वक्ष्ये 'समासेन' संक्षेपेण। इदानीं नानात्वं प्रतिपादयन्नाह-

मू. (९९०) निसीहिया नमुक्कारं आसज्जावडपडणजोइक्खे।
अपमज्जियभाए वा छीए छिन्नेव कालवहो॥

वृ. कालं गृहीत्वा गुरुसकाशे प्रविशन यदि नैषेधिकीं न करोति ततः कालव्याघातः, तथा 'नमोक्कारे' नमो खमासमणाणं इत्येवं यदि न प्रविशन भणति ततो गृहीतोऽपि कालो व्याहन्यते, तथा आसज्जासज्जत्येवं तु यदि न करोति ततो व्याहन्यते गृहीतोऽपि, तथा साधोः कस्यचिदावडणं-आभिडणं कालो व्याहन्यते, पतनं लोष्टादेरात्मनो वा, ज्योतिष्कस्पर्शो वा व्याहन्यते, तथा यदि प्रमार्जयन न प्रविशति ततश्च व्याहन्यते

कालः, 'भीतः' त्रस्तो वा यदि भवति तथाऽपि व्याहन्यते, श्रुते वा व्याहन्यते, छिनत्ति वा-यदि मार्जारस्थादिस्तिर्यक् छिन्दन् व्रजति, ततश्चैभिरनन्तरोदितैः कालस्य वधो-भङ्गो भवतीति।

मू. (९९१) आगम इरियावहिया मंगल आवेयणं तु मरुनायं।
सव्वेहिवि पट्ठविएहि पच्छा करणं अकरणं वा॥

वृ. आगत्य च गुरुसमीपमीर्यापथिकां प्रतिक्रामति, कायोत्सर्गं चाष्टोच्छ्वासं पञ्चनमस्कारं चिन्तयति, तेनैव चोत्सारयति, मङ्गलमिति पञ्चनमस्कार उच्यते, तत ईर्यापथिकां प्रतिक्रम्य गुरोः 'आवेदयति' निवेदयति कालमित्यर्थः। अत्र मरुओ-ब्राह्मणो तेनैव ज्ञातं-दृष्टान्तः, तंजहा-कम्हिइ पट्टणे थिज्जायाणं राइणा दिन्नं, तेसिं च थोसावियं-जो सामन्नो सो गेण्हउ आगंतुणं भागं एत्थ, एवं हक्कारिए जो आगतो तेन तस्सो भागो, जो पुन गामाईसु गतो सो चुक्को, एवं साहूवि दंडधारिणा घोसिए जे उक्कउना ठिया निवेदिए य काले जेहिं सन्झाओ पट्ठविओ ताणं स जाओ दिज्जइ, जे पुन विकहादिणा ठिया ताणं सज्झाओ दिज्जइ, जे पुन विकहादिणा ठिया ताणं सज्झायकरणं न दिज्जइ। एतदेवाह-सर्वैः साधुभिः स्वाध्याये प्रस्थापिते सति पश्चा-तेभ्यः स्वाध्यायकरणं दीयते, ये पुनः कालग्रहणवेलायामुपयुक्ता न स्थिताः न स्वाध्यायप्रस्थापनवेलायां सन्निहिता भूतास्तेभ्य स्वाध्यायकरणं न दीयते। इदानिं मरुककथानकम-

मू. (९९२) सन्निहियाण वडारो पट्ठविय पमाय नो दए कालं।
बाहिठिए पडियरए पविसइ ताहेव दंडधरो॥

वृ. सन्निहितानां त्रैविद्यब्राह्मणानां 'वडारो' वण्टकः आकरणं-आह्वानं यथासन्निहितानां, ये तु नागतास्तेषां न वण्टको-विभागो जातः, एवमत्रापि 'पट्ठविय'त्ति स्वाध्यायप्रस्थापनं यैः कृतं तेभ्यो दीयते स्वाध्यायः, ये पुनः प्रमादिनस्तेभ्यो न दीयते काल इति, काले गृहीते स्वाध्यायो भवति, पुनश्च निवेदिते सति काले पुनर्बहिरन्यः प्रतिजागरकः प्रेष्यते, पुनश्च तत्र बहिःस्थिते प्रतिजागरके सति ततो दण्डधारी प्रविशतीति।

मू. (९९३) पट्ठविय वंदिए या ताहे पुच्छेइ किं सुयं भंते!।
तेवि य कहेंति सव्वं जं जेन सुयं व दिट्ठं वा॥

वृ. पुनश्चासौ प्रस्थापितस्वाध्यायो वन्दितगुरुश्च सन् तदा साधून पृच्छति दण्डधारी, यदुत हे भदन्त! भवतां मध्ये केन किं श्रुतं?, तेऽपि च साधवः कथयन्ति सर्वं यथेन श्रुतं गर्जितादि दृष्टं वा कपिमुखादि। पुनश्च तत्र कस्याश्चिद्गर्जितादिशङ्का भवति ततश्च को विधिरित्यत आह-

मू. (९९४) एक्कस्स दोण्ह स संकियंमि कीरइ न कीरए तिण्हं।
सगणंमि संकिए परगणंमि गंतुं न पुच्छंति॥

वृ. एकस्य गर्जितादिशङ्किते क्रियते स्वाध्यायः, द्वयोर्वा, त्रयाणां पुनर्गर्जिताद्याशङ्कायां न क्रियते स्वाध्यायः, एवं यदि स्वगणे शङ्का भवति ततश्चैवंविधायां स्वगणे शङ्कायां सत्यां 'परगणे' अन्यगच्छे गत्वा न पृच्छन्ति, किं कारणं?, यत इह कदाचिन्मम कालग्राहकः साधुः सुधिरादिनाऽनायुक्त आसीत् ततश्च देवता कालं शोधयितुं न ददाति, तत्र तु परगणे नैवं, अथवा परगण एव कदाचिदनायुक्तः कश्चिद्भवति इह तु नैवं, तस्मात्परगणो न प्रमाणमिति। इदानीं यदुक्तं मान्मीत 'कालचतुष्के नानात्वं वक्ष्यामः' तत्प्रदर्शयन्नाह-

मू. (९९५) कालचउक्के नाणत्तयं तु पाओसियंमि सव्वेवि।
समयं पट्ठवयंती सेसेसु समं व विसमं वा॥

वृ. कालानां चतुष्कं कालचतुष्कं तत्रैकः प्राभातिकः द्वितीयोऽर्द्धरात्रिकः तृतीयो वैरात्रिकः चतुर्थः प्राभातिकः कालः इति. एतस्मिंश्चतुष्के कालचतुष्के नानात्वं पश्यदर्शयति, तत्र प्राभातिककाले सर्व एव समकं स्वाध्यायं प्रस्थापयन्ति. शेषेषु तु त्रिषु कालेषु समकं-एककालं स्वाध्यायं प्रस्थापयन्ति विषमं वा-न युगपद्वा स्वाध्यायं प्रस्थापयन्तीति। इदानीं चतुर्णामपि कालादीनां कनकपतने सति यथा व्याघातो भवति तथा प्रदर्शयन्नाह-

मू. (९९६) इंदियमाउत्ताणं हणंति कणगा उ मत्त उक्कोसं।
वासासु य तिन्नि दिसा उउबुद्धे तारगा तिन्नि॥

वृ. इन्द्रियैः-श्रवणादिभिरुपयुक्तानां 'घ्नन्ति' व्याघातं कुर्वन्ति कालस्य कनका उत्कर्षेण सप्त, एतच्च वक्ष्यति, 'वासासु य तिन्नि दिस'त्ति 'वर्षासु' वर्षाकाले प्राभातिके काले गृह्यमाणे तिसृषु दिक्षु यद्यालोकः शुद्ध्यति चक्षुषो न कुड्यादिभिरन्तरितस्ततो गृह्यत एव कालः, अन्यथा व्याघात इति. एतद्विशेषविषयं दृष्टव्यं, शेषेषु त्रिष्वाद्येषु कालेषु चतसृष्वपि दिक्षु चक्षुष आलोको यदि शुद्ध्यति ततो गृह्यते वर्षाकाले नान्यथा, एतच्च प्रकटीकरिष्यति। 'उउबद्धे तारगातिन्नि'त्ति ऋतुबद्धे-शीतोष्णकालयोरादेषु त्रिषु कालेषु यदि मेघच्छन्नेऽपि तारकात्रयं दृश्यते ततः शुद्ध्यति कालग्रहणं, यदि पुनस्तिस्रोऽपि न दृश्यन्ते ततो न ग्राह्यः, प्राभातिकस्तु कालः ऋतुबद्धे मेघैरदृश्यमानायामप्येकस्यामपि तारकायां गृह्यते कालः, वर्षाकाले त्वेकस्यामपि तारकायामदृश्यमानायां चत्वारोऽपि काला गृह्यन्ते। इदानीमेनामेव गाथां भाष्यकृद्व्याख्यानयति-

मू. (९९७) कणगा हणंति कालं तिपंचसत्तेव घिंसिसिरवासे।
उक्का उ सरेहावगा रेहारहितो भवे कणतो॥ [भा. ३१०]

वृ. कनकाः घ्नन्ति कालं त्रयः पञ्च सप्त यथासङ्ख्येन 'घिंसिसिरवासे' ग्रीष्मकाले त्रयः कनकाः कालं व्याघ्नन्ति शिशिरकाले पञ्च घ्नन्ति कालं वर्षाकाले सप्त घ्नन्ति कालम्। इदानीमुल्काकनकयोर्लक्षणं प्रतिपादयन्नाह-उल्का सरेखा भवति, एतदुक्तं भवति-निपततो ज्योतिष्पिण्डस्य रेखायुक्तस्य उल्केत्याख्या, स एव च रेखारहितो ज्योतिष्पिण्डः कनकोऽभिधीयते।

मू. (९९८) सव्वेवि पढमजामं दोन्नि उ वसभा उ आइमा जामा।
तइओ होइ गुरुणं चउत्थओ होइ सव्वेसिं॥

वृ. तस्मिंश्च प्राभातिके काले गृहीते सति सर्व एव साधवः प्रथमयामं यावत्स्वाध्यायं कुर्वन्ति, द्वौ त्वाद्यौ यामौ वृषभाणां भवतो गीतार्थानां, ते हि सूत्रार्थं चिन्तयंतस्तावत्तिष्ठन्ति यावत्प्रहरद्वयमतिक्रान्तं भवति. तृतीया च पौरुष्यवतरति, ततस्ते चैव कालं गृह्णन्ति अङ्गुरुतियं, उवज्झायाईणं संदिसावेत्ता ततो कालं घेत्तूणं आयरियं उट्ठवेंति, वंदनयं दाऊण भणंति-सुद्धो कालो, आयरिया भणंति-तहत्ति. पच्छा ते वसभा सुयंति, आयरिओवि बितियं उट्ठावेत्ता कालं पडियरावेइ, ताहे एगचित्तो सुत्तत्थं चिंतेइ जाव वेरत्तियस्स कालस्स बहुदेसकालो, ताहे तइयपहरे अतिक्कंते सो कालपडिलेहगो आयरियस्स पडिसंदेसावेत्ता वेरत्तियं कालं गेण्हइ, आयरिओवि कालस्स पडिक्कमित्ता सोवति, ताहे जे ओइयल्लया साहू आसी ते उट्ठवेऊण वेरत्तियं सज्झायं करेंति जाव पाभाइयकालगहणवेला जाया, ततो एगो साहू उवज्झायस्स वा अन्नस्स वा संदिसावेत्ता पाभाइयं कालं गेण्हइ, जए नवण्हं कालगहणाणं वेला पहुच्चति सज्झाए आरतो चेव पुणो ताहे साहुणो सव्वे उट्ठेंति, किह पुन नव काला पडिलेहिज्जंति, पढमो उवद्दिओ कालग्गाहो तस्स तिन्नि वारा कालो उवहअसो एक्कमि मंडलए, नओ पुणो बितिओ उट्ठेइ सो बितिए मंडलए तिन्नि वारा लेइ, तितस्स जदि न सुज्झंति ततो तइओ साहू उट्ठेइ, सोवि ततिए मंडलए तिन्नि वारा लेइ, तितस्स जदि न सुज्झंति

ताहे भग्गो कालो, एत्थ तेताण साहूण नव वाताक्यराणं पभा फुट्टति, ततो तीए वेलाए पडिक्कमंति. अह तिन्नि कालगाहिणो नित्थ कि तु दुवे चव, तत्तो इक्को पढमे पढमकालमंडलए तिन्नि वारा उल्लंऊण ततो बितिए दो वारे गिण्ह ततो बितिओ साहू वयण चेव कालमंडलए एक्कं वारं लंऊण ततो तइए मंडले तिन्नि वाराओ गेण्हइ, एवं चेव नव वारा हवंति. अहवा पढमे चेव कालमंडलए एगो चत्तारि वाराओ लेइ, बितिओ पुण बितिए कालमंडलए दो वाराओ लेइ, ततिए तिन्नि वाराउ लेइ सो चेवबितिओ, एवं वा दोण्हं साहूणं नव वाराओ भवंति, अह एक्को चेव कालग्गाही तओ भववावाएण सो चेव पढमे तिन्नि वारा लेइ, पुणो सो चेव बितिए मंडले तिन्नि वारा लेइ, पुणो सो चेव ततिए मंडलए तिन्नि चेव वासओ लेइ। एसो पाभाइकालस्स विही। एवं च सति कालस्स पडिक्कमित्ता गुवंति, एगो न पडिक्कमति, सो आववाएण कालं निवेदिस्सइ॥ इदानीं यदुक्तं "वासासु य तिन्नि दिसा"त्ति तद्व्याख्यानयन्नाह-

मू. (९९९) वासासु य तिन्नि दिसा हवंति पाभाइयम्मि कालंमि।
सेसेसु तीसु चउरो उदंमि चउरो चउदिसंपि॥ [भा. ३११]

वृ. वर्षासु तिस्रो दिशो यदि कुड्यादिभिस्तिरोहिता न भवन्ति ततः प्राभातिककालग्रहणं क्रियते, शेषेषु त्रिषु कालेषु चतसृष्वपि दिशो यदि कुड्यादिभिस्तिरोहिता न भवन्ति ततो गृह्यन्ते कालाः ?, नान्यथा, 'उदंमि चउरो चउदिसंपि'त्ति ऋतुबद्धे काले चत्वारोऽपि काला गृह्यन्ते यदि चतसृष्वपिदिशोऽतिरोहिता भवन्ति नान्यथा, एतदुक्तं भवति-चतसृष्वपि दिक्षु यद्यालोको भवति ततश्चत्वारोऽपि काला गृह्यन्ते। इदानीम् "उबद्धे तारका तिन्नि"त्ति व्याख्यायते-

मू. (१०००) तिसुतिन्नि तारगा उउदुंमि पाभाइए अदिट्ठेवि।
वासासअितारागा चउरो छन्ने निविट्ठोवि॥ [भा. ३११]

वृ. 'त्रिषु' आद्येषु कालेषु घनसंछादितेऽपि ऋतुबद्धे काले यदि तारकास्तिस्रो दृश्यन्ते ततस्त्रयः काला आद्या गृह्यन्त इति, 'पाभाइए अदिट्ठेवि'त्ति प्राभातिके काले गृह्यमाणे ऋतुबद्धे घनाच्छादिते यदि तारकत्रितयमपि न दृश्यते तथाऽपि गृह्यते काल इति। वर्षाकाले पुनर्घनाच्छादितेऽपि अदृष्टतारा एव चत्वारोऽपि काला गृह्यन्ते। छन्ने न सावकाशे एते चत्वारोऽपि कालागृह्यन्ते। 'निविट्ठोवि'त्ति प्राभातिके त्वयं विशेषः-उपविष्टोऽपि छन्ने स्थाने ऊर्द्धवस्थानस्यासति गृह्णाति। एतदेव व्याख्यानयन्नाह-

मू. (१००१) ठाणासति बिंदूसु गेण्हइ निट्ठोवि पिच्छमं कालं।
पडियरइ बाहि एक्को एक्को अंतट्ठिओ गिण्हे॥

वृ. स्थानस्यासति. एतदुक्तं भवति-यद्यूर्द्धवस्थितो न शक्नोति ग्रहीतुं कालं ततः स्थानाभावे सति तोयबिन्दुषु वा पतत्सु सत्सु गृह्णात्युपविष्टः पश्चिमं-प्राभातिकं कालं, तथा प्रतिजागरणं करोति द्वारि एको स्थितः ओलिकापालादेरधस्तान्स्थितः साधुः, एकश्च साधुरन्तः-मध्ये स्थितो गृह्णाति कालमिति। इदानीं कः कालः कस्यां दिशि प्रथमं गृह्यते ?, एतत्प्रदर्शयन्नाह-

मू. (१००२) पाओसियअड्ढरत्ते उत्तरदिसि पुव्व पेहए कालं।
वेरत्तियंमि भयणा पुव्वदिसा पच्छिमे काले॥

वृ. प्रादोषिकः अर्द्धरात्रिकश्च कालः द्वावप्येतावुत्तरस्यां दिशि 'पूर्वं' प्रथमं प्रत्युपेक्षते-गृह्णाति ततः पूर्वादिदिक्षु, वैरात्रिकतृतीयकाले भजना-विकल्पः कदाचित् उत्तरस्यां पूर्वं पूर्वस्यां वा, पुनः पश्चिमे-प्राभातिके काले पूर्वस्यां दिशि प्रथमं करोति कायोत्सर्गं ततः पुनर्दक्षिणादाविति।

मू. (१००३) सज्झायं काऊणं पढमबितियासु दोसु जागरणं।
अत्तं वावि गुणंतो सुणंति झायंति वाऽसुद्धे॥

वृ. एवं यदि शुद्ध्यति प्रादोषिकः कालस्ततः स्वाध्यायं कृत्वा प्रथमद्वितीयपौरुष्योर्जागरणं कुर्वन्ति साधवः अथासौ प्रादोषिकः कालो न शुद्धस्ततः 'अन्यत' उत्कालिकं गुणयन्ति शृण्वन्ति ध्यायन्ति तथाऽशुद्धे सति, एण्हिं अववाओ भन्नइ-जति पाओसिओ सुद्धो ततो अड्ढरत्तिओ जइवि न सुज्झइ तहवि तं चेव पवेयइत्ता सज्झायं कुणंति, एवं जइ वेरत्तिओ न सुज्झइ ततो अणुग्गहत्थं जइ अड्ढरत्तिओ सुद्धो तओ तं चेव पवेयइत्ता सज्झायं कुणंति, एवं जइ न पाभाइओ तओ तं चेव पवेयइत्ता सज्झायं कुणंति, एवं द्रव्यक्षेत्रकालभावा ज्ञातव्या इति।

मू. (१००४) जो चेव अ सयणासणवही नेगाणं वन्निओ वग्गहिदारे।
सो चेव इहंपि भवे नाणत्तं उवरि सज्झाए॥

वृ. य एव शयितव्ये विधिः पूर्वमनेकानां प्रत्युपेक्षकाणां व्यावर्णितो वसतिद्वारे स एवात्रापि द्रष्टव्यः, नानात्वं यदि परमिदं, यदुत स्वाध्यायं कृत्वा स्वपन्तीति।

मू. (१००५) एसा सामायारी कहिया भे! धीरपुरिसपन्नत्ता।
एत्तो उवहिपमाणं वुच्छं सुद्धस्स जह धरणा॥

वृ. सुगमा॥ उक्तं पिण्डद्वारं, इदानीमुपधिद्वारप्रतिपादनायाह-नवरं शुद्धस्य [illegible] धरणं भवति तथा वक्ष्ये। 'नत्त्वभेदपर्यायैर्व्याख्ये'ति न्यायात् पर्यायान्प्रतिपादयन्नाह-

मू. (१००६) उवही उवग्गहे संगहे य तह पग्गहुग्गहे चेव।
भंडग उवगरणे या करणेवि य हुंति एगट्ठा॥

वृ. उपदधातीत्युपधिः, किमुपदधाति?, द्रव्यं भावं च, द्रव्यतः शरीरं भावतो ज्ञानदर्शनचारित्राणि उपदधाति, उपगृह्णातीत्युपग्रहः, संगृह्णातीति संग्रहः, प्रकर्षेण गृह्णातीति प्रग्रहः, अवगृह्णातीत्यवग्रहः, तथा भण्डकमुच्यते उपधिः, तथा 'उपकरणं' उपकरोतीत्युपकरणं, तथा करणमुच्यत उपधिरिति, एते एकार्थाः। इदानीं भेदतः प्रतिपादयन्नाह-

मू. (१००७) ओहे उवग्गहंमि य दुविहो उवही उ होइ नायव्वो।
एक्केक्कोवि य दुविहो गणणाए पमाणतो चेव॥

वृ. उपधिर्द्विविधः-ओघोपधिः उपग्रहोपधिश्चेति, एवं द्विविधो विज्ञेः, तिनी स एवैकैको द्विविधः, कथं?, गणनाप्रमाणेन प्रमाणप्रमाणतश्च, एतदुक्तं भवति-ओघोपधेर्गणनाप्रमाणेन प्रमाणप्रमाणेन च द्वैविध्यं, अवग्रहोपधेरपि गणनाप्रमाणेन प्रमाणप्रमाणेन च द्वैविध्यं, तत्र ओघोपधिर्नित्यमेव यो गृह्यते, अवग्रहावधिस्तु कारणे आपन्ने संयमार्तं यो गृह्यते सः अवग्रहावधिरिति, ओघोपधेः गणनाप्रमाणेन प्रमाणमेकद्वयादिभेदं वक्तव्यं प्रमाणप्रमाणं च कर्तव्यं दीर्घपृथुतया, तथाऽवग्रहोपधेरपि, कट्यादिगणनाप्रमाणं प्रमाणप्रमाणं च दीर्घपृथुत्वद्वारेण वक्तव्यमिति। तत्र ओघोपधिर्जिनकल्पिकानां प्रतिपाद्यते-

मू. (१००८) पत्तं पत्ताबंधो पायट्ठवणं च पायकेसरिया।
पडलाइं रयत्ताणं च गुच्छओ पायनिज्जोगो॥

मू. (१००९) तिन्नेव य पच्चागा रयहरणं चेव होइ मुहपत्ती।
एसो दुवालसविहो उवहि जिनकप्पियाणं तु॥

मू. (१०१०) एए चेव दुवालस मत्तग अइरेगपडिग्गहो य।
एसो चउद्दसविहो उवही पुण थेरकप्पम्मि ॥

वृ. पात्रकं पात्रकबन्धस्तथा पात्रकस्थापनं 'पात्रकेसरिका' पात्रकमुखवस्त्रिकातथा पटलानि रजस्त्राणं गोच्छकः अयं 'पात्रनियोगः' पात्रपरिकर इत्यर्थः। त्रयः 'प्रच्छादकाः' कल्पा इत्यर्थः, तथा रजोहरणं मुख-वस्त्रिका चेति, एवं। चतुर्दशविध एवोपधिर्जिनकल्पिकानां भवति। इदानीं स्थविरोपधिं गणनाप्रमाणतः प्रतिपादयन्नाह-एत एव चतुर्दश निजकल्पिकसत्काः पात्रकाद्या मुखवस्त्रिकापर्यन्ता उपध्यवयवा भवन्ति स्थविराणां स्थविरकल्पे अतिरिक्तस्तु मात्रकपटलकश्च भवति, एष चतुर्दशविध उपधिः स्थविरकल्पे भवति। इदानीं असङ्ग्रहग्रहणगाथया सर्वमेतदुपसङ्ग्रहन्नाह-

मू. (१०११) जिनां बारसरूवाइं, थेरा चउहमरविणो।
अज्जाणं पत्तवासं तु, अओ उड्ढं उवग्गहो ॥

वृ. जिनानां-जिनकल्पिकानां 'द्वादश रूपाणि' उक्तलक्षणानि भवन्ति, स्थविराणां 'चतुर्दश रूपाणि' उक्तलक्षणानि भवन्ति, आर्यिकाणां [illegible] उक्तलक्षणः, एष च [illegible] लक्षणः, 'अत ऊर्ध्वं' उक्तप्रमाणात् सर्वेषामेवैष उपधिर्भवति स उपग्रहो वेदितव्यः। इदानीं स जिनकल्पिकोपधिः स्थविर-कल्पिकोपधिश्च सर्व एव त्रिविधो भवति, तस्योपधेर्मध्ये कानिचिदुत्तमान्यङ्गानि कानिचिज्जघन्यानि कानिचिन्मध्यमानि, तत्र जिनकल्पिकानां तावत्प्रतिपादयन्नाह-

मू. (१०१२) तिन्नेव पच्छागा पडिग्गहो चेव होइ उक्कोसो।
गुच्छगपत्तगदवणं मुहनंतगकेसरि जहन्नो ॥

वृ. तत्र य प्रच्छादकाः कल्पा इत्यर्थः पतद्ग्रहश्चेत्येष। जिनकल्पिकावधेर्मध्ये उत्कृष्ट उपधिः प्रधानश्चतुर्विधोऽपि, अत्रापि प्रधानान्यङ्गानीत्यर्थः, गोच्छकः पात्रकस्थापनं मुखानन्तकं-मुखवस्त्रिका पात्रकेसरिका-पात्रमुखवस्त्रिका चेति, एष जिनकल्पावधेर्मध्ये जघन्यः-अप्रधानश्चतुर्विध उपधिरिति, पात्रबन्धः पटलानि रजस्त्राणंरजोहरणमित्येष चतुर्विधोऽप्युपधिर्जिनकल्पिकावधेर्मध्ये मध्य उपधिः-न प्रधानो नाप्यप्रधान इति। उक्तो जिनकल्पिकानामुत्कृष्टजघन्यमध्यम उपधिरिति। इदानीं स्थविर-कल्पिकानां प्रतिपादयति, तत्रापि प्रथमं मध्यमोपधिप्रतिपादनायाह-

मू. (१०१३) पडलाइं रयत्ताणं पत्तबंधो य चोलपट्टो य।
रयहरण मत्तओऽवि य थेराणं छव्विहो मज्झो ॥

वृ. पटलानि रजस्त्राणं पात्रकबन्धश्च चोलपट्टकश्च रजोहरणं मात्रकं चेत्येष स्थविरावधिमध्ये षड्विधो मध्यमोपधिः नोत्कृष्टो नापि जघन्य इति। पात्रकं प्रच्छादककल्पत्रयं, एष चतुर्विधोऽप्युत्कृष्टः-प्रधानः स्थविरकल्पिकावधिमध्ये, पात्रस्थापनकं पात्रकेसरिका गोच्छको मुखवस्त्रिकेत्येष जघन्योपधिः स्थविरकल्पिकावधिमध्ये चतुर्विधोऽपि। इदानीं आर्यिकाणामोघोपधिं गणनाप्रमाणतः प्रतिपादयति-

मू. (१०१४) पत्तं पत्तबंधो पायट्ठवणं च पायकेसरिया।
पडलाइं रयत्ताणं च गोच्छओ पायनिज्जोगो।

मू. (१०१५) तिन्नेव पच्छागा रयहरणं चेव होइ मुहपत्ती।
तत्तो य मत्तगो खलु चउदसमो कमढगो चेव ॥

मू. (१०१६) उग्गहनंतगपट्टो अद्धोरुग चलणिया य बोद्धव्वा।

अब्भिंतर बाहिरियं संणियं तह कुंचुगे चेव ॥

मू. (१०१७) उक्कच्छिय वेकच्छी संघाडी चेव खंधकरणी य।

ओहोवहेंमि एए अज्जाणं पन्नवीसं तु ॥

वृ. तत्र गाथाद्वयं पूर्ववद् (वं तावद्) व्याख्यातं, नवरम आर्यिकाणां कमठकमेतदर्थं भवति यतस्तासां प्रतिग्राहको न भ्रमति तुच्छस्वभावत्वात्, कमठक एव भोजनक्रियां कुर्वन्नीति। इदानीं भाष्यकारो गाथाद्वयं व्याख्यानयन्नाह-

मू. (१०१८) नाभानिभो उगहनंतगो उ सो मुज्झदेसरुक्खट्ठा।

सो उ पमाणेणेगो घनमसिणो देहमासज्ज ॥ [भा. ३१३]

मू. (१०१९) पट्टोवि होइ एक्को देहपमाणेन सो उ भइयव्वो।

छायंतोग्गहनंतं कडिबंधो मल्लकच्छव्वा ॥ [भा. ३१४]

मू. (१०२०) अद्धोरुगो उ तं दोवि गेण्हिउं छायए कडिविभागं।

जानुपमाणा चलनी अंसीविया लंबियाएव ॥ [भा. ३१५]

मू. (१०२१) अंतो नियंसणी पुन जीनतरा जाव अद्धजंघाओ।

बाहिरखालुपमाणा कडी य दोरेण पडिबद्धा ॥ [भा. ३१६]

मू. (१०२२) छाएइ अनुक्कमइ उरोरुहे कंचुओय अंसीविओय।

एमेव य ओक्कच्छिय सा नवरं दाहिणे पासे ॥ [भा. ३१७]

मू. (१०२३) वेकच्छिया उ पट्टो कंचुयमुक्कच्छियं व छाएइ।

संघाडीओ चउरो तत्थ दुहत्था उवसयंमि ॥ [भा. ३१८]

मू. (१०२४) दोन्नि तिहत्थयामा भिक्खट्ठाएग एग उच्चारे।

ओसरणा चउहत्था निसन्नपच्छायणी मज्झिमाय ॥ [भा. ३१९]

मू. (१०२५) खंधकरणी य चउहत्थवित्थडा वायविहुयरक्खट्ठा।

खुज्जकरणी उ कीरइ रूववईणं कुडहहेउं ॥ [भा. ३२०]

वृ. तत्थ जा सा दुहत्थिया पिहु तेन सा खोमिया होइ, एयाओ संघाडीओ पडियागारेण होंति, अद्धोरुगो पंडएहिं कीरइ तालुगागारोत्ति। अयं चार्यिकाणां संबन्धी अवधिर्त्रिप्रकारो भवति, एकोऽपि सन उत्तमध्यमजघन्यभेदेन, तत्र तस्यार्यिकावधिमध्ये उत्कृष्टः-प्रधानोऽष्टविधः, एतदेवाह-

मू. (१०२६) संघाइमे अगे वा सव्वो देसो समासओ उवही।

पायस्स बंधमझुसिरो जं चाइन्नं तयं एवं ॥ [प्र. २७]

मू. (१०२७) जिना बारसरूवाणि० [प्र. २८]

मू. (१०२८) उक्कोसगो जिनानं चउव्विहो मज्झिमोवि एमेव।

जहन्ना चउव्विहो खलु इत्तो थेराण वुच्छामि ॥ [प्र. २९]

मू. (१०२९) उक्कोसो थेराणं चउव्विहो छव्विहो मज्झिमो।

जहन्नो चउव्विहो खलुइत्तो अज्जाण वुच्चमि ॥ [प्र. ३०]

मू. (१०३०) उक्कोसो अट्ठविहो मज्झिमओ होइ तेरसविहो उ।

जहन्नो चउव्विहोवि य तेन परमुवग्गहं जाण ॥

वृ. उत्कृष्टोऽष्टविधस्तद्यथा-पात्रकं पात्रबन्धः पात्रस्थापनिका पात्रकेसरिका पटलानि रजस्त्राणं गोच्छकः प्रतिग्रहः पात्रप्रमार्जनिका च, अयमष्टविध उत्कृष्टः-प्रधानः। पत्ताबंधो १ पडलाइं २ रयत्ताणं ३ रयहरणं ४ मत्तयं ५ उग्गहनंतयं ६ पट्टओ ७ अद्धोरुगं ८ चलणि ९ कंचुगो १० उक्कच्छिया ११ वेकच्छिया १२ कमढगा १३, अयमार्यिकाधर्मध्ये त्रयोदशभेदो मध्यमोपधिरिति। पायठ्ठवणं १ पायकेसरिया २ गोच्छओ ३ मुहपत्तिया ४ चेति अयमार्यिकावर्गधर्मध्ये जघन्यः-अशोभनश्चतुष्प्रकार इति। अतः परं यः कारणे सति संयमार्थं गृह्यते सोऽवग्रहावधिरित्येवं जानीहि॥

मू. (१०३१) एगं पायं जिनकप्पियाण तेरण मत्तओ बिइओ।
एयं गणणपमाणं पमाणमाणं अओ वुच्छं॥

वृ. एकमेव पात्रकं जिनकल्पिकानां भवति, स्थविरकल्पिकानां तु मात्रको द्वितीयो भवति, इदं तावदेकद्रव्यादिकं गणनाप्रमाणम्, इत ऊर्ध्वं प्रमाणप्रमाणं वक्ष्ये, तत्र पात्रकस्य प्रमाणप्रमाणप्रतिपादनायाह-

मू. (१०३२) तिन्नि विहत्थी चउरंगुलं च भाणस्स मज्झिमपमाणं।
इत्तो हीण जहन्नं अइरेगतरं तु उक्कोसं॥

मू. (१०३३) इणमन्नं तु पमाणं नियगाहाराउ होइ निप्फन्नं।
कालक्कमणसिद्धं उदरपमाणेण य वयंति॥

मू. (१०३४) उक्कोस तिन्नमासे दुगाउअद्धाणमागओ साहू।
चउरंगुलूणभरियं जं पज्जत्तं तु साहुस्स॥

मू. (१०३५) एयं चेव पमाणं सविसेसयरं अनुग्गहपवत्तं।
कंतारे दुब्भिक्खे रोहगमाईसु भइयव्वं॥

वृ. समचउरंसं वट्टं तहेव णवि निरिच्छयं उड्ढमहो य, सो य दोरओ तिन्नि विहत्थीओ चत्तारि अंगुलाइं जति होइ तता भाणस्स एयं मज्झिमं पमाणं, 'इतः' अस्मात्प्रमाणार्द्धानं तज्जघन्यं प्रमाणं भवति, अथातिरिक्तं प्रमाणं मध्यमप्रमाणाद्भवति तत्तस्तदुत्कृष्टप्रमाणमित्यर्थः, तथेदमपरं प्रमाणान्तरं प्रकारान्तरेण वा पात्रकस्य भवति-इदमन्यत्प्रमाणं निजकाहारेण निष्पन्नं वेदितव्यं, एतदुक्तं भवति-कार्त्तिकादिद्रव्योपेतस्य भक्तस्य चतुर्भिरङ्गुलैरूनं पात्रकं तत्साधोर्भोक्ष्यतो यत्परिनिष्ठितं याति तत्तादृग्विधं मध्यमप्रमाणं पात्रकं, तच्चैवंविधं कालप्रमाणेन ग्रीष्मकाले प्रमाणसिद्धं पात्रकं भणन्ति, उदरप्रमाणेन सिद्धं च 'वदन्ति' प्रतिपादयन्ति। कालप्रमाणसिद्धं पात्रकमुदरप्रमाणसिद्धं च पात्रकं प्रतिपादयन्नाह-उत्कृष्टा तु द्वे मासयोः-ज्येष्ठाषाढयोर्यस्मिन् काले स उत्कृष्टतृष्णासः कालस्तस्मिन्नुत्कृष्टतृष्णाकाले द्विगव्यूताध्वानमात्रादागतो यो भिक्षुश्चतुर्भिरङ्गुलैर्न्यूनं भृतं सद् यत्पर्यायान्वा साधोर्भवति तदित्थंभूतं कालप्रमाणोदरप्रमाणसिद्धं पात्रकं मध्यमं भवति। 'एतदेव' पूर्वोक्तं प्रमाणं यदा 'सविशेषतरम्' अतिरिक्ततरं भवति तदा तदनुग्रहार्थं प्रवृत्तं भवति, एतदुक्तं भवति-बृहत्तरेण पात्रकेणान्येभ्यो दानेनानुग्रहं आत्मनः क्रियते, तत्र कान्तारे महतीमटवीमुत्तीर्यान्येभ्योऽप्यर्थं गृहीत्वा व्रजति येन बहूनां भवति, तथा दुर्भिक्षेऽलभ्यमानायां भिक्षायां बद्धदृष्टित्वा बालादिभ्यो ददाति, तच्चानिमात्रं भाजने सति भवति दानं, तथा रोधके कोट्टरुद्ध जाते सति कश्चिद्भोजनं श्रद्धया ददात्यत्र तत्र नीयते येन बहूनां भवति, एतेषु 'भजनीयं' सेवनीयं तदमितमात्रं पात्रकम्। इदानीमेतदेव भाष्यकारो व्याख्यानयन्नाह-

मू. (१०३६) वेय्यावच्चगरो वा नंदीभाणं घरे उवग्गहियं।

सो खलु तस्स विसेसो पमाणजुत्तो तु सेसाणं ॥

वृ. वैयावृत्यकारो वा नन्दीपात्रं धारयत्यौपग्रहिकमाचार्येण समर्पितं निजं वा, स खलु तस्यैव वैयावृत्यकरस्य विशेषः, एतदुक्तं भवति-यदतिरिक्तं मात्रपात्रधारणमयं तस्यैवैकस्य वैयावृत्यकरस्य विशेषः क्रियते, शेषाणां, तु साधूनां प्रमाणयुक्तमेव पात्रं भवति, उदरप्रमाणयुक्तमित्यर्थः।

भा. (१०३७) दिज्जाहि भाणपूरंति सिद्धिमं कोवि रोहमाडेज्ज।
तत्थवि तस्सुवओगो सेसं कालं तु पडिकट्ठो ॥

वृ. एतश्च तेन प्रमाणातिरिक्तं न पात्रकेण प्रयोजनं भवति, दद्याद्भाजनपूरकं कश्चिदद्धिमान् पात्रभरणं कश्चिदीश्वरः कुर्यात्, कदा ?, पत्तनरोधकादौ, तत्र-पात्रकभरणं तस्य नन्दीपात्रकस्योपयोगः शेषकालमुपयोगशून्यस्य 'प्रतिकृष्टः' प्रतिषिद्धः कारणमन्तरेणेत्यर्थः तत्र पात्रकं लक्षणोपेतं ग्राह्यं नालक्षणोपेतम्-

भा. (१०३८) पायस्स लक्खणमलक्खणं च भुज्जो इमं वियाणित्ता।
लक्खणजुत्तस्स गुणा दोषा य अलक्खणस्स इमे ॥

भा. (१०३९) वट्टं समचउरंसं होइ थिरं थावरं च वन्नं च।
हुंडं वायाडलं भिन्नं च अधारणिज्जाइं ॥

भा. (१०४०) संठियंमि भवे लाभो, पतिट्ठा सुपतिट्ठिते।
निव्वणे कित्तिमारोगे, वन्नड्ढे नाणसंपया ॥

भा. (१०४१) हुंडे चरित्तभेदो सबलंमि य चित्तविब्भमं जाणे।
दुप्पते खीलसंठाणे गणे च चरणे च नो ठाणं ॥

भा. (१०४२) पउमुप्पले अकुसलं, सव्वणे वनमाविसे।
अंतो बहिं च डड्ढंमि, मरणं तत्थ निद्दिसे ॥

भा. (१०४३) अकरंडगम्मि भाणे हत्थो उड्डे जहा न घट्टेइ।
एवं जहन्नयमुहं वत्थुं पप्पा विसालं तु ॥

वृ. पात्रकस्य लक्षणं 'ज्ञात्वा' विज्ञाय अपलक्षणं च बुद्धा 'भूयः' पुनर्लक्षणोपेतं ग्राह्यं, यतो लक्षणोपेतस्यामी गुणाः, अपलक्षणस्य चैते दोषाः-वक्ष्यमाणा भवन्ति तस्मात्लक्षणोपेतमेव ग्राह्यं नालक्षणोपेतं ॥ तत्रेदम-'वृत्तं' वर्तुलं तंत्र वृत्तमपि कदाचित्समचतुरस्रं न भवत्यत आह-समचतुरस्रं सर्वतस्तथा स्थिरं च यद्भवति-सुप्रतिष्ठानं तद्गृह्यते नान्यत्, तथा स्थावरं च यद्भवति न परकीयौषधस्कन्धवद् याचितं कतिपयदिनस्थायि, तथा 'वर्णवं' स्निग्धवर्णोपेतं यद्भवति तद् ग्राह्यं, नेतरत्। उक्तं लक्षणोपेतम्, इदानीमलक्षणोपेतमुच्यते-'हुण्ड' कचित्रिन्नं कचिदुन्नतं यत्तद्धारणीयं, 'वायाडलं' ति अकालेनैव शुष्कं सङ्कुचितं वलीभूतं तद्धारणीयं, तथा 'भिन्नं' राजियुक्तं संछिन्नं वा एतानि न धार्यन्ते-परित्यज्यन्त इत्यर्थः। इदानीं लक्षणयुक्तस्य फलदर्शनायाह-संस्थितेपात्रके वृत्तचतुरस्रे धियमाणे लाभो भवति, प्रतिष्ठा गच्छेद् भवति सुप्रतिष्ठिते-स्थिरे पात्रके, 'निव्वणे' व्रणवर्जितादिरहिते कीर्तिरारोग्यं च भवति, वर्णाढ्ये ज्ञानसंपद्भवति। इदानीमलक्षणयुक्तफलं प्रदर्शयन्नाह-'हुण्डे' निम्नोन्नते चारित्रस्य भेदो भवति विनाश इत्यर्थः, 'शबले' चित्रले 'चित्तविभ्रमः' चित्तविप्लुतिर्भवति, 'दुष्पते' अधोभागे प्रतिष्ठितेऽप्रतिष्ठारहिते, तथा 'कीलसंस्थाने' कीलवद्दीर्घमुच्चं गणे तस्मिंश्च एवंविधे 'गणे' गच्छे च 'चरणे' चारित्रे वा न प्रतिष्ठानं भवति। पद्मोत्पले हुंडे घासगागारे पात्रेऽकुशलं भवति, व्रणे पात्रके सति व्रणो भवति पात्रकस्वामिनः तथा अन्तः-अभ्यन्तरं

बहिर्या दग्धे सति मरणं तत्र निर्दिशेत्। इदानीं मुखवस्त्रिकाप्रतिपादनार्थः तस्मिन्नेवंविधे 'भाजने' पात्रके मुखं कियन्मात्रं क्रियते ? अत आह-इत्यन्तः प्रविशन् ओष्ठ-कर्णौ यथा 'न घट्टयति' न स्पृशति एतज्जघन्यमुखं पात्रकं भवति, 'वस्तु प्राप्त' वस्त्वाश्रित्य मुखेनैव गृह्णन्ति ददतीति एवमाश्रित्य विशालतरं मुखं क्रियत इति। आह-कस्मादभाजनग्रहणं क्रियते ?, आचार्यस्त्वाह-

मू. (१०४४) छक्कायरक्खणट्ठा पायग्गहणं जिणेहिं पन्नत्तं।
जे य गुणा संभोए हवंति ते पायगहणेवि॥

मू. (१०४५) अतरंतबालवुड्ढा सेहाएसा गुरू असहुवग्गो।
साहारणोग्गहोऽलद्धिकारणा पादगहणं तु॥

वृ. षट्कायरक्षणार्थं पात्रकरहितः साधुर्भोजनार्थी षडपि कायान् व्यापादयति यस्मात्तस्मात्पात्रग्रहणं जिनैः 'प्रज्ञप्तं' प्ररूपितं, य एव गुणा मण्डलीसंभोगे व्यावर्णिता त एव गुणाः पात्रग्रहणेऽपि भवन्ति, अतो ग्राह्यं पात्रमपि। के च ते गुणाः ? इत्यत्र आह-ग्लानकारणात् बालकारणात् वृद्धकारणात् शिक्षककारणात् प्राघूर्णककारणात् असहिष्णुः राजपुत्रः कश्चित् प्रव्रजितस्ततः कारणात् साधारणोऽवग्रहः-अवष्टम्भोऽनेन पात्रकेण क्रियते एतेषां सर्वेषामनः साधारणावग्रहाद्धेतोः अलब्धिमांश्च कश्चिद्भवति तस्यार्थाय दीयते नच्च विना दातुं न शक्यतेऽतः कारणात् पात्रकग्रहणं भवति। उक्तं पात्रकप्रमाणप्रमाणम्, इदानीं पात्रबन्धप्रमाणप्रमाणं प्रतिपादयन्नाह-

मू. (१०४६) पत्ताबंधपमाणं भावपमाणेण होइ कायव्वं।
जह गंठिमि कयंमि कोणा चउरंगुला हुंति॥

वृ. पात्रबन्धप्रमाणं भाजनप्रमाणेन भवति विज्ञेयं सर्वथा, यथा ग्रन्थौ 'कृते' दत्ते सति कोणौ चतुरङ्गुलप्रमाणौ भवतस्तथा कर्तव्यं। इदानीं पात्रकस्थापनगोच्छकपात्रकप्रत्युपेक्षणिकानां प्रमाण-प्रमाणप्रतिपादनायाह-

मू. (१०४७) पत्तट्ठवणं तह गुच्छओ य पायपडिलेहणीआ य।
तिण्हंपि यप्पमाणं विहत्थि चउरंगुलं चेव॥

वृ. पात्रकस्थापनकं गोच्छकः 'पात्रकप्रत्युपेक्षणिका' पात्रकमुखवस्त्रिका एतेषां त्रयाणामपि वितस्तिश्चत्वारि चाङ्गुलानि प्रमाणं चतुरस्रं द्रष्टव्यं, अत्र च पात्रस्थापनके गोच्छकश्च एते द्वे अपि ऊर्णामये वन्दितव्ये, मुखवस्त्रिका सौमिया। इदानीमेषामेव प्रयोजनप्रतिपादनाह-

मू. (१०४८) रयमाइरक्खणट्ठा पत्तट्ठवणं जिणेहिं पन्नत्तं।
होइ पमज्जणहेउं तु गोच्छओ भाणवत्थाणं॥

मू. (१०४९) पायपमज्जणहेउं कसरिया पाए पाए एक्केक्का।
गोच्छगपत्तट्ठवणं एक्केक्कं गणनमाणेणं॥

वृ. रजआदिरक्षणार्थं पात्रस्थापनकं भवति एवं विद्वांसो व्यपदिशन्ति, भवति प्रमार्जननिमित्तं गोच्छको भाजनवस्त्राणां, एतदुक्तं भवति-गोच्छकेन हि पटलानि प्रमृज्यन्ते। तथा 'कसरिकाऽपि' पात्रकमुखवस्त्रिकाऽपि पात्रकप्रमार्जननिमित्तं भवति पात्रपात्रे एकैका पात्रकसम्बन्धिका भवति गणनया, तथा गोच्छकः पात्रस्थापनं च एकैकं गणनामानेनेति। इदानीं पटलानां गणनाप्रमाणप्रतिपादनाद्दनायाह-

मू. (१०५०) जेहिं सवित्था न दीसइ भूमिरेहा न कसरिया भवे पडला।

तिन्नि व पंच व सत्त व कयलीगब्भोवमा मसिणा ॥

मू. (१०५१) गिम्हासु तिन्नि पडला चउरो हेमंत पंच वासासु।
उक्कोसगा उ एए एत्तो पुण मज्झिमे वुच्छं ॥

मू. (१०५२) गिम्हासु हंति चउरो पंच य हेमंति छच्च वासासु।
एए खलु मज्झिमया एत्तो उ जहन्नओ वुच्छं ॥

मू. (१०५३) गिम्हासु पंच पडला छप्पुण हेमंति सत्त वासासु।
तिविहंमि कालछेए पायावरणा भवे पडला ॥

वृ. यैः पटलैस्त्रिभिरेकीकृतैः सद्भिः सविता न दृश्यते तिरोहितः सन्, पञ्चभिः सप्तभिर्वा पटलैरेकीकृतैः सविता नोपलभ्यत इति, किमुक्तं भवति ?-एवंविधानां संबन्धिनो रश्मयो नोपलभ्यन्ते तादृशानि पटलानि भवन्ति, किंविशिष्टानि ?-कदलीगर्भोपमानि श्लक्ष्णानि श्लक्ष्णानि मसृणानि घनानि चेति. तत्र यदुक्तं त्रीणि पटलानि पञ्च सप्त वा पटलानि भवन्तीत्येतदेव कालभेदेन विशेषेण दर्शयन्नाह-'ग्रीष्मे' उष्णकाले त्रीणि पटलानि पञ्च सप्त वा पटलानि भवन्तीत्येवदेव कालभेदेन विशेषेण दर्शयन्नाह-'ग्रीष्मे' उष्णकाले त्रीणि पटलानि गृह्यन्ते यानि यानि दृढानि मसृणानि च भवन्ति उत्कृष्टानीत्यर्थः, हेमन्ते' शिशिरे च चत्वारि गृह्यन्ते घनानि मसृणानि च भवन्ति, स ह्यत्यन्तस्निग्धकालो यत उत्कृष्टान्येतानि उक्तलक्षणानि प्रधानान्येतानि। इत ऊर्द्धं 'मध्यमानि' न शोभनानि नाप्यशोभनानि वक्ष्ये इति। 'ग्रीष्मे' उष्णकाले चत्वारि मध्यमानि पटलानि गृह्यन्ते, तानि मनाग् जीर्णानि. हेमन्ते पञ्च गृह्यन्ते मध्यमानि, वर्षासु प्रायड् एतानि 'मध्यमानि' न प्रधानानि नाप्यप्रधनानि, तत्र ग्रीष्मो रूक्षः कालः हेमन्तो मध्यमः वर्षा स्निग्धस्तेन पटलानां वृद्धिरुक्ता। इत ऊर्द्धं जघन्यानि वक्ष्य इति। ग्रीष्मे पञ्च पटलानि जघन्यानि जीर्णप्रायाणि गृह्यन्ते, षड् पुनःहेमन्ते जघन्यानि जीर्णप्रयाणि, वर्षाकाले सप्त जघन्यानि संगृह्यन्ते जीर्णप्रायाणि, एवमुक्ते न प्रकारेण त्रिविधेऽपि 'कालच्छेदे' कालपर्यन्ते अन्यानि चान्यानि च 'पात्रावरणानि' स्थगनानि पटलानि भवन्ति।

इदानीमेषामेव प्रमाणप्रतिपादनायाह-

मू. (१०५४) अड्ढाइज्जा हत्था दीहा छत्तीस अंगुले रुंदा।
बितियं पडिग्गहाओ सरीराओ य निप्फन्नं ॥

वृ. अर्द्धतृतीयहस्तदीर्घाणि भवन्ति, षट्त्रिंशदङ्गुलानि विस्तीर्णानि भवन्ति. द्वितीयमेषां प्रमाणं पतद्ग्रहाच्छादनेन शरीरस्कन्धाच्छादनेन च निष्पन्नं भवति, एतदुक्तं भवति-भिक्षाऽटनकाले स्कन्धः पात्रकं चाच्छाद्यते यावता तत्प्रमाण पटलानामिति। इदानीं किं तैः प्रयोजनमित्यस्यार्थस्य प्रदर्शनायाह-

मू. (१०५५) पुप्फफलोदयरयरेणुसउणपरिहारणायरक्खट्ठा।
लिंगस्स य संवरणे वेदोदयरक्खणे पडला ॥

वृ. अस्थगिते पात्रके पुष्पं निपतति तत्संरक्षणार्थं पटलानि गृह्यन्ते तथा फलपातरक्षणार्थमुदकपातसंरक्षणार्थं च पटलग्रहणं तथा रजः-सचित्तपृथिवीकायस्तत्संपातरक्षणार्थं च, रेणुः-धूलिस्तत्संपातरक्षणार्थं, शकुनपरिहारः-शकुनपूरीषं तत कदाचिदाकाशान्निपतति तत्पातसंरक्षणार्थं, लिङ्गसंवरणार्थं लिङ्गस्थगनं च भवति, तथा पुरुषवेदोदये सति तस्यैव स्तब्धता भवति तत्संरक्षणं स्थगनं तदर्थं च पटलानि भवन्तीति इदानीं रजस्त्राणप्रमाणप्रतिपादनायाह-

मू. (१०५६) मानं तु रयत्ताणे भाणपमाणेण होइ निप्फन्नं।

पायाहिणं करेंतं मज्झे च उरंगुलं कमइ ॥

वृ. 'मानं' प्रमाणं [illegible] 'भाजनस्य' पात्रस्य एतद्रूपकालेन भवति, तदुक्तं भवति-पात्रकानुरूपं रजस्त्राणं भवति, तच्च रजस्त्राणं पात्रकस्य कथं दीयते ? अत आह-प्रदक्षिणां कुर्वाणं सत्तिर्यग् दीयते, 'मध्ये' पृथुत्वेन चत्वार्यंगुलानि 'क्रामति' गच्छति प्रदक्षिणां कुर्वाणमिति। इदानीं कल्पप्रमाणप्रमाणप्रतिपादनायाह-

मू. (१०५७) मूसयरजउक्केरे वासे सिण्हा रए य रक्खट्ठा।
होंति गुणा रयताणे पादे पादे य एक्केक्के ॥

वृ. तच्च रजस्त्राणं दीयते भूषिकरजउत्केरसंरक्षणार्थं, वर्षोदकसंरक्षणार्थं, सिक्ता-अवश्याय-स्तत्संरक्षणार्थं, भवन्ति गुणा रजस्त्राणस्यैते, तच्च पात्रे पात्रे चैकैकं भवतीति।

इदानीं कल्पप्रमाणप्रमाण-प्रतिपादनायाह-

मू. (१०५८) कप्पा आयपमाणा अड्ढाइज्जा उ वित्थडा हत्था।
दो चेव सोत्तिया उत्तिओ य तइओ मुणेयव्वो ॥

वृ. कल्पा आत्मप्रमाणाः, एतदुक्तं भवति-यावन्मात्राः प्रावृताः स्कन्धस्योपरि प्रक्षिप्तास्तिष्ठन्ति एतावदात्मप्रमाणमर्द्धतृतीयांस्तु विस्तृता हस्तान् तत्र द्वौ सूत्रिकौ भवतः ऊर्णिकश्च तृतीयो विज्ञेयः।

इदानीं तत्प्रयोजनप्रतिपादनायाह-

मू. (१०५९) तणगहणानलसेवा निवारणा धम्मसुक्कझाणट्ठा।
दिट्ठं कप्पग्गहणं गिलाणमरणट्ठया चेव ॥

वृ. तृणग्रहणनिवारणार्थं गृह्यन्ते, अनलः- अग्निस्तत्सेवानिवारणार्थं च, एतदुक्तं भवति-कल्पाग्रहणे तृणग्रहणमग्निसेवनं च भवति, तन्निवारणार्थं कल्पग्रहणं क्रियते, तथा धर्मशुक्लध्यानार्थं कल्पग्रहणं भवति, एतदुक्तं भवति-शीतादिना बाध्यमानो धर्मशुक्ले ध्यानं ध्यातुमसमर्थो भवति यदि कल्पान्न गृह्णाति, अत एवमर्थं दृष्टं कल्पग्रहणं, तथा ग्लानसंरक्षणार्थं मरणार्थं मृतस्योपरि दीयते कल्पः एतदर्थं च च ग्रहण-मिति। इदानीं रजोहरणस्वरूपप्रतिपादनायाह-

मू. (१०६०) घनं मूले थिरं मज्झे, अग्गे मद्दवजुत्तया।
एगंगियं अ झुसिरं, पोरायामं तिपासियं ॥

वृ. मूलदण्डपर्यन्ते, 'घनं' निबिडं भवति 'मध्ये' मध्यप्रदेशे स्थिरं कर्त्तव्यम 'अग्गे' दशिकापर्यन्ते 'मार्दवयुक्तं' मृदुकर्त्तव्यम, 'एकाङ्गिकं' तज्जातदशिकं सदशिकाकम्बलीखण्डनिष्पादितमित्यर्थः। 'अज्झुसिरं' अग्रंथिला दशिका निषद्या च यस्य तदशुषिरम, 'पोरायामंति अङ्गुष्ठपर्वणि प्रतिष्ठितायाः प्रदेशिन्या यावन्मात्रं शुषिरं भवति तदापूरकं कर्त्तव्यं, दण्डिकायुक्ता निषद्या यथा तावन्मात्रं पूरयति तथा कर्त्तव्यम, 'त्रिपासितं' त्रीणि वेष्टनानि दवरकेन दत्त्वा पासितं पाशबन्धनेन। किञ्च-

मू. (१०६१) अप्पोल्लं मिउ पम्हं च, पडिपुन्नं हत्थपूरिमं।
रयणीपमाणमित्तं, कुज्जा पोरपरिग्गहं ॥ [भा. ३२२]

वृ. अमुमेव श्लोकं भाष्यकारो व्याचष्टे-'अप्पोल्लं' दृढवेष्टनाद् घनवेष्टनाच्च कारणात, मृदु पक्ष्म च कर्त्तव्यं-मृदूनि दशिकापक्ष्माणि क्रियन्ते। 'प्रतिपूर्णं' सद् बाह्येन निषद्याढ्येन युक्तं सत् हस्तं पूरयति यथा तथा कर्त्तव्यम। तथा 'रत्निप्रमाणमात्रं' यथा दण्डो हस्तप्रमाणो भवति तथा कर्त्तव्यम। 'कुज्जा पोर-परिग्गहं'ति पोरम-अङ्गुष्ठपर्व तस्मिंस्तत्राङ्गुष्ठपर्वणि लग्नया प्रदेशिन्या यद्भवति छिद्रं तद्यथा पूर्यते तेन दण्डकेन

त्राद्यनिषद्याद्वयरहितेन तथा कर्त्तव्यं, एवंविधं 'पोरपरिग्गहं' अङ्गुष्ठप्रदेशिनीकुण्डलिकापूरणं कर्त्तव्यमिति। इदानीं समुदायरूपस्यैव प्रमाणं प्रतिपादयन्नाह-

मू. (१०६२) बत्तीसंगुलबाहं चउवीसं अंगुलाइं दंडो से।
अट्ठंगुला दसाओ एगयरं हीनमहियं वा॥

वृ. द्वात्रिंशदङ्गुलानि सार्द्धमेकं वीर्घलोन इत्यर्थः भवति, तस्य वा 'अस्य' रजोहरणस्य चतुर्विंशत्यङ्गुलानि दण्डकः, अष्टाङ्गुलप्रमाणकाश्च दशिका भवन्ति, 'एगतरं हीनमहियं वा' एकतरं दण्डकस्य दशिकानां वा कदाचिद्धीनं प्रमाणतो भवति कदाचिदधिकं भवति, सर्वथा समुदायतस्तदात्रिंशदङ्गुलं कर्त्तव्यम्। तच्च किम्मयं भवति ? इत्यत आह-

मू. (१०६३) उन्नियं उट्टियं वावि, कंबलं पायपुंछणं।
तिपरीयल्लमसिस्सट्ठं, रयहरणं धारए एगं॥

वृ. तद्रजोहरणं कदाचिदूर्णामयं भवति कदाचिदौष्ट्रीणामयं भवति कदाचित्कम्बलमयं भवति, पादपुञ्छनशब्देन रजोहरणमेव 'गृह्यते, तदेवंगुणं भवति, 'तिपरियल्लं'ति त्रिःपरिवर्त्तं-त्रयः परावर्त्तकाः-वेष्टनानि यथा भवन्ति तथा कर्त्तव्यम्. 'अनिसिट्ठं'ति मृदु कर्त्तव्यं, तदेवंगुणं रजोहरणं धारयेदेकमेवेति।

तेन च किं प्रयोजनमित्यत आह-

मू. (१०६४) आयाणे निक्खेवे ठाननिसीयण तुयट्टसंकोए।
पुव्वं पमज्जणट्ठा लिंगट्ठा चेव रयहरणं॥

वृ. आदाने-ग्रहणं तत्र प्रमार्जनार्थं रजोहरणं गृह्यते निक्षेपो-न्यासः स्थानं-कायोत्सर्गः निषीदनम्-उपवेशनं त्वग्वर्त्तनशयनं सङ्कोचनं-जानुसंवेशकादेः, एतानि पूर्वं प्रमृज्य क्रियन्ते अतः पूर्वं प्रमार्जनार्थं रजोहरणग्रहणं क्रियते लिङ्गमिति च कृत्वा रजोहरणधारणं क्रियत इति। इदानीं मुखवस्त्रिकाप्रमाणम-

मू. (१०६५) चउरंगुलं विहत्थी एयं मुहनंतगस्स उ पमाणं।
बितियं मुहप्पमाणं गणणपमाणेण एक्केकं॥

वृ. चत्वार्यङ्गुलानि वितस्तिश्चेति, एतच्चतुरस्रं मुखानन्तकस्य प्रमाणम्, अथवा इदं द्वितीयं प्रमाणं, यदुत मुख्यप्रमाणं कर्त्तव्यं मुहनंतयं, एतदुक्तं भवति-वसतिप्रमार्जनादौ यथा मुखं प्रच्छाद्यते कक्काटिकापृष्ठतश्च यथा ग्रन्थिर्दातुं शक्यते तथा कर्त्तव्यं. त्र्यस्रं कोणद्वये कक्काटिकायां ग्रन्थिर्दातुं शक्यते तथा कर्त्तव्यमिति, एतद्वितीयं प्रमाणं, गणनाप्रमाणेन पुनस्त्वेकैकमेव मुखानन्तकं भवतीति।

मू. (१०६६) संपातिमरयरेणूपमज्जणट्ठा वयंति मुहपत्तिं।
नासं मुहं च बंधइ तीए वसहिं पमज्जंतो॥

वृ. संपातिमसत्त्वरक्षणार्थं जल्पन्तिभमुखे दीयते, तथा रजः-सचित्तपृथिवीकायस्तत्प्रमार्जनार्थं मुखवस्त्रिका गृह्यते, तथा रेणुप्रमार्जनार्थं मुखवस्त्रिकाग्रहणं प्रतिपादयन्ति पूर्वर्षयः। तथा नासिकामुखं बध्नाति तया मुखवस्त्रिकया वसतिं प्रमार्जयन् येन न मुखादौ प्रविशन्तीति।

मू. (१०६७) जो मागहओ पत्थो सविसेसतरं तु मत्तयपमाणं।
दोसुवि दव्वग्गहणं वासावासासु अहिगारो॥

वृ. यो मागधिकः प्रस्थस्तत्स्वविशेषतरं मात्रकं भवति, स च मागधिकप्रस्थः दो असईओ पसई दो पसईओ सेतिया चउसेडयाहिं मागहो पत्थ्य सो तारिसो प्रमाणेण तारिसं सविसेसतरं मत्तयं हवति। तेन

किं प्रयोजनमित्यत आह-'दोसुवि' द्वयोरपि वर्षावर्षयोः-वर्षाकालवस्तृबहत्कालयोर्यतनाचार्यादिप्रायोग्यद्रव्यग्रहणं क्रियते अयमधिकाग्रस्तस्य मात्रकस्यति, इदं प्रयोजनमित्यर्थः।अथैवमन्यत्प्रमाणमुच्यते-

मू. (१०६८) सूवोदणस्स भरितं दुगाउअद्धाणमागओ साहू।
भुंजइ एगट्ठाणे एयं किर मत्तयपमाणं॥

वृ. सूपस्य च ओदनस्य च भृतं द्विगव्यूताध्वानादागतः साधुर्भुङ्क्ते यदेकस्मिन् स्थाने तदेतत् किल मात्रकस्य द्वितीयं प्रमाणमुक्तं आह-कस्मादुक्तं प्रमाणाल्लघुतरं न क्रियते?, उच्यते, लघुतरे दोषा भवन्ति-

मू. (१०६९) संपाइमतसपाणा धूलिसरिक्खे य परिगलंतंमि।
पुढविदगअगणिमारुयउद्दवणवणिंमणाऽऽहरे॥

वृ. अतिलघुनि मात्रके च आहारेण भृते सति यदि तदाच्छादनमुत्क्षिप्यते ततः शुषिरेण संपाति-मत्रसप्राणा धूलिश्च सरजस्क-चा(क्षा)रः एते प्रविशन्ति, तथा परिगलमाने च तद्द्रव्यसंपातेन पृथिव्युदकाग्नि-मारुतानां वधः संभाव्यते, उद्रवणं-वधो भवति, तथा 'वणिंमणा' परिभवो भवतीति, यदुक्तातेन प्रवर्तितेन अतर्मनस्तावद्भवति येनैतदभक्तं मित्रश्चेतश्च विक्षिपन प्रयातीति, ततश्च दूरके एते दोषा यतो भवन्तीति ततः पूर्वोक्तं प्रमाणयुक्तं मेवे ग्राह्यमिति। इदानीमाचार्यादि प्रायोग्यग्रहणनिमित्तं मात्रकस्यानुज्ञा-

मू. (१०७०) आयरिए य गिलाणे पाहुणए दुल्लभे सहसदाने।
संसत्तभत्तपाने मत्तगपरिभोग अणुनाओ॥

वृ. आचार्यप्रायोग्यग्रहणे तथा ग्लानप्राघूर्णकप्रायोग्यग्रहणे तथा दुर्लभघृतादिद्रव्यग्रहणे सहसादानग्रहणे तथा संसक्त भक्त पानग्रहणे च मात्रकस्य परिभोगोऽनुज्ञातो नान्यवेति, तस्य च मात्रकस्यानेन क्रमेण परिभोगः कर्त्तव्यः, यद्याचार्यस्य तस्मिन् क्षेत्रे ध्रुवलम्भः प्रायोग्यस्य तदा एक एव सङ्घाटकः प्रायोग्यं गृह्णाति न सर्वे। तत्र चैकस्य सङ्घाटकस्याचार्यप्रायोग्यं गृह्णतः को विधिरित्यत आह-

मू. (१०७१) एक्कंमि उ पाउग्गं गुरुणो बितिओग्गहे य पडिकुट्ठं।
गिण्हण संघाडेगो ध्रुवलंभे सेस उभयंपि॥

वृ. एकस्मिन प्रतिग्रहके प्रायोग्यं गुरोर्गृह्णाति 'बितिउग्गहे य'त्ति द्वितीयप्रतिगहके' 'पडिकुट्ठं'ति प्रतिषिद्धं यत्संसक्तादि तद्गृह्णाति, अथवा 'पडिकुट्ठं' विरुद्धं यत्काञ्जिकाअम्बिलादि तद्वितीयप्रतिमग्रहके गृह्णाति एक एव सङ्घाटक-। कदा पुनरयं विधिरित्यत आह-'ध्रुवलम्भे' ध्रुवे-अवश्यम्भाविनि प्रायोग्यलाभे सत्ययं विधिः, 'सेस उभयंपि'त्ति शेषा-येऽन्ये सङ्घाटकास्ते आत्मार्थमुभयमपि-भक्तं पानकं च गृह्णन्ति, एकः पानकमेकस्मिन् प्रतिग्रहके गृह्णाति द्वितीयस्तु भक्तं गृह्णाति, एवं सर्वेऽपि सङ्घाटका भिक्षामन्तर्न्तीति, ततश्चैवं मात्रकग्रहणं न संजातमिति। अथ ध्रुवलम्भः प्रायोग्यस्य न तस्मिन् क्षेत्रे ततः को विधिः?

मू. (१०७२) असइं लाभे पुन मत्तए य सव्वे गुरुण गेण्हंति।
एसेव कमो नियमा गिलाणसेहाइएसुंपि॥

वृ. असति लम्भे पुनः प्रायोग्यस्य सर्व एव सङ्घाटका मात्रकेषु गुरोः प्रायोग्यं गृह्णान्ति, यतो न ज्ञायते कः किंचिल्लप्स्यते आहोश्चिन्नेत्यतो गृह्णान्ति, एष एव क्रमो नियमत एव ग्लानशिष्यकादिष्वपीति।

मू. (१०७३) दुल्लभदव्वं व सिया घयाइ तं मत्तएसु गेण्हंति।
लद्धेवि उ पज्जत्ते असंथरे सेसगट्ठाए।

वृ. दुर्लभं वा द्रव्यं स्याद् घृतादिन्मात्रकेषु गृह्णन्ति। तथा लब्धेऽपि भक्ते पर्याप्ते आत्मार्थं तथाऽपि

यदि न संस्तरन्ति न शरन्ति ग्लानवृद्धादीनां, ततोऽसंस्तरणे सति ग्लानवृद्धादिशेषार्थं नावत्पर्यटन्ति यावत्पर्याप्तं भक्तं ग्लानादीनां भवतीति। अथवाऽनेन प्रकारेण मात्रकग्रहणं संभवति-

मू. (१०७४) संसत्तभत्तपानेसु वावि देसेसु मत्तए गहणं।
पुव्वं तु भत्तपानं सोहेउ छुहंति इयरेसु॥

वृ. यत्र प्रदेशेषु स्वभावेनैव संसक्तं भक्तं पानं सम्भाव्यते, तेषु संसक्त भक्त पानेषु देशेषु सत्सु प्रथमं मात्रके ग्रहणं क्रियते, पुनश्च तत्पूर्वमेव भक्त पानं शोधयित्वा इतरेषु प्रतिग्रहकेषु, ततश्चैवं वा मात्रकग्रहणं संभवति। इदानीं चोलपट्टकप्रमाणप्रतिपादनायाह-

मू. (१०७५) दुगुणो चउग्गुणो वा हत्था चउरंस चोलपट्टो उ।
थेरजुवाणाणट्ठा सण्हे थुल्लंमि य विभासा॥

वृ. द्विगुणश्चतुर्गुणो वा कृतः सन् यथा हस्तप्रमाणश्चतुरस्रश्च भवति तथा चोलपट्टकः कर्त्तव्यः, कस्यार्थमित्यत आह- 'थेरजुवाणाणट्ठा' स्थविराणां यूनां चार्थाय कर्त्तव्यः, स्थविराणां द्विहस्तो यूनां च चतुर्हस्त इति भावना, 'सण्हे थुल्लंमि विभास'त्ति, यदि परमयं विशेषः, यदुत स्थविराणां श्लक्ष्णोऽसावेव चोलपट्टकः क्रियते यूनां पुनः स्थूल इति किमर्थं पुनरसौ चोलपट्टकः क्रियते ?, आह-

मू. (१०७६) वेउव्विवाउडे वातिए हिए स्वद्धपजणणे चेव।
तेसिं अनुग्गहत्था लिंगुदयट्ठा य पट्टो उ॥

वृ. यस्य साधोः प्रजननं वैक्रियं भवति विकृतमित्यर्थः, यथा दाक्षिणात्यपुरुषाणां वेष्टार्थं विध्यते प्रजननं तच्च विकृतं भवति ततश्च तत्प्रच्छादनार्थमनुग्रहाय चोलपट्टः क्रियते, तथाऽप्रावृत्ते कश्चिद् वातिको भवति वातेन तत्प्रजननमूर्ध्वं भवति ततश्च तदनुग्रहायानुज्ञातः, तथा 'ह्रीकः' लज्जालुः कश्चिद भवति तदर्थं, तथा 'खद्धं'ति बृहत्प्रमाणं स्वमानेनैव कस्यचित्प्रजनं भवति ततश्चैतेषामनुग्रहार्थं, तथा लिङ्गोदयार्थं च, कदाचिस्त्रियं दृष्ट्वा लिङ्गस्योदयो भवति, अथवा तस्या एव स्त्रिया लिङ्गं दृष्ट्वा उदयः स्वलिङ्गस्य भवति-तं प्रत्यभिलाषो भवतीत्यर्थः, ततश्चैतेषामनुग्रहार्थं चोलपट्टकग्रहणमुपदिष्टमिति। उक्त औधोपधिः-

मू. (१०७७) संस्थारुत्तरपट्टो अड्ढाइज्जा य आयया इत्था।
दोण्हंपि य वित्थारो हत्थो चुरंगुलं चेव॥

वृ. संस्तारकस्तथोत्तरपट्टकश्च, एतौ द्वावप्येकैकोऽर्द्धतृतीयहस्तौ दैर्घ्येण प्रमाणतो भवति, तथा द्वयोरप्येतयोर्विस्तारो हस्तश्चत्वारि चाङ्गुलानि भवतीति। आह-किं पुनरेभिः प्रयोजनं संस्तारकादिभिः ?

मू. (१०७८) पाणादिरेणुसारक्खणट्ठया होंति पट्टगा चउरो।
छप्पइयरक्खणट्ठा तत्थुवरिं खोमियं कुज्जा॥

वृ. प्राणिरेणुसंरक्षणार्थं पट्टका गृह्यन्ते, प्राणिनः-पृथिव्यादयः रेणुश्च-स्वतः शरीरे लगति अनन्तद्रक्षणार्थं पट्टकमुपग्रहणं, ते चत्वारो भवन्ति, द्वौ संस्तारकोत्तरपट्टकावुक्त एव, तृतीयो रजोहरणाच्छनिषद्यापट्टकः पूर्वोक्त एव, चतुर्थः क्षौमिक एवाभ्यन्तरनिषद्यापट्टको वक्ष्यमाणकः, एते चत्वारोऽपि प्राणिसंरक्षणार्थं गृह्यन्ते, तत्र षट्पदीरक्षणार्थं तस्य कम्बलीसंस्तारकस्योपरि खोमियं-संस्तारकं पट्टकं कुर्याद् येन शरीरकम्बलीयमयसंस्तारकसंघर्षेण न षट्पद्यो विराध्यन्त इति।

मू. (१०७९) रयहरणपट्टमेत्ता अदसागा किंचि वा समतिरेगा।
एकगुणा उ निसेज्जा इत्थपमाणा सपच्छागा।

वृ. स रजोहरणपट्टकोऽभिधीयते यत्र दशिका लग्नाः तत्प्रमाणा 'अदशा' दशिकारहिता क्षौमा रजोहरणाभ्यन्तरनिषद्या भवति, 'किंचि वा समतिरेग'त्ति किञ्चिन्मात्रेण वा समधिका तस्य रजोहरणपट्टकस्य भवतीति, 'एकगुण'त्ति एकैव सा निषद्या भवतीति, हस्तप्रमाणा च पृथुत्वेन भवति, 'सपच्छाग'त्ति सह बाह्यया हस्तप्रमाणया भवतीति, एतदुक्तं भवति बाह्याऽपि निषद्या हस्तमात्रैव।

मू. (१०८०) वासोवग्गहिओ पुन दुगुणो अवही उ वाकप्पाई।
आयासंजमहेउं एक्कगुणा सेसओ होइ॥

वृ. वर्षासु-वर्षाकाले औपग्रहिकः अवधिर्द्विगुणो भवति, कश्चासौ ?-वर्षाकल्पादिः, आदिग्रहणात् पटलानि, जो बाहिरं छिंडंतस्स निम्मति सो सो दुगुणो होइ, एक्कोनि पुणो अन्नो घेप्पइ, स च वर्षाकल्पादिर्द्विगुणो भवति, आत्मरक्षणार्थं संयमरक्षणार्थं च, तत्रात्मसंरक्षणार्थं यद्येकगुणा एव कल्पादयो भवन्ति ततश्च तेहिं तन्निहिं पोट्टमूलेणं मरेत, संयमरक्खणत्थं जइ एक्कं चेव कप्पं अइमइलं ओढंऊणं नीहरइ तो तस्स कप्पस्स जं पाणियं पडइ तिन्नस्स तेन आउक्काओ विनम्मइ, शेषस्त्ववधिरेकगुण एव भवति न द्विगुण इति। किञ्च-

मू. (१०८१) जं पुण सपमाणाओ ईसिं हीनाहियं व लभेज्जा।
उभयंपि अहाकडयं न संधणा तस्स छेदो वा॥

वृ. यत्पुनः कल्पादिरूपकरणं स्वप्रमाणादीषद्धीनमधिकं वा लभ्यते तदुभयमिति-ओहियस्स उवग्गाहियस्स वा यदिवा उभयं तदेव हीनमधिकं वा लब्धं सत् 'अहाकडं' यथाकृतमल्पपरिकर्म यल्लभ्यते तस्य न सन्धना क्रियते हीनस्य तथा न छेदः क्रियतेऽधिकस्य। किञ्च,-

मू. (१०८२) दंडए लट्ठिया चेव, चम्मए चम्मकोसए।
चम्मच्छेदन पट्टेवि चिलिमिली धारए गुरू॥

वृ. अयमपर औपग्रहिको भवति साधोः, साधोश्चावधिर्दण्डको भवति, दण्डकश्च यष्टिश्च चेवग्रहणाद्यष्टिश्चेति, अयं सर्वेषामेव पृथक् पृथगौपग्रहिकः, अयमपरो गुरोरेवौपग्रहिकः, कश्चासौ ?-'चम्मए'त्ति चर्मकृतिछवडिया चर्मकोशकः जत्थ नहरणाई छुब्भति, तथा 'चर्मच्छेदः' वर्द्धपट्टिका, यदिवा 'चर्मच्छेदनकं' पिप्पलकादि, तथा 'पट्ट'त्ति योगपट्टकः चिलिमिली चेति, एतानि चर्मादीनि गुरोरौपग्रहिकोऽवधिर्भवतीति।

मू. (१०८३) जं चन्न एवमादी तवसंजमसाहगं जइजनस्स।
ओहाइरेगगहियं ओवग्गहियं वियाणाहि॥

वृ. यच्चान्यद्वस्तु, एवमादि उपनहादि, तपःसंयमयोः साधकं यतिजनस्य ओघोपधेरतिरिक्तं गृहीतमौपग्रहिकं तद्विजानीहि इदानीं यदुक्तं 'यष्ट्यादि औपग्रहिकं भवति साधूनां' तत्स्वरूपं प्रतिपादयन्नाह-

मू. (१०८४) लट्ठी आयपमाणा विलट्ठि चउरंगुलेन परिहीना।
दंडो बाहुपमाणो विदंडओ कक्खमेत्तो उ॥

वृ. यष्टिरात्मप्रमाणा, वियष्टिरात्मप्रमाणाच्चतुर्भिरङ्गुलैन्यूना भवति, 'बाहुप्रमाणः', स्कन्धप्रमाणः, विदण्डकः कक्षाप्रमाणोऽन्या नालिका भवति आत्मप्रमाणाच्चतुर्भिरङ्गुलैरतिरिक्ता, तत्थ नालियाए जलथाओ गिज्झइ, लट्ठीए जवणिया बज्झइ, विलट्ठी कहंचि उवस्सयबारघट्टणी होइ, दंडओ रिउल्हे घेप्पति भिक्खं भमंतेहिं, विदंडओ वरिसाकाले घेप्पइ, जं सो लहुयरओ होइ कप्परस अब्भितरे कयओ निज्जइ जेन नाउक्काएण न फुसिज्जइति। इदानीं यष्टिलक्षणप्रतिपादनायाह-

मू. (१०८५) एक्कपव्वं पसंसंति, दुपव्वा कलहकारिया।
तिपव्वा लाभसंपन्ना चउपव्वा पाणनिग्गा ॥

मू. (१०८६) पंचपव्वा उ जा लट्ठी, पंथे कलहनिवारणी।
छच्चपव्वा य आयंको, सत्तपव्वा अरोगिया ॥

मू. (१०८७) चउरंगुलपइट्ठाणा, अट्ठंगुलसमूसिया।
सत्तपव्वा उ जा लट्ठी, मत्तागयनिवारिणी ॥

मू. (१०८८) अट्ठपव्वा असंपत्ती, नवपञ्चा असकारिया।
दसपव्वा उ जा लट्ठी, तहियं सव्वसंपया ॥

मू. (१०८९) वंका कीडक्खइया चित्तलया पोल्लडा य दड्ढा य।
लट्ठी य उब्भसुक्का वज्जेयव्वा पयत्तेणं ॥

मू. (१०९०) विसमेसु य पव्वेसुं, अनिप्फन्नेसु अच्छिसु।
फुडिया फरुसवन्ना य, निस्सारा चेव निंदिया ॥

मू. (१०९१) तूणई पव्वमज्झेसु, थूला पोरेसु गंठिला।
अथिरा असारजरढा, साणपाया य निंदिया ॥

मू. (१०९२) घवणट्ठमाणपव्वा निद्धा वन्नेण एवगवन्ना य।
घनमसिणवट्टपोरा लट्ठि पसत्था जइजनस्स ॥

वृ. चत्वार्यङ्गुलान्यधः प्रतिष्ठानं यस्या यष्टेः सा तथोच्यते, अष्टौ अङ्गुलानि सर्वोपरि उच्छ्रिता या सा अष्टाङ्गुलोच्छ्रिता। शेषं सुगमम्। विषमेषु पर्वसु सत्सु यष्टिर्न ग्राह्या. एतदुक्तं भवति-एकं पर्व लघु पुनर्बृहत्प्रमाणं पुनर्लघु पुनर्बृहत्प्रमाणमित्येवं या विषमपर्वा सा न शस्ता, तथाऽनिष्पन्नानि चाक्षीणि-बीजप्रदेशस्थानानि यस्या- सा निंदिता, तथा स्फुटिता 'परुषवर्णा' रूक्षवर्णेत्यर्थः, तथा 'निःसारा' प्रधानगर्भरहितेत्यर्थः, सर्वविधा निन्दितेति। तथेयं निन्दिता-तन्वी पर्वमध्ये च 'स्थूला' ग्रन्थियुक्ता, तथा 'अस्थिरा' अदृढा, तथा 'असारजरढा' अकालवृद्धेत्यर्थः, तथा 'श्वपादा' च अधःश्वपादरूपा वर्तुला या यष्टिः सा निन्दितेति। घनानि वर्द्धमानानि च पर्वाणि यस्याः सा तथोच्यते, तथा स्निग्धा वर्णेन एकवर्णा च, तथा घनानि-निबिडानि मसृणानि वर्तुलानि च पोराणि यस्याः सा तथोच्यते। सर्वविधा यष्टिर्यतिजनस्य प्रशस्तेति। आह-किं पुनरनया करणम् ?, उच्यते,-

मू. (१०९३) दुट्ठपसुसाणसावयचिक्खलविसमेसु उदगमज्झेसु।
लट्ठी सरीररक्खा तवसंजमसाहिया भणिया ॥

वृ. दुष्टाश्च ते पशवश्च श्वानश्च श्वापदाश्च तेषां संरक्षणार्थं यष्टिर्गृह्यते, तथा 'चिक्खलः' सकर्दमः प्रदेशः तथा विषमेषु रक्षणार्थं तथोदकमध्येषु च रक्षणार्थं यष्टिग्रहणं क्रियते, तथा तपसः संयमस्य च साधिका यष्टिर्भणितेति। कथं तपः संयमसाधिका ? इत्यत आह-

मू. (१०९४) मोक्खट्ठा नाणाई तणू तयट्ठा तयट्ठिया लट्ठी।
दिट्ठो जह्रोवयारो कारणतक्कारणेसु तहा ॥

वृ. मोक्षार्थं ज्ञानादीनि इष्यन्ते, ज्ञानादीनां चार्थाय तनुः-शरीरमिष्यते, तदर्था च यष्टिः शरीरार्थेत्यर्थः शरीरं यत- यष्टयाद्युपकरणेन प्रतिपाल्यते, अत्र च कारणतत्कारणेषूपचारो दृष्टो यथा धृतं वर्धति अन्तरिक्ष-

मिति, एवं मोक्षस्य ज्ञानादीनि कारणानि ज्ञानादीनां च तनुः कारणं शरीरस्य च यष्टिरिति। किञ्चन केवलं ज्ञानादीनां यष्टिरुपकरणं वर्त्तते, अन्यदपि यज्ज्ञानादीनामुपकरोति तदेवोपकरणमुच्यते, एतदेवाह-

मू. (१०९५) जं जुज्जइ उवकरणे उवगरणं तं सि होइ उवगरणं।
अतिरेगं अहिगरणं अजतो अजयं परिहरंतो।

वृ. यदुपकरणं पात्रकादि उपारे ज्ञानादीनामुपयुज्यते तदेवोपकरणं 'से' तस्य साधोर्भवति, यत्पुनरतिरेकं-ज्ञानादीना मुपकारे न भवति तत्सर्वमधिकरणं भवति, किंविशिष्टस्य यतः ?-'अयतः' अयत्नवान् 'अयतं' अयतनया 'परिहरन्' प्रतिसेवमानस्तदुपकरणं भवतीति, 'परिहरंतो'त्ति इयं सामयिकी परिभाषा प्रतिसेवनार्थं वर्त्तत इति। किञ्च-

मू. (१०९६) उग्गमउप्पायणासुद्धं, एसणादोसवज्जियं।
जवहिं धारए भिक्खू, पगासपडिलेहणं॥
मू. (१०९७) उग्गमउप्पायणासुद्धं, एसणादोसवज्जियं।
उवहिं धारए भिक्खू, जोगाणं साहणट्ठया॥
मू. (१०९८) उग्गमउप्पायणासुद्धं, एसणादोसविज्जियं।
उवहिं धारए भिक्खू, अप्पदुट्ठो अमुच्छिओ॥
मू. (१०९९) अज्झत्थविसोहीए उवगरणं बाहिरं परिहरंतो।
अप्परिग्गहोत्ति भणितो जिणेहिं तेलुक्कदंसीहिं॥
मू. (११००) उग्गमउप्पायणासुद्धं, एसणासदोसवज्जियं।
उवहिं धारए भिक्खू, सदा अज्झत्थसोहिए॥

वृ. एवंगुणविशिष्टामुपधिं धारयेद्भिक्षुः, किंविशिष्टमित्यत आह-'पगासपडिलेहणं' प्रकाशे-प्रकटप्रदेशे प्रत्युपेक्षणं क्रियते यस्या उपधेस्तामेवंगुणविशिष्टामुपधिं धारयेत्, एतदुक्तं भवति-यस्याः प्रकटमेव कल्पाद्युपधेः प्रत्युपेक्षणा क्रियते न तु महार्घमौल्याद्यौरभ्रादभ्यन्तरे या क्रियते सा तादृशी उपधिर्धारणीयेति। सुगमा, नवरं योगाः-संयमात्मका गृह्यन्ते तेषां साधनार्थमिति। सुगमा, नवरं अप्रद्विष्टः अमूर्च्छितः साधुरिति। सुगमा, नवरम्-अध्यात्मविशुद्धया हेतभूतया धारयेत्। किंच-पकरणं बाह्यं-पात्रकादि 'परिहरंतो' प्रतिसेवयत्नपरिग्रहो भणितो जिनैस्त्रैलोक्यदर्शिभिः अतो यत्किञ्चिद्रूपमोपकरणं तत्परिग्रहो न भवति। अत्राह कश्चिद् बोटिकपक्षपाती-यद्युपकरणसहिता अपि निर्ग्रन्था उच्यन्ते एवं तर्हिगृहस्था अपि निर्ग्रन्थाः, यतस्तेऽप्युपकरणसहिता वर्त्तन्ते, अत्रोच्यते-

मू. (११०१) अज्झप्पविसोहीए जीवनिकाएहिं संथडे लोए।
देसियमहिंसगत्तं जिनेहिं तेलोक्कदंसीहिं॥

वृ. नन्विदमुक्तमेव यदुताध्यात्मविशुद्ध्या सत्युपकरणे निर्ग्रन्थाः साधवः, किञ्च-यद्यध्यात्मविशुद्धिर्नेष्यते ततः 'जीवनिकाएहिं संथडे लोए'त्ति 'जीवनिकायैः' जीवसङ्घातैरयं लोकः संस्तृतो वर्त्तते, ततश्च जीवनिकायसंस्तृत-व्याप्ते लोके कथं नग्नकश्चङ्क्रमन् वधको न भवति यद्यध्यात्मविशुद्धिर्नेष्यते, तस्मादध्यात्मविशुद्ध्या देशितमाहिंसकत्वं जिनैस्त्रैलोक्यदर्शिभिरिति। क्व पुनर्दर्शितं तदित्यत आह-

मू. (११०२) उच्चालियंमि पाए ईरियासमियस्स संकमट्ठाए।
वावज्जेज्ज कुलिंगी मरिज्ज तं जोगमासज्ज॥

मू. (११०३) न य तस्स तन्निमित्तो बंधो सहुमोवि देसिओ समए।
अणवज्जो उ पओगेण सव्वभावेण सो जम्हा।

वृ. 'उच्चालिते' उत्पाटिते पादे सति ईर्यासमितस्य साधोः सङ्क्रमार्थमुत्पाटिते पादे इत्यत्र संबन्धः, व्यापद्येत संघट्टनपरितापनैः, कः ?-'कुलिङ्गी' 'ते' व्यापदनयोगम् 'आसाद्य' प्राप्य। न च तस्य तन्निमित्तो बन्धः सूक्ष्मोऽपि देशितः 'समये' सिद्धान्ते, किं कारणं ?, यतोऽनवद्योऽसौ साधुस्तेन 'व्यापादनप्रयोगेण' व्यापादनव्यापारेण, कथं ?-'सर्वभावेन' सर्वात्मना, मनोवाक्कायकर्मभिरनवद्योऽसौ यस्मात्तस्मात्स सूक्ष्मोऽपि बन्धस्तस्येति। किं च-

मू. (११०४) नाणी कम्मस्स खयट्ठमुट्ठिओऽनुट्ठितो य हिंसाए।
जयइ असढं अहिंसतत्थमुट्ठिओ अवहओ सो उ॥

मू. (११०५) तस्स असंचेयअयो संचेयतो य जाइं सत्ताइं।
जोगं पप्प विनस्संति नत्थि हिंसाफलं तस्स।

मू. (११०६) जो य पमत्तो पुरिसो तस्स य जोगं पडुच्च जे सत्ता।
वावज्जंते नियमा तेसिं सो हिंसओ होइ॥

मू. (११०७) जेवि न वावज्जंती नियमा तेसिं पहिंसओ सो उ।
सावज्जो उ पओगेण सव्वभावेण सो जम्हा॥

वृ. ज्ञानमस्यास्तीति ज्ञानी-सम्यग्ज्ञानयुक्त इत्यर्थः- कर्मणः क्षयार्थं चोत्थित उद्यत इत्यर्थः, तथा हिंसायामनवस्थितः प्राणिव्यपरोपणे न व्यवस्थित इत्यर्थः, तथा जयति कर्मक्षपणे प्रयत्नं करोतीत्यर्थः, 'असढं'ति शठभावरहितो यत्नं करोति न पुनर्मिथ्याभावेन सम्यग्ज्ञानयुक्त इत्यर्थः, तथा 'अहिंसत्थमुट्ठिओ'त्ति अहिंसार्थं 'उत्थितः' किन्तु सहसा कथमपि यत्नं कुर्वतोऽपि प्राणिवधः संजातः स एवंविधः अवधक एव साधुरिति। तज्ज्ञानया गाथया भङ्गका अष्टौ सूचिता स्तद्यथा-नाणी कम्मस्स खयट्ठं उट्ठिओ हिंसाए अणुट्ठिओ १, नाणी कम्मखयट्ठमुट्ठिओ हिंसाए य ठिओ २, नाणी कम्मस्स खयट्ठं नवि ठिओ हिंसाए पुन पमत्तोऽवि नवि ठिओ, देवजोगेण कहवि तप्पएसे पाणिणो नासी, एस तइओ अणुद्धो य ३, नाणी कम्मस्स खयट्ठं नो ठिओ हिंसाए य ठिओ ४, तथा अज्ञानी मिथ्याज्ञानयुक्त इत्यर्थः कम्मस्स खयट्ठमुट्ठिओ हिंसाए न ठिओ ५, अन्नाणी कम्मखयट्ठमुट्ठिओ हिंसाए य ठिओ ६, अन्नाणी कम्मस्स खयट्ठं नोट्ठिओ हिंसाए य नोट्ठिओ एस सत्तमो, अन्नाणी कम्मस्स खयट्ठं णोट्ठिओ हिंसाए य ठिओ एस अट्ठमो, तत्र गाथाप्रथमार्द्धेन शुद्धः प्रथमो भङ्गः कथितः, पश्चार्द्धेन द्वितीयभङ्गः सूचितः, कथं ?, जयतीति कर्मक्षपणे उद्यतः, 'असढं'ति सम्यग्ज्ञानसंपन्नः 'अहिंसत्थमुट्ठिओ'त्ति अहिंसायां 'उत्थितः' अभ्युद्यतः, किन्तु सहसा प्रयत्नं कुर्वतः प्राणिवधः संजातः स चैवंविधोऽवधकः शुद्धभावत्वात्। 'तस्य' एवंप्रकारस्य ज्ञानिनः कर्मक्षयार्थमभ्युद्यतस्य 'असंचेतयतः' अजानानस्य. किं ?, सत्त्वानि, कथं ?-प्रयत्नवतोऽपि कथमपि न दृष्टः प्राणी व्यापादितश्च, तथा 'संचेतयतः' जानानस्य कथमत्रास्य प्राणी ज्ञातो दृष्टश्च न प्रयत्नं कुर्वतोऽपि रक्षितुं पारितः, ततश्च तस्यैवंविधस्य यानि सत्त्वानि 'योगं' कायादि प्राप्य विनश्यन्ति तत्र नास्ति तस्य साधोर्हिंसाफलं-साम्परायिकं संसारजननं दुःखजननमित्यर्थः, यदि परमार्थाप्रत्ययं कर्म भवति, तच्चैकस्मिन समये बद्धमन्यस्मिन् समये क्षपयति। यश्च प्रमत्तः पुरुषस्तस्यैवंविधस्य संबन्धिनं 'योगं' कायादिं 'प्रतीत्य' प्राय ये सत्त्वा व्यापाद्यन्ते 'तेषां' सत्त्वानां 'नियमाद्' अवश्यं 'सः' पुरुषो हिंसको भवति तस्मात्प्रमत्ताभाव

कर्मबन्धकारणानि। येऽपि मन्त्वा न व्यापादयन्ते तेषामप्ययौ नियमाद्धिंसकः, कथं ?, 'सावद्यो उपयोगेण' सहावद्येन वर्तत इति सावद्यः- सपाप इत्यर्थः, ततश्च सावद्यो यतः 'प्रयोगेण' कायादिना 'सर्वभावेन' सर्वैः कायवाङ्मनोभिः, अतः अव्यापादयन्नपि व्यापादक एवासौ पुरुषः संपापयोगत्वादिति। यतश्चैवमतः-

मू. (११०८) आया चेव अहिंसा आया हिंसत्ति निच्छओ एसो।
जो होइ अप्पमत्तो अहिंसओ हिंसओ इयरो॥

वृ. आत्मैवाहिंसा आत्मैव हिंसा इत्येष निश्चय इत्यर्थः। कथमसावहिंसकः कथं वा हिंसकः ? इत्यत आह-'जो होइ' इत्यादि, यो भवति 'अप्रमत्तः' प्रयत्नवानित्यर्थः स खल्वेवंविधोऽहिंसको भवति, 'हिंसओ इयरो'त्ति 'इतरः' प्रमत्तो यः हिंसको भवतीत्येषं परमार्थः। अथवाऽनेनाभिप्रायेणेयं गाथा व्याख्यायते, तत्र नैगमस्य जीवेष्वजीवेषु च हिंसा, तथा च वक्तारो लोके दृष्टाः, यदुत जीवोऽनेन हिंसितो-विनाशितः, तथा घटोऽनेन हिंसितो-विनाशितः, ततश्च सर्वत्र हिंसाशब्दानुगमात् जीवेष्वजीवेषु च हिंसा नैगमस्य, अहिंसाऽप्येवमेवेति, संग्रहव्यवहारयोः षट्सु जीवनिकायेषु हिंसा, सङ्गश्चात्र देशग्राही द्रष्टव्यः सामान्यरूप्य नैगमान्तर्भावी, व्यवहारश्च स्थूलविशेषग्राही लोकव्यवहरणशीलश्चायं, तथा चाह-लोको बाहुल्येन षट्स्वेव जीवनिकायेषु हिंसामिच्छतीति, ऋजुसूत्रश्च प्रत्येकं प्रत्येकं जीवे जीवे हिंसां व्यतिरिक्तामिच्छतीति, शब्दसमभिरूढैवंभूताश्च नया आत्मैवाहिंसा आत्मैव हिंसेति, एतदभिप्रायेणैवाह-'आया चेव' इत्यादि, आत्मैवाहिंसा आत्मैव हिंसा इत्यं निश्चयनयाभिप्रायः कुतः ?, यो भवत्प्रमत्तो जीवः स खल्वहिंसक-, इतरश्च प्रमत्त-, ततश्च स एव हिंसको भवति, तस्मादात्मैवाहिंसा आत्मैव हिंसा अयं निश्चय-परमार्थ इति।

इदानीं प्रकारान्तरेण तथाविधपरिणामविशेषाद् हिंसाविशेषं दर्शयन्नाह-

मू. (११०९) जो य पओगं जुंजइ हिंसत्थं जो य अत्तभावेणं।
अमनो उ जो पउंजइ इत्थ विसेसो महं वुत्तो॥

मू. (१११०) हिंसत्थं जुंजंतो सुमहं दोसो अनंतरं इयरो।
अमनो य अप्पदोसो जोगनिमित्तं च विन्नेओ॥

मू. (१११९) रत्तो वा दुट्ठो वा मूढो वा जं पउंजइ पओगं।
हिंसावि तथ्जायइ तम्हा सो हिंसओ होइ॥

वृ. यश्च जीवप्रयोगं मनोवाक्कायकर्मभिर्हिंसार्थं युनक्ति-प्रयुङ्क्ते यश्चान्यभावेन, एतदुक्तं भवति-लक्ष्यवेधनार्थं काण्डं क्षिप्तं यावताऽन्यस्य मृगादेर्लाभ, ततश्चान्यभावेन यः प्रयोगं प्रयुङ्क्ते तस्यानन्तरोक्तेन न पुरुषविशेषेण सह महान् विशेषः। तथा 'अमनस्कश्च' मनोरहितः- संमूर्च्छज इत्यर्थः, स च यं प्रयोगं-कायादिकं प्रयुङ्क्ते, अत्र विशेषो महानुक्तः, एतदुक्तं भवति- यो जीवो मनोवाक्कायैर्हिंसार्थं प्रयोगं प्रयुङ्क्ते तस्य महान् कर्मबन्धो भवति, यश्चान्यभावेन प्रयुङ्क्ते तस्याल्पतरः कर्मबन्धः यश्चामनस्कः प्रयोगं प्रयुङ्क्ते तस्याल्पतमः कर्मबन्धः, ततश्चात्र विशेषो महान् दृष्ट इति। एतदेव व्याख्यानयन्नाह-हिंसार्थं प्रयोगं प्रयुञ्जन्, सुमहान् भवति, इतरश्च योऽन्यभावेन प्रयुङ्क्ते तस्य मन्दतरो दोषो भवत्यल्पतर इत्यर्थः, तथा 'अमनस्कश्च' संमूर्च्छनजः प्रयोगं प्रयुञ्जन अल्पतरतमदोषो भवति। अतो 'योगनिमित्तं' योगकारणिकः कर्मबन्धो विज्ञेय इति। किञ्च-'रक्तः' आहारार्थं सिंहादिः, 'द्विष्टः' सर्पादिः, 'मूढ' वैदिकादिः, स एवंविधो रक्तो वा द्विष्टो वा मूढो वा यं 'प्रयोगं' कायादिकं प्रयुङ्क्ते तत्र हिंसाऽपि जायते, अपिशब्दादनृतादि चोपजायते, अथवा हिंसाऽप्येवं रक्तद्विष्टभावेनोपजायते न तु हिंसामात्रेणेति वक्ष्यति, तस्मात्स हिंसको

भवति यो रक्त विभावयुक्त इति, न च हिंसयैव हिंसको भवति, तथा चाह-न च हिंसामात्रेण सावद्येनापि हिंसको भवति, कुत-?, शुद्धस्य पुरुषस्य कर्मसंप्राप्तिरफला भवतीना जिनवरैरिति। किञ्च-

मू. (१११३) जा जयमाणस्स भवे विराहणा सुत्तविहिसमग्गस्स।
सा होइ निज्जरफला अज्झत्थविसोहिजुत्तस्स॥

मू. (१११४) परमरहस्समिसीणं समत्तगणिपिडगझरियसाराणं।
परिणामियं पमाणं निच्छयमवलंबमाणाणं॥

मू. (१११५) निच्छयमवलंबंता निच्छयओ निच्छयं अयाणंता।
नासंति चरणकरणं बाहिरकरणालसा केइ॥

वृ. या विराधना यतमानस्य भवेत्, किंविशिष्टस्य सतः ?-सूत्रविधिना समग्रस्य-युक्तस्य गीतार्थस्येत्यर्थः, तस्यैवंविधस्य या भवति विराधना सा निर्जराफला भवति, एतदुक्तं भवति-एकस्मिन् समये बद्धं कर्मान्यस्मिन् समये क्षपयतीति, किंविशिष्टस्य ?-'अध्यात्मविशोधियुक्तस्य' विशुद्धभावस्येत्यर्थः। किञ्च,-परमं-प्रधानमिदं रहस्यं-तत्त्वं, केषाम् ?-'ऋषीणां सुविहितानां, किंविशिष्टानां ?-समग्रं च तद् गणिपिटगं च समग्रगणिपिटकं तस्य क्षरित्रःपतितः सारः-प्राधान्यं यैस्ते समग्रगणिपिटकक्षरितिसारास्तेषामिदं रहस्यं, यदुत 'पारिणामिकं प्रमाणं' परिमाण् भवं पारिणामिकं, शुद्धोऽशुद्धश्च चित्तपरिणाम इत्यर्थः, किंविशिष्टानां सतां पारिणामिकं प्रमाणं ?-निश्चयनयमवलम्बमानानां, यतः शब्दादिनिश्चयनयानामिदमेव दर्शनं, यदुत-पारिणामिकमिच्छन्तीति। आह-यद्येवं निश्चयस्ततोऽयमेवावलम्ब्यतां किमन्येनेति ?, उच्यते- निश्चयमवलम्बमानाः पुरुषा 'निश्चयतः' परमार्थतो निश्चयमजानानाः सन्तो नाशयन्ति चरणकरणं, कथं ?-'बाह्यकरणालसाः' बाह्यं-वैयावृत्त्यादि करणं तत्र अलसाः-प्रयत्नरहिताः सन्तश्चरणकरणं नाशयन्ति, केचिदिदं चाङ्गीकुर्वन्ति यदुत परिशुद्धपरिणाम एव प्रधानो नतु बाह्यक्रिया, एतच्च नाङ्गीकर्तव्यं, यतः परिणाम एव बाह्यक्रियारहितः शुद्धो न भवतीति, ततश्च निश्चयव्यवहारमतमुभयरूपमेवाङ्गीकर्तव्यमिति।

मू. (१११६) एवमिणं उवगरणं धारेमाणो विहीसुपरिसुद्धं।
हवति गुणानायतनं अविहि असुद्धे अनाययणं॥

वृ.'एवम्' उक्तन्यायेन उपकरणं धारयन् विधिना 'परिशुद्धं' सर्वदोषवर्जितं, किं भवति ?-गुणानामायतनं-स्थानं भवति। अथ पूर्वोक्तविपरीतं क्रियते यदुताविधिना धारयति अविशुद्धं च तदुपकरणं, ततोऽविधिनाऽशुद्धं धियमाणं तदेवोपकरणम् 'अनायतनम्' अस्थानं भवतीति।

मू. (१११७) सावज्जमनायतणं असोहिठाणं कुसीलसंसग्गी।
एगट्ठा होंति पया एते विवरीय आययणा॥

वृ. सावद्यमनायतनमशोधिस्थानं कुसीलसंसर्गी, एतान्येकार्थिकानि पदानि भवन्ति, एतान्येव च विपरीतानि आयतनं भवन्ति, कथम् ?-असावद्यमायतनं शोधिस्थानं सुशीलसंसर्गीति। अत्र चानायतनं वर्जयित्वाऽऽयतनं गवेषणीयम् ?, एतदेवाह-

मू. (१११८) वज्जेत्तु अणायतनं आयतणगवेसणं सया कुज्जा।
नं तु पुण अनाययणं नायव्वं दव्वभावेणं॥

मू. (१११९) दव्वे रुक्खाइघरा अनायतणं भावओ दुविहमेव।
लोइयलोगुत्तरियं तहियं पुण लोइयं इणमो॥

मू. (११२०) खरिया तिरिक्खजोणी तालायर समण माहण सुन्नाणे।
वग्गुरिय वाह गुम्मिय हरिएस पुलिंद मच्छंधा॥

मू. (११२१) खणमवि न खमं गंतुं अनायतनसेवणा सुविहियाणं।
जंगंधं होइ वणं तंगंधं मारुओ वाइ॥

मू. (११२२) जे अन्ने एवमादी लोगंमि दुगुंछिया गरहिया य।
समणाण व समणीण व न कप्पई तारिसे वासो॥

मू. (११२३) अह लोउत्तरियं पुण अनायतनं भावतो मुणेयव्वं।
जे संजमजोगाणं करेंति हानिं समत्थावि॥

मू. (११२४) अंबस्स य निंबस्स य दुण्हंपि समागयाइं मूलाइं।
संसग्गीए विनट्ठो अंबो निंबत्तणं पत्तो॥

मू. (११२५) सुचिरंपि अच्छमाणो नलथंबो उच्छुवाडमज्झंमि।
कीस न जायइ महुरो जइ संसग्गी पमाणं ते?॥

मू. (११२६) सुचिरंपि अच्छमाणो वेरुलिओ कायमनियओम्मासे।
न उवेइ कायभावं पाहन्नगुणेण नियएण॥

मू. (११२७) भावुगअभावुगाणि य लोए दुविहाइं हुंति दव्वाइं।
वेरुलिओ तत्थ मणी अभावुगो अन्नदव्वेणं॥

मू. (११२८) ऊणगसयभागेणं बिंबाइं परिणमंति तब्भावं।
लवणागराइसु जहा वज्जेह कुसीलसंसग्गी॥

वृ.वर्जयित्वाऽनायतनमायतनस्य गवेषणं 'सदा' सर्वकालं कुर्यात्, तत्पुनरनायतनं द्रव्यतो भावतश्च ज्ञेयम्। तत्र द्रव्यानायतनं प्रतिपादयन्नाह-'द्रव्ये' द्रव्यविषयमनायतनं रुद्रादीनां गृहम्। इदानीं भावतोऽनायतनमुच्यते, तत्र भावतो द्विविधमेव-लौकिकं लोकोत्तरं च, तत्रापि लौकिकमनायतनमिदं वर्त्तते-'खरिए'त्ति द्रव्यक्षरिका यत्रास्ते यदनायतनं, तथा तिर्यग्योनयश्च यत्र तदप्यनायतनं, तालायरा-चारणास्ते यत्र तदनायतनं, श्रमणाः-शाक्यादयस्ते यत्र, तथा ब्राह्मणा यत्र तदनायतनं, श्मशानं चानायतनं, तथा वागुरिका-व्याधा गुल्मिका-गोलिपाला हरिएसा पुलिन्दा मत्स्यबन्धाश्च यत्र तदनायतनमिति. एतेषु चानायतनेषु क्षणमपि न गन्तव्यम्, तथा चाह-क्षणमपि न 'क्षमं' योग्यमनायतनं गन्तुं, तथा सेवना चानायतनस्य सुविहितानां कर्तुं 'न क्षमं' न युक्तं, यतोऽयं दोषो भवति-'गंधं होइ वणं तंगंधं मारुओ वाति'त्ति सुगमम्। येऽन्ये एवमाद्या लोके जुगुप्सिता गर्हिताद्रव्यक्षरिकाद्यनायतनविशेषास्तत्र श्रमणानां श्रमणीनां वा न कल्पते तादृशे वास इति। उक्तं लौकिकं भावनायतनम्, इदानीं लोकोत्तरं भावानायतनं प्रतिपादयन्नाह-अथ लोकोत्तरं पुनरनायतनं भावत इदं ज्ञातव्यं, ये प्रव्रजिताः संयमयोगानां कुर्वन्ति हानिं समर्था अपि सन्तस्तल्लोकोत्तरमनायतनम्। तैश्चैवंविधः संसर्गो न कर्तव्या, यत आह-'अंबे'त्यादि सुगमा। पर आह-'सुइर'मित्यादि सुगमा॥ तथा पर एवाह-'सुइर'मित्यादि सुगमा। आचार्य आह-द्रव्याणि द्विविधानि भवन्ति-भावुकानि अभावुकानि च, तत्रास्रवृक्षो भावुको वर्त्तते नलस्तम्बश्चाभावुकः, ततश्चाभावुकमङ्गीकृत्येतद् द्रष्टव्यमिति. यानि पुनर्भावुकानि द्रव्याणि तेषां न्यूनो यः शततमो भागः स यदि लवणादिना व्याप्यते ततस्तद्द्रव्यं चर्मादि लवणभावेन परिणमति। एतदेवाह-न्यूनश्चासौ शततमभागश्च

न्यूनशततमभागस्तेन न्यूनशततमभागेन लवणादिव्यापन्न 'बिम्बानि' चर्मकाष्ठादीनि नानि लवणेन-न्यूनशततमभागस्पृष्टेन 'तद्भावं' लवणभावं परिणमन्ति अवलाकरादिषु यथा, एतदुक्तं भवति-काष्ठादिबिम्बस्य शततमो यो विभागोऽसावपि न्यूनः स एवंविधो लवणाकरादिषु यदि स्पर्शं प्राप्नोति ततस्तत्काष्ठं सर्वं लवणरूपं भवति, तस्मात्स्तोकोऽपि कुशीलसंसर्गिबंहुमपि साधुसङ्घातं दूषयति यस्मात्तस्माद्वर्जयेत कुशीलसंसर्गमिति। तथा,

मू. (११२९) जीवो अणाइनिहणो तब्भावणभाविओ य संसारे।
खिप्पं सो भाविज्जइ मेलणदोसानुभावेणं॥

मू. (११३०) जह नाम महुरसलिलं सागरसलिलं कमेण संपत्तं।
पावइ लोणियभावं मेलणदोसानुभावेणं॥

मू. (११३१) एवं खु सीलमंतो अस्सीलमंतेहि मेलिओ संतो।
पावइ गुणपरिहाणिं मेलणदोसानुभावेणं॥

वृ.सुगमाः॥ यस्मादेवं तस्मात्,

मू. (११३२) नाणस्स दंसणस्स य चरणस्स य जत्थ होइ उवघाओ।
वज्जेज्जाऽवज्जभीरू अनायतणवज्जओ खिप्पं॥

वृ.ज्ञानस्य दर्शनस्य चारित्रस्य च 'यत्र' अनायतने भवत्युपघातस्तद्वर्जयेदवद्यभीरुः-साधुः किं विशिष्टः?-अनायतनं वर्जयतीति अनायतनवर्जकः, स एवंविधः क्षिप्रमनायतनमुपघात इति मत्वा वर्जयेदिति।

मू. (११३३) जत्थ साहम्मिया बहवे, भिन्नचित्ता अनारिया।
मूलगुणपडिसेवी, अनायतणं तं वियाणाहि॥

मू. (११३४) जत्थ साहम्मिया बहवे, भिन्नचित्ता अनारिया।
उत्तरगुणपडिसेवी, अनायतनं तं वियाणाहि॥

मू. (११३५) जत्थ साहम्मिया बहवे, भिन्नचित्ता अनारिया।
लिंगवेसपडिच्छन्ना, अनायतणं तं वियाणाहि॥

वृ.सुगमा, नवरं-मूलगुणाः प्राणातिपातादयस्तान् प्रतिसेवन्त इति मूलगुणप्रतिसेविनस्ते यत्र निवसन्ति तदनायतनमिति। सुगमा, नवरम-उत्तरगुणाः "पिण्डस्स जा विसोही" इत्यादि, तत्प्रतिसेविनो ये। सुगमा, नवरं लिङ्गवेषमात्रेण प्रतिच्छन्ना बाह्यतोऽभ्यन्तरतः पुनर्मूलगुणप्रतिसेविन उत्तरगुणप्रतिसेविनश्च ते यत्र तदनायतनमिति। उक्तं लोकोत्तर-भावानायतनं, तत्प्रतिपादनाच्योक्तमनायतनस्वरूपम्-

मू. (११३६) आययणंपि य दुविहं दव्वे भावे य होइ नायव्वं।
दव्वंमि जिनघराइं भावंमि य होइ तिविहं तु॥

मू. (११३७) जत्थ साहम्मिया बहवे, सीलमंता बहुस्सुया।
चरित्ताचारसंपन्ना, आययणं तं वियाणाहि॥

वृ. आयतनमपि द्विविधं-द्रव्यविषये भावविषये च भवति, तत्र द्रव्ये जिनगृहादि, भावे भवति त्रिविधं ज्ञानदर्शनचारित्ररूपमायतनमिति। 'जत्थे'त्यादि सुगमा।

मू. (११३८) सुंदरजनसंसग्गी सीलदरिद्दंपि कुणइ सीलड्ढं।
जह मेरुगिरीजायं तणंपि कणगत्तणमुवेइ॥

वृ. सुगमा। उक्तमायतनद्वारम्, इदानीं प्रतिसेवनाद्वारव्याख्यायसरा सम्बन्धप्रतिपादनायाह-

मू. (११३९) एवं खलु आययणं निसेवमाणस्स इत्त साहुस्स।
कंटगपहे व छलणा रागद्दोसे समासज्ज ॥

वृ.'एवम्' उक्तेन न्यायेन आयतनं सेवमानस्यापि साधोर्भवेत् कण्टकपथ इव छलना, किमासाद्य ?, अत आह- रागद्वेषौ समाश्रित्य। सा च रागद्वेषाभ्यां प्रतिसेवना द्विविधा भवति, एतदेवाह-

मू. (११४०) पडिसेवणा य दुविहा मूलगुणे चेव उत्तरगुणे य।
मूलगुणे छट्ठाणा उत्तरगुणि होइ तिगमाई ॥

वृ.प्रतिसेवनाऽपि द्विविधा-मूलगुणे उत्तरगुणे च, तत्र मूलगुणविषये प्रतिसेवना 'षट्स्थाना' प्राणातिपातादिलक्षणा वक्ष्यति च, उत्तरगुणविषया च प्रतिसेवना भवति त्रिकादिका, तच्चेदं त्रिकम्-उद्गम उत्पादना एषणा च, एतदेव त्रिकमादिर्यस्या उत्तरगुणप्रतिसेवनायाः सा तथाविधा, आदिग्रहणात्पञ्चमितयो भावना तथा द्विविधगित्येवमादीनि गृह्यन्ते। इदानीं मूलगुणान् व्याख्यानयन्नाह-

मू. (११४१) हिंसालियचोरिक्के मेहुन्नपरिग्गहे य निसिभत्ते।
क्य छट्ठाणा मूले उग्गमदोसा य इयरंमि ॥

वृ. हिंसाऽलीके चौर्यमैथुनं परिग्रहः तथा निशिभक्तं चेति, एवं षट्स्थाना मूलगुणप्रतिसेवना द्रष्टव्या, उद्गमदोषादिका चेतरा उत्तरगुणप्रतिसेवना द्रष्टव्या आदिग्रहणादुत्पादनैषणादयः परिगृह्यन्ते।

मू. (११४२) पडिसेवणा मइलणा भंगो य विराहणा य खलणा य।
उवघाओ य असोही सबलीकरणं च एगट्ठा ॥

वृ. प्रतिसेवणा मइलणा भङ्गो विराधना खलना उपघातः अशोधिः शबलीकरणं चेत्येकार्थिकाः शब्दा इति। उक्तं प्रतिसेवनाद्वारम्, इदानीमालोचनाद्वारसंबन्धप्रतिपादनायाह-

मू. (११४३) छट्ठाणा तिगठाणा एगतरे दोसु वावि छलिएणं।
कायव्वा उ विसोही सुद्धा दुक्खक्खयट्ठाए ॥

वृ.'षट्स्थाने' प्राणातिपातादिके च त्रिके, अनयोरेकतरे द्वयोर्वा 'छलितेन' स्खलितेन सता साधुना कर्तव्या विशुद्धिः, किंविशिष्टा ?-'शुद्धा' निष्कलङ्का दुःखक्षयार्थं कर्तव्येति। सा च विशुद्धिरालोचनापूर्विका भवतीत्यिकृत्वाऽऽलोचनां प्रतिपादयन्नाह-

मू. (११४४) आलोयणा उ दुविहा मूलगुणे चेव उत्तरगुणे य।
एक्केक्का चउकत्ता दुवग्ग मिलावसाना य ॥

वृ. आलोचना च द्विविधा-मूलगुणालोचना उत्तरगुणालोचना चेति, सा द्विविधाऽप्येकैका-मूलगुणालोचना, उत्तरगुणालोचना च चतुष्कणा भवति 'दुवग्ग'त्ति द्वयोरपि साधुसाध्वीवर्गयोरेकैकस्य चतुष्कणा भवति, एक आचार्यो द्वितीयश्चालोचकः साधुः एवं साधुवर्गे चतुष्कणा भवति, साध्वीवर्गेऽपि चतुष्कणा भवति, एका प्रवर्त्तिनी द्वितीया तस्या एव या आलोचयति साध्वी, एवं साधुवर्गे साध्वीवर्गे च चतुष्कणा भवति, अथवा एकैका मूलगुणे उत्तरगुणे च चतुष्कणा द्वयोश्च साधुसाध्वीवर्गयोर्मीलितयोरष्टकण भवति, कथम् ?, आचार्य आत्मद्वितीय, अथवा छक्का होज्जा यदा वुड्ढो आयरिओ हवइ तदा एगस्सवि साहुणोदुगं आलोएइ एवं छक्का हवंति, सव्वहा साहुणाए अप्पबितियाए आलोएव्वं न उण्णागिनीएत्ति। एवं तावदुत्सर्गतः आचार्याय आलोचयति, तदभावे सर्वदेशेषु निरूपयित्वा गीतार्थायालोचयितव्यं, एवं तावद्या-

वन्निच्छानामाप्यालोच्यते साधूनामभावं, ततश्चैवं निष्ठावसाना आलोचना दानव्येति।

मू. (११४५) आलोयणा वियडणा सोही सब्भावदायणा चेव।
निंदे गरिहे विउट्टण सल्लुद्धरणंति एगट्ठा॥

वृ. आलोचना विकटना शुद्धिः सद्भावदायणा निंदणा गरहणा विउट्टणं सल्लुद्धरणं चेत्येकार्थिकानीति। आलोचनाद्वारं समाप्तम्, इदानीं विशुद्धिद्वाराव्याचिख्यासयाऽऽह-

मू. (११४६) पत्तो सल्लुद्धरणं वुच्चइ भंमी धीरपुरिसपन्नत्तं।
जं नाऊण सुविहिया करेंति दुक्खक्खयं धीरा॥

मू. (११४७) दुविहा य होइ सोही दव्वसोही य भावसोही य।
दव्वंमि वत्थमाई भावे मूलुत्तरगुणेसु॥

मू. (११४८) छत्तीसगुणसमन्नागएण तेनवि भवस्स कायव्वा।
परसक्खिया विसोही सुट्ठुवि ववहारकुसलेणं॥

मू. (११४९) जह सुकुसलोऽवि विज्जो अन्नस्स कहेइ अप्पणो वाही।
सोऊण तस्स विज्जस्स सोवि पकिरम्मभारभइ॥

मू. (११५०) एवं जाणंतेनवि पायच्छित्तविहिमप्पणो सम्मं।
तहंवि य पागडतरयं आलोएतव्वयं होइ॥

मू. (११५१) गंतूण गुरुसगासं काऊण य अंजलिं विनयमूलं।
सव्वेण अत्तसोही कायव्वा एस उवएसो॥

मू. (११५२) नहु सुज्झइ ससल्लो जह भणियं सासने धुवरयाणं।
उद्धरियसव्वसल्लो सुज्झइ जीवो धुयकिलेसो॥

मू. (११५३) सहसा अन्नाणेण व भीएण व पिल्लिएण व परेण।
वग्गेणनायकेण व मूढेण व रागदोसेहिं॥

मू. (११५४) जं किंचि कयमकज्जं न हु तं लब्भा पुणो समायरिउं।
तस्स पडिक्कमियव्वं न हु तं हियएण वोढव्वं॥

मू. (११५५) जह बालो जंपंतो कज्जमकज्जं व उज्जुयं भणइ।
तं तह आलोएज्जा मायामयविप्पमुक्को उ॥

मू. (११५६) तस्स य पायच्छित्तं जं मग्गविऊ गुरू भवइसंति।
तं तह आयरियव्वं अनवज्जपयंगभीरुणं॥

मू. (११५७) नवि तं सत्थं व विसं व दुप्पउत्तो व कुणइ वेयालो।
जंतं व दुप्पउत्तं सप्पो व पमाइणो कुद्धो॥

मू. (११५८) जं कुणइ भावसल्लं अनुद्धियं उत्तमट्ठकालंमि।
दुल्लभबोहीयत्तं अनंतसंसारियत्तं च॥

वृ. अत ऊर्ध्वं शल्योद्धरणं वक्ष्ये धीरपुरुषप्रज्ञप्तं, 'यत्' शल्योद्धरणं ज्ञात्वा सुविहिताः कुर्वन्ति दुःखक्षयं धीराः इति। द्विविधा भवति शुद्धिः-द्रव्यशुद्धिश्च भावशुद्धिश्च, तत्र 'द्रव्ये' द्रव्यविषया शुद्धिर्वस्त्रादीनामवगन्तव्या, भावे तु मूलोत्तरगुणेषु शुद्धिर्ज्ञातव्या, एतदुक्तं भवति-मूलगुणोत्तरगुणालोचनया भावशुद्धि-

भवतीति [illegible] तावन्मूलगुणोत्तरगुणेषु छलस्तिनालोचना दातव्या। इदानीं यस्मै आलोचना दीयते तेनाप्यालोचयितव्य[illegible]ति, एतदेव प्रदर्शयन्नाह-जातिकुलबलरूपान्विष्टत्रिशल्लक्षणसमन्वितेनाप्यवश्यं परमार्थिकी शुद्धिः कर्त्तव्या सुष्ठ[illegible]पनक्रियाव्यवहारकुशलेन-सुविहितेनेति। अत्रोदाहरणं दीयते- यथा कुशलोऽपि वैद्योऽन्यस्मै वैद्याय कथय[illegible]न्मव्याधिं, श्रुत्वा च तस्य वैद्यस्य सोऽपि वैद्यो यस्मै कथितं स प्रतिकर्म आरभते। एवं जानताऽपि प्राय[illegible]धिमात्मनः सम्यक्करणेन तथाऽपि प्रकृटतरमालोचयितव्यमवश्यमिति। किञ्च-सुगमा। 'न हु' नैव शुद्ध[illegible]सशल्यः पुरुषः, कथं पुनः शुद्ध्यति ?, यथा भणितं धृतरजसां शासने तथा शुद्ध्यति, कथं पुनः शुध्यति[illegible]न आह-उद्धृतसर्वशल्यो जीवः शुद्ध्यति धुतक्लेश इति, तस्माद्यद्यपि कथमपि किञ्चिदकार्यं कृतं तथाऽप्या[illegible]यितव्यम। कथं पुनस्तत्कृतं भवतीत्यत आह-'सहस्सा' अप्रतर्कितमेव प्राणिपर्यादिकमकार्यं यदि कृतं [illegible]कामतश्चेत्यत्र द्वितीयगाथायां दर्श्यते, अज्ञानेन च कृतं न तत्र प्राणी ज्ञातो व्यापादितश्च, भीतेन- आत्मानं मा भूदयं मां मारयिष्यतीत्यतः प्राणव्यपरोपणं यदि कृतं, प्रेरितेन वा परेण यदि कृतं, व्यसनेन वा आपदा यदि कृतं आतुरेण वा-व्याधिपरीषहोपसर्गेण यदि कृतं मूढेन वा-रागद्वेषपरीतकृतं किञ्चिदकार्यं ततः यत्किञ्चित्कृतमकार्यं [illegible]ह' नैव समाचरितुं लब्धा-उपलभ्येत यथा तथा प्रतिक्रमितव्यं, एतदुक्तं भवति-किञ्चिदकार्यं कृत्वा पुन[illegible]क्रियते तथा तस्य प्रतिक्रमितव्यं, न पुनस्तदकार्यं हृदयेन वोढव्यं, सर्वमालोचयितव्यमित्यर्थः। कथं पुनरा[illegible]यितव्यमित्यत आह-तस्य च साधोर्यत्प्रायश्चितं मार्गविदो गुरव उपदिशन्ति तत्प्रायश्चितं 'तथा' तेनैव विधिना चरितव्यं, कथम् ?, अनवस्थाप्रसङ्गभीतेन सताऽऽलोचयितव्यम्, अनवस्था नाम यद्यकार्यसमाचरणात्प्रायश्चित्तं न दीयते क्रियते वा ततोऽन्योऽपि एवमेव समाचरति यदुत प्राणिव्यपरोपणादौ न किञ्चित्प्रायश्चित्तं भवति ततश्च समाचरणे न कश्चिद्दोष इति, एवमनवस्थाप्रसङ्गभीतेन साधुना प्रायश्चितं समाचरितव्यमिति। इतश्चालोचयितव्यम-न तत्करोति दुःखं शस्त्रं नापि विषं नापि 'दुष्प्रयुक्तः' दुःसाधितो वेतालः यन्त्रं वा दुष्प्रयुक्तं सर्पो वा क्रुद्धः प्रमादिनः पुरुषस्य दुःखं करोति यत्करोति भावशल्यमनुद्धृतम् 'उत्तमार्थकाले' अनशनकाले, किं करोतीत्यत आह-'दुर्लभबोधिकत्वं अनन्तसंसारित्वं चेति, एवम्महादुःखं करोति भावशल्यं अनुद्धृतं, शस्त्रादिदुःखानि पुनरेकभव एव भवन्ति, अतः संयतेन सर्वमालोचयितव्यम।

मू. (११५९) तो उद्धरंति गारवरहिता मूलं पुनब्भवलयाणं।
मिच्छादंसणसल्लं मायासल्लं नियाणं च॥

मू. (११६०) उद्धरियसव्वसल्लो आलोइयनिंदिओ गुरुसगासे।
होइ अतिरेगलहुओ ओहरियभरो व्व भारवहो॥

मू. (११६१) उद्धरियसव्वसल्लो भत्तपरिन्नाए धणियमाउत्तो।
मरणाराहणजुत्तो चंदगवेज्झं समाणेइ॥

मू. (११६२) आराधनाइ जुत्तो सम्मं काऊण सुविहिओ कालं।
उक्कोसं तिन्नि भवे गंतूण लभेज्ज निव्वाणं॥

वृ. तत एवमालोचयेत् गारवरहिता मुनयः 'उद्धरन्ति' उत्पाटयन्ति मूलं पुनर्भवलतानां येन मिथ्यादर्शनशल्यं मायाशल्यं निदानशल्यं चोद्धरन्तीति। सुगमा, नवरम-अतिरेकम-अत्यर्थं लघुर्भवति, 'ओहरितभारो' उत्तारितभारः 'भारवहः' गर्दभादिः स यथा लघुर्भवति एवमालोचिते सति कर्मलघुत्वं भवतीति। तथैवंविधः स उद्धृतसर्वशल्यः 'भक्तपरिज्ञाए' भक्तप्रत्याख्याने 'धनिकम' अत्यर्थम् 'आयुक्तः'

प्रयत्नपरो मरणाराधनयुक्तः, स एवंविधश्चरमभवेधं 'समानयति' करोतीत्यर्थः। अत्र च कथानके राधावेधे आवश्यकादवसेयमिति। किञ्च-आराधनया युक्तः प्रयत्नपरः सम्यक् कृत्वा सुविहितः कालं पुनश्च 'उत्कृष्टतः' अतिशयेन सम्यगाराधनां कृत्वा त्रीन् भवान् गत्वा 'निर्वाणं' मोक्षमवश्यं प्राप्नोतीति, एतदुक्तं भवति-यदि परमसमाधानेन सम्यक् कालं करोति ततस्तृतीये भवेऽवश्यं सिद्ध्यतीति। आह परः-उत्कृष्टतोऽष्टभवाभ्यन्तरे सामायिकं प्राप्य नियमात्सिद्ध्यतीति, जघन्यतः पुनरेकस्मिन्नेव भवे सामायिकं प्राप्य सिद्ध्यतीत्युक्तं ग्रन्थान्तरे, ततश्च यदुक्तं त्रीन् भवानतीत्य सिद्ध्यतीति तदेतन्नाप्युत्कृष्टे नापि जघन्ये ततश्च विरोध इति, उच्यते, अनालीढसिद्धान्तमदभावेन यत्किञ्चिदुच्यते, यत्तदुक्तं जघन्यत एकेनैव भवेन सिद्ध्य-तीति तद्वज्रर्षभनाराचसंहननमङ्गीकृत्योक्तं, एतच्च छेवट्टिकासंहननमङ्गीकृत्योच्यते, छेवट्टि-कासंहननो हि यद्यतिशयेनाराधनं करोति ततस्तृतीये भवे मोक्षं प्राप्नोति, उत्कृष्टशब्दश्चात्रातिशयार्थे द्रष्टव्यो न तु भवमङ्गीकृत्य, भवाङ्गीकरणे पुनरष्टभिरेवोत्कृष्टतो भवै छेवट्टिकासंहननो सिद्ध्यतीति।

मू. (११६३) एसा सामायारी कहिया भे धीरपुरिसपन्नत्ता।
संजमतवड्ढगाणं निग्गंथाणं महरिसीणं॥

मू. (११६४) एवं सामायारिं जुंजंता चरणकरणमाउत्ता।
साहू खवंति कम्मं अनेगभवसंचियमनंतं॥

मू. (११६५) एसा अनुग्गहत्था फुडवियडविसुद्धवंजणाइन्ना।
इक्कारसहिं सएहिं एगुणवन्नेहिं सम्मत्ता॥

निर्युक्तिगाथा-८११, भाष्यगाथा-३२२, प्रक्षेपगाथा-३२

मुनि दीपरत्नसागरेण संशोधिता संपादिता ओघनिर्युक्तिः मूल सूत्रस्य द्रोणाचार्य विरचिता टीका परिसमाप्ता।

४१ द्वितीय मूलसूत्रं-ओघनिर्युक्तिः समाप्ता